ए०॥ ॐ नमः श्रीकृष्णाय नमः॥ श्रीगणेशाय नमः॥ कल्याणानि ददातु वो गणपतिर्यस्मिन्नतुष्टे स
तिस्फोदीयस्यपि कर्मणि प्रभवितुं ब्रह्मापि जिह्मायते॥ जाते यच्चरणप्रणामसुलभे सेनाग्यनाग्ये
दयैरं कस्यां कमनं ऋणानि विशंते देवेंद्रलक्ष्मीरपि॥१॥ शश्वत्सुवर्णहिरण्मयगर्भरसना सिंहासनध्या
यिनी सेयं वागधिदेवता वितरतु श्रेयांसि नः यांसि शिवः॥ यत्पादामरकोमलांगुलिनखज्योत्स्नाभिरुद्वे
लितः शांद्रानन्दसुधांबुधिर्बुधमनस्युच्चैः खलं खेलति॥२॥ नमस्तस्मै विश्वोदयविलयरक्षाप्रकृत
ये शिवाय क्लेशौघच्छिदुरपदपद्मप्रणतये॥ अमंदस्वच्छंदप्रथितहृणुलीलातनुभृते त्रिवेदीवा
चामथपथ्यनिजतत्त्वस्थितिकृते॥३॥ रागः कृष्णनवस्तवश्रुतिरियं चेतश्चमत्कारिणी मुग्धे वेत्थ यथा
मयाश्रुतरते वेदग्ध्यमाविःकृतं॥ जानीते दयितैव साश्रुतरते यच्छिद्रितं नवानित्युक्तो मधुजिन्निरु
त्तरमुखः स्मिष्यन्नुप्रियां पातु वः॥४॥ तेदेवस्य गजतुष्टयो दिनपते राधुत्रवेदस्थिदो निःकृतं तुकृता तप
तानपथप्रस्थानदोस्थ्याः निवः॥५॥ येः सौवर्णमिवाखिलं करुणयानिमोत्तरस्थुयतेः कर्णस्वर्णपरागरागघ का० दी० १

षितं दिक्चक्रमालक्ष्यते॥५॥ श्रीमद्राजीवचक्षुर्विजयतु जगति स्फीतशीतांशुवंशात्प्रादुर्भूतः समस्तक्षितिप
तितिलकः सहताद्दाहशक्तिः॥ तस्मै नेनेत्रपालः समभवदवनीमंडलश्रीमहत्श्रीरस्माद्विस्मापकानां स
मजनि यशसां निर्जितकर्णेनभूपः॥६॥ अस्ति प्रक्रमान्नतन्मनमुकुटतटप्रांशुरत्नांशुदंडः श्रेणीवेणीविरा
जत्पदयुगलगलत्सर्वनिर्वैरवैरः॥ ताहृग्भिः सीमतीमाद्भुतचरितशतारंभदंभानदृशाशानिशित्रस्तचन्द्रा
स्तिस्तदनुतदनुजः श्रीमहीदेवभूपः॥७॥ आकैलाशाद्विशालालसगणतरुणीगीतगौरीशकीर्तिराचमें
खालपाण्योनिधिजललहरीखेदखेदाश्रुवेलात्॥ आशर्वस्मात्परस्मादपि धरणिभृतः कंपमानाय दीय
मानांराज्ञाचमथीशाः करमुकुलमिलन्मौलयः पालयंति॥८॥ संग्रामेषु श्रमणीता सुपगता वीराः पराको
टयः सेवाधीसु पपादनेन विधीनाधीक्षिरस्पृहणात्॥ अस्मादादेते नियन्त्ययसुखं तत्रैतदीयं यशोहि
क्याला निवसाज्ञितां गमयितुं दिग्मंडलीमंचति हेलासादितलक्ष्मीमार्गणगणांश्चैवैतदीयं गुणांये
षां श्रेणिरनुस्मरंत्यहरहस्तुष्टावदानाद्भुतं॥ तेषामेव महाहवेषु मिलतां प्रत्यर्थिनामर्थिनामप्यस्याप्य

श्व्याकरल२

भुजं व्रजंति विलयं सैन्यानि दैन्यानि च ॥१०॥ अस्याश्चैवन्निमदृमीरुदगहनगुहागर्भगर्भस्मृगेंद्रवासव्या
सप्रसंगोच्चलनकुलनकुलव्यालमाला। वारंवारं स्मृतेतद्भुजयुगलयुगस्फीतनीतिर्द्विरोघा मूर्च्छा
ति हंत द्विति धरधरणीलंबयंतो द्विषंतः॥११॥ अनेन चिंतामणिकामधेनुकल्पद्रुमानर्थिजनाय दत्त्वा
विलोक्यतां के किल मुष्य सर्वगीर्वाणनाथोपि करप्रदोभूत्॥१२॥ तस्यास्ति नाम हेमाद्रिश्च सर्वश्रीक
रणप्रभुः। निजोदारतया तश्च सर्वश्रीकरणप्रभुः॥१३॥ तस्मादक्रूरचरितात्सुपवित्रकीर्तिवंशोद्दिमोश्च वि
न्नाद्भुतिराविरासित्। लीलावतारमकरोदिह वासुदेवतस्माद्विजातिरुद्भूतकामदेवः॥१४॥ हेमाद्रि
रिस्वखिलभूतलगीतकीर्तिस्तस्याथ सूनुरजनिष्ट विशिष्टमूर्तिः। नाम्नास मोपि विजितश्चरितेन येन श्लाघ्यं
मुष्येतिनदि कांचनाद्रि॥१५॥ तस्याश्रीकरणेनास्य कापि लेखनचातुरी। यत्रावत्रास्ति निःपूर्णायेन द्विषित
पोमृताः॥१६॥ लिपिविधावालिखितां जनस्य भाले विभूत्या परिमृज्य दुष्टां। कल्याणि निर्मेखलिखस्यथि नो
विवेचमाणीकुरुते विधिश्च॥१७॥ संचिंत्यसंचिंत्य तदेतदीयं धत्ते मनो विस्मयमस्मदीयं॥ प्राग्जन्मवि
दी

का.हे.
२

द्यास्मरणक्रमो यं ज्ञाणेनयद्विस्मृतिमेति दत्ता॥१८॥ मन्ये तक्त्त दानधारिलहरी पूर्णोयमर्णोनिधिः कल्पां
ते पिनशोकदोषविषमाधत्ते कदाचिद्दशां॥ किं चैनं जलधिस्थितिप्रतिभुवं निश्चित्य दैत्यारिसानिश्चिंतेन
भुजंगपुंगवनवतल्पे सुखं सुप्यते॥१९॥ विचित्रत्र दानदृष्टिपयसस्तत्रस्य किं ब्रूमहे यस्मीन्नन्यवदा
न्यकीर्तिरतुला धत्ते रणश्रेणितां। यत्कूर्मोपति तंयसि ष्णुजनतापंकानिय चार्थिनां न्यस्तं तस्तलेषु माल
फलके पापालिपिंलुंपति॥२०॥ तत्रर्पितो देवगणः सनूनमरोकी वंद्यमसः सुधायाः। त्वयंतु वंद्यस्य तदी
यकीर्तिस्पार्धा समृद्धानिफलं सघानि॥२१॥ श्रूराणाम वधिर्निधिश्च यशसोमेकाश्रयः संपदां दाद्यणां प्रथ
मः कलाकुलगृहं वेदस्य नानां गुरुः॥ धौरेयश्च विपश्चितां सुकृतिनामद्वैतवादास्पदं नैवासीन्नचवर्त्तिन
नवेता हेमाद्रिसूरेः परः॥२२॥ विजतर्तिर्नूनं द्विज एव मेषस एव हेमाद्रिकुलप्रीतातः। उदारसंतानवतोयं
दस्य कल्पद्रुमं दक्षिणबाकुमाकुः॥२३॥ अथामुना धर्मकथादरिद्रं त्रैलोक्यमालोक्य कलेर्बलेन। तस्यो
पकारेदधतानुचिंता चिंतामणिः प्रादुरकारि चारु॥२४॥ तत्र चा खंडैश्चतुर्भिर्भ्रितदान्तीर्थ मोक्षाभिर्धेर्वर्ग च

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अक्षः मुक्तः॥विरच्यते तत्परिशिष्टवस्तुन्यावर्णनार्थपरिशेषखंडं॥२५॥तत्रादौ देवताकांडं ततकालविनिर्ण
यः॥विपाकः कर्मणां पश्चाद्व्रतानां समुच्चयः॥महाप्रकरणानीह चत्वार्येतान्यनुक्रमात्॥२६॥तत्रोक्त
व्रतदानादिकर्मजातोपयोगिनं॥कुरुते करुणाध्यक्षो हेमाद्रिः कालनिर्णयं॥२७॥सर्वसंदेहसंदोह——
नं च कालस्वरूपं हि कूर्मपुराणे दर्शितं॥अनादिरेष भगवान्कालोऽनंतोऽजरोऽमरः॥सर्वगत्वात्स्वतंत्रत्वात्सर्वा
त्मत्वान्महेश्वरः॥२८॥ब्रह्मणो बहवो रुद्रा ह्यन्ये नारायणादयः॥एको हि भगवानीशः कालः कविरिति स्मृतः॥
२९॥ब्रह्मनारायणेशानां त्रयाणां प्राकृतो लयः॥प्रोच्यते कालयोगेन पुनरेव च संभवः॥३०॥परं ब्रह्म च भूतानि
वासुदेवोऽपि शंकरः॥कालेनैव च सृज्यंते स एव ग्रसते पुनः॥३१॥तस्मात्कालात्मकं विश्वं स एव परमेश्वरः॥ ॥ का॰नि॰
विष्णुधर्मोत्तरे॥अनादिनिधनः कालो रुद्रः संकर्षणः स्मृतः॥३२॥कलनात्सर्वभूतानां स कालः परिकीर्तितः॥ ३
कर्षणात्सर्वभूतानां स तु संकर्षणः स्मृतः॥सर्वभूतशमत्वाच्च स तु रुद्रः प्रकीर्तितः॥३३॥अनादिनिधनत्वेन
स महान्परमेश्वरः॥निमेषादपि सूक्ष्मश्च सूक्ष्मात्सूक्ष्मतरोऽपि॥३४॥तस्य सूक्ष्मातिसूक्ष्मस्य कालस्य परमेष्ठि

मनुधो मन्यते जनः॥कालक्रमेण तद्भिन्नेषु

नः॥उ विद्वांसो महाभागा योगिनामपि सूक्ष्मता॥३५॥पद्मपत्रसहस्रं तु सूच्या वै भिद्यते यदा॥समकालं तु तद्भिन्नं
हात स्पष्टिज सूक्ष्मता॥३६॥एवंविधस्यानादिनिधनस्यापि सूक्ष्मस्य यद्यप्यपरिछिन्नता तथाप्यादित्यवर्ती
निःसूर्यादिग्रहक्रियाभिः परिछिन्नत्वोपपद्यते॥तासां क्रियाणां संजातस्य बीजांकुरसंतानवत्॥अनाद्यंतत्वात्
अनादिनिधनस्यापि कालस्य परिछेदः संभवति॥तथा च विष्णुधर्मोत्तरे॥तस्य सूक्ष्मातिसूक्ष्मस्य तथातिमह
तो द्विजाः॥मानसंख्या तु धेर्ज्ञेया ग्रहगत्यनुसारतः॥३७॥तथास्मदादिप्रत्यक्षनिमेषादिक्रियाद्वारेण परि
छेदः कालस्य तत्रैवाभिहितः॥लघ्वक्षरसमा मात्रा निमेषः परिकीर्तितः॥अतः सूक्ष्मतरः कालो नोपलभ्यो भृगु
त्तम॥नोपलभ्यं यथा द्रव्यं सूक्ष्मं वै परमाणुवत्॥द्वौ निमेषौ त्रुटिर्ज्ञेया प्राणो दशत्रुटिः स्मृतः॥विनाडिका तु
षट्प्राणास्तत्षष्ट्या नाडिका स्मृता॥अहोरात्रं तु तत्षष्ट्या नित्यमेव प्रकीर्तितं॥त्रिंशन्मुहूर्त्ताश्च तथा अहो
रात्रेण कीर्तिताः॥तत्र पंचदशाधोज्ञारामनिसंदिवाकराः॥उत्तरां तु यदा काष्ठां क्रमात्संक्रमते रविः॥तथा त
थान्वेहद्धिर्दिवसस्य महानुज॥दिवसस्य यथा रामहद्धिं समधिगच्छति॥तदाश्रित मुहूर्त्तानां तथा वृद्धि

कीर्तिता॥दिनवृद्धिर्यथा राम दोषाहानिस्तथा तथा॥तदाश्रितमुहूर्तानां हानिर्ज्ञेया तथा तथा।दक्षिणां च यदा का
ष्ठां क्रमाद्राक्रमते रविः।दिवसस्य तथा हानिस्तावत्तावद्भवेत्तु॥क्षीयं तेन तस्य हानौ तु तन्मुहूर्तास्तथैव॥रात्राश्रित थे
श्च वर्धते रात्रिवृद्धिस्तथा तथा।यदा मेषं सहस्रांशुस्तुलां चैव प्रपद्यते।समरात्रिदिवः कालो विषुवच्छब्दवाच्य
एवं च निमेषक्रियया कालद्वारेणावच्छिन्नाया सूर्यक्रियाया तद्रूपो हि क्रियेयस्याः क्रियायाः अवयवो तत्क्रिया
याऽवच्छिन्नः कालः॥त्रुटिरितिव्यवहारस्य विषयो भवति।एवमन्येपि प्राणविनालिकादयोपि व्यवहाराव्या
ख्येयाः॥एवं तु द्याद्यवयवद्वारेणाहोरात्रं निष्पद्यते।तच्च त्रिविधं दर्शितं ब्रह्मसिद्धान्ते।सावनं तु स्यादहोरात्रं उ
दयादुदयाद्रवेः।रावेस्त्रिंशात्तु राश्यंशः तिथिसंज्ञो गमैन्दवं॥विष्णुधर्मोत्तरे।उअहोरात्रं च चतुर्धा दर्शितं॥ का०दे०
तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्तितः।अहोरात्रेण चैकेन सावनो दिवसः स्मृतः।आदित्यनागयोगेन सौ ४
रो दिवस उच्यते।चंद्रनक्षत्रयोगेन नाक्षत्रो दिवसः स्मृतः।तिथिनागयोर्लक्षणं तत्रैव दर्शितं।चन्द्रार्कगत्या का
लस्य परिच्छेदो यदा भवेत्। तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य नागवः।नागणेन समग्रेण ज्ञेया द्वादशराशयः

यः।त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते।आदित्याद्विप्रकृष्टं तु भागद्वादशकं यदा।चंद्रमास्तु तदा राम तिथिरित्य
भिधीयते।स्कंदपुराणे प्रभासखंडेपि।अमा षोडशभागेन देवि प्रोक्ता महाकला।संस्थिता परमा माया देहिनां देह
धारिणी।अमादिपौर्णमास्यान्ता या एव शशिनः कलाः।तिथयस्ताः समाख्याताः षोडशैव वरानने।एवं मासोपि
पितामहेन त्रिविधो दर्शितः।दर्शाद्दर्शश्चान्द्रस्त्रिंशद्दिवसस्तु सावनो मासः।रविसंक्रान्तिचिह्नः सौरोपि नि
गद्यते नक्षैः।दर्शादितिशुक्लोपेदिकृयोगे च पंचमी॥दर्शात्परतः शुक्लप्रतिपदमारभ्यामावास्यान्त इत्यर्थः।तथा
च ब्रह्मसिद्धान्तेपि हिते।चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।एकराशौ रवियावत्कालं मासः स भा
स्करः।ज्योतिः।शास्त्रान्तरे तु मासश्चतुर्विधो दर्शितः।प्रथमः सावनो मासो द्वितीयश्चान्द्र उच्यते।नक्षत्रस्तु तृती
यस्यात्सौरो मासश्चतुर्विधः।विष्णुधर्मोत्तरेपि।मासस्य चातुर्विध्यमावेदितं।चंद्रमाः पौर्णमास्यान्तनक्षत्रादि
तिरिच्यते।राशिषट्कं तथा राम मासार्धेन नसंशयः।भागद्वादशके नैव तिथ्या तिथ्या क्रमेण तु।चंद्रमाः कृष्ण
पक्षान्ते सूर्येण सह युज्यते।संनिकर्षादथारभ्य संनिकर्षादथापरं।चन्द्रार्कयोस्तु यो मासश्चान्द्र इत्यभिधीयते।

न

सावनेतुतथामासित्रिंशत्सूर्योदयाःस्मृताः।आदित्यराशिसंयोगेनसौरोमासःप्रकीर्तितः।सर्वर्क्षपरिवर्तैस्तुनाक्ष
त्रोमासउच्यते।चांद्रस्तुदेशव्यवस्थयाद्विकांडमंडनेननिबंधेकृत्वाद्विधादर्शितः।तत्रापिशुक्लपक्षाद्यंतःकृष्णा
दिर्वेतिवद्विधा।कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन।येछंतिनतेषां--पीष्टोविध्यस्यदर्शणा।तथाचतै
त्तिरीयकेश्रूयते।अमावास्ययामासान्संपाद्याहरुत्सृजंत्यमावास्ययाहिमासान्संपश्यंतिपौर्णमास्याप
मासान्संपाद्याहरुत्सृजंतिपौर्णमास्याहिमासान्संपश्यंतीति।तथापूर्णमासादणस्यास्मिन्महावार्तिकेः
पूर्णमासोऽस्मिन्निति।शष्पवद्भिरुक्तत्वात्।अश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यंदिनेदिने।इतिलिंगदर्शनाच्च
स्मृतएवचांद्रमाससंग्रहार्थ।यस्मिन्मासेदिनेयस्मिन्विपत्तिरुपजायते।पर्वांतसतुविज्ञेयोमासोनैमित्तिकं
मतीति।ज्योतिर्गणापिपर्वांतइतिसामान्येनोक्तं।नैमित्तिकंचषष्टितिसांवत्सरिकमुच्यते।सांवत्सरिकेचचांद्रमा का०नि०
सएवविनियुक्तः।आब्दिकेपितृकार्येचचांद्रोमासःप्रशस्यते।इतिवचनात्।मानभेदेनमासदिनसंख्या।विम ५
स्तुधर्मोत्तरेदर्शिता।मानेमासस्तुनाक्षत्रेसप्तविंशतितिर्दिनैः।परिशेषेषुमानेषुमासःत्रिंशद्दिनःस्मृतः।मा

सशेषयथोदितानांचतुर्णामपिमासानामनेकार्थः।गवादिशब्दवच्चकोऽयमितिकेचित्।अपरेत्वाऽऽ
मासशब्दश्चांद्रमासविशेषवचनः।त्रयोदशमासाःसंवत्सरःअस्तित्रयोदशोमासःअधिमासेदेवाइज्यंते।मा
सिमासिपितृभ्यःक्रियतेत्यादिवैदिकप्रयोगस्यचांद्रविषयत्वात्।तेनशब्देयववराहादिशब्दवत्सर्वत्रमु
ख्यत्वे।पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुतावुभाविस्यमरसिंहेनाभिधानात्।इतरथाचांद्रमासइत्यभिदध्या
त्।एवमन्येष्वभिधानेषुचांद्रएवमासशब्दइतिनिरूपितंमासःपक्षद्वयमितिपुराणाद्यभिधानाच्च।नचचतु
र्षुमासेष्वनुगतंमासत्वसामान्यमनुभूयतेउपपद्यतेवा।मासांतरेषुप्रयोगस्तुप्रकारांतरेणाप्युपपद्यतइत्य
नेकार्थशक्तिकल्पनानीयाचांद्रएवमुख्योमासशब्दइति।अत्रकेचिदाहुः।चैत्रवैशाखादिशब्दाविशाखा
द्यनुराधादिनक्षत्राणामेकतरनक्षत्राविनापौर्णमासीयुक्तमासवचनाःपाणिनेरनुशासनादितियद्यो
क्तंनक्षत्रेणयुक्तःकालःसास्मिन्पौर्णमासीतिसंज्ञायामितिनक्षत्रेणविशाखाद्यन्यतरेणयुक्तापौर्णमासी
वैशाखादिव्यपदेशानाकृन्नक्षत्रयोगश्चनकार्स्न्येन।किंचैकदेशेनापिव्यपदेशहेतुस्तथाचशांकरीगीता।

ष्यादिपादार्द्धमात्रेणोनक्षत्रस्यान्वयेप्यसौ। तिथिरर्द्धेन संयुक्ता विपरीता नुसा पुनः। इति सा पौर्णमासी यस्मिन्मा
से स वैशाखादिपदाभिधेयः। संज्ञायामिति शब्दरूढतां पुरस्करोति। तथा च माधवः। अन्ते पांते त्रिनोज्ञेयो फा
ल्गुनश्च त्रिनोमतः। शेषा मासा द्विनाज्ञेयाः कृत्तिकादि व्यवस्थयेति। संकर्षणकांडेपि। देवे चित्रादिताराणां पूर्ण
पर्वेंदुसंगते। मासाश्चैत्रादयो ज्ञेयास्त्रिकैः षष्ठांत्यसप्तमाः। तेन विशाखायोगाद्वैशाखादित्वं इति नयोगत्र्य
रथरणीयः। तथा च विष्णुः। माघी चेन्मघायुक्ता स्याद्वैशाखी चेद्विशाखायुक्ता स्यादित्यादि। यत्तु हस्तिकारेण पु
ष्ययोगात्पौषित्युदाहृतं तच्छिष्याणां सुखावबोधनार्थं नायमस्य करणादिवत्सर्वथानुमावयवार्थः। किं
तत्तिष्यादिवद्यथा कथं चिद्रवासप्रवृत्तिनिमित्ते इति तस्याभिप्रायः। प्रवृत्तिप्रत्ययान्वाख्यानमपि गौराँइस्ये का०दे० ६
वगामृडोः गच्छतीति गौरिति वदवसेयं। ततश्च वैशाखशब्देन पौर्णमासीवान्नक्षत्रं वायोगो वा तद्युक्ता वा पौ
र्णमासी नक्षत्रं वा तद्युक्ता पौर्णमासीयुक्तो मासो वा न द्योगस्त्यादि कल्पना चतारः। आगमप्राबल्यादश्वकर्णा
दिशब्दवत्स्वानुपपत्तेः। तस्माद्वैशाखादिशब्दयौगिक नक्षत्रयुक्तपौर्णमासीलक्षण कालवचनाः। वैशा

त३

खादिशब्दाश्च तत्तन्नक्षत्रान्विता पौर्णमासी मध्यशुक्लपूर्वप्रतिपदादिदर्शांतश्चांद्रमासवचना इति स्थितं। कथं तर्हि
सौरमासे वैशाखादिपदप्रवृत्तिः। तत्रापि प्रसिद्धप्राबल्यमस्ति। न च केचिदाहुः। अनेकशक्तिकल्पनादोषप्र
णाति वा द्वे हि मासे वैशाखादिप्रसिद्धिः। शास्त्रनियुक्तानां शास्त्रस्थाने। सौरे तु मासे न शास्त्रस्थानां शास्त्रस्था
नप्रसिद्धिर्बलीयसी। लौकिकी गौणत्वेनाप्युपपद्यते। तथा चाहुः। शास्त्रस्थाननिमित्तत्वात्प्रतिपत्तिर्बलीय
सीति। लौकिकी प्रतिपत्तिस्तु गौणत्वेनापि नीयत इति। न रसस्य सिध्योर्विशेषात्। तथा हि सौरो मासो विवा
हादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये तु चांद्रो मासः प्रशस्यते। बृहस्पतिः। विवाहे सौरमासे च्छाधि
कामर्थसिद्धिं प्राह वराहमिहिरः। चैत्रे चापन्यते पराशरः कथयते। पौषचैत्रौ नाग्परं आषाढादिचतुष्टयं चन्
शुनेकैश्चित्स्यदिष्टं द्विजैः। इत्यादि बोधायनश्च। कर्कटे तु हरौ सुप्ते शक्रध्वजः क्रियाश्विने इति। तुलायां बोधये
द्देवं वृश्चिके तु जनार्दनं द्विराषाढः स विज्ञेयः शेते च श्रावणो च्युत इति। तेन बोधायनादयः। सौरमासे श्रावणा
दिपदानि प्रयुंजते। तेनोन्यमपि प्रसिद्धिः। शास्त्रस्थानविशेषेण सौरमासगतागौणापारस्यासमाधियते प्र

द्विधावल्पत्वेनानेकशक्तिकल्पनाप्रसक्त्यादिदोषश्च विरुध्यते। आगोपालांगनाजनपुरस्कृता च सौरमासे वैश
खादिपदप्रसिद्धिः। केषांचिद्देवं चांद्रेन स्मा सौरचांद्रमासः वचनाएव मुख्यया वृत्त्या वैशाखादिशब्दप्रसि
द्धिरिति सिद्धमिति तदयुक्तं। उनयोरपि प्रसिद्ध्योः शास्त्रस्थत्वाविशेषेपि चांद्रमासे वैशाखादिपदप्रसि
द्धिः सार्वत्रिकी प्रबला। सौरे तु न तथा। यत्तूक्तं आगोपालांगनाजनपुरस्कृता च। सौरमासे वैशाखादिपदप्र
सिद्धिः। केषांचिद्देवं चांद्र इति तदपि मिथ्यैव विपरीतस्यैव दर्शनात्। तथा च पाणिनिः नक्षत्रेण युक्तः काल
स्मिन् पौर्णमासीति संज्ञायामिति न च सौरसावनयोरेवंविधास्ति संज्ञा। तस्माच्चांद्रमास एव चैत्रवैशाखा
दिशब्दाः। अत एव तु सौरे चांद्रमानेनैव मासद्वयात्मकः। तत्र सौरमानेन विष्णुधर्मोत्तरे। सौरं मासद्वयं राम ऋ
तुरित्यभिधीयते। चांद्रमानेनापि त्रिकांडमंडनेन। श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चांद्रमसार्तुषु। तदलाभे तु सौ
रर्तुषु निर्णीतो निर्विवादं मतं। अतो चंद्रनिमित्तत्वं मंत्रवर्णात्प्रतीयते। अहन्यन्यो विदधज्जायते पुनरित्यतः। पुनः
पुनर्योजायेत स एव विदधावृतून्। चंद्रः पुनः पुनर्जन्मा तस्माच्चंद्रवशादृतुः। होत्रप्रकरणे चंद्रं प्रकृतिमाह

का·हे०
७

तित्तिरिः। स ऋतुकल्पयानीति चांशेन ऋतुकल्पकः ते च षट् हेमंतशिशिरयोः समासेन पंचवा षड्वा ऋतवः पंच
र्तवः। हेमंतशिशिरयोः समासेनेति च श्रुते ते च वसंतोपक्रमाः मुखं वा एतदृतूनां यद्वसंत इति श्रुतेः। ते च प्र
त्येकं चैत्रादिमासद्वयात्मकाः। मधुश्च माधवश्च वासंतिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वा
र्षिकावृतू। इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमंतिकावृतू। तपश्च तपस्यश्च शैशिरावृतू इत्याद्यर्थ
वश्रुतेः। मधुमाधवादिशब्दाः चैत्रवैशाखादिषु ग्रंथांतरेषूक्ताः। चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो म
तः। ज्येष्ठो मासः शुक्रः स्यादाषाढः शुचिरुच्यते। नभो मासः श्रावणः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्व
युजो मासः कार्तिकश्चोर्ज उच्यते। सहो मासो मार्गशिरः सहस्यः पौषनामकः। माघमासस्तपः प्रोक्तस्तप
स्यः फाल्गुनः स्मृतः। बौधायनेन पुनर्मीनमेषयोर्वा मेषवृषयोर्वा वसंत इत्यभिधानान्मीनादिद्वंद्वं चैक
ल्पिकं वसंतस्यांगीकृतं। यदा त्वधिकमासो न वर्तते तदा चांद्रमाने मासत्रयात्मकोपि कश्चिदृतुः संपद्यते। त
था च त्रिकांडमंडनेनोक्तं। चांद्रमाने यदा चैत्रमासादिमलनस्तदा। शुद्धेपि मलिने चैत्रे वैशाखेपि वसंतता।

[illegible]

सत्संगसंतराभावात्सैवात्राभ्युपगम्यते। न चात्रापि विकल्पः। किं तदत्राभ्युपगम्यत इति। मासास्त्रयो वसंतारम्भा
त्पञ्चाद्यमथवा तिमं। अत्रोच्यते विकल्पो हि सौरमासेषु युज्यते। न तु चांद्रेषु युक्तो सौ मलमासानुवर्तिषु॥
द्वादशैव हि ते मासाः सूर्यसंक्रांतिसम्मिताः॥ द्वौ द्वौ मासाविहैकैकमृतुं कुर्वाते गम्यते। अत एवात्र मानाद्या
मेषाद्या वा भवेद्वा हि। चांद्रा सुमलिने मासे ज्ञाते मासास्त्रयोदश। विकल्पं तत्र यत्किंचिन्मासमारभ्य युग्मत
ऋतुषु क्रियमाणेषु मासएकोतिरिच्यते। किमसावृतुर्मासः किं वर्तुः समसो न वेत्। एतत्तु वाक्यापिष
विज्ञाविति चिंत्यते। ऋतुश्चान्यो न कालोस्ति नापवर्तुः समसमः स्मृतौ। तच्चर्तुर्त्वेनायुज्यमान इत्यवश्यन्ता। ष
ष्ठा ऋतव इत्येषा श्रुतिः सप्तमवारिका। अतः श्रुतेः स्मृतिर्बाध्या द्वौ मासावृतुरित्यसौ। तस्मादधिकं मासः। ।का॰हे॰
स्यात्रैवर्तुषु कुत्रचित्। यत्रैषां तत्र नवैन्मासः स ऋतुः स्यात्रिमासकः। यद्वा षष्टिदिनैर्मासएकएवोनया ८
त्मकः। अतोत्रापि वसंतत्वस्याद्ययोरेव मासयोः॥ अयनं सौरं ऋतुत्रयेण तथा। सौरमानमधिकृत्य विष्णु
धर्मोत्तरे। ऋतुत्रयं चायनं स्यादिति। तथा संवत्सरोपि चांद्रैर्मासैः चांद्रः सावनैः सावनः सौरैः सौर इति त्रिवि

धः। तथा च ब्रह्मसिद्धांते। चांद्रसावनसौराणां मासानां त्रय भेदतः। चांद्रसावनसौरास्तु त्रयः संवत्सरा अपि। सवत्स
रश्च मासात्मकः। द्वादशमासाः संवत्सर इति श्रुतेः। चांद्रस्तु संवत्सरः कदाचित्त्रयोदशमासात्मकोपि भवति। अ
स्ति त्रयोदशो मास इत्याहुरिति श्रुतेः। चांद्रमाने एव त्रयोदशमासस्य संभवात्। तथा च विष्णुधर्मोत्तरे। सौर
संवत्सरस्यांते मानेन शशिजो यदा। एकादशातिरिच्यंते दाशुनिघ्नसप्तमासमाहृये साष्टमासे तस्मान्मासो
तिरिच्यते इति। चांद्रः संवत्सरश्चैव शुक्लप्रतिपदुपक्रमः। तथा च ब्रह्मपुराणे। संवत्सरारंभविधिप्रक्रमे। चैत्रे
मासे जगद्ब्रह्मा ससर्ज प्रथमेहनि। शुक्लपक्षे समग्रं तु तदा सूर्योदये सति। प्रवर्तयामास तदा कालस्य ग
णनामपि। ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपः। ब्रह्मसिद्धांते। चैत्रसितादेरुदयाद्भानोर्दिनमास
युगकल्पाः। सृष्ट्यादौ लंकायां समं प्रवृत्ता दिनेर्कस्य। सौरः संवत्सरः पुनर्मीनादिर्मेषादिर्वा वसंतस्य विकल्पे
न मीनादिस्तस्य मेषादिस्तस्य चोक्तत्वात् वसंतस्य चतुर्मुखत्वात् संवत्सरमुखस्यैव ऋतुमुखत्वोपपत्तेः। यत्तु
विष्णुधर्मोत्तरे। माघशुक्लसमारंभे चंद्रार्कौ वासवर्क्षगौ। जीवयुक्तौ यदा स्यातां षष्ट्यब्दादिस्तदा स्मृत इति। म

घशुक्लप्रतिपदुपक्रमत्वं संवत्सराणां॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पंचवर्षस्य कालज्ञानं प्र
चक्षते॥ ज्योतिः॥ शास्त्रप्रसिद्धशुभाशुभफलप्रतिपादनार्थं। न तु धर्मानुष्ठानार्थमिति मंतव्यं। चांद्रादिषष्टि
संवत्सराणां आदितः पंचानां पंचानां युगसंज्ञकानां यथासंख्यं संवत्सरपरिवत्सरइदावत्सरइद्वत्सराख्याः।
तथा च ब्रह्मवैवर्ते ब्रह्मखंडे। संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः। इदावत्सरस्तृतीयश्च चतुर्थश्चानुवत्सरः॥ उ
द्वत्सरः पंचमस्तु कालस्तु युगसंज्ञित इति। तथा च कालस्य यक्कैथोप्रकारेणावच्छेदसंभवाद्दनानिर्दिष्टस्यापि
यथायथं व्रतादिधर्मानुष्ठानांगत्वमुपपद्यत इति तन्निर्णयः क्रियते। तत्र संवत्सरादेः कालस्य संवत्सरभेदेता
दौ यथायथमुपयोगो द्रष्टव्यः। अयनं ऋतुसत्याह। देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणामुखे तु कु
र्वन्न तत्फलमवाप्नुयात्। सौरसावनचांद्रनाक्षत्राणां मासानां पुनः कुत्र कस्योपयोग इत्यपेक्षायामुक्तं। विष्णु
धर्मोत्तरे। एवं कालस्य सूक्ष्मस्य प्रोक्तं मानचतुष्टयं। येन येन च मानेन यच्च कार्यं निबोध तत्। अब्दायनर्तुग्रहचार
कर्म सौरेण मानेन सदा व्यवस्येत्। सत्रा एणुपास्यान्यथ सावनेन लौकं च यस्याद्व्यवहारकर्म। स्यात्सर्वकाल

।का॰दे॰
९

शयशरणस्यां चांद्रेण मानेन युगं च राहोः। नक्षत्रसत्राण्ययनानि चेंद्रोर्मानेन कुर्याद्गणितस्य केन। ऋषिशृंगः॥
विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते। पार्वणे त्वष्टकाश्राद्धे चांद्रमिष्टं तथाब्दिके। विवाहोत्सवयज्ञेषु सौरं मानं
प्रशस्यते। तथा च स्मृत्यंतरे। एकोद्दिष्टविवाहादौ ऋणादौ सौरसावनौ। सदैव पितृकृत्यादौ मासश्चांद्रमसः स्मृ
तः। ज्योतिर्गार्ग्ये। सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते॥
आब्दिके सांवत्सरीकमृताहश्राद्धे पितृकार्येषु मासिकश्राद्धेषु चत्राश्चात्मासंवत्सरसाध्ये। यज्ञव्यतिरिक्ते
सर्वस्मिन् देवकार्ये चांद्रो मासः प्रशस्यत इत्युक्तं। उक्तं च पितामहेन। देवकर्मणि पित्र्ये च मासश्चांद्रमसः स्मृतः।
ब्रह्मसिद्धांते। प्रतिसंवत्सरश्राद्धे मासश्चांद्रमसः स्मृतः। बृहस्पतिः। रवेरस्तुदये मानं चंद्रस्य पितृकर्मणि। यज्ञे
सावनमित्याहुरार्कं सर्वव्रतादिषु। ज्योतिर्गार्ग्यः। आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा। सावनेनैव क
र्तव्या शत्रूणां चाप्युपासना। यथा पांडवैः कौरवाणां। ब्रह्मसिद्धांते। अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्म
णस्य तु। संक्रांतिपौर्णमासिभ्यां तथैव नृपवैश्ययोः। अत्रादिशाशर्पः आकरेण दर्शितः। विवाहोपनयनचूडा

व्रतनियमप्रतिष्ठागृहकरणक्षौरयात्रामहाषष्ठीमहासप्तमीविजयादशमीदशहरायुगादिमहालयेष्टाप्रवृत्त्यादिश्
ष्टेत्रोपादीयते। यज्ञादाविति यागदानहोमगर्भाधानसीमंतोन्नयनजातकर्मऋणक्रयविक्रयव्यवहारग्रहणं
तथा सदैव पितृकृत्यादौ मासश्चांद्रमसः स्मृतः॥ इत्यत्र पितृकृत्यादौ इत्यादिशब्देनाद्यनिषेकसंवत्सरश्राद्धपा
र्वणाष्टकादेर्करायनरज्ञोत्सवादिग्रहणं। तथा च प्रथमाशितः प्रवृत्तिगोचराष्टकवर्गानुसरणक्रमेण तत्र
फाशिनोगसंबंधेन शुभाशुभोपभोगात्। मंगलेषु विवाहेषु कन्यासंवरणेषु च। दश मासाः प्रशस्यंते चैत्रपौष
विवर्जिताः॥ इति मासोपदेशे सौरमासाश्रयणं। सावनस्य तु मासस्य नियतत्रिंशद्दिवसत्वात् निषेकदिवसा
त्प्रवृत्ति षष्टाष्टममासेषु पुंसवनादेर्विधानात्। मासमग्निहोत्रं जुहोतीति चातुर्मास्येन यजेत इत्यादिश्च नियतदि का॰दे॰
वसमासपरिग्रहानुपपत्तेर्नियतसावनमासग्रहणं। तथा मासि मासि पिंडपितृयज्ञेन चरंतीति तिन तस्य स्या १०
परे पक्षे तिथिषोडशकचयादित्यादितिथिसंबंधेन विहितपितृकार्ये सितासितविधिनियमतारणसांवत्सरि
कं प्रतिनियमानुपपत्तेः सर्वत्र तिथिनागे चांद्रमासाश्रयणमिति। अत्र पदितपरितोषकृतोक्तं। आदिशब्देन

प्राशनादिषु सौरमास इत्येकांतिकं गर्भादिसंख्या वर्षाणां गर्भाष्टमे ब्राह्मणमुपनयीतेति। षष्ठेन्न॥

व्यवस्थानाय यथा परिगणिता विवाहादयो गृहीतव्या इति कृतो गतं। अव्यवस्थेत हणाबाधकप्रमाणानाना
त्। तथा हि सौरो देवशायनादिषु विहितश्चांद्रमासाश्रयबाधादृष्टपादितिथिवशेन शायनादिक्रियादर्शपते। य
शाह गार्ग्यः। द्विराषाढक्रियाता वद्यावद्विष्णोः प्रबोधनं। प्रबोधेनं प्रबुध्येत उत्सवो कार्या सूर्यगत्यैव सा क्रिया। अ
थ च विष्णुः॥ स्वपिति कर्कटे इति द्विराषाढे पिराशिनो गपुरस्कारो पि दृश्यते। न चोपनयनादौ प्राशनं मासि।
अष्टवर्षा भवेद्गौरी नववर्षा तु कन्यके त्यादि गौतमवचनैः। सावनमासपुरस्कारान्न च सावने मासि सितासि
तु पक्षपरिहरणमस्ति। सति च तिथिपरिग्रहे। चांद्रमासाश्रयणमपि शक्यते वक्तुं। यासौ वैशाखस्यामाव
स्या रोहिण्या संपद्यते। तस्यामादधीते चेति द्वेमास्याधानविधानात्। यज्ञादौ सावनविधिरनेकांतिकवि
वाहव्रतयज्ञेषु सौरं मानं प्रशस्यत इति च यज्ञेष्वपि सौरं मानं दर्शयति। अनेन विधिना श्राद्धं त्रिपेच मिह
निर्वपेत् कन्याकुंभवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा। कन्यायोगास्तविनरि पितृयज्ञानुशासनात्। तावत्पितृ
पुरी शून्या यावद्वृश्चिकदर्शनमिति। सौरमानेनापि पितृकार्ये परेशगात्। न च संवत्सरश्राद्धे इत्येकांतिकं। य

स्मिन्नाशिगते सूर्ये विपन्नियांतिमानवाः। तेषां तत्रैव कर्तव्या पिंडदानोदकः क्रिये तिव्याघ्रवचने हि सौर मा
नं दर्शयति। प्रचेताः पुनराह। चैत्र मासस्य यः पक्षस्तत्रियो ष तिवत्सरं। यावत्स्मरति पौत्रो पिएक मुद्दिश्यं पये
दिति। न च व्रतनियमादिकं सौरे क्रियत इत्येकांतिकं। चातुर्मास्यव्रतानां हि शियनवत्रोनारंतसमाप्त्युपदे
शात्। मासोपवासस्य चाश्विनशुक्लैकादश्यामुपक्रांतस्य। तथा विधैकादश्यंतस्योपवासात्। सावनचां
द्रयोरेकतरमपि नियतं। न च देवशयनशक्रोत्सवादि चांद्रमासविहितमप्येकांतिकं विष्णुः स्वपिति कर्क
टे। तुलायां बोध्यते देवी वृश्चिके तु जनार्दनः। कन्यायामंबिका देवि सिंहे चैव पुरंदरः। तस्मिन्सुप्तेथ दशा विष्णु
ः तुलायामिति वृश्चिकः॥ इत्यादि बौधायनवचनवशेन हि सौरं प्रतीयते। यद्यपि पर्वति। दशाहदशसुनोक
र्षश्च तु षपियुगादिषु उपाकर्म तथा षष्ठ्यां देशदिष्ट वर्षा दिने इति तदप्यनैकांतिकं। प्रौष्ठपद्यां हस्तेनोपा
करणं। श्रावण्यां प्रौष्ठपद्यां वा श्रुपाकृत्य यथाविधि त्यादि गोभिलादिवचनात्चांद्रमासावगतेः। यदपि पि
तामहवचने। कार्तिकस्य तु यत्स्नानं माघे मासि विशेषतः। तत्कृच्छ्रादि नियमानां चैव चांद्रमानेष्व माणत इति त

दनैकांतिकं। तुलामकरमेषेषु प्रातःस्नानं विधीयत इति भ्रमपुराणवचनात्। न च कृच्छ्रादि नियमे चांद्रमानेनै
कांतिकं। तथा च चांद्रायणं प्रक्रम्य मनुः। यथाकथंचित्पिंडानां तिस्रोशीतिः समाहिताः। मासेनाश्नन् इवि
ष्यस्य तु चंद्रस्यैतः सलोकतामिति वदन्सावनमासं पुरस्करोति। तिथिवृद्ध्या चरेत्पिंडानिति याज्ञवल्क्य
श्चांद्रं दर्शयति। तथा। पतितेन तु संपर्कं मासं मासार्धमेव वा। गोमूत्रयावकाहारो मासार्धेन विशुध्यतीति
ति सावनं मासं दर्शयति। अन्यथा तु कतिपय दिनाधिके मासः संसर्गनिमित्तप्रायश्चित्तकल्पना मूलमासा
नुसारेण सौरचांद्रयोः नियतदिवसतया कल्पनानुपपत्तेस्त्रिंशत् दिनसावनमासाश्रयो युज्यते। एवं वर्ष
मित्यपि प्रायश्चित्ते सावनमासग्रहणं। तस्मात्सौरो मासो विवाहादावेति विवाहादिशब्देन यथापरिग
णितानविवाहादयो गृह्यंत इति। अन्यथा वर्णनीयं। तथा हि। यत्र मेषरवादि राशिनो गव्यपदेशेन कर्मवि
धिः। तत्र सौरमासाश्रयेणानकर्मणपुनुष्ठेयानि। नाडूपदादिव्यपदेशेना पियदि तान्येवं। तथा। हादवंपाशु
क्लपक्षे चमासि नाडूपदे तथा। शक्रमुच्छ्रापयेद्राजेति। तथा सिंहे शक्रध्वज क्रियेति। तत्र सिंहमाडूपदयोः

द्वा० टी
का० हे०
११

सामान्यविशेषन्यायेनाविरोधादुभयसमावेशः सुकरः। यत्र सामोन्येन दशमासाः प्रशस्यंते चैत्रपौषविव
र्जिता इति श्रूयते। तत्र चैत्रादिशब्दानां सौरचांद्रसाधारणत्वात्संदेहे सौरा इति गम्यते। तद्वा शिवरहस्ये नस्तुनाश
नफलं श्रूयते। सौरो मासो विवाहादाविति वचनात्। सौर एव युज्यते। सौरे च चैत्रपदे गृह्यमाणे यदि तत्र चि
त्रायुक्तपौर्णमासीसंबंधो घटते तदा चैत्रव्यपदेशार्हत्वात्तन्निषेधविषयत्वे सौरस्यागमबलीयस्त्वेन नि
षेधस्य पूर्वमाससंबंधेनाप्युपपत्तेः। तदपि चैत्रत्वमसकल्पमेव। तथा गर्गादिसंख्या वर्षाणामितिः। यद्य
पि सावनपरिग्रहः। तथाप्युपनयनादिषु राशिगोचरशुभाशुभफलानुसारेण लग्नाद्युपपादनवशा
त्सौरपरिग्रहे। विरोधाद्युपपद्यत इति धीः। अग्निपीठे। सौरमासो विवाहादाविति। न पुनरन्यस्य मास
स्य विवाहादौ निराकरणं स्यमवगम्यते। तथा च वराहमिहिरः। बृहस्पतेर्गोचरगोचरास्ते विवाहमिच्छं
ति दाक्षिणात्याः। इति बृहस्पतेः। शुद्धिं वदंत्यादिमाने पुरस्करोति। संवत्सरं गुरुतिष्ठति पद्त्रयं भूमिज
इति च। सावनं चात्र न संभवत्येव। नियतक्रममासद्वादशकावच्छिन्नत्वात्सावनवर्षस्य बृहस्पतिराशि

भ्रमणोगस्य च नियतदिवसक्रममासद्वादशकावच्छिन्नत्वात् अंगारकशुद्धेरपि चापेक्षितत्वात् द्वादशिनोगेपि चांद्रमा
सग्रहणेनैव। तथा संसृष्टन्नगुतनयेकन्या क्रियते बृहस्पतौ पुरुषः। इत्यादिवचनं क्वचित्सावनं क्वचिच्चांद्रमानं पुर
स्करोति। एवं यज्ञादेरपि। सावमानादेर नियम इति दर्शितं। तस्माच्छास्त्रवचनेन वशेन सर्वेष्वेव कर्मसु सर्वेषामेव
चांद्रमासानां संभवः। किंतु। क्वचित्क्वचित्प्रशस्ता। तदुक्तं प्रशस्यत इति। यत्र तु एकस्मिन् विषये चांद्रं प्रशं
सात्रैवच। सौरस्य यथा कार्त्तिकस्नाने वचनोदितानुदितहोमनींदापदंशसान्यायेन व्यवस्थितशाखाविक
ल्पवदनुष्ठानं तस्मादादिशब्देन व्यवस्थितादिवाहादयो गृह्यंते। इति वचनमत्र गमनं। यथोक्तमेव साधीय इ
ति वयं तु ब्रूमः। यस्मिन् क्रियांतरे वचनांतरेण सौरादिमासा विनियुक्ताः तत्कार्यमादिशब्देनोपादीयते यत्र
तु मासि विशेषग्रहणे कारणं न विद्यते तत्र चांद्र एव ग्राह्यः। चैत्रवैशाखादिपदानां चांद्र एव मुख्यत्वादिति
इति संवत्सरायनमासविशेषाणां कार्यविशेषोपयोगनिरूपणं॥ ॥अथ मलमासनिर्णयः॥ ॥तत्र म
लमासस्वरूपं लघुहारीतेन दर्शितं। इंद्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः। अग्नीषोमौ स्मृतो मध्ये समा

सोपिष्टसोमकौ।तमतिक्रम्यउयदारविर्गच्छेत्कदाचन।आद्योमलिम्लुचोज्ञेयोद्वितीयःप्राकृतःस्मृतः।इति।इं
द्राग्नीयत्रलुप्येतेइतिश्रुतेःप्रतिपदुपलक्षणंअग्निषोमावितिद्वन्द्वस्यप्रतिपदि।पिष्टसोमकावितिद्वन्द्वस्याप
नेनचांद्रोमासउपलक्षितः।तंमासमतिक्रम्यान्यस्मिन्मासेयदासूर्योराश्यंतरंगच्छेत्।सद्वदांमलिम्लुचोउत्त
रःप्राकृतः।तथाचब्रह्मसिद्धांते।चांद्रोमासोपसंक्रांतोमलमासःप्रकीर्तितः।नंदीपुराणे।अमावास्याअहोरा
त्रेयदासंक्रामतेरविसंक्रामतितदासचांद्रोमासःपवित्रःस्यात्।यदापुनरमावास्यायासेअहोरात्रेव्यवतीति
स्तिप्रतिपतिसंक्रमतितदाचांद्रोमासोधिमासोस्यात्।ज्योतिःशास्त्रे।अमावास्याद्वयंयत्ररविसंक्रांतिवर्जि
तं।मलिम्लुचःसविज्ञेयउत्तरस्तूभाविधौ।रविणालंघितोमासःचांद्रःख्यातोमलिम्लुचः।वरुणःसूर्योभानुःस्त का॰दे॰
पनंश्चडोरविर्गभस्तिश्च।अर्यमाहिरण्यरेतोदिवाकरोमित्रविष्णुश्च।एतेद्वादशनामानःसूर्यामाघाद्येषुद्वयेति १३
मासेषु।निःसूर्योधिकमासोमलिम्लुचाख्यस्ततःपापः।मासेषुद्वादशादित्यास्तपंतेहियथाक्रमं।नपुंसकेधिके
मासिमंडलेतपतेरवेः।असंक्रांतोहियोमासःकदाचिन्निर्दिष्टदिनः।कालांतराक्रमायातिसनपुंसकउच्यते

सचकदानभवतीत्यपेक्षातेवसिष्ठसिद्धांतेउक्तं।द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा।।घटिकानांचतुष्केण
निपतत्यधिमासकः।अतीताधिकमासाद्रारभ्यद्वात्रिंशन्मासादुपरिषोडशदिनेषुघटिकाचतुष्टयाधिकेषुगते
ष्वधिमासोभवतीत्यर्थः।यत्तुविष्णुधर्मोत्तरेनिर्दिष्टं।सौरेणाष्टसुमानेनयदाभवति।भार्गवः।सावनेनतदामाने
दिनषट्कंनदृश्यते।ऊनरात्राश्चतेरामप्रोक्ताःसंवत्सरेणषट्।सौरसंवत्सरस्यातेमानेनत्वांद्रोजेनतु।एकादशा
तिरिच्यंतेदिनानिभृगुनंदन।वर्षद्वयेसाष्टमासेतस्मान्मासोतिरिच्यते।सचाधिमासकःप्रोक्तःकाम्यकर्मसुगर्हि
तः।तथाकाठकगृह्ये।मासत्रिंशत्तमेदिति।महाभारते।पंचमेपंचमेवर्षेद्वौमासावुपजायते।तेषांकालातिरेके
णग्रहाणामभिचारतइति।तदेतत्सर्वमर्वाक्तनमासोनसंभवत्येवपरेः।ननुरेकस्मिन्वत्सरेसंक्रांतिरहितमा ति॰
सद्वयंज्योतिःशास्त्रेनिर्दिष्टं।असंक्रांतमासोधिमासःस्फुटःस्याद्विसंक्रांतमासःक्षयाख्यःकदाचित्।क्षयः
कार्त्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येधिमासद्वयंचेति।तत्कथमुच्यतेद्वात्रिंशन्मासादर्वाक्मलमा
सोनसंभवतीतिउच्यते।यद्यप्येकस्मिन्वत्सरेसंक्रांतिरहितंमासद्वयंभवतिइति।तथापितयोरेकेएवमल

मासः।द्वात्रिंशन्मासादूर्ध्वं यः संपद्यते।अपरसंक्रान्तिरहितोपि न मलमासः।अकालाधिक्यात्।कालाधिक्यस्यैव मल
त्वात्।तथा च गृह्यपरिशिष्टे।मलं वदंति कालस्य मासं कालविदोधिकमिति।तथा च विष्णुधर्मोत्तरे।स चाधिमासक
:प्रोक्तः काम्यकर्मसु गर्हित इति।अधिकशब्देनावयवेनाधिक्यलक्षणया आधिक्यं प्रतीतेः।यथोक्तमिति कश
ब्देन मासवाचकमिति।कशब्देन मासवाचककासशब्दलक्षणया मासस्य।ततश्च मासेषु उक्तलक्षण एवासौ।तथा
च जाबालः।एकस्मिन्नपि वर्षे च द्वौ मासावधिमासकौ।पूर्वो मासः प्रशस्तः स्यादपरस्त्वधिमासकः।मासद्वये
ष्टमध्ये तु संक्रान्तिर्न यदा भवेत्।प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरे इत्यादि।पूर्वाधिक॰मासादारभ्य द्वात्रिंश
न्मासादूर्ध्वं यः पूर्वोऽसंक्रान्तिः स प्राकृतः शुद्ध इत्यर्थः।यस्ततः परः सोधिकमासो मलमास इत्यर्थः।तथा द्वात्रिंश
न्मासादूर्ध्वमसंक्रान्तो मासः सोधिकः।ततोर्वाक्ये यो संक्रान्तो मासः स प्राकृतो मासो नाधीमास इत्यर्थः।न चात्र मा
सयोर्वैपरीत्यं विवक्षितं वक्ष्यमाणवचनविरोधात्।यत्तु तदा वर्षमध्ये मासद्वयं चेत्सनिधानं तदसंक्रान्तत्वात्।अ
संक्रान्तमासोधिमासः।रविणालंघितो मास इत्यादिवचनात्।न तु कर्मानर्हत्वादिति।यदा त्वेकस्मिन्वत्सरे आश्विना

का०हे०
७

दिषट्कमध्ये संक्रान्तिशून्य एको मासः।चैत्रादिषट्कमध्ये च परः।तदा द्वात्रिंशन्मासादूर्ध्वमपि न वत्पूर्वो मासो ना
धिमासः परतस्तु न भवति।तथा च ब्रह्मसिद्धान्ते।चैत्रादर्वाक् नाधिमासः परतस्त्वधिको न चेत्।वृश्चिकादिसर्वशा
स्त्रेषु तस्मिन्मूर्तित्रयोदशी।तस्मिंस्तु तत्र स्मिन्नेव त्रयोदशी मूर्तिः न तु पूर्वस्मिन्नपि विरोधादिति भावः।चैत्रा
दर्वाग् इत्यत्राश्विनादारभ्येति द्रष्टव्यम्।उक्तं हि ज्योतिःसिद्धान्ते।घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनि।मकरे
वाप्यथ कुंभे वा नाधिमासो विधीयते इति।यदि तु सामान्यतोधिमासमात्रनिषेधपरं वचनद्वयं।तदा मासः
कन्यागते नानाव संक्रान्तो न वेद्यदि।दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयमिति।ज्योतिःपितामहस्मरणं
विरुध्येत।वाक्यबाधकस्यात्।तस्माद्यथोक्तविषयमेवेति।यदा त्वेकस्मिन्नाश्विनादिषट्के संक्रान्तिरहितं मा
सद्वयं न भवति।तदा प्राकृतस्तत्र पूर्वः स्यादधिमासः तथोत्तर इत्येतदेव द्रष्टव्यं।चैत्रादिषट्के त्वधिमासद्वयं
न संभवत्येव।तस्य क्षयमासो नयपार्श्ववर्तित्वात्।क्षयस्य च कार्तिकादित्रयनियतत्वस्योक्तत्वात् इति॥
तथा द्विसंक्रान्तोपि क्षयाख्यो मलमासः।तथा च काठकगृह्ये।यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा।म

त्नमासः स विज्ञेयो मासस्त्रिंशत्तमे न वेदिति। अत्र केचिन्मासस्संख्यापि लक्षणांतरगतेत्याहुः। तन्न। विज्ञेय इति ल-
क्षणवाक्ये समासे त्रिंशत्तम इति अभिधानात् पूर्वोदाहृतवचनाविरोधाच्च। अपि च। यत्किंचिदपेक्ष्य त्रिंश-
त्तमत्वमत्र लक्षणं विवक्षितं। मलमासापेक्षया वा। नाद्यः। अतिव्याप्तेः। न द्वितीयः। आत्माश्रयत्वात्। स्पष्टा-
दिमासे अव्यापकत्वाच्च। तस्य त्रिंशत्तमत्वाभावात्। मलमासे चैवं तदुत्तरतः। सर्वो मलमासः स्यादिति लक्ष-
णव्याघातान्न लक्षणं। यत्रैकस्मिन्वत्सरे संक्रांतमासद्वये संक्रांतिद्वययुतो मासश्च। तत्राप्यसंक्रांतिद्वि-
संक्रांतौ। तौ संसर्पांहस्पतिसंज्ञौ। अन्यश्चाधिमासः। तथा बार्हस्पत्यज्योतिर्ग्रंथे। यस्मिन्मासे न संक्रांतिः
संक्रांतिद्वयमेव वा। संसर्पांहस्पती मासावधिमासश्च निंदिताः। श्रुतेरपि। संसर्पोस्यंहस्पतये चेत्याह। का॰दे॰ १५
अस्ति त्रयोदशो मास इत्याहुस्तमेव तस्याणातीति। अत्र ज्योतिःशास्त्रे प्रसिद्धविवाहादिकर्मसु त्रयोपि निंदि-
ताः। क्षयाधिकमासौ तु श्रौतस्मार्तकाम्यकर्मस्वपि निंदितौ। क्षयस्यांहस्पतित्वेन कालमलरूपत्वात्। अंह-
सश्च मलत्वात्। अधिमासस्य कालाधिक्येनापवित्रत्वात्। तथा च स्मृत्यंतरे। अमावास्यामहोरात्रे यदा संक्रम-

ते रविः। स तु मासः पवित्रः स्यादतीतेऽप्यधिको न वेत्। अत्र केचिदाहुः। अधिमासस्य चैत्रादिसंज्ञा न भवति। तन्न।
चैत्रादिमाससंज्ञानां मेषादिसंक्रांतिनिबंधनत्वादधिमासस्य संक्रांतिरहितत्वात्। चैत्रोऽधिमासो वैशाखोऽ-
धिमास इत्यादिव्यवहारो न स्यात्। तथा हि। रूपजात्यानां च चैत्रादि चैत्रादिशब्दप्रवृत्तावनुगतः कश्चिदुपा-
धिः स्वीकार्यः। यौगिकत्वेपि चित्रान्वितपौर्णमासीयुक्तो चैत्रपदप्रयोगार्थमुपाध्याश्रयणं तुल्यं। न च
मेषादिसंक्रांतियोगातिरिक्त उपाधिर्दृश्यते। न च फाल्गुनोत्तरत्वमुपाधिः वैशाखपूर्वत्वस्यापि प्रसंगात्।
अत्र विशेषात्। द्वयोरुपाधित्वे वैयर्थ्यात्। विकल्पेनोपाधित्वे अनेकार्थत्वापातात्। फाल्गुनानंतरमधिमा-
सेऽपि तदुत्तरस्य चैत्रत्वं स्यात्। किंच। चैत्रवत् फाल्गुनस्य माघोत्तरत्वं तस्य पुष्योत्तरत्वमिति क्रमेण चैत्रोत्तर-
त्वं वैशाखस्येति चक्रकदोषः। अतो मेषादिसंक्रांतियोग एवोपाधिः। किंच वेदे मलिकादकशब्दा। यस्मिन्मा-
से न संक्रांतिः संक्रांतिद्वयमेव वा बुधश्चेति द्वादशासत्या अनुक्रम्य संसर्पोसीति संज्ञांतरत्वेयुक्तं। त्रयोदश
मासाः संवत्सर इति संख्या। पृथक्चेयुक्तानेन चैत्राद्याधिक्यात्रतसंज्ञ इति। उच्यते। यद्यप्यधिकमासस्य

दात्पृथग्भूतःस्यात्स्यादेवं।नत्वेवमस्ति।किंत्वसावब्दांतर्भूत एव।तदुक्तं।षष्ट्या तु दिवसैर्मासः कथितो बादरा
यणैरिति।एवं षष्टिदिनो मासस्तदर्धं च मलिम्लुचमिति वा न तु वाच्यं।अत्र मासशब्द एकशेषवृत्तिः द्विवचनाभा
वे पि मासद्वित्वावगतेः।एकवचनमेकसंक्रांतियोगोपाधित्वेनाधिमासो न चैत्रादिरिति।सकललोकसिद्धचै
त्रादिव्यवहारस्यानावश्यसंगात्।समर्पशब्दस्यैकदेशावचनस्यार्थांतरविषयत्वमस्मत्पक्षेपि विद्यत इति ए
वाश्रुतिश्च।त्रिंशद्दिनमासविवक्षयेति।अतो यदायदंतर्भूतो सौ तदा तत्संज्ञायाव्यपदिश्यत इत्यदोषः।न
न्वेवमप्यधिमासस्य शुद्धमासद्वयमध्यपातित्वात् किं मासो पूर्वस्योत्तरार्थं किं वोत्तरस्य पूर्वार्धमिति॥ का०दे०
निर्धारणकारणाभावात्संज्ञानिर्धारो दुर्घटः।उच्यते।अधिमासस्योत्तरमासपूर्वार्धत्वादुत्तरमाससंज्ञा १६
तदुक्तं।आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः।षष्टिदिनात्मकस्य मासस्याद्यः पूर्वो भागो मलिम्लुचो
शुद्धः कर्मानर्हो ज्ञेयः।द्वितीय उत्तरो भागः प्राकृतः शुद्ध इत्यर्थः।ज्योतिःपितामहोपि।षष्ट्या तु दिवसैर्मा
सः कथितो बादरायणैः।पूर्वार्धं तु परित्यज्य कर्तव्या उत्तरे क्रिया।ज्योतिःशास्त्रांतरे पि।षष्ट्या तु दिवसैर्मास

कथितो बादरायणैः।पूर्वमार्धं परित्यज्य उत्तरार्धं प्रशस्यते।एवं सर्वत्राधिमासस्योत्तरमासपूर्वार्धत्वे
प्राप्ते कश्चिदपवादमाह।मासद्वयेब्दमध्ये तु संक्रांतिर्न यदा भवेत्।प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलि
म्लुचः।एकस्मिन्वर्षे यदा द्वौमावसंक्रांतौ भवतस्तदा वैपरीत्यं।षष्टिदिनात्मकस्य मासस्य पूर्वो भागः प्रा
कृतः शुद्धः।उत्तरो भागो मलिम्लुच इत्यर्थः।एकाब्दमध्यवर्तिनो द्वावधिमासौ पूर्वमासोत्तरार्धत्वात्पूर्व
माससंज्ञाविधस्त्वभिप्रायः।युक्तं चैतत्।अधिमासस्य मासवृद्धित्वात्वृद्धेश्चानिष्टत्वनियमात्।अन्यथा
न्यथा तिथिवृद्धेरप्युत्तरतिथिसंज्ञत्वाभिहितं।अत एवोक्तं।एकत्र मासे द्वितयं यदि स्याद्वर्षे धिकं तत्र प
रो धिमासः।नन्वेवमेकस्मिन्संवत्सरे चतुर्दश मासाः स्युरित्यत आह।त्रयोदशं प्रतु श्रुतिराह मासं
चतुर्दशः क्वापि न चैव दृष्टः।एकस्मिन्वर्षेधिमासद्वयेपि मासास्त्रयोदशैव।यद्वर्षमध्येधिकमासयुग्मं त
त्कार्तिकादित्रितयेन्ययात्स्य इति वचनादित्यभिप्रायः।यत्तु मासद्वयेब्दमध्ये त्विस्यादिवचनानामेवं व्या
ख्यानं कृतं।यदैकस्मिन्वर्षे द्वौ मासावसंक्रांतौ भवतस्तत्र तयोरसंक्रांतयोर्मध्ये यः पूर्वोसंक्रांतः स प्रा

ऽतः शुभकर्मार्हः। उत्तरस्त्वसंक्रांतो मलिम्लुचः कर्मानर्हः सर्वकर्मसु। यस्मिन्मासे द्विसंक्रांतोऽधिकं मासद्व
यं तदा। तद्विमासत्रयं दुष्टं सर्वेषु शुभकर्मसु। संसर्पांहस्पती मासावधिमासश्च निंदिताः। यद्वर्षमध्येऽधिक
मासयुग्मं तत्कार्त्तिकादित्रितये ज्ञयात्। मासत्रयं त्याज्यमिदं प्रयत्नात् विवाहयज्ञोत्सवमंगलेषु इत्यादि
तस्मात्पूर्वैव व्याख्या ज्यायसी। यत्तु वचनं। चैत्राद्वार्वाक् नाधिमासः परस्त्वधिको न चेत्। दृष्टादि सर्वशास्त्रेषु
तस्मिन्सूर्ये त्रयोदशीति। यदपि। घटकन्यागते सूर्ये वृश्चिके वाथ धन्वनि। मकरे वाथ कुंभे वा नाधिमासो
विधीयते इति। तदुभयमप्याश्विनादीनां फाल्गुनांतानां पूर्वभागाद्यधिमासा न भवंतीत्येवंपरं। न तु सर्वथै
वाधिमासा न भवंतीत्येवंपरं। दशानां फाल्गुनादीनां प्रायो माघस्य तु क्वचित्। नपुंसकत्वेन संभवतीति वच
नविरोधादिति। तदयुक्तं। वाक्यानाकूतत्वात्। पूर्वोक्तशास्त्राणामुपात्तमासपरित्यागेनानुपात्तमासग्र
हणस्यायुक्तत्वात्। यत्तूक्तं। चैत्राद्वार्वाक् नाधिमासः इति घटकन्यागत इति वचनद्वयमाश्विनादीनां फा
ल्गुनांतानां पूर्वभागाद्यधिमासा न भवंतीत्येवंपरमिति। तन्न लक्षणाप्रहारादिप्रसंगात्। दशानां फाल्गु

नादीनामिति वचनविरोधस्यास्मत्पक्षेप्यनावाच्यस्वरूपतोऽधिमासनिषेधस्यानंगीकारात्। यत्त्वास्मत्पक्षे दू
षणमभिहितं। तदयुक्तं। असंक्रांतमासनिषेधस्य सामान्यशास्त्रस्य विशेषशास्त्रेण बाध्ययुक्तत्वात्। अ
स्य दोषस्य न वस्त्पक्षे समानत्वात् सामान्यशास्त्रप्राप्तोत्तरमासपूर्वार्द्धत्वापवादांगीकारात्। मासत्रय
दुष्टत्वप्रतिपादकवचनस्य ज्योतिःशास्त्रप्रसिद्धविवाहादिशुभकर्मत्वात्। तथा च तत्रैवोक्तः। विवाह
यज्ञोत्सवमंगलेषु इत्यादि। तस्मात्पूर्वैव व्याख्या ज्यायसी॥ ॥इति मलमासस्वरूपनिर्णयः॥ ॥अ
थ मलमासे कार्याकार्यनिर्णयः॥ ॥तत्र शातातपः वत्सरांतर्गतः पापो यज्ञानां फलनाशकृत्।
नैर्ऋतयातुधानाद्यैः समाक्रांतोऽधिमासकः। मलिम्लुचे समाक्रांता सूर्यसंक्रांतिवर्जितं। मलिम्लुचं वि
जानीयात् सर्वकर्मसु गर्हितं। सत्यव्रतः। मलिम्लुचस्तु यो मासः स मासः पापसंज्ञितः। विवर्जितः सर्वदे
वानां पितृकर्मसु तं त्यजेत्। पैठीनसिः। श्रौतस्मार्तक्रिया सर्वा द्वादशे मासि कीर्तिताः। त्रयोदशे तु सर्वा
स्ता निःफला इति संहिताः। तस्मात्त्रयोदशे मासि क्रिया नैव कदाचन। कुर्वन्नर्थमिवाशु क्रियादात्म

DR BHAU DA

विनाशनं। नृगुः। एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्। हव्यकव्यक्रियाहंता तदा ज्ञेयोधिमासकः॥ इ
तिन विष्णोः स्मरणात्। असंक्रांते तथा मासे दैवे पित्र्ये च कर्मणि। मलीमसमशेषं च वर्जयेन्मतिमान्नरः। सुमं
तुः। न कुर्यादधिके मासि काम्यं कर्म कंचन। मलं वदंति कालस्य मासं कालविदोधिकं इति। एतस्य परिशि
ष्टेपि मलिम्लुचस्तु मासो वै मलिनः पापसंभवः। गर्हितः पितृदेवेभ्यः सर्वकर्मसु तं त्यजेत्। ब्रह्मसिद्धांते। य
दाशाशी याति गमनस्थिमंडलं दिवाकरः संक्रमणं करोत्यनु तथाधिमासः कथितो विरंचिना विवाहया
त्रोत्सवयज्ञदोषहृत्। ज्योतिःशास्त्रांतरे। स चित्रमंडलमेति यदा राशीन् रनुसंक्रमणं कुरुते रविः। म
ख महोत्सवनाशकरस्तदा मुनिवरैः कथितोधिकमासकः। तथा। सिनीवालीमतीक्रम्य यदा संक्रमते
रविः। नानुनालंघितो मासो न्यूनर्हः सर्वकर्मसु। एवं सामान्यतः सकलकर्मनिषेधप्राप्तौ विशेषो वक्ष्यते।
तत्र शंभुः। न कुर्यादधिके मासि काम्यकर्म कदाचन। मुक्तानैमित्तिकं श्राद्धं तद्धितत्रैव कीर्तितं। अत्र के
चिदाहुः। काम्यस्य कर्मणोधिमासे प्रारंभः समाप्तिश्च निषिध्यते। प्रारब्धे तु काम्यकर्मणि समाप्तिकालाद

का०द्वे० १८

र्वीक्। मध्यपतितेधिमासेपि काम्यकर्म कार्यं। यथा चातुर्मास्यव्रतानां आषाढेधिमासे नारंभः। कार्त्तिके
चाधिमासे न समाप्तिः। अंतरे पतिते त्वधिमासेप्यनुष्ठानं। अत एवांतराधिमासपातेपि संक्रांतियुक्ता
षाढशुक्लैकादश्यां च समाधिरुक्ता। यथोक्तं। एकादश्यां तु गृह्णीयात्संक्रांतौ कर्कटायने। आषाढादौ
नरो नक्ता चातुर्मासिव्रतक्रिया। ततो विबुध्यते देवः शंखचक्रगदाधरः। कार्त्तिक्यां शुक्लपक्षस्य एकादश्यां
समाहितः। मंत्रेणानेन राजेंद्र देवमुत्थापयेद्द्विजः। अधिमासेपि पतिते एष एव विधिक्रमः। अधिमासनि
दि पातेपि क्रमाद्विंशाविकाहरीत्। कन्यातुलावृश्चिकेषु नृपमुख्य पर्ये ध्रुवं। न चैवं सति मासपंचकं व्रतानु
ष्ठानप्राप्तौ चातुर्मासीव्रतमिति समाख्याविरोधः। वार्षिकांश्चतुरो मासान्मध्यमांसं च यस्त्यजेत्। स्वर्गदो हरिमु
द्दिश्य शयानवेदेद्विद्विजः। यद्यपि तद्वृपादेन आषाढादिक्रमेण या। विष्णुः शयनतून्मत्स्यः सन वेत्त्रिकेत
न। मैत्रादिपादे स्वपितीति विष्णुर्वैष्णव्यमध्ये परिवर्त्तते च। पौष्णावसाने च सुरारिहंता प्रबुध्यते मासच
तुष्टयेन। इत्यादिवचनविरोधश्चेति वाच्यं। षष्ट्यां तु दिवसैर्मासः कथितो बादरायणैरिति वचनान्मास

चतुष्टयोपपन्ने। बल सिद्धं तेपि। प्रारब्धं कर्म यत् किंचित्तु कार्यं मलिम्लुचे। तथा। असूर्या नाम ये मासा न तेषु
मम संमताः। व्रतानां चैव यज्ञानामारंभश्च समापनम्। इत्यारंभसमाप्त्योरेवाधिमासे प्रतिषेधात्। चकारा
त्सर्वकाम्यकर्मग्रहणमिति। तदप्युक्तं। प्रवृत्तं मलमासात्प्राक् यत्काम्यमसमापितं। आगते मलमासे पि त
त्समाप्यमसंशयमिति काठकगृह्यपरिशिष्टवचनेन काम्यकर्मसमाप्तेरपि विधानात्। तस्मादेवं विषय
व्यवस्था। असूर्या नाम ये मासा निं मित्रिके ऊर्यात् प्रयतः सन्मलिम्लुचे इत्यादिवक्ष्यमाणनित्यनैमित्ति
कविधायकबहुवचनसंकोचप्रसंगात्। तस्मादस्यैवैकस्य काम्यव्रतयज्ञविषयतया संकोचो युक्तः।
ननु किमत्र मलमासात्प्रागारब्धस्य समाप्तिः प्रतिषिध्यते। उत तत्रैवारब्धस्य। न प्रथमः। प्रवृत्तं मल
मासात्प्रागिति वचनविरोधात्। न द्वितीयः। आरंभे निषेधादेव समाप्तेः प्रसक्तेर्निषेधायोगादिति। उच्य
ते। मलमासप्रारब्धस्य समाप्तिस्तत्रैव प्रतिषिध्यते। यो त्वज्ञानान्मलमासे पि काम्यकर्मप्रारंभनं। तेन तत्र स
माप्तौ कृतायां दोषाधिक्यं स्यादित्येतदर्थवाक्यमिति न दोषः। बृहन्मनुबृहस्पतिपैठीनसिज्योतिःशास्त्र
त्र॥ इति वचनेन काम्यव्रतयज्ञानां आरंभः समाप्तिश्च प्रतिषिध्यते न तु नित्यव्रतयज्ञानां नित्यत्वे॥ ६

का० हे०
१९

पराशराः। अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः। मांगल्यमभि
षेकं च मलमासे विवर्जयेत्। क्वचिद्यज्ञदानव्रतप्रतिग्रहाविति पाठः। अस्यापवादः। चंद्रसूर्यग्रहे चैवम
रणे पुत्रजन्मनि। मलमासे पि देयं स्याद्दत्तमक्षयकारकं इति। बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते
मलमास इवैतानि वर्जयेद्देवदर्शनमिति॥ अग्न्याधेयं प्रतिष्ठा चेत्यत्रानावश्यकत्वे सतीति विशेषो द्र
ष्टव्यः। तेन मलमासे पि प्रायश्चित्तभूतमग्न्याधेयमग्न्यनुगमनानंतरं कर्तव्यं न प्रतिषिध्यते। एवं प्रतिमा
दिसंस्कारनाशे पुनः प्रतिष्ठा न प्रतिषिध्यते। यज्ञाः काम्या नित्या अपि वसंतादिसंबंधेन विधीयमाना उ
त्तरे ससंक्रांतेपि क्रियमाणे स्वकाल एव कृता भवंति। दानानि महादानानि। केचित्तु व्रतानामपि मह
तामेव प्रतिषेधमाहुः। वृषोत्सर्गस्य चैकादशाहिकस्य प्रतिषेधः। षोडशश्राद्धादिवत्तस्योपकारित्वात्
शुक्रास्तमयादावपि अनावश्यकत्वे सत्यग्न्याधेयादि प्रतिषिध्यते। न मलमास इवेति विधानात्। देवदर्श
नं। प्रसिद्धस्वयंभुदेवदर्शनं। तच्चात्र प्रथमं विवक्षितं। अनादिदेवतां दृष्ट्वा शुचयः स्युर्न्नष्टनागवि। इति

स्कंदपुराणदर्शनात्। मलिम्लुचे प्रवर्त्तनीर्थस्नानं विवर्जयेत्। अत्र केचिदाहुः। मलशब्देति सिद्धवत् दृ
ष्टांतीकरणान्यथानुपपत्त्या मलमासे प्रथमदेवतादर्शननिषेधः सिद्धः। अपरे तु मलमासाइवेत्यग्न्या
धेयादिष्वेव योजयंति यथोक्तं मलमासे चंद्रसूर्यादिग्रहकालव्यतिरेकेण तेषां निषेधस्तथैव बाल्या
दिष्वपि यथा स्यादिति। तस्मिन्पक्षे मलमासे देवतादर्शनस्याप्रतिषेधः। वापीकूपतडागादिप्रतिष्ठां य
ज्ञकर्माणि न कुर्यान्मलमासे च महादानव्रतानि च। महादानानि च विष्णुपुराणे दर्शितानि। मनुरुवाच॥
महादानानि यानीह पवित्राणि शुभानि च। रहस्यानि च प्रदेयानि तानि मे कथयाच्युत। मत्स्य उवाच। नोक्ता का०दे०
नि यानि गुह्यानि महादानानि षोडश। तानि ते संप्रवक्ष्यामि यथावदनुपूर्वशः। आद्यं तु सर्वदानानां तुलापु २०
रुषसंज्ञितं। हिरण्यगर्भदानं च ब्रह्मांडं तदनंतरं। कल्पपादपदानं च गोसहस्रं च पंचमं। हिरण्यकामधेनु
श्च हिरण्याश्वस्तथैव च। हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा। पंचलांगलकं तद्वद्धरादानं तथैव च। वृ
दादत्रं विश्वचक्रं च ततः कल्पलतात्मकं। सप्तसागरदानं च रत्नधेनुस्तथैव च महाभूतघटस्तद्वत्षो

डशः परिकीर्तिताः। तथा च पुराणेष्वन्यानि दश महादानानि दर्शितानि। कनकाश्वतिलानागादासीरथमही
गृहाः। कन्या च कपिला धेनुर्महादानानि वै दश। काठकगृह्ये। चूडा मौंजीबंधनं च अग्न्याधेयं महालयं। राजा
भिषेकं काम्यं च न कुर्याद्भानुलंघिते। कौथुमिः। अधिमासे न कर्तव्यं श्राद्धं संवत्सराधिके। वर्षवृद्ध्यभिषे
कादि कर्तव्यमधिके न तु। हारीतः। अधिमासे न कर्तव्यं श्राद्धमभ्युदयं तथा। तथैव काम्यं यत्कर्म वत्सरात्
प्रथमादृते। सपिंडीकरणादूर्ध्वं यत्किंचिच्छ्राद्धिकं भवेत्। दृष्टं वाप्यथवादृष्टं तन्न कुर्यान्मलिम्लुचे। आभ्युद
यिकं श्राद्धं आद्यवत्सरांतर्गतजातकर्मादिनिमित्तव्यतिरिक्तं अन्ये त्वेवं व्याचक्षते। वत्सरात्प्रथमादृते प्र
थमं संवत्सरं विहाय आभ्युदयिकं श्राद्धं प्रथमे तु प्रथमे संवत्सरे मलमासे प्राप्ते सपिंडीकरणं विहीतं। त
दुत्तरदिने यदाभ्युदयिकं तन्मलमासेऽपि कर्तव्यं यथोक्तं। भ्राता वा भ्रातृपुत्रो वा सपिंडी शिष्य एव वा। स
हपिंडक्रियां कृत्वा कुर्यादभ्युदयिकं ततः इत्यत्र वचनेन अभ्युदयशब्देन आभ्युदयिकं श्राद्धं विनायकप्रकरणे वि
श्वरूपाचार्येण व्याख्यातं। अन्ये तु उत्तरदोषत्वेन व्याचक्षते। सपिंडीकरणादूर्ध्वं यस्य प्रथमसंवत्सरे प्रतिमा

संपुनः क्रियमाणं त्रिपौरुषिकं श्राद्धं तन्मलिम्लुचेऽधिमासे कार्यमिति। वक्तुं वत्सरप्रथमाद्दतश्चेत्युक्तं। एत
ज्ञोपरिष्टाद्वृहस्पतेः। असंक्रांतः प्रवक्ष्यज्योतिःशास्त्रे। तत्र दत्तमदत्तं स्यात् कृतं चाकृतमेव वै। सुजसमथज
संस्यान्योपवासः स्नतो न भवेत्। न यात्रां न विवाहं च न चैवास्तु निवेशनं। न प्रतिष्ठां च देवानां प्रासादग्रामकू
रुहां। न हिरण्यसुवासांसि कारयेदिति निश्चयः। पराशरः। रविणा लंघितो मासः चांद्रः ख्यातो मलिम्लुच
यत्र यद्विहितं कर्म उत्तरे मासि कारयेत्। प्रजापतिः। उत्तरे पाकमंचिहव्यं च कव्यं पर्वेक्षिवं तथा। उत्त
रे नियतं कुर्यात्पूर्वं तन्निष्फलं भवेत्। पराशरः। पक्षद्वयेऽर्कसंक्रांतिर्यदा न स्यात् सितासिते। तदा तत्र
मासिकं कार्यमुत्तरे मासि कारयेत्। एवं षष्टिदिनो मासः स्त दर्शं च मलिम्लुचः। त्यक्त्वा तमुत्तरे कार्याः पि
तृदेवादिकाः क्रियाः। सत्यव्रतः। मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्। तत्रोत्तरोत्तमा ज्ञेया पूर्वा तु स्या
न्मलिम्लुचा। तत्राधिमासे यत्कर्तव्यं तदाह शातपः। एकसंज्ञो यदा मासो स्यातां संवत्सरे क्वचित् तत्राद्ये
पितृकार्याणि दैवकार्याणि चोत्तरे। अंगिराः। द्वौ मासावेकनामानौ चेकस्मिन् संवत्सरे यदि। पूर्वस्मिन्दे

का०दे०
२१

वकार्याणि पितृकार्याणि चोत्तरे। एवमादीनि मलमासे दैवकार्यं पितृकार्यं प्रतिपादकानि वचनानि। नाव
श्यकदैवकार्यपितृकार्यविषयाणि द्रष्टव्यानि। बृहस्पतिः। नित्यनैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे॥
तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च। नित्यमावश्यकं यन्मासविशेषणामनिरपेक्ष्यमेव विहितं। यस्या
करणे कालात्यये निमित्तं प्रायश्चित्तमाम्नायते। तद्यथा। अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपे
त्। यो दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वातिपादयेदिति। तथाभूतस्य नित्यस्यग्रह
णं। न तु नित्यमात्रस्य। तेन दर्शपौर्णमासाग्निहोत्रपंचमहायज्ञादेरनुष्ठानं मलिम्लुचे कर्तव्यं। स्वकाला
तिक्रमे प्रायश्चित्तमाम्नायते। एवं च नित्यापि सोमयागक्रिया मलिम्लुचे मासि न कार्या। मलिम्लुचमासा
तिक्रमे पि वसंतादिकालस्य सोमयागक्रिया मलिम्लुचे मासि न कार्या। मलिम्लुचमासातिक्रमे पि वसंता
दिकालस्य सोमयागांगभूतस्यानतिक्रांतत्वेनात्र प्रायश्चित्तप्रसक्तेरसंभवात्। एवं यस्य निमित्तिकस्य गृह
णादिनिमित्तानंतरकाले कर्तव्यस्य न मासांतरे विहितकाललाभः। तथाभूतावश्यकक्रियाविषया

च मलिम्लुचे मासि कुर्यादिति विधानं। जातेष्ट्यादेर्नैमित्तिकस्यापि शिशुरक्षणार्थं निमित्तानंतरकाले मा
साद्याय कालांतरे कर्तव्यस्य यथा दशरात्रादिसूतककालमध्ये नुष्ठानमन्याय्यं। तथा मलिम्लुचकाल
मध्येपीति। न मलिम्लुचे नुष्ठानं। एवं च नित्यत्वं नैमित्तिकत्वं वा विवक्षितं। यस्यातिक्रमे प्रायश्चित्तप्राप्ति
यस्य च मासांतरविहितकालालाभेनावश्यकं मलिम्लुचे नुष्ठानं तत्सर्वं मलिम्लुचे कुर्यादिति। बार्हस्पत
स्य वचनात्तात्पर्यार्थः प्रसेतव्यः। तथा च स्मृत्यंतरे। अनन्यगतिर्यन्नित्यं कुर्यान्नैमित्तिकं तथेति। तस्य मु
ख्यनित्यस्य कालातिक्रमेणान्यकालांतरस्याननुज्ञातत्वादत्यंतलोपः प्रायश्चित्तं प्रसज्यते। तत्कर्मा
नन्यगति। तन्मलमासेपि कुर्यात्। गृह्यपरिशिष्टमपि। मलं वदंति कालस्य मासं कालविदोधिकं। नेदे
त्र विशेषोऽस्यामस्त्यावश्यकाद्विधेः। अन्यत्वेदिति दर्शपौर्णमासादिविधेरन्यत्र विशेषेऽपि मलमासेने
ह्त्। नो चरेत्। यस्यां शुद्धे मासि क्रियायां नास्ति विधिलोपः सा विशेष्या। यथा वसंते ज्योतिषा यजेतेति
वसंतविहितस्य ज्योतिष्टोमस्य मलमासवैशाखपरित्यागेन शुद्धवैशाखे क्रियमाणस्य वसंत एवत्व

का०दे० २२

त्वात्रास्ति विधिलोपः। अनेनावश्यको विधिः। अधिकमासेनुष्ठेयद्वस्याप्युक्तं। उक्तं च। साक्षादपि तत्रैव। व
षट्कारहोमाश्च पर्व चाग्रहणं तथा। मलमासे तु कर्तव्यं काम्यानन्यांस्तु वर्जयेत्। अवषट्कारहोमाग्निहोत्रोपास
न वैश्वदेवादयः। पर्व दर्शपूर्णमासौ पार्वणस्थालीपाकश्च। आग्रामाग्रयणेष्टिः। यथाग्रहणं वर्षासु श्यामा
कैर्यजेतेति मासद्वयात्मकवर्षाख्यकाले विहितं। मलिम्लुचमासेपि स्वकालसंभवादनन्यगतिकं न भवति।।
तथा दुर्भिक्षेण श्यामाकव्यतिरिक्तधान्यासंभवे जीवनार्थं नवश्यामाकान्नभोजनमकृताग्रहणेनाकर्तव्य
मित्याग्रयणानुष्ठानं जीवनार्थमावश्यकमिति युक्तमुक्तमाग्रायणं तथेति। यदा तु दुर्भिक्षाभावादनाव
श्यकं। तदाधिमासे श्यामाकाग्रयणं न कर्तव्यं अनेनैवाभिप्रायेण पैठीनसिना। संक्रांतिरहिते मासे कुर्या
ग्रयणं न वेति विकल्प उक्तः। काठकगृह्यपरिशिष्टे। मलेनन्यगतिर्नित्यां कुर्यान्नैमित्तिकीं क्रियां। सोमया
गादिकर्माणि नित्यान्यपि मलिम्लुचे। इष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि। महालयाष्टकाश्राद्धं
कर्माण्यन्यानि कारयेत्। स्पष्टं मासविशेषाख्याविहितं वर्जयेन्मले। महालयो नामापरपक्षः। प्रेतमा

न्यादिमासमस्याब्दपिंडोदकक्रियाः॥सपिंडीकरणांताश्चयथाकालमुपस्थिताः॥यववीहितिलैर्होमोजातक
र्मादिकाः क्रियाः॥माघत्रयोदशीश्राद्धं चस्तुपस्थितदेतुकं।अनन्यगतिकत्वेनकर्तव्यंस्यान्मलिम्लुचे।दृगुस्म
त्तावपि।वृद्धिश्राद्धंतथासोममस्याधेयंमहालयं।राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघिते।ज्योतिर्पितामहो
पि।मासःकन्यागतेनानावसंक्रांतौनवेद्यदि।दैवंपित्र्यंतदाकर्मतुलास्थेकर्तुरव्ययं।ज्योतिःपराशरोपि।या
वधानविशोयोमासःकन्यार्केजायतेयदा।पित्र्यंदैवंतदाकर्मउत्तरेमासियुज्यते।गोभिलः।अर्केनन्नस्थेकं
न्यास्थेश्राद्धपक्षःप्रकीर्तितः॥सिनीवालीमतिक्रम्ययदासंक्रमतेरविः।तदाकालस्यदृष्टिर्वीदृतीतेत्वपित्र्यक्रि
चयत् या।अतीतःपंचमंपक्षमतिक्रांताएवंकैश्चिदुक्तं।कन्यासंक्रांतिनिमित्तानांश्राद्धानांषोडशीसुदिवसेषुनैमि का०हे०
त्तिकत्वान्नैमित्तिकस्यचश्राद्धस्यमलमासेप्रतिषेधाभावान्तानिकार्याणि।तदुक्तंप्रजापतिना।मुक्त्वा।नैमि २३
त्तिकंश्राद्धमितिब्रह्मसिद्धांतेपि।सूर्येणलंघितोमासोनकर्मण्यःस्मृतोबुधैः।तस्मात्तत्रनकुर्वीतश्राद्धंनै
मित्तिकादृते।निमित्तत्वंचश्राद्धप्रतिकन्यासंक्रांतेःपुराणोक्तं।कन्यागतेसवितरियान्यहानिषोडश।क।तु

निस्तानितुल्यानिपितृणांदत्तमक्षयमिति।तन्निरस्तं।तथाचरणाद्यायनिः।ननस्पस्यापुरेपक्षेतिथिषोड
शकस्तुयः।कन्यागतान्वितश्चेस्यासकालःश्राद्धकर्मणि।तथाचनागरखंडेपिदृश्यतिब्रह्मवचनं।आष
ढ्यापंचमेपक्षेकन्यासंस्थेदिवाकरे।योवैश्राद्धंनरःकुर्यादेकस्मिन्नपिवासरे।तस्यसंवत्सरंयावत्तृप्ता
स्युःपितरोध्रुवं।ननोवाप्यनन्नस्योवामलमासोपदानवेत्।सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमः।यत्तु
नागकर्णवचनं।आषाढीमवधीकृत्वायःस्यात्पक्षस्तुपंचमः।श्राद्धकालःसविज्ञेयःकन्यागच्छतुवान
वा।यच्चादित्यपुराणवचनं।आषाढीमवधिंकृत्वायःस्यात्पक्षस्तुपंचमः।श्राद्धंतत्रतुकुर्वीतकन्यांगच्छ
तुवानवा।इति।तत्सर्वदर्शिनानिवाक्यानिचयपर्यालोचनयापाक्षोनिक्रमानिषायं।तथाचकार्ष्णाजि
निः।अतेवायदिवामध्येयत्रकन्यांरविर्व्रजेत्।सपक्षःसकलःपूर्णस्तत्रश्राद्धंविधीयते।तेनगन्यागते
सवितरीत्यादिपुराणवचनं।पक्षमध्येयस्मिन्कस्मिंश्चिद्दिनेकन्यासंक्रमणेसतिप्रतिपदादिषोड
शाप्यहान्युपादेयानीत्येवंव्याख्येयं।नतुसंक्रमप्रभृतिपूर्वाणिदेयानीत्येवंव्याख्येयंनतुसंक्रमाणात्स

वर्णिरेव। नीलेवं पंचमपक्षस्य श्राधान्यार्थवात् तद्वचनं। तीर्थश्राद्धं गजछाया श्राद्धं तद्वनयंन नित्यं। अकर
णे प्रत्यवायाभावात्। नापि नैमित्तिकं वीर्यसंबंधस्य च गजछायासंबंधस्य च निमित्तस्य पुरुषप्रयत्नसाध्य
त्वात्। अतः तयोः पृथक्ग्रहणं। गजछाया त्र गजस्यैव याम्यां पूर्वस्यां दिशि वर्तते। सा मुख्या या त्वाविश्वामि
त्रोक्ता। परमान्नं तु यो दद्यात् पितॄणां मधुना सह। छायायां तु गजेंद्रस्य पूर्वस्यां दक्षिणामुखः। यदेंदुः पितृ
दैवत्ये सूर्यश्चैव करे स्थितः। याम्या तिथिर्भवेत्सापि गजछाया प्रकीर्तिता। इति या परिभाषिता गजछा
या सा अमुख्या असंभवेन। नीचमलमासे हंसश्चैव करे स्थित इति वचनात्। हंसः सूर्यः। करे हस्ते स्थितः। तदा
कन्यासंक्रांतेः विद्यमानत्वात् मलमासत्वाभावात्। एतच्छ्राद्धं नित्यत्वेन मलमासेपि प्राप्तं यत्तत्पुनर्विधीय
ते। तत्संवत्सरमध्यपतिते मलिम्लुचे। एकमासिकं तु द्वा द्वितीये मासि शुद्धे प्युन्यदधिकं कुर्यादित्येतदर्थं। त
थाह वसिष्ठः। संवत्सरमध्ये यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं वर्द्धयेत्। वृद्धवसिष्ठः। आद्यीयाहति
संवत्सरेऽधिमासो न वेद्यदि। आहुः द्वयं प्रकुर्वीत एवं कुर्वन्न मुह्यति। कौथुमिः। अष्टमं तु भवेद्दद्याद्दत्तं वापि

तु संचितं। संवत्सरे विवृद्धेपि प्रतिमासं च मासिकं। गालवः। नकुर्यान्मलमासेपि काम्यकर्म कदाचन। मुक्त्वा
नैमित्तिकं श्राद्धं तद्धि तत्रैव कीर्तितं। एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते। तत्कार्यं पूर्वमासेपि कालाधि
क्येपि धर्मतः। विष्णुः। मासिकार्थे चेदधिकमासपातो मासिकार्थं दिनमेकं वर्द्धयेत्। कश्चिदेतद्वचनमेवं व्या
चष्टे। वर्द्धयेत् खंडयेदिति। तत्स्वागुदाकृतवचनादर्शननिबंधनमित्युपेक्षणीयं। स्मृत्यंतरेपि। संवत्सरे विवृ
द्धेपि प्रतिमासं च मासिकं। एतत्सपिंडीकरणात् प्रोक्तमासिकविषयं। एकोद्दिष्टवैरूप्यमासिकविष
यं स्यादिति केचित्। तद्युक्तं। सपिंडीकरणोत्तरमासिकानामपि वैकल्पिकैकोद्दिष्टत्वविधानात्। यदा
ह कात्यायनः। सपिंडीकरणादूर्ध्वं न दद्यात्प्रतिमासिकं। एकोद्दिष्टविधानेन दद्यादित्याह शौनकः। अत्र
सपिंडीकरणोत्तरमेकोद्दिष्टविधानेन प्रतिमासिकं न दद्यादित्येकः पक्षः। दद्यादित्यपरः। न तु सपिंडीक
रणोत्तरकालेन दद्यादित्येकः। दद्यादित्यपरः। तथा च जातूकर्ण्यः। पितुः पितृगणस्थस्य कुर्यात्पार्वण
वत्सुतः। प्रत्यब्दं प्रतिमासं च विधिर्ज्ञेयः सनातनः। पितृगणस्थः सपिंडितः। ऋष्यशृंगः। संवत्सरातिरेके

वैमासश्चैव त्रयोदशः॥ असुराणां तु मासो सौ तेन स्माद्देवविगर्हितः॥ तस्मात्त्रयोदशे श्राद्धं न कुर्यान्नोपतिष्ठते॥ त
स्मात्त्रयोदशो सुरसंबंधगर्हितः। तस्मात्त्रयोदशे मलमासे श्राद्धं न कुर्यात् कृतमपि यतो न्योपतिष्ठते। केचित्त्र
योदशं श्राद्धं न कुर्यादिति पठित्वा त्रयोदशं यन्मासिकं मलमासपातजन्मकार्यमिति व्याचक्षते। तदयुक्तं।
संवत्सरमध्ये यद्यधिमासो न वेदित्यादिषाङ्गुल्यक्तवचनविरोधात्। अपरे तु तस्मात्त्रयोदशे श्राद्धं न कु
र्यादिंदुसंक्षये इति पठंति तदप्ययुक्तं। जातकर्मणि यच्छ्राद्धं दर्शश्राद्धं तथैव च। मलमासे पि तत्कार्यं व्यास
स्य वचनं यथा। इति व्यासवचनविरोधात्। पिंडपितृयज्ञादिवत्तदनंतरं अन्वक्रूपानुष्ठेयस्यामावास्याश्रा
द्धस्य प्रतिषेधप्रसंगाच्च। तस्मात्त्रयोदशे श्राद्धं न कुर्यान्नोपतिष्ठते। इव बह्वृग्ग्रंथो दृष्टः। काश्मीरलिखित
श्च पाठो ज्यायान्। तथा च हरिहरादिग्रंथेष्वयमेव पाठो दृश्यते। मांडव्यः। गर्भे वार्धुषिके प्रेतश्राद्धे कृत्स्ने तु
मासिके। प्रथमे च वार्षिके चैव नाधिमासो विधीयते। गर्भे वार्धुषिके कृत्स्ने श्राद्धकर्मणि मासिके। सपिंडी
करणे नित्ये नाधिमासे विवर्जयेत्। तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः। जातकर्मान्त्यकर्माणि न

का०हे० २५

व श्राद्धं तथैव च। मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश। चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं॥
कार्याणि मलमासे पि नित्यनैमित्तिकं तथा। गर्भे गर्भमासयुक्त्या विहिते पुंसवनादौ। स्वकं वार्धुषिके पि
अश्चिति नागो वृद्धिरित्यादिदृष्टो कृत्स्ने संवत्सरादिपर्यंतकालकृते। मासिके। इति द्वादशमासिकविष
यत्वेनकेन वित्व्याचक्षते। तदयुक्तं। श्राद्धान्यपि च षोडशेत्यनेनैव तस्य। श्राद्धस्य मलमासे विधानात्। त
स्य षोडशश्राद्धगणनात्। जातूकर्ण्यः। द्वादशप्रतिमास्यानि आद्यं षाण्मासिके तथा। सपिंडीकरणं चैव
इति यत्तच्छ्राद्धषोडशं। षाण्मासिकमित्यनेन विहितयोः श्राद्धयोः निरूपणप्रमि[illegible]। कालेन तु षण्मा
सा यदा स्युरिति त्रिभिः। शून्याः संवत्सरश्चैवं स्यात्तां षाण्मासिके तथा। एकेनाक्रांतिनिर्वीर्य स्यात् षाण्मासा
न्यूनाः स्युः संवत्सरश्च। तदा षाण्मासिकादिकं श्राद्धं कार्यमित्यर्थः। तद्विष्णुपुराणे। अस्थिसंचयने श्राद्धं
त्रिपक्षे मासिकानि च। रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोडश। रिक्तयोस्तिथ्योरित्येकेनाक्रांतन्यूनेषष्ठैका
दशे च मास इत्यर्थः। ब्रह्मपुराणे। नृणां तूत्क्रांतदेहानां श्राद्धं षोडशसर्वदा। चतुर्थे पंचमे चैव नवमैका

दर्शितं तथा। ततो द्वादशमासिकानि श्राद्धानि द्वादशसंख्यया। चतुर्थे पंचमे च कर्त्तव्याः श्रुतितस्तेषां न त्वविद्वांश्च त
र्पयेत्। तेन मासिके श्राद्धकर्मणि। अमावास्याश्राद्धकर्मणीत्यर्थः॥ नित्ये नित्यदाने। होमो त्रौपासनहोम्यः
यवव्रीहितिलादिनि॥ तत्र होतव्यद्रव्योपादानात्। अन्यकर्माणि दहनोदकपिंडदानास्थिसंचयनादीनि॥
जातकर्मवत्॥ जातश्राद्धमपि कर्त्तव्या। जातश्राद्धकनामानि ये च संस्काराः सव्रताः। मलिम्लुचेपि कर्त्तव्याः
काम्या इष्टीश्च वर्जयेत्। संस्कारा अन्नप्राशननिःक्रमणादयः। जनार्दनस्वापनादारभ्य यावदुत्थापनं ध
रणापारणादिकं करिष्यामीत्येवंविधसंकल्पसहिताः काम्या अपि। इष्टिग्रहणं काम्यपशुबंधादिक-
र्मोपलक्षणार्थं। सर्वेषामपि काम्यानामनावश्यकत्वेन वर्जनीयत्वात्। अत एव स्मृत्यंतरं। इष्ट्यादि स-
र्वकाम्यं मलमासे विवर्जयेत्। हारीतोपि। मलमासे न कर्त्तव्यं श्राद्धमभ्युदयं तथा। तथैव काम्यं यत्कर्मेति
यत्काम्यं कर्म इष्ट्यादि तन्मलमासे न कर्त्तव्यमित्यर्थः। यत्तु ज्योतिःपराशरेणोक्तं। उपाकर्म तथोत्सर्गः प्र-
सवाहोत्सवाष्टकाः। मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकं। इति पराः कार्याः। उत्तरे मासि कार्या इत्यर्थः॥ का॰ हे॰ २६

तत्र त्वसवत्राद्वेन जातेष्टिर्विधास्यते। न पुनराभ्युदयिकश्राद्धं जातकर्म च। तयोरपि ग्रहणे श्राद्धजातकनामानि ये
च संस्काराः सव्रताः। मलिम्लुचेपि कर्त्तव्या इति सर्वस्मृतिविरोधः॥ इति स्मृतिविरोधापत्तेः। पैतृकग्रहणमावश्य-
कविषयं न तु केवलसांवत्सरिकविषयं। अमावास्यादिश्राद्धस्यापि मलमासे विरोधात्। मत्स्यपुराणे। चं-
द्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि देयं स्याद्दत्तमक्षयकारकं। क्वचित् श्राद्धमक्षयकारकमि-
ति पाठः। शातातपस्मृतौ। प्रतिसांवत्सरे श्राद्धे नाधिमासं विवर्जयेत्। पैठीनसिः। मलमासेपि कर्त्तव्यं
श्राद्धं यत्प्रतिवत्सरं। सांवत्सरं न वर्ज्येन श्राद्धं तत्र मृताहनि। जातकर्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च।
प्रतिसंवत्सरं चैव पूर्वमासे प्रकीर्त्तितं। पूर्वमासेधिमासे। मासस्य योदर्शो यत्र तत्र श्राद्धं कथं भवेत्। पू-
र्वापरावधी तत्र कथं कुर्याद्विचक्षणः। यस्मिन् राशौ गते सूर्ये विपत्तिः स्याद्द्विजन्मनः। तत्राशौ च कर्त्त-
व्यं पितृकार्यं मृताहनीति। एतानि मलमृतमासकर्माणि। यदाह पैठीनसिः। मलमासे मृतानां तु श्राद्धं
यत्प्रतिवत्सरं। मलमासेपि कर्त्तव्यं नान्येषां तु कदाचन। इति। लघुगुरपि। मलमासमृतानां तु श्राद्धं यत्प्र

तिवत्सरं। मलमासेपि कर्त्तव्यं नान्येषां तु कदाचनेति। व्यासः। मलिम्लुचेपि संप्राप्ते ब्राह्मणोपि यतेयदि। ऊ-
नाधिको यो मासो सौ कथं कुर्यादाब्दिकं। यस्मिन्राशिगते सूर्ये विपत्तिः स्यादयात्मनः। तस्यामेव तु कुर्वी-
त पिंडदानोदकक्रियां। अधिमासेपि विपन्नानां सौरं मानं समाश्रयेत्। स एव तस्य मासोपि श्राद्धपिंडक्रिया-
दिषु। स्मृत्यंतरे तून्नरार्द्धमन्यथा पठ्यते। स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु। मासपक्षतिथिस्पृष्टे यो-
यस्मिन्म्रियतेहनि। प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति वचनपर्यालोचनया ज्ञातातपवच-
नानि मलमासमृतविषयाणि इत्याहुः। मलमासमृतस्य हि मलमासे संभवे सति मलमासस्पृष्ट एव
मृताहस्तथाभूतो न तु श्राद्धमासस्पृष्ट एव न तु शुद्धमासस्पृष्ट इति मलमासगतक्षयाह एवाब्दिकं श्राद्धं
कर्त्तव्यं न तु शुद्धमासगतक्षयाहे अतथाभूतत्वात् मलमाससंभवे तु गुणलोपन्यायात् मलमासस्पृष्टे-
पि क्षयाहे मृताहश्राद्धं कर्त्तव्यमित्यवगंतव्यं। प्रथमाब्दिकं मलमासे कार्यं तथा च वृद्धवसिष्ठः। असंक्रां-
तेपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकं श्राद्धं सपिंडीकरणं तथा। केचिदेवं व्याचक्षते। आब्दिकं

का०दे० २७

प्रथमं नूनाब्दिकं। यदाब्दिकात्मृताहात्पूर्वदिने क्रियते। मासिकं तु द्वादशामृताहन्येव। यदाब्दिकसंज्ञं
क्रियेत इति पूर्वमेव द्वादशाहादौ सपिंडीकरणं कृतं। यदा तु पूर्णे संवत्सरे तु क्रियते। तदा प्रथमाब्दि-
कं नास्ति। सपिंडीकरणेनैव तस्यापि सिद्धेः। तदुक्तं। पूर्णे संवत्सरे पिंडः षोडशः परिकीर्तितः। तेनैव च स-
पिंडत्वं तेनैवाब्दिकमिष्यते पिंडशाष्टेन श्राद्धं पूर्णे संवत्सरे लभ्यते। षोडशाः षोडशं श्राद्धमित्यर्थः। तदयु-
क्तं। आब्दिकं प्रथममित्यनेन नूनाब्दिकग्रहणे मासिकशाद्विनाब्दिकग्रहणे प्रमाणाभावात्। द्वादशमा-
सिकस्य च द्वादशमासोपक्रम एव कर्त्तव्यत्वाच्च। एतच्च षोडशश्राद्धनिर्णयप्रस्तावे दर्शयिष्यते। यत्तु
सत्यव्रतेनोक्तं। वर्षे वर्षे च यच्छ्राद्धं मातापित्रोर्मृतेऽहनि। मलमासे न कर्त्तव्यं व्याघ्रस्य वचनं यथा। तदधि-
मासादन्यत्र मृतस्याब्दिकाख्यश्राद्धविषयं। अत्र मलमासे नाधिमासो ग्राह्यः। एक एव यदा मासः संक्रां-
तिद्वयसंयुतः। मासद्वयगतं श्राद्धं मलमासेपि शस्यते इति। शुद्धमासमृतस्यापि प्रतिसंवत्सरश्राद्धस्य
क्षयमासे विधानात्। एवं च क्षयमासानुप्रवेशितसंक्रांति श्राद्धं प्रकृतस्तत्र पूर्वस्यादिति वचनात्तत्र

न भवति तदा प्रथमाब्दिकं चेन्मलमासे कार्यं तेहि नाप्युनयोः॥ द्वितीयाब्दिकं चेच्छुद्ध एव कार्यं मलमासे॥ ३

यमासे च कार्यं। तेन मलमासे मृतस्य मरणश्राद्धे मासो मलमासो न भवति। तदा प्रतिसंवत्सरश्राद्धं मलमा
स एव कार्यं। न शुद्धेनाप्युनयोः शुद्धमासि मृतस्य तु यदा मरणमासो मलमासो नाप्युनयोः॥ तस्मिंस्तु प्रा
प्ते मासि क्रियाच्छ्राद्धं यथाविधि तथैवाब्दस्य सर्वं नित्यमेकं हि सर्वदा। प्रकृते शुद्धे सर्वं श्राद्धं नि
यमेनैव कार्यं न द्वितीयं मलमासेपीत्यर्थः॥ तथा। संवत्सरे न वर्द्धेत श्राद्धं तत्र मृताहनीति वचनादपि न
सांवत्सरिकमुभयत्रानुष्ठेयं। अत्र केचिदाहुः॥ मलमासे सांवत्सरिकं श्राद्धं कृत्वा तदुत्तरमासे पुनस्तद्दे
वावर्त्तनीयं। तथा च यमः। आब्दिकं प्रथमं यस्मात् कुर्वीत मलिम्लुचे। त्रयोदशे मासे तु संप्राप्ते कुर्वी का०हे०
त पुनराब्दिकं। त्रयोदशे मासि संपूर्णे सति चतुर्दशे मासप्रवेशदिने पुनराब्दिके कुर्वीतेत्यर्थः॥ सांवत्स २८
रे न वर्द्धेतेत्यस्यायमर्थः। न वर्द्धेत न विद्धिर्द्धेतेति तेनैतदपि मासद्वये श्राद्धमनुष्ठेयमिति प्रतीपादयंती
ति। तदयुक्तं। उभयत्र श्राद्धानुष्ठाने प्रमाणाभावात्। यमवचनस्य चायमर्थः। प्रथममाब्दिकं मलिम्लुचे
कुर्वीत। पुनराब्दिकं द्वितीयाद्याब्दिकं तु त्रयोदशे मासि संपूर्णे सति चतुर्दशे मासप्रवेशदिने कुर्वी

तेति। आब्दिकं प्रथममिति सांवत्सरं न वर्द्धेतेति वचनद्वयस्यास्मदुक्तोर्थो विवचनांतरसंवादी। तथा च तन्मूल
भूतया श्रुत्योपपत्तेश्च मूलांतरकल्पना। न वदुक्तस्त्वर्थो नि तथेति मूलभूतस्मृत्यंतरकल्पनाप्रसंगः॥ किं
च। मन्वस्य हेतु त्रयोदशे प्राप्ते तु इत्यत्राब्दिकशब्दवैयर्थ्यं प्रसज्येत। त्रयोदशे तु संपूर्णे पुनः कुर्वीतेत्यु
क्तेपि प्रकृतत्वेन प्रथमाब्दिकस्यानन्वयात् द्वितीयाद्याब्दिकविषयत्वेतुनायं दोषः। तेन श्राद्धीयाहनि संप्रा
प्ते इति। वृद्धवसिष्ठवचनं मासिकविषयमिति ज्ञेयं। किं च। सांवत्सरिकविषयत्वेपि किं मलमासमृतसांव
त्सरिकविषयं अमलमासमृतप्रथमाब्दिकविषयं वा। न प्रथमः। तदा श्रावेव कर्त्तव्यं। तस्मिन्नेव प्रकुर्वीत
स एव तस्य मासोपि वत्सरस्येति। प्रागुदाहृतसाधारणबहुवाक्यविरोधात्। मलमासेपि कर्त्तव्यमिति
शिष्टवचनानगतोपि त्राष्टस्त्वेवमपि उपपद्यते। यदा शुद्धत्रयोदशो न भवति तदा तत्र सांवत्सरिककार्यं य
दा मलमासः त्रयोदशो न भवति तदा तत्रापीति। यद्वा। प्रागुदाहृतवचनानुरोधादपि त्राष्ट एवकारानर्थ
भावः इति। एकस्मिन्नेवाहनि श्राद्धद्वयप्रसंगाच्च। अपवचनांतरपर्यालोचनयैकं मलमासे अपरं तु शु

द इत्युच्यते। तत्पर्यालोचनयैव मासिकविषयता प्रसज्येत। नापि द्वितीयः। उक्तादेव हेतोः। प्रत्यब्दं द्वादशो मा-
सीति वचनमाण्णत। लघुहारीतवचनाच्च। अथ असंक्रांतेपि कर्त्तव्यमित्यपि शाट्याद्युक्तं यत्र श्राद्धमित्युच्यते
तद्विमलमासे एकोद्दिष्टं कृत्वा पुनः शुद्धे क्रियमाणं न प्रथमाब्दिकं स्यात्। यदा शुद्धस्त्रयोदशो भवति॥
तदा तत्र प्रथमाब्दिकं कार्यं। यदा असंक्रांतस्त्रयोदशो भवति। तदा तत्रापीत्येवमपि शाट्यायपन्नेश्चा। अ-
न्येत्वाब्दिकं प्रथमं यस्मात् नक्रुवीत मलिम्लुचे इति पीगमुदाहृत्य मलमासमृतविषयत्वेनैवं व्याचक्षते
मलिम्लुचमृतस्य यत् प्रथमाब्दिकं तत् मलिम्लुचे न कुर्वीत तस्य प्रथमाब्दिकसमये मलिम्लुचासंभवा-
त्। द्वितीये हि वर्षे पूर्वस्मात् मलमासात् अन्यो मलमासो भवति। तस्मात् मलमासमृतस्य पृथगाब्दिकं मल-
मासे कदाचिदपि न प्राप्नोति। अतः पूर्वार्द्धं नित्यानुवादः। यदा गच्छता कालेन यदि मलमासमृतस्य पुनराब्दि-
के प्राप्ते स एव मलमासो भवति तदा तस्मिन्नेव मलमासमृतस्य पुनराब्दिकं प्रतिसंवत्सरं विहितं श्राद्धं कु-
र्वीतेत्यर्थः। मलमासेपि कर्त्तव्यं श्राद्धं यत्प्रतिवत्सरं। सांवत्सरं न वर्ज्येत श्राद्धं तत्र मृताहनि। अस्यापि पूर्वा-

र्द्धं मलिम्लुचमृतविषयं। सांवत्सरं प्रथमाब्दिकं। तन्नवर्द्धते। न विच्छिद्येत। शुद्धेपि मास इत्येतावान् अनुवाद-
स्तदुक्तं। निःप्रयोजननित्यानुवादस्यायुक्तत्वात्। श्लोकद्वयेपि पूर्वेयर्थ्यप्रसंगात् अस्माद् आब्दिकं प्रथमं य-
स्मात् तत् कुर्वीत मलिम्लुचे। इत्येवं बहुग्रंथदृष्टः पाठो युक्तः। मलमासेपि कर्त्तव्यमिति वचनस्य च। अस्मदु-
क्त एवार्थो युक्तः। तस्मान्मलमासमृतसांवत्सरिकं मलमाससंभवे तत्रैव कार्यं मलमासमृतप्रथमाब्दि-
कं चेति सिद्धं। इदं त्विह विचार्यते। किमंतराधिमाससंनिपातेपि प्रथमाब्दिकं त्रयोदशमासि कार्यमिति। त-
दाह लघुहारीतः। प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रिया द्विजैः। क्वचित्त्रयोदशेपि स्यादाद्यं मुक्त्वा तु वत्सरं।
पिंडक्रिया मृताहश्राद्धक्रिया। द्वादशे मासि संपूर्णे सति त्रयोदशे मासि तिथौ यावत्क्वचिदधिमासयुक्ते संव-
त्सरत्रयोदशो वा चतुर्दशे मासीति। पा-- आद्यमाब्दिकं त्वधिमासवत्यपि संवत्सरे द्वादशे मासि परिपूर्णे
सति कार्यं। त्रयोदशे मासि कार्यमित्यर्थः। तदप्युक्तं। यदि हि क्वचिदित्यस्याधिमासः प्रभवति संवत्सर इ-
त्यर्थः स्यात्। तदांतराधिमासे सति कार्तिकमृतप्रथमाब्दिकस्याश्विने मासि संप्राप्तो मास पक्षातिथिस्प-

शेयो यस्मिन्म्रियतेऽहनि।प्रत्यब्दं तु तथाभूतं ज्ञयां हंतस्य तं विदुरिति व्यासवचनं बाध्येत।यद्वि तु कश्चिदि
ति त्रयोदशोऽधिमास इत्यर्थः।तदानास्य वाक्यस्य संकोचलक्षणो बाध इत्ययमेवापेयुक्तः।।किंच।प्रत्य
ब्दं द्वादशे मासि इत्यस्य वचनस्यास्मदुक्तार्थस्वीकारे संक्रांतिकर्त्तव्यमाब्दिकं प्रथमद्विजैरित्येतन्मूल
भूतये।वश्रुत्योपपत्तेर्न मूलांतरकल्पना।भवत्पक्षे तु साप्यापद्येत एवं तावत्पक्षद्वितयेपि विछक्षेनेवास्मा
र्थस्य सिद्धत्वात्।प्रत्यब्दं द्वादशे मासि इत्यस्य वाक्यस्यास्मत्पक्षे संकोचो नास्तीत्युक्तं।इदानीमंगीकृत्योच्य
ते।कार्त्तिकमृतस्यांतराधिमासे सत्याश्विने मासि श्राद्धे क्रियमासपक्षतिथिस्पृष्ट।इति वचनसंकोचः।अ
धिमासे शुद्धमासे च मासिकस्य विधानादधिमासवति संवत्सरे त्रयोदश मासिकानि जातानि।ततश्च त्र
योदशमासे प्रमीमासि वेन्नादिने मासिकं सांवत्सरिकं च प्राप्नोति।तच्चायुक्तं।नैकः श्राद्धद्वयं कुर्यात्समाने
हनि कुत्रचिदिति वचनात्।अस्यान्यविषयत्वे च भवत्पक्षे वाक्यद्वयसंकोचः।अस्मत्पक्षे तु त्रयोदशपद
स्यैकस्याधिमासविषयत्वेन संकोच इति विशेषः।।किंच।श्राद्धद्वयं युगपदनुष्ठीयते क्रमेण वा।नतावत्

युगपत्कर्ममध्ये कर्मांतरानुष्ठाननिषेधात्।अस्यान्यविषयत्वे च भवत्पक्षे वाक्यद्वयसंकोचः।।अस्म
त्पक्षे त्वेकस्येति स एव युक्तः।।द्वितीयेपि किमाद्यो मासिकं।सांवत्सरिकं वीतेन्मासिकं।एकस्य विहित
कालबाधप्रसंगात्।तस्यान्यविषयत्वे दुक्तपरिहारः।।नापि सांवत्सरिकं।उक्तादेव हेतोः।।किंच।मासि
कोत्तरकालमाब्दिके विधानात्तद्बाधापि प्रसज्येत तस्यान्यविषयत्वे च भवत्पक्षे वाक्यचतुष्टयसंको
चः।अस्मिन्पक्षे त्वेकस्येति महान्विशेषः।ननु संवत्सरविवृद्धौ च यदि स्यादधिमासकः।तदा द्वादशाके
मासिकार्पतदधिकं भवेदिति।सत्यव्रतवचनेन त्रयोदशमासिकं द्वादशमासि विहितं।अतो नायं दो
ष इति चेदुच्यते।संवत्सरविवृद्धौ च प्रतिनासंत मासिकमित्यादिना वचनात्।मासमासिकविधानाद्दिक
स्यः।ततश्च त्रयोदशसु मासेषु प्रतिमासं मासिकानुष्ठानपक्षे प्रागुक्तो दोष इत्यवधेयं।।किंच।प्रत्यब्दं द्वा
दशे मास्यतीवे इत्ययमर्थो मासपक्षतिथिस्पृष्ट इति वाक्यपर्यालोचनया वर्णनीयः।तत्रश्चोपजीव्या
बाधेनास्य वाक्यस्योपपत्तौ नोपजीव्यबाधायुक्तेति किंच।यस्मिन्मासे दिने यस्मिन्विपत्तिरुपजायते।।

पर्वतः सत्तु विज्ञेयो मासो नैमित्तिकं प्रति इति। ज्योतिर्गार्ग्यवचनादिदं कोचोपि प्रसज्येत॥ किंच। अस्मत्पक्षे मल-
मासकार्याकार्यनिरूपणस्य प्रकृतत्वात्प्रकृतसंगतमिदं वाक्यं न वेत्। भवत्पक्षे त्वधिमासवति संवत्सरे ऽधि-
मासांतरगतकार्यनिरूपणान्न तथा। संगतमित्यपरो विशेषः॥ किंच चैत्रे मृतस्य ज्येष्ठाद्यधिमासे फाल्गु-
ने श्राद्धं स्यात्तत्र प्रतिसंवत्सरमिति बाध्यते। संवत्सरभेदाभावात्। द्वितीये चाभावात्प्रतिसंवत्सरमिति स्याद-
तिबाधः॥ अन्ये तु पूर्वोक्तदूषणभिया एवं व्याचक्षते। न तु द्वादशमासादर्वागपि मृतेऽहनि कर्तव्यं प्रतिमा-
संवत्सरमिति विधानमस्ति तत्राद्यमिति द्वितीयादिसंवत्सरेष्वयं नियम इत्यर्थः। एवं हि सर्वत्राशास्त्रवि-
राधः। अन्यथानन्यथासिद्धेन मृताहविशेषेण मासबाधः स्यात्। आद्यत्वाच्छ्राद्धस्य द्वितीयपरः स्यादिति। तस्मा- का० दे० ३१
द्यदाधिमासः त्रयोदशो भवति। तदैव त्रयोदशे मासि प्रथमाब्दिकं। नत्वेतराधिमासवनिपातेपीति ज्ञेयं।
अन्ये त्वाब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे इति यमवचनप्रामाण्यादन्तरा पतितेप्यधिमासे
त्रयोदशे मासि प्रथमाब्दिकं कार्यमित्येवं परत्वेनैवैतद्वाक्यं व्याचक्षते। अंतरा मलिम्लुचे संस्याब्दिकं यत्प्र-

त्यस्मिन्मासे पक्षतिथिस्पृष्टे मृताहनि विधानवशात्स्यात्तत्र पुनराब्दिकं द्वितीयाद्याब्दिकं कुर्वीत न प्रथ-
मं। प्रथमं तु द्वादशमासपतीते त्रयोदशे मासि संप्राप्ते पर्वेशाहनि कुर्वीतेत्यर्थः। तदप्युक्तं। अनेकाध्याहारा-
दिदोषप्रसंगात्। अस्य चार्थस्य वचनांतराप्रतीतेरस्मिन्नर्थे अध्याहाराद्यंगीकारेण तात्पर्यकल्पने
प्रमाणाभावाच्च। तस्मादाब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुच इत्ययमेव वक्तुर्यथादृष्टः पाठो युक्तः।
तस्माद्यदा मलमासस्त्रयोदशो भवति। तदैव त्रयोदशे माब्दिकं तु पराधिमासनिपातेपीति सिद्धं। पैठीन-
सिः। प्रशस्तान्यधिमासे तु न कार्याणि महात्मनि॥ शुद्धे मासि प्रकर्तव्यं आत्मनः श्रेय इच्छता। यद्यप्यत्र
काम्यव्रतानि मलमासे प्रतिषिध्यंते। तथाप्यधिमासे नैषामारंभसमाप्ती प्रतिषिध्येते। क्षयमासे तु प्रथ-
मारंभ एव। अन्यथा कार्तिकस्य क्षयमासांतःपातः प्राप्तः प्रारब्धानां चातुर्मास्यव्रतानामसमाप्तिः प्रसज्येत॥
पुष्यस्य च क्षयमासांतःजाते पूर्वस्मिन्पक्षे प्रारब्धस्य माघस्नानव्रतस्य पुनरारंभः प्रसज्येत। क्षयमासा-
त्पूर्वस्मिन्नुत्तरस्मिन्वा मासे तत्समाप्ते तदारंभे चेत्कार्तिके समाप्तिविधानं पुष्टे चारंभे न विरुध्येत। प्रारब्ध

कर्मणश्चासमाप्तावनेकवर्षसाध्यस्य च मासव्रतस्यारब्धस्यान्यस्मिन्वर्षे पुनरनारंभेन संकल्पविरोधः। द्वा-
रंभान्नियमो दोषश्चासमाप्तौ स्यादिति कात्यायनवचनविरोधश्च। अधिमासे तु शुद्धमासांतरसद्भावादा-
रंभसमाप्त्योस्तयोपपन्नेऽधिमासे तयोः प्रतिषेधेन कश्चिद्विरोधः। प्रथमारंभोपि क्षयमासे शुद्धमासां-
तराभावात्कस्मान्न स्यादिति केचित्। न कुर्यान्मलमासे तु महादानव्रतानि चेति वचनविरोधात्। अस्या-
न प्रथमारंभे न व्यतिरिक्तसमाप्त्यादिनिषेधपरत्वे संकल्पादिविरोधस्योक्तत्वात्। काम्यव्रतादीनां क्षयमासे
प्रथमारंभे न निषेधपरत्वे संकल्पादिविरोधस्योक्तत्वात्। काम्यव्रतादीनां क्षयमासे प्रथमारंभे न निषेधपरत्वे का०दे०
विरोधाभावाच्चेति। नन्वेवं प्रतिपदा कार्त्तिकोऽधिमासो भवति। तदा कार्त्तिकव्रतानां शुद्धाश्विन एवारंभात् ३२
शुद्धकार्त्तिके च संप्राप्ते मासोपवासव्रतस्यापि मासद्वयमनुष्ठानं प्राप्नोति। तच्चाशक्यमुच्यते। यदि द्विमा
सोपवासव्रतस्याश्विने प्रारंभविधाने शुद्धकार्त्तिके च समाप्तिविधाने स्यात्स्यादेवानन्वयमपि। किं तस्या
श्विनशुक्लद्वादश्यामारंभमभिनिधायोपरितनशुक्लद्वादश्यां समाप्तिर्विष्णुरहस्ये निहिता। आश्विन

स्यामले पक्षे एकादश्यामुपोषितः। व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु। अन्यूनाधिकमेवं तु व्र-
तं त्रिंशद्दिनैरिदं। कृत्वा मासोपवासं तु संयतात्मा जितेंद्रियः। ततोऽर्चयेत वै पुण्ये द्वादश्यां गरुडध्वजं। पू-
जयेत्पुष्पमालाभिर्गंधपुष्पविलेपनैः। वस्त्रदानादिभिश्चैव भोजयेत्तु द्विजोत्तमान्। दद्याच्च दक्षिणां तेभ्
प्रतिपन्नसमापयेदिति। ततः शुद्धाश्विनशुक्लद्वादश्यामेतद्व्रतमारभ्योपरितनशुक्लद्वादश्यां समापनी-
यं न मासद्वयमनुष्ठेयं। मासोपवासव्रतस्य च काम्यत्वात्काम्यस्य मलमासात्प्रागारब्धस्य मलमासेऽपि
समाप्तिविधानान्न कश्चिद्दोषः। ननु क्षयमासमृतानां च द्वितीयाद्याब्दिकं वर्धापनं च कस्मिन्मासे कार्य-
मिति चेदपेक्षायां तन्निर्णयायैव क्षयमासांतर्गतमासद्वयविवेकमाह। तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयार्द्धे
तदुत्तरः। मासाविति बुधैश्चिंत्यौ क्षयमासस्य मध्यगौ। प्रथमे तिथ्यर्द्धे पूर्वो मासः। द्वितीये तिथ्यर्द्धे तु
उत्तरमासः। इत्येवं क्षयमासस्य मध्यगतौ मासौ बुधैश्चिंतनीयौ इत्यर्थः। अत्र प्रथमे तिथ्यर्द्धे मृतस्या-
ब्दिकं तत्रोत्पन्नस्य च वर्धापनं च पूर्वे मासि कार्यं। द्वितीये तिथ्यर्द्धे मृतस्याब्दिकं तत्रोत्पन्नवर्धापनमुत्तरे

मासिकार्यमिति विवेकः॥ ॥इति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्यावि-
शारदश्रीहेमाद्रिविरचिते चतुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये मलमासनिर्णयः समाप्तः॥श्री॥ ॥
॥अथ सामान्यतः सर्वतिथिनिर्णयः॥ ॥तिथिश्च द्विप्रकारा संपूर्णा खंडा च। तत्र संपूर्णा स्कंदपुराणे।
दर्शिता। प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः संपूर्णा इति विख्याता हरिवासरवर्जिताः॥ हरिवास-
त्वमेका रसंपूर्णत्वमेकादशीनिर्णये वक्ष्यते। असंपूर्णा दिनद्वयसंबंधिनी खंडा। तस्या दिनद्वयसंबंधित्वाच्च ता-
यनुष्ठाने पूर्वा परा वा ग्राह्येति संदेहनिर्णयः क्रियते। तत्र निगमः॥ युग्माग्नियुगभूतानां षण्मुन्योर्वसुरं-
ध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा। प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं। एतद्व्यस्तं मह- का०हे०
द्दोषं हंति पुण्यं पुराकृतं इति। युग्मं द्वितीया। अग्निस्तृतीया। युग्मं चतुर्थी। भूतं पंचमी। षट् षष्ठी। मुनिः स- ३३
प्तमी। वसुरष्टमी। रंध्रं नवमी। रुद्र एकादशी तिथ्योर्युग्ममभिधानात्। द्वितीयादिषु प्रतिपदं तां सुक्रमेण द्व-
योर्द्वयोस्तिथ्योः परस्परमेव युग्मं महाफलं। न पुनर्यैनैव संतिथ्यंतरयुग्मं इत्यर्थः॥ अनेनोक्तयुग्मसप्तके के-

न पूर्वा तिथिरुत्तरविद्धा कार्या उत्तरा तु पूर्वविद्धेत्युक्तं भवति। भविष्यत्पुराणे। द्वादशीकल्पे तु युग्मा सुरु-
तरा मास्तीति पठ्यते। अनंतचतुर्थी रामस्तृतीया। तत्रैव युग्मानि कृत्वा पुण्यानीति पाठांतरं। तथा अनंतभूता-
नीति। अत्र केचिदाहुः॥ शुक्लप्रतिपदमावास्यायुक्ता ग्राह्या प्रतिपद्यमावास्येति वचनात्। यत्तु प्रति-
पत्सद्वितीया। पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथिरि-
ति। पैठीनसिवचात् पैठीनसिवचनाच्च। अत्र केचित् संमुखा सायाह्नव्यापिनीति व्याचक्षते। संमुखा नाम
सायाह्नव्यापिनी दृश्यते यदा इति स्कंदपुराणवचनात्। तदयुक्तं। वक्ष्यमाणवचनविरोधात्। स्कंद-
पुराणस्यान्यविषयत्वेनोपपत्तेश्च। तस्मादत्र संमुखा पूर्वविद्धा विवक्षिता। सापि चापराह्णव्यापि-
न्येव। प्रतिपत्संमुखा कार्या या भवेदापराह्णिकीति। स्कंदपुराणवचनात्। अन्यास्तु शुक्ला कृष्णा वा द्विती-
यायुतैव ग्राह्या। प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युतेत्यापस्तंबवचनात्। न तु शुक्ला प्रतिपत्पूर्वा ग्राह्येत्ये-
तदुक्तं। तत्रैवायं विशेषः॥ कस्मान्न भवति। प्रतिपत्संमुखा कार्या या भवेदापराह्णिकी। प्रतिपत्सद्वितीया-

द्वितिज्ञस्यपूज्ञविषयमेव।तत्रचनापराह्णिकनियमः।पैठीनसीवचनमपिशुक्लप्रतिपद्विषयमित्युच्यते।एवं
सतिपंचमीचेतिप्रतिपत्संमुखाकार्या इतिवचनद्वयस्यकेवलशुक्लप्रतिपद्विषयत्वेनसंकोचः।प्रसज्येत।
प्रतिपत्सद्वितीयास्यादितिसंकोचवाक्यस्तुपक्षद्वयेपिवसिष्ठः।।नगवतायुग्माग्निवाक्यविषयपरित्या
गाश्रयणात्।नतुपंचमीसप्तमीचैवइतिवचनंसंकोचेनावकाशेनैवविद्यते।दोषायश्वसामान्यशास्त्रस्य
विशेषशास्त्रेणोपसंहारस्ययुक्तत्वात्।।संकोचभयादनुपहारेसर्वत्रोपसंहारोच्छेदापत्तेः।सत्यमेवंप्र
तिपत्संमुखाकार्येतिवचनसंकोचेत्ववकाशेननविद्यते।नेतदुनयत्रापिप्रवर्त्तते।एवंपंचमीसप्तमीचै
वेतिवाक्यसंकोचेप्यस्मात्सत्वेननविष्यतिप्रतिपत्संमुखाकार्येतिवचनसंकोचः।सोप्यापद्यतेइति
नास्यसंकोचोयुक्तइत्युच्यते।नतुकस्यप्रतिपदिः पूर्वविद्धत्वमप्राप्तं।अतश्चसापूर्वविद्धायाह्यासाचाप
राह्णीकीसर्पद्वयविधानात्गौरवंस्यात्।शुक्लप्रतिपदस्तुविद्धत्वप्राप्तंइति।तद्विषयत्वेनगौरवमिति
चेन्नउच्यते।अपराह्णिकीतावत्प्रतिपत्स्वरूपतोविद्यते।ततश्चयाअपराह्णिकीप्रतिपत्सासन्मुखाका

को०३०
३४

र्या इतिगौरवंततःश्चोभयप्रतिपद्विषमिदं।ततोपराह्णिप्रतिपत्पूर्वविद्धा।अन्यानूत्तरविद्धेतिव्यव
स्थासिद्धा।तदेतदयुक्तं।प्रतिपदः संमुखयोः कर्तुमशक्यत्वात्।ततश्चसंमुखायांप्रतिपदिकर्मका
र्यंतच्चापराह्णव्यापिन्यामितिविधाने गौरवं।शुक्लप्रतिपद्विषयत्वेतुनायंदोषः।एवंपंचमीसप्तमीचै
वेतिवाक्यसंकोचोबलादापतितोपरिहार्य।तस्मात्शुक्लप्रतिपत्पूर्वायाह्याः।यद्यपराह्णका।कृष्ण
प्रतिपत्सवैर्ब्नैरेवेतव्यवस्था।तेनयत्केश्चिदुक्तं।प्रतिपत्सद्वितीयास्यादितिवचनंतिलकाशोककर
वीरव्रतव्रतविषयत्वं।तेषांपूर्वाह्णएवविधानादिति।तन्निरस्तं।कर्मान्तरस्यादितिवचनंतिलकाशो
ककरवीरव्रतविषयत्वं।तेषांपूर्वाह्णएवविधानादिति।कर्मान्तरस्यापिपूर्वाह्णएवविधानात्।केव
लतद्विषयत्वेनसंकोचेकारणाभावाच्च।पूर्वाह्णविहितनस्कलकर्मविषयत्वमुच्यते।तदयु
क्तं।यस्मिन्कालेउयत्कर्मतत्कालव्यापिनीतिथिरितिसामान्यवचनेनैवास्यार्थस्यसिद्धत्वात्।किंचै
वंसतिप्रतिपत्संमुखीकार्येतिवचनमपराह्णविहितकर्मविषयप्रसज्येत।ततश्चास्यापिवैयर्थ्यं

स्यात्। सामान्यवचनेनैव सिद्धेः॥ किं चैवं पूर्वविद्धपरविद्धपदद्वयग्रहणं प्रतिपादकसर्ववाक्यं वैय
र्थ्यं प्रसज्येत। प्रातिस्विक। पूर्वाह्णादिविधायकवाक्येभ्यः॥ प्रदर्शितसामान्यवचनाच्चास्यार्थस्य सिद्धत्वा
त्। दिनद्वयेऽपि कर्मकालव्याप्तितिथ्यभावे पूर्वविद्धपरविद्धग्रहणप्रतिपादकवाक्यद्वयस्यैव प्रमाण
त्वात्। तस्मादस्मदुक्तैव व्यवस्था युक्ता। अपरे त्वेवमाहुः। एकादशी तथा षष्ठी अमावास्या चतुर्थिका।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः। इति वचनात्। प्रतिपदः पूर्वविद्धत्वं उपवासविषये। प्रतिपत्स
द्वितीया स्यादिति तद्व्यतिरिक्तविषयमिति। न त्वेवं सति प्रतिपद्यमावास्येति पंचमी सप्तमी चैवेति
प्रतिपत्संमुखा कार्येति वचनसंकोचः प्रसज्येत। अस्मत्पक्षे तु प्रतिपत्सद्वितीया स्यादित्यस्यैव संको
चः। इति विशेषो विद्यते। अतः कथमियं विषयव्यवस्थेति चेत्। उच्यते। बहुवाक्यसंकोचोऽपि स्वीक्रियते
सामान्यशास्त्रविशेषशास्त्रेणोपसंहारस्य युक्तत्वात्। न चात्र संकोचोऽपि विद्यते युग्मादिवचनेन द्विप्रतिप
दः पूर्वविद्धत्वेऽनिर्दिष्टे प्रतिपत्सद्वितीया स्यादिति वचनेन परविद्धत्वं। एवं विरोधे सति कर्मविशेषानुपादा

कालदे० ३५

नात्। कस्मात् ग्रहणे कर्मणो ग्रहणमित्यपेक्षायामुपवासे प्रतिपदः पूर्वविद्धत्वाभिधानात्। युग्मवाक्ये स एव
गृह्यते। प्रतिपत्सद्वितीया स्यादिति वचने तूपवासव्यतिरिक्तकर्मग्रहणमिति कुतः संकोचः। तदुक्तं। प्रतिपत्स
द्वितीया स्याद्द्वितीया प्रतिपद्युतेत्यत्रोत्तरपादे प्रतिपद्द्वितीयेऽह्न्येव वक्ष्यते। तेन पूर्वपदेऽपि। तदेव प्रतीयते
ग्राह्ये द्वितीया पंचमी चैव दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी। इति वचनेन प्रतिप
न्मात्रस्य पूर्वविद्धस्योपोष्यत्वाभिधानात्। युग्मवाक्यस्योपवासविषयत्वे केवलशुक्लप्रतिपदः पूर्वविद्धत्वा
भिधानमनुपपन्नं स्यात्। अपरतरपि शुक्लप्रतिपद्विषयं तर्हि द्वितीया पंचमी वेधादित्यत्र द्वितीया तृतीयेऽपि
शुक्ले एव ग्राह्ये तेन शुक्ले तृतीया परयुतोपोष्येत्यर्थः स्यात्। तत्र रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तमोऽन्या
स्वपि सर्वकार्येषु गणयुक्ता प्रशस्यते। इति वचनेन रंभाव्यतिरिक्तसर्वकार्येषु तृतीयामात्रस्य परयुतत्व
विधानवचनात्। पूर्वविद्धप्रतिपदेकवाक्येभ्यः॥ सामान्यतः पूर्वविद्धत्वप्रतीयमानं द्वितीया पंचमी वेधा
दिति वचने द्वितीयशास्त्रानां साधारणत्वप्रतीयमानं विनाकारेण बाधितं स्यादिति तस्मादस्मदुक्तैव व्यवस्था

युक्ता। द्वितीयां केचिदाहुः। शुक्लद्वितीया पराविद्धा युग्माग्नीति वचनात्। अस्य च शुक्लपक्षविषयत्वं पक्षान्तरे च
तुर्दशी पूर्णिमा युग्मा न सा दर्शयदि वर्गतश्यां। यत्तु ब्रह्मवैवर्ते वचनं द्वितीया प्रेतपक्षयुतेति वत्। कृष्णद्विती
याविषयं। अन्ये त्वाहुः। शुक्लद्वितीया परयुता ग्राह्या। कृष्णद्वितीया पूर्वा। शुक्लपक्षे तिथिर्ग्राह्या यस्याम
भ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः। मार्कण्डेयवचनात्। यत्र त्वेकैकवचनेन पूर्व
विद्धा ग्राह्येत्युच्यते। अपरेण परयुतेति तत्रानेन वाक्येन व्यवस्था क्रियते। एवं सत्यपेक्षितार्थप्रतिपाद
नं भवति न तु शुक्लपक्षव्यवस्थाप्यावस्थित चतुर्दश्या विषयत्वे यत्तु केषांचित् व्याख्यानं। युगादिविषयमे
तद्वचनं। दैवे शुक्ले दैवतया कृष्णे युगादौ कवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके। इति वच
नादिति तदपि निरस्तं उक्तप्रकारेण कांक्षितसमर्पणार्थवत्त्वे संभवति केवलयुगादिविषयत्वेन सं
कोचे कारणाभावात्। यत्तु व्याख्यानं। पक्षशब्देन दैवकार्यमुपलक्ष्यते। तस्य प्रायेण शुक्लपक्षे विहितत्वात्
कृष्णपक्षशब्देन च पितृकार्यं तस्य प्रायेण कृष्णपक्षे विधानात्। दैवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः॥ तिथिरेकेन

का०दे०
३६

पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः इति। इदं याज्ञवल्क्यवचनाच्च। पूर्वविद्धापि दृष्टा द्वाकीर्तिता तिथि
न ग्राह्या विबुधैरस्तु युक्ते कानास्करविया। वचनाच्च। तदप्ययुक्तं। विना कारणं लक्षणाप्रसंगात्। वाक्या
न्तरस्यापि पर्यनिर्णयेन च यथा श्रुतौ पपद्यमाने प्रतिपाद्यमानः इति च निःप्रमाणकं। तस्मात् कृष्णद्वितीया पू
र्वा शुक्लद्वितीयोत्तरेति व्यवस्था। अपरे त्वेवमाहुः। द्वितीया तु सर्वा तृतीयायुता ग्राह्या। युग्माग्निवचना
त्। यत्तु ब्रह्मवैवर्ते। प्रतिपत्संमुखा कार्या द्वितीया द्विजसत्तमैः। आपस्तम्बेरु। द्वितीया प्रतिपद्युतेति त
त्पूर्वादिन पूर्वाह्णव्यापिद्वितीयाविषयं। तथा स्कन्दपुराणे। प्रतिपन्मुखा कार्या या भवेदापराह्णिकी।
पूर्वाह्णिकी च कर्तव्या द्वितीया तादृशी विनो। तादृशी संमुखा पूर्वविद्धेत्यर्थः। न तु कृष्णद्वितीया पूर्वा ग्रा
ह्या। तत्रैवायं विशेषः। पूर्वाह्णिकी च कर्तव्येति शुक्लद्वितीयाविषये च। न तत्रापराह्णिकीत्यनियम इति व्य
वस्था किं न स्यात्। उच्यते। एवं सति पूर्वाह्णिकी च कर्तव्येति प्रसज्येत। प्रतिपत्संमुखी कार्या द्वितीयेति। द्वि
तीया प्रतिपद्युतेति वचनद्वयसंकोचस्तु पक्षद्वयेऽप्यविशिष्टः। न वतायुग्माग्नीत्यस्य शुक्लद्वितीयाविषय

त्वमंगीकृत्य तद्विषयपरित्यागाश्रयणात्। अस्माभिस्तु पूर्वाह्णिकी च कर्तव्येत्येतद्विषयपरित्यागाश्रयणात्। स्वरूप
तश्च पूर्वाह्णिकी द्वितीया विधीयते। तस्या पूर्वविधत्वे विधीयत इति पूर्ववज्ञौरव परिहारः। शुक्लपक्षे तिथिद्वैधे
तितु वचनं साकांक्षं तिथ्यन्तरविषयं। तस्मात्पूर्वाह्णिकी द्वितीया पूर्वविद्धा अन्या तु उत्तरविद्धेति व्यवस्था। एत
दप्युक्तं। पूर्वविद्धे वगौरवस्य परिहर्तुमशक्यत्वात्। तस्मात्कृष्णद्वितीया पूर्वा ग्राह्या। यद्दि पूर्वाह्णिकी शुक्लद्विती
या सर्वा तु उत्तरैवेति व्यवस्था॥ एतेन यत्कैश्चिदुक्तं। द्वितीयाप्रतिपद्युक्तत्वं तद्यम द्वितीयाविषयं। तस्या ह्निनगीनी
निःक्रान्तरे नोऽस्ति नैकत्वता। यावितविषयं॥ तेषां स्वकालव्यापित्वानियतत्वात्। नाप्युपवासविषयं। तस्याप
रविद्धायामेव विहितत्वात्। तन्निरस्तं। पूर्वाह्णिक्या द्वितीयायाः पूर्वविद्धाया उपादेयत्वमुक्तं। तच्चैकवक्तादिचतुर्थ
यव्यतिरिक्तकर्मान्तरविषयमप्युपपद्यत इति यम द्वितीयाविषयत्वेन निःप्रमाणिकसंकोचाश्रयणस्यायुक्त
त्वात्। तस्मादस्मदुक्तैव व्यवस्थितेति। अन्ये त्वेवं व्यवस्थामाहुः। एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इति विष्णुधर्मोत्तरे शिवरात्रीवचनात्। युग्माग्नि इति वचनमुप

को॰ दे॰
३५

वासविषयं। द्वितीयाप्रतिपद्युतेत्यादि। पूर्वविद्ध द्वितीयाप्रतिपादकमुपवासव्यतिरिक्तविषयं। तत्र चायं वि
शेषः। पूर्वाह्णिकी च कर्तव्येति पूर्वव्यवस्थायां तु प्रतिपत्संमुखा कार्या द्वितीयाप्रतिपद्युतेति। वचनद्वयस्याप
वासव्यतिरिक्तकर्मविषयत्वेन शुक्लपक्षे प्युपपद्यमानस्य कारणं विना संकोचः प्रसज्येत्। ननु युग्माग्निवाक्य
स्योपवासव्यतिरिक्तविषयत्वेनापि शुक्लपक्ष एवोपपद्यमानस्य। न वत्मते पि संकोचः प्रसज्येत। उच्यते। एतद्वा
क्यमसंकोचस्तु वत्पक्षेपि विद्यते। कृष्णद्वितीयोपवासविषयत्वेनाप्युपपद्यमानस्यास्य केवलशुक्लद्वितीया
विषयताश्रयणात्। न तु पक्षद्वये संकोचो विशेषेपि न वत्पक्षे शुक्लद्वितीयोपवासव्यतिरिक्तत्वरूपकर्मत्यागा
दस्मत्पक्षे तु कृष्णद्वितीयोपवासमात्रस्य त्यागाव कल्पत्वकृतो विशेषो विद्यते। सत्यमेव। किंतु नवस्पक्षे प्रदा
र्शितवाक्यद्वयसंकोचः॥ अस्मत्पक्षे तु युग्माग्निवाक्यस्यैवेति विशेषः॥ किं चात्र संकोचोपि न विद्यते। तथा च॥
युग्माग्निवाक्येन द्वितीयापरविद्धाया ह्युपोष्या स्तु॥ द्वितीयाप्रतिपद्युतेत्यादिना च पूर्वविद्धत्वं। न चात्र कर्मविशेषउ
पात्तः। अतश्चात्र कस्य कर्मणो ग्रहणमित्यपेक्षायामुपवासे द्वितीयायाः परविद्धत्वविधानाच्च एवं युग्मवाक्ये।

यत्वतो द्वितीया चेतिदयुक्ते तिद्वलादिवचनैरुपवासव्यतिरिक्तकर्मग्रहणमिति ज्ञेयः संकोच इति तदयुक्तं उ
पपुत्रैतित्तया अपि द्वितीयाया उपोष्यत्वस्योपवासतिथिनिर्णयदर्शितत्वात् तस्मात्पूर्वलेखवस्थास्था कार्य
र्येति। तृतीया तु द्वितीयायुताग्राह्या॥ युग्माग्नीति वचनात्। सापि च रंभा तृतीयैव। तथा च ब्रह्मवैवर्ते। रंभा
ख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम। अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते। गणश्चतुर्थी। स्कंदपुराणे। द्वि
तीयया तु या विद्धा तृतीया न कदाचन। कर्तव्या व्रतिभिस्तात धर्मकामार्थतत्परैः। विद्धायैकांतरं नास्य तृतीयां
तु एव वर्जनी। तत्रात्र ऋषिनिषीतं वचनं कृतिकासूतः। वृद्धवक्ष्यात तथा रंभा सावित्री वटपैतृकी। कृष्णपा न
पावसण् कर्तव्या संमुखा तिथिः। नान्येषु संमुखा कार्या तृतीया चाष्टमी द्विजः। अन्या सर्वा तृतीया चतुर्थी का०हे० ३८
युतेव। तथा च ब्रह्मवैवर्ते। चतुर्थीसंयुता या च सा तृतीया फलप्रदा। अपरस्विवा चतुर्थीसंयुता या च सा तृती
या फलप्रदा। अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रदायिनी। ब्रह्मवैवर्ते। तृतीया तु न कर्तव्या द्वितीयापद्दिता वि
नो। तृतीयया युतां तां तु यः करोति नराधमः। संवत्सरकृतेनेह नरो धर्मेण मुच्यते। तथा। द्वितीयाशेषसंयु

क्ता तृतीयां कुरुते नृपा स याति नरकं घोरं कालसूत्रं भयंकरं। द्वितीयाशेषसंयुक्तां या करोति विमोहिता। सा वै
धव्यमवाप्नोति प्रवदंति मनीषिणः। स्कंदपुराणे। तृतीया तु न कर्तव्या द्वितीयासंयुता तिथिः। या करोति विमूढा
त्मा पुरुषो वा शिखिध्वज। द्वितीयासंयुता तात पूर्वधर्मा विलुप्यते। विधवा दुर्भगत्वं च न वै नैवात्र संशयः॥
कलाकाष्ठापि या चैव द्वितीया संप्रदृश्यते। सा तृतीया न कर्तव्या कर्तव्या गणसंयुता। यच्छेत्परमं गुप्तं व्र
तकर्ता शिखिध्वज। भविष्यत्पुराणे। वाराहीकल्पे। कार्या द्विवीयाया सार्धं न तृतीया कदाचन। ननु द्वितीय
यायुततृतीयाया विधिः अशक्तद्वितीयाविषयः। निषेधस्तु शक्तद्वितीयाविषयः इति व्यवस्था किं न स्यात् न
च वाक्यं। एवं सति रंभावाक्यानर्थक्यप्रसंगेन। सर्वेषामपि व्रतानां तत्र प्राप्तेः। पूर्वविद्धतृतीयावाक्यस्य
५३ अशक्तपक्षे बाधः। द्वितीयाविद्धनिषेधवाक्यस्य शक्तपक्षे इत्यपरं दूषणद्वयं इति उपवासतृतीयायाः परयु
तायाः अशक्तपक्षेपि ग्रहणात्। तदपवादकतया रंभावाक्यस्यार्थवत्तोपपत्तेः न चापवादेष्वुत्सर्गस्य बाधा
दस्येव दर्शिणमिति वक्तव्यं। यतो न व्रतपक्षेपि सर्वव्रतविषयतया चतुर्थीयुता तृतीया ग्रहणे प्राप्तं तदप

वाद्करंनावाक्यमुख्येनानवस्थैवचद्वयगतपाक्षिकबाधकल्पोवाथएकस्मिन्नपिवचनेविद्यतएवतथा
हि।युग्माग्नियुगभूतानित्वाक्यंशुक्लकृष्णपक्षसाधारणंनकेवलशुक्लपक्षविषयंतत्रापिव्रतमात्रसाधार
णंमत्तुरंनेकविषयमुच्यतेइतितुल्योबाधः।किंच।अमावास्यातृतीयाचताउपोष्याःपरान्विता।इत्युपवास
परमवच्छितंस्यात्।व्रतांतरेपिचचतुर्थीविद्धतृतीयायवारणात्।तस्मात्द्वितीयाविधिनिषेधौशुक्लपक्ष
द्वितीयाविषयावितितदेतदपेशलं।एवंद्विसतिद्वितीयायुततृतीयानिषेधकयागुदाहृतवक्यस्यसं
कोचःप्रसज्येत।चतुर्थीसंयुतावेत्यापस्तंबवचस्यैववर्त्तवचनस्यकर्तव्यागणसंयुतेतिस्कंदपुराणवचन
स्यसंकोचःप्रसज्येत।अस्मत्पक्षेतुनसंकोचः।रंभाव्रतपरित्यागेनद्वितीयाविद्धतृतीयानिषेधानांचतुर्थी
युततृतीयाविधीनांचशुक्लपक्षेपिप्रवृत्तेरांगीकरणात्।अन्येषुसर्वकार्येष्वितिविहायैकांतुरंभाख्यां
तिवचनबाधोपिनवत्पक्षेप्रसज्येत।अस्मत्पक्षेतुयुग्माग्निसत्वेपवरंभाव्रतविषयत्वेनसंकोचइतिम
हान्विशेषः।अमावास्यातृतीयाचेतिवचनेतिथिविशेषाणामुपवासेपरमितिविद्धप्रतिपादकं।नतु

कार्यांतरेपरविद्धत्वनिषेधकं।एतेनैतन्निरस्तं।द्वितीयायुततृतीयानिषेधश्चतुर्थीयुततृतीयाविषयौपो
पवासविषयौ।अमावास्यातृतीयाचताउपोष्याःपरान्विताइतिवचनात्।द्वितीयाविद्धतृतीयाविधिस्तुतद्व्यति
रिक्तविषयइति।अन्येषुसर्वकार्येषुगणयुक्ताप्रशस्यतइतिशाद्विवचनेनोपवासव्यतिरिक्तकार्येपिपर
विद्धाविधानात्।नतुयुग्मवाक्यस्यरंभातृतीयाविषयत्वेवैरूप्यंप्रसज्येत।उक्तद्वितीयायांतृतीयांतर
स्यापितृतीयायुक्तत्वांगीकारात्।तदर्थमग्निशब्देनतृतीयांतस्यापिग्रहणात्।यद्वारंभातृतीयाएवपरविद्ध
त्वंप्रसज्येत।तदुक्तं।अत्रकर्मविशेषोपादानात्तृतीयारंभाव्रतेपूर्वविद्धापिग्राह्या।शुक्लद्वितीयायुत
र्वस्मिन्नपिकार्येपरयुतेसेतस्मिन्नर्थेवचनांतरपर्यालोचनयास्वीक्रियमाणेदोषाभावात्।तस्मादस्मदु
क्तैवव्यवस्थायुक्ता।चतुर्थीपंचमीयुतायाह्या।युग्मभूतानामितिवचनात्।यत्तुनविष्णुपुराणे।द्वादशी
कल्पब्रह्मवैवर्तयोवचनं।चतुर्थीसंयुताकार्यातृतीयाचतुर्थीका।तृतीययायुताचैवपंचम्याकारयेत्
क्वचित्।तथास्कंदपुराणे।चतुर्थ्येवकर्तव्यातृतीयासंयुताविभोइतिचतुर्थ्यांतृतीयायुक्तचवचनेत

द्विनायकव्रतविषयं। तथा च ब्रह्मवैवर्त्ते। चतुर्थीसंयुता या च तृतीया सा फलप्रदा। चतुर्थी तृतीयायां महापुण्यफलप्र-
दा। कर्त्तव्या व्रतिभिर्वत्स गणनाथस्य तोषणं। अत्र च गणनाथं सुतरां तोषयतीति गणनाथसुतोषिणीति च म-
तुविशेषणसामर्थ्यात् विनायकव्रतविषयत्वं प्रतीयते। अन्ये त्वेवमाहुः। शुक्लचतुर्थीपरयुता कृष्णे चतुर्थी पू-
र्वयुता शुक्लपक्षे तिथिर्ज्ञेया इत्युदाहृतवचनादिति। तदयुक्तं। तृतीयायुतचतुर्थीग्रहणवाक्यस्योदाहृतब्रह्म-
वैवर्त्तवचनेन विनायकप्रतीतेः। शुक्लपक्षे तिथिर्ज्ञेयेति वचनं विनायकव्रतव्यतिरिक्तविषयं। तस्मात्पूर्वो-
क्तैव व्यवस्था ज्यायसी। जया च यदि संपूर्णा चतुर्थी क्षयते पुनः। सा जया चैव कर्त्तव्या नागविद्धां न कारयेत्॥ कालनि० ४०
इति वचनं विनायकव्यतिरिक्तविषयं। उभयविषयत्वे बाधगौरवप्रसंगात्। तत्रैव पंचमीयुतचतुर्थीप्राप्ते
निषेधसामंजस्याच्च। पंचमी तु चतुर्थीयुता ग्राह्या। तथा च युग्मवाक्ये युगभूतानामिति स्कन्दपुराणे। पंचमी
तु तथा कार्या चतुर्थीसहिता विभो। ब्रह्मपुराणे भविष्यत्पुराणे चादर्शकल्पयोः। पंचमी च चतुर्थीयुक्ता का-
र्या षष्ठ्या न संयुता। यत्तु ब्रह्मवैवर्त्तवचनं पंचम्यां तु प्रकर्त्तव्या षष्ठ्या युक्ता तु नारदेति तत् शुक्लपक्षविषयं॥

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविरिति वचनात्। अन्ये त्वाहुः। यदा तु कृष्णकालव्यापिनी द्वितीये द-
ने पंचमी न भवति। तद्विषयमेतद्वचनमिति। अपरे त्वाहुः। पंचमीषष्ठीयुक्तत्वं नागविषयं। तस्याः पूर्वोक्तएव विधा-
नादिति। तदुभयमप्ययुक्तं। प्रतिपत्सद्वितीयास्यादिति वचनस्य तिलकाशोककरवीरव्रतविषयत्वं भंगो-
क्तन्यायायात्। तस्मात् शुक्लपंचमी परविद्धा। कृष्णपंचमी तु पूर्वविद्धेति व्यवस्था। अन्ये त्वेवं व्यवस्थामा-
हुः। पंचम्याश्चतुर्थीयुक्तत्वप्रतिपादकानि निगमादिवचनान्युपवासविषयाणि। एकादशी तथा षष्ठी अमा-
वास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः। इति वचनेनोपवासपंचम्याश्चतुर्थीयुक्तत्व-
स्याभिधानात्। किंच। पूर्वव्यवस्थायां पंचमी तु कर्त्तव्येति वाक्यस्योपवासव्यतिरिक्तविषयत्वेन कृष्णपक्षेणु-
पपद्यमानस्य कारणं विना संकोचप्रसज्येत। न च युग्मादिवाक्यानामुपवासविषयत्वेन संकोचो दोषाय
सामान्यशास्त्रस्य विशेषशास्त्रेणोपसंहारस्य युक्तत्वात्। न च न्मतेपि केवलकृष्णपक्षविषयत्वेन संकोच-
स्याविशिष्टत्वात्। न चैवं विधिविषये संकोचो विद्यत इत्युक्तं प्राक्। षष्ठी तु सप्तमीयुता ग्राह्या। तथा च यु-

ग्मवाक्ये षण्मुन्योरिति। स्कंदपुराणेपि। नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन। सप्तमीसंयुता कार्या षष्ठीच
विंतकैः। ब्रह्मवैवर्त्ते। नागविद्धा तु या षष्ठी न ता पुण्यतया न वेत्। सप्तम्या सह कर्त्तव्या महत्पुण्यफलप्रदा॥
निगमः। नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः। कामविद्धो न वै विष्णुर्न ग्राह्यास्तेपि वासराः। नागः पंचमी
रुद्रोष्टमी। दिवाकरः सप्तमी। कामस्त्रयोदशी। विष्णुर्द्वादशी। सप्तमी षष्ठीयुता ग्राह्या। तथा च युग्मवाक्ये
षण्मुन्योरिति। स्कंदपुराणेपि। षष्ठ्या युता सप्तमी तु कर्त्तव्या तात सर्वदा। षष्ठी च सप्तमी चैव तत्र सन्निहि
तो रविः। भविष्यत्पुराणे। ब्राह्मीकल्पे पद्मपुराणेपि। षष्ठी च सप्तमी तात तेन्योन्यं समाश्रिते। तथा। पूर्वविद्धा
द्विजश्रेष्ठ कर्त्तव्या सप्तमी सदा। अष्टमी नवमीयुता ग्राह्या। तथा युग्मवाक्ये वसुरंध्रयोरिति। ब्रह्मवैव
र्त्तेपि। सप्तमी नाष्टमीयुक्ता सप्तम्यापि सदाष्टमी। सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभेति। क्वचित्तु न सप्त
म्या युताष्टमीति पाठः। स्कंदपुराणेपि। अष्टमी नवमी मिश्रा कर्त्तव्या भूतिमिच्छता। सप्तमीसंयुता चैव न क
र्त्तव्या शिखिध्वजः। एकादश्यष्टमी तात कर्त्तव्या रविसंयुता। पद्मपुराणेपि। नाष्टमी सप्तमीयुक्ता सप्तमी

का॰ हे॰
४१

नाष्टमीयुता। नवम्या सह कार्या स्यादष्टमी नात्र संशयः। एतच्च शुक्लाष्टमीविषयं तथा च निगमः। शुक्लप
क्षेष्टमी चैव शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता। उपवासादिकार्येषु धर्मो ह्येष सना
तनः। क्वचित्तु उपवासेषु कार्येष्विति पाठः। कृष्णाष्टमी तु सप्तमीयुतैव। तथा च तत्रैव। कृष्णपक्षेष्टमी चैव कृ
ष्णपक्षे चतुर्दशी। पूर्वविद्धैव कर्त्तव्या परविद्धा न कस्यचित्। उपवासादिकार्येषु एष धर्मः सनातनः। अष्ट
मीनवम्योर्युग्मं एवं पक्षद्वयेपि शिवशक्त्योः। शिवस्तेन कर्त्तव्यः सुमहोत्सवः। तथा च पद्मपुराणे। अष्ट
म्या नवमी विद्धा नवम्या चाष्टमी युता। अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः। अष्टमीनवमीयुग्मे
ह्योस्याद्महोत्सवः। शिवशक्त्योः शिवः शक्ते पक्षयोरुभयोरपि। नवमी चाष्टमीयुतैव ग्राह्या। तथा युग्म
वाक्ये वसुरंध्रयोरिति। ब्रह्मवैवर्त्तेपि। अष्टम्या नवमी विद्धा कर्त्तव्या फलकांक्षिभिः। स्कंदपुराणे। भवि
ष्यत्पुराणे ब्राह्मीकल्पे यो न कुर्यान्नवमी तात दशम्यां च कदाचन। पद्मपुराणे। नवम्येकादशी चैव
द्वितीया विद्धा यदा भवेत्। न तदा वर्ज्या विप्रेण गंगांभः सदृशो यथा। भविष्यत्पुराणे ब्राह्मीकल्पे। नव

म्यासह कार्या सा दृष्टमी नवमी तथा। दशमि त्वपूर्वविद्धा ग्राह्या॥ तथा च स्कंदपुराणे। दशमी चैव कर्तव्या सद्दु
र्गा द्विजसत्तम। परा दशमी दिनद्वयेपि कर्मकालव्यापिनी भवति। तदा पूर्वपरा वा विकल्पेन ग्राह्या। तथा
चांगिरा:। संपूर्णा दशमी कार्या परया पूर्वयाथ वा। उक्ता न दूषिता यस्मादिति। सा सर्वतोमुखी। भविष्यपु
राणे द्वादशीकल्पेपि। संपूर्णा दशमी कार्या परया पूर्वयाथवा। उक्ता न दूषिता यस्मात्त्र्यतः सा सर्वतोमु
खी। एकादशी तु परयुता रुद्रेण। द्वादशीयुक्तेति युग्मवाक्यवचनात्। एकादशी न कर्तव्या दशमीसंयु
ता विभो इति ब्रह्मवैवर्तेपि। स्कंदपुराणे चानिषेधाच्च। भविष्यत्पुराणे द्वादशीकल्पेपि। पूर्वविद्धा न क
र्तव्या तृतीया षष्ठिका तथा। अष्टम्येकादशी नूपधर्मकामार्थवांछता। द्वादशी वैकादशीयुता ग्राह्या॥
रुद्रेण द्वादशीयुक्तेति युग्मवाक्यात्। द्वादशी च प्रकर्तव्या एकादश्या युता प्रभो। सदा कार्या तु विद्वद्भिर्वि
ष्णुभक्तैश्च मानवैः॥ इति स्कंदपुराणवचनाच्च। त्रयोदशी प्रकर्तव्या न वेद्या वा परेक्षिकी। अपरेक्षिकीति
पूर्वविद्धेत्यर्थः। पद्मपुराणेपि। एवमेकादशी ग्राह्या द्वादशी तु त्रयोदशी। एतच्च शुक्लपक्षत्रयोद

का० दे०

शीविषयं। यत्तु कृष्णपक्षत्रयोदश्याश्चतुर्दशीयुताया ग्राह्यत्वमभ्यर्थ्यते। तथा च निगमवाक्यं। षष्ठ्यष्टम्यमावा
स्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा। यदा तु नोत्तरेद्युः कृष्णत्रयोदशी। किंतु
पूर्वेद्युर्निषिद्धतिथिविद्धैव। तत्रापदृष्टवमिष्टः। एकादशी तृतीया चेति। तेन शुक्लत्रयोदश्यामपि परेद्युः सं
भवति न पूर्वा ग्राह्येति। अन्ये तु न यत्र त्रयोदशीविषयमेतद्वाक्यमित्याहुः। तदुनयमप्ययुक्तं। यदि त्रयो
दश्यपि परेद्युः संभवे तां न पूर्वयुते ग्राह्या। तथा निगमवाक्ये। कृष्णपक्षे त्रयोदशी। अत्र कृष्णपक्ष इति वि
शेषणं वैयर्थ्यं प्रसज्येत। किंच। किं कृष्णत्रयोदशीविषयमिदं उत शुक्लत्रयोदशीविषयमिति संदेहे
कृष्णत्रयोदश्याः परयुताया ग्रहणविधानात्। शुक्लत्रयोदश्याश्च पूर्वयुताया ग्रहणादेकादश्या द्वा
नात्तु परविधानामुपादानात्। तस्मादहवर्यात्रयोदश्योपि ग्रहणमपि पारविद्धाविषयं स कृष्णत्रयोदशी
विषयं विज्ञायते। तस्मात्पूर्वोक्तैव व्यवस्था ज्यायसी। शुक्ला च चतुर्दशीति पूर्णिमायुता ग्राह्या। तथा च यु
ग्मवाक्ये चतुर्दश्या च पूर्णिमेति। भविष्यत्पुराणे द्वादशीकल्पेपि। एवमेको दशी कार्या द्वादशी तु त्रयोदशी

श्याः। सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता। पद्मपुराणेपि। एकाद-
श्यष्टमी षष्ठी शुक्लपक्षे चतुर्दशी। एताः पूर्वयुताः कार्याः पराः पूर्वेण संयुताः॥ वाराहपुराणे तु। एकाद-
श्यष्टमी षष्ठी शुक्ला चैव त्रयोदशी। अमा त्वापरेण युंसेका न तु पूर्वेण संयुताः। तथा। तृतीयैकादशी षष्ठी
अष्टमी च चतुर्दशी। श्रीशाक्तिया न कुर्वीत पूर्वविद्धसुमानवे। इति ती। नागविद्धा तथा षष्ठी नानुविद्धोम-
हेश्वरः। चतुर्दशी कामविद्धा मिश्रा स्त्रामलिनाः स्मृताः। महेश्वरोष्टमी। अत्राष्टमी चतुर्दश्योः शुक्ले त्वाला-
पे तु श्रावणचतुर्दश्योः शुक्ले अपि रात्रियोगिन्यो ग्राह्ये। मधुश्रावणमासस्य शुक्लायाश्च चतुर्दश्याः सा रात्रि-
व्यापिनी ग्राह्या त्वापरा पूर्वाह्णगामिनीति वचनात्। निशीत्वमतिनूतानि राकय शूलभृद्यतः। अतस्तस्यां प्रदर्श-
नं तत्पूर्वजननं वेदितिच उक्तम् चतुर्दशीति त्रयोदशी युतेवा। तथा च श्रावणपक्षे तु वा। कृष्णपक्षे दशमी चैकाद-
कृष्णपक्षे चतुर्दशी। पूर्वविद्धानुकर्तव्या परविद्धा न कस्यचित्। यत्तु ब्रह्मवैवर्ते। चतुर्दशी दर्शयुक्ता पौ-
र्णमास्या युता विभो। इति। यत्तु नारदीयपुराणे। अष्टम्येकादशी षष्ठी शुक्लपक्षे चतुर्दशी। अमावास्या तृ-

का॰ दे॰
४३

तीया वा कर्तव्या परसंयुताः। तदुपवासविषयं। एकादश्यष्टमी षष्ठी उभौ पक्षे चतुर्दशी। अमावास्या
तृतीया च ता उपोष्याः पराह्णिताः। इति पद्मपुराणवचनात्। यदा तु शुक्लकृष्णद्वयेपि चतुर्दश्यौ पूर्वपरा-
र्कं च प्राप्नुतः। तदा त्रयोदशीयुते एव ग्राह्ये। तथा च स्कंदपुराणे। चतुर्दशी कर्तव्या त्रयोदश्या युता विभो।
मम नक्तं महाबाहो न वै ग्राह्या पराह्णिकी। दर्शविद्धा न कर्तव्या राका विद्धा कदाचन। पौर्णमासी चतुर्दश्या-
ग्राह्या। तथा च युग्मवाक्ये। चतुर्दश्या उ पूर्णिमेति। पद्मपुराणेपि। पूर्वविद्धा तु कर्तव्या सप्तमी व्रतिभिर्न-
नरैः। पौर्णमासि महीपाल पुराणे तिस्वयं गता। एतच्च सावित्रीव्रतविषयं। भूतविद्धा न कर्तव्या दर्शो पू-
र्णो कदाचन। वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति। ब्रह्मवैवर्तवचनात्। ननु एकादश्यष्टमी ष-
ष्ठी पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः पराह्णिता इति। इति पद्युक्तायां पौर्णमास्या-
मुपवासविधानात्। सावित्रीव्रतोपवासोपि व्यतिरेकेणापि पूर्वैवेति सावकाशत्वादुच्यते। एकादश्य-
ष्टमी षष्ठी शुक्लपक्षे चतुर्दशीति। पौर्णमासि महीपालेति। वाक्ययोर्युग्म सावित्रीवाक्ययोश्च न प्रतिप-

युक्तवाक्येन बाधो युक्तः ॥ विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वमिति न्यायात् । सावित्रीव्रतादन्य
त्र प्रतिपन्मिश्रैव उदाहृतवचनात् । शुक्लपक्षे तिथिर्ग्राह्या यस्याममभ्युदितो रविः । इति वचनात् । अमावा
स्या तु प्रतिपद्युता ग्राह्या ॥ तथा च युग्मवाक्ये प्रतिपद्यप्यमावास्येति । पद्मपुराणेपि । षष्ठ्यष्टमी तथा द
र्शः कृष्णपक्षे त्रयोदशी । एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा ॥ प्रचेताः । नागविद्धा तु या षष्ठी सप्तम्
च तथाष्टमी । दशम्येकादशी विद्धा त्रयोदश्या चतुर्दशी । भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुंगव । उत्त
रोत्तरविद्धास्ताः कर्तव्याः कार्गकी श्रुतिः । सप्तम्या च तथाष्टमी नवमी त्रयोदश्या चतुर्दशीति शुक्लपक्षविषयं । य का॰दे॰ ४४
त्तु नारदीयपुराणवचनं । दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनं । पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते
इति तत्सावित्रीव्रतविषयं । भूतविद्धा न कर्तव्येति ब्रह्मवैवर्तवचनात् । भूतविद्धा त्वमावास्या कर्तव्या
न कदाचन । वर्जयित्वा तु सावित्रीव्रतं तु शिववाहनीति । स्कंदपुराणवचनाच्च । अन्ये त्वाहुः । अमावास्
याः प्रतिपद्युक्तत्वमुपवासविषयं । उपवासे तस्याः परयुतत्वाभिधानात् । उपवासव्यतिरिक्त सर्वका

र्येषु पूर्वयुतैवेति । तदयुक्तं । भूतविद्धा न कर्तव्येति भूतविद्धाप्यमावास्येति च वचनविरोधात् । नागविद्धा तु या
षष्ठी दशम्येकादशी तथा । भूतविद्धा सिनीवाली न तत्र व्रतं चरेदिति निषेधविरोधाच्च । एतान्युपवासविष
याणीति चेत् । न बह्वृचवाक्यसंकोचप्रसंगात् । सावित्रीव्रतवाक्ययोरनर्थकत्वप्रसंगाच्च । किं चैवं दैवकार्याणि
भूतविद्धायाममावास्यायां प्राप्नुवंति । ततश्च सिनीवाली न यापित्र्ये दैवेषु सततं कुहूरिति जाबालिवचनं विरु
ध्यते । प्रत्युत पक्षेप्यमामावास्या पूर्वाह्णव्यापिनी यदि । भूतविद्धैव सा कार्या पित्र्यकर्मणि सर्वदेति वचनाद्दै
वकार्यं प्रतिपन्मिश्रायां कार्यमिति गम्यते । तस्मात्पूर्वैव व्यवस्था ज्यायसी ॥ एवं तिथिद्वैधे पूर्वोत्तरग्रहणनि
यमः प्रतिपादितः ॥ छ ॥ इदानीमेतद्विरुद्धानां वाक्यानां विषयव्यवस्था क्रियते । तत्रोशना व्याघ्रश्च । खर्वो दर्पस्त
था हिंसा त्रिविधं तिथिलक्षणं । खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी । खर्वः साम्यं । आचारसारकृता
तु तिथिद्वैधे स्मृतः खर्व इति व्याख्यातं । दर्पो वृद्धिः ॥ हिंसा क्षयः साम्यवृद्धिक्षययोः पूर्वतिथ्यपेक्षया । पितामहः
खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं । खर्वदर्पौ परौ पूज्यौ हिंसा सर्वत्र पूजयेत् । न विष्णुपुराणे द्व

रार्द्धे पठ्यते। खर्वदर्पौ परौ कार्यौ हिंसा स्यात्पूर्वकालिकी। तत्रैवं विरोधे व्यवस्थामाह। व्यासनिगमवाक्यं। द्विती
यादिषु युग्मानां ह्रस्वानां नियमादिषु। एकोद्दिष्टादिश्राद्धे ह्रासवृद्ध्यादिचोदना। नियमादिष्वित्यादिशब्देन
पितृकर्मव्यतिरिक्ते – श्राद्धस्य वृद्ध्यादावित्यादिशब्देन मांगलिकश्राद्धस्य। एवं च पितृकार्ये ह्रासवृद्ध्यादि
चोदनोक्ता नवति। अस्यापवादः स्कांदे। यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिः। यो यस्य विहितः काल
स्तत्कालव्यापिनी तिथिः। याज्ञवल्क्यवृद्धः। कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कु
र्वीत ह्रासवृद्धी न कारणं। पूर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदाः। अपराह्णिकास्तिथयो ज्ञेयाः पित्र्ये धविस्तु
नावहाः इति। एतन्निगमब्रह्मवैवर्त्तवचनमपि कर्मणो यस्य यः काल इत्यनेन समानविषयं। ननु यदा
युग्मदिने कर्मकालव्यापिनी युग्मकाले तु विपरीता तदा ग्राह्या। अत्र केचिदाहुः। युग्मतिथिरेव ग्राह्या। ति
थ्योर्युग्मं महाफलमिति विधानात्। एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतं। इति युग्मातिक्रमे दोषश्रवणाच्च
घटिकादिपरिमिताया अपि संपूर्णत्वाभिधानाच्च। उदाहृतकर्मकालव्याप्तिशास्त्रस्य युग्मवाक्यविषयत्वेप

का०दे०
४५

रिहारेणैवोपपन्नेश्च। शिष्टाचारानुगुण्याच्च युग्मपक्ष एव युक्तः। तदयुक्तं। यद्यपि कर्मकालव्याप्तिशास्त्रं
युग्मवाक्यविषयपरिहारेणाप्युपपद्यते। युग्मवाक्यं च कर्मकालव्याप्तिशास्त्रविषयपरित्यागेन तथाच
युग्मवाक्यस्यैव कर्मकालव्याप्तिशास्त्रविषयपरित्यागो युक्तः। अन्यथा आतिथ्यिकप्रतिपदादिविधीनाम
पि बाधप्रसंगात्। केषुचिद्व्रतेषु स्मृतिवाक्य एव प्रतिपदादितिथिश्रुतेस्तद्बाधे कृत्स्नशिष्टगुणानुरोधे
न प्रसज्येत। संपूर्णत्वाभिधानेनारोपितकर्मणात्। किंच। यदा नाडपरशुक्लषष्ठी दिनमात्रपर्याप्ता द्वि
तीयदिने च सप्तमी त्रिमुहूर्त्तैर्न्ना। तदा अमुक्ताभरणसप्तमी द्वितीये वा। अहः सुतिथयः पूर्णा इति व
क्ष्यमाणवचनात्। न च तत्र दूर्वाष्टमीव्रतमपि तत्रैव कार्यं। अस्याः पूर्वविद्धाया अभिधानात्। ततश्च
विरोधः प्रसज्येत। अमुक्ताभरणसप्तम्यामग्निपक्कविशेषस्यैव भोज्यताविधानात्। दूर्वाष्टम्यां चाग्निप
क्वभोजनाविधानात्। न तश्चसा ह्नतोनयव्रतानां विरोधः स्यात्। अस्मत्पक्षे नायं दोषः। कर्मकालव्याप्ति
शास्त्रपर्यालोचनया द्वितीयेह्नि दूर्वाष्टमीव्रताचरणात्। दैवकर्मणि विधानात्। एवमन्यास्वपि तिथिषु वि

र्वाक्त

रोधउद्भावनीयः॥ तस्मात्सातिरिक्तपराह्णावच्छिन्नपूर्वाह्णादिकालस्य कर्मणामावश्यकत्वात् युग्मानाद
रेण कर्मकालव्यापिनी तिथिर्ग्राह्येति। तथा चैवं व्यवस्था। यदा दिनद्वयेपि नियमादिकर्मकालव्यापि
न्यास्तिथेः संभवः संभवो वा। तद्विषयं युग्मादिवाक्यं। यथा चैकस्मिन् दिने व्रताद्येकोद्दिष्टादिकर्मकाल
व्यापिन्यास्तिथेः संभवे असंभवे च ह्रासवृद्ध्यादिवाक्यं। यथा चैकस्मिन् दिने व्रताद्येकोद्दिष्टादिकर्मकालव्या
पिनी तिथिः॥ अपरस्मिन्नास्ति तदा कर्मणो यस्य यः काल इत्यादिवचनात् कर्मकालव्यापिनी तिथिर्ग्राह्ये
ति। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति मार्कंडे
यवचनमपि यत्रैकैव तिथिरेकेन वचनेन पूर्वाग्राह्यत्वमुच्यते। अपरेणापरयुतेति। तत्र विरोधे सति व्य का॰हे॰ ४६
वस्थापकं न दृष्टव्यं। तथा च तत्र तत्र दर्शितं। व्याख्यानानंतरं च पूर्वमेव निराकृतं। यत्तु विष्णुधर्मोत्तरव
चनं। वर्धमानेंऽशुपक्षस्य उदये पूज्यते तिथिः॥ यदा चंद्रः क्षयं याति तदास्यादापराह्णिकी॥ कृष्णपक्षे ति
थिर्ज्ञेया यस्यामस्तमितो रविः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति तदुभयमपि पूर्ववद्व्या

ख्येयं। यत्तु बौधायनवचनं। सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः॥ वर्धमानस्य पक्षस्य हानौ
त्वस्तमयं प्रति। यच्च वृद्धवसिष्ठस्य। वर्धमानस्य पक्षस्य उदये पूज्यते तिथिः। यदा पक्षः क्षयं याति
तदास्यादापराह्णिकी। तत्खर्वदर्पवचनविसमानविषयं। अन्यत्तु शुक्लपक्षे तिथिर्ज्ञेयेति वचन
समानविषयमित्याहुः॥ तदयुक्तं। चंद्रक्षयवृद्ध्योः पक्षउपचारप्रसंगात्। यत्तु व्याख्यातं। यदा प
क्षो वर्धते षोडशदिनात्मको भवति। तदा परा ग्राह्या। यदा पक्षः क्षीयते चतुर्दशदिनात्मको भव
ति। तदा पूर्वेति। तदप्ययुक्तं। उभयथापि वाक्यस्योपपन्नौ वचनांतरसंभवादिति अर्थेतात्पर्य
कल्पनायायुक्तत्वात्। एवं मूलस्थसंतरकल्पनापि न भविष्यति। नवत्सङ्गेसात्। तस्मात्पूर्वैर्व्या
ख्या युक्ता। अस्मैवं व्यवस्थामाहुः। प्रतिपदादिविशेषेण पूर्वाह्णादिविशेषेण च विहिते धर्मे
पूर्वाह्णादिव्यापिनी तिथिर्ग्राह्या। कर्मणो यस्य यः काल इति वचनात्। ननु कालद्वयविधिवाक्यानामे
व प्राप्तेयमर्थः। सत्यं। किं ह्रासवृद्ध्यादिवाक्यैर्बाधितः। अत एवोक्तं। ह्रासवृद्धी न कारणमिति। उ

तस्तर्हि कारणमिति। उच्यते। यदा द्वे तिथी तत्कालस्थे न भवतः तदा तिथिद्वये पूर्वाग्राह्या। द्वितीयापरा। खर्वो दर्पस्त
थाहिंसा त्रिविधं तिथिलक्षणमिति वचनात्। तिथिसाम्ये तु शुक्लपक्षे परा। कृष्णपक्षे पूर्वा। शुक्लपक्षे तिथि
र्ज्ञेयेति वचनात्। न तु त्रयाणामपि विशेषेण बाधे प्राप्ते किमिति खर्व एव बाध्यते। ब्रूमः प्रथमप्रतीतत्वात्॥
बाधलाघवात्। कालसंबंध्याः सर्वतिथिविषयत्वोनुवादाच्च। कस्तर्हि खर्वस्य विषयः। अमावास्या। तथा च श्रु
तेः। तिथिद्वये सिनीवाली तिथिवृद्धौ कुहूः स्मृता। साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिः। यदा तु द्वे अपि
तिथी तत्कालस्थे न भवतस्तदा युग्मवाक्यपर्यालोचनया निर्णय इति। तदयुक्तं। द्वितीयादिषु युग्मानामि
निगम ४ ति व्यासवचनविरोधात्। शुक्लपक्षे तिथिर्ज्ञेयेति वचनस्य चास्मदुक्तप्रकारेणोपपत्तेः। खर्वबाधकत्वप्र का०हे० ४१
माणाभावाच्च। खर्वदर्पद्वये द्वैकवाक्योपपन्नेषु त्रयदर्पौ सर्वतिथिविषयौ। खर्वस्त्वमावास्याविष
य इति वैरूप्यापत्तेश्च वर्णस्योक्तप्रकारेण वाक्योपपत्तावनुचितत्वात्। तस्मात् पूर्वैव व्यवस्था न्यायसी। य
दा त्वेकस्मिन् दिनेऽल्पं काले स्थिता तिथिः अन्यस्मिन् दिने नाल्पमपि। तदा कर्मणो यस्य यः कालस्तत्क

र्मकालसंबंधिन्येव ग्राह्या। यदा तु दिनद्वयेप्यल्पकर्मसंबंधिनी। तदा कालसद्भिवाक्यैर्युग्मादिवाक्यैश्च व्यवस्थाय
थं पूर्वापरा वा ग्राह्या। एकस्मिन्नपक्षद्वये संपूर्णकालव्यापिनि द्विदिनतिथिसंस्पर्शमात्रेणाप्यनुष्ठितकर्मसगु
णं न वा। तिथिदर्शयितुमाह देवलः। यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नान
दानजपादिषु। पंक्तिपरितोषे तु स्नानदानव्रतादिषु इति पठितं। विष्णुधर्मोत्तरे तु स्नानदानादिकर्मस्विति पा
ठः। व्यासः। उदयन्नेव सविता यां तिथिं प्रतिपद्यते। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। देवलः। यां ति
थिं समनुप्राप्य अस्तं याति दिवाकरः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। पंक्तिपरितोषे तु स्नान
दानादिकर्मस्विति पठितं। न विष्णुपुराणमपि। व्रतोपवासनियमे घटिकैका यदा भवेत्। सा तिथिः सकला
ज्ञेया पित्र्यर्थे चापराह्णिकी। विष्णुधर्मोत्तरे। सा तिथिस्तदहोरात्रं यस्यामस्तमियाद्रविः। तयार्योकेणोक्त
वीतकालसहद्दिनकारणं। पद्मपुराणमपि। व्रते स्नाने तथा नक्ते पित्र्ये कार्ये विशेषतः। यस्यामस्तं गतो भानु
ः। सा तिथिः पुण्यभाग्भवेत्। व्रतोपवासनियमे घटिकैका यदा भवेत्। उदये सा तिथिस्तत्र विपरीता तु पैतृके॥

वीपरीता अस्तमयंसंबंधिनी। स्कंदपुराणे। व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिस्त
त्र विपरीता तु पैतृके। विष्णुधर्मोत्तरे। व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्रा
द्धादावस्तगामिनी। व्यासः। व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। तामेव तिथिमाश्रित्य कुर्यात् कर्माणि
तद्विदः। बौधायनोपि। आदित्योदयवेलायां या स्तोकापि तिथिर्भवेत्। पूर्णा सा तु वगंतव्या प्रभूता नोदयं
विना। अत्रास्तमयकालीनतिथेः संपूर्णत्वाभिधानं पूर्वविद्धोपादेयतिथिविषयं। उदयकालीनतिथेः सं
पूर्णत्वाभिधानं च परविद्धोपादेयतिथिविषयमिति ज्ञेयं। अत्रापि विशेषः। स्कंदेपि। यां तिथिं समनुप्राप्य
यात्यस्तं पद्मिनीपतिः। सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्तापि या भवेत्। यां प्राप्यास्तमुपेत्यर्कः सा चेत्स्यात्त्रिमु का०ई० ५८
हूर्त्तिका। धर्मकृत्येषु सर्वेषु पूर्णां तां विदुर्बुधाः। क्षये पूर्वा तु कर्त्तव्या वृद्धौ कार्या सदोत्तरा। तिथेस्तस्याश्चि
ह्नणया क्षयवृद्धिश्च कारणं विज्ञाणयाः त्रिमुहूर्त्ता या। स्कंदपुराणे। तस्मात्तु त्रिमुहूर्त्ता या इति द्वितीय
पादः पठितः। वृद्धवसिष्ठः। यस्यां तिथावस्तमियात् सूर्यस्तु त्रिमुहूर्त्तकं। प्रागदानजपादिभ्यः सामेवोप।

क्रमेत्तिथिं। अस्यापवादमाह वसिष्ठः। त्रिमुहूर्त्ता न कर्त्तव्या या तिथिः क्षयगामिनी। त्रिमुहूर्त्तापि कर्त्तव्या या
तिथिर्वृद्धिगामिनी। अत्र त्रिमुहूर्त्ततिथिग्रहणपरित्यागे वृद्धिक्षासयोः कारणत्वं वसिष्ठवचनेनोक्तं। शिवर
हस्यसौरपुराणवचनेन च प्रतिषिद्धं। तत्रैवं व्यवस्था। पितृकार्ये वृद्धिक्षासयोः कारणत्वं। निनयमाद्युद्विती
यादिषु युग्मानामिति व्यासनिगमवचनात्। विष्णुधर्मोत्तरे बौधायनप्रोक्ते वा। उदिते दैवतं भानौ पित्र्यं चास्त
मिते रवौ। त्रिमुहूर्त्तं त्रिकश्च सा तिथिर्हव्यकव्ययोः। इति। अस्यार्थः। नानावृदिते सत्युत्तरकालं अक्षो मुहूर्त्त
त्रयं दैवतं दैवदैवसं। तस्मिंश्चास्तमिते तत्पूर्वकालीनमक्षो मुहूर्त्तत्रयं पित्र्यं पित्र्यदैवसं। अतस्तावत्काल
व्यापिनी या तिथिर्भवति सैव क्रमात् हव्यकव्ययोर्ग्राह्येति। अत्र केचिदाहुः। द्विमुहूर्त्तमित्यनुकल्पः। त्रिमुहूर्त्ता
न कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्त्ता न कर्त्तव्या या स्यादित्यभिधानात्। तिथिर्वृद्धिगामिनीति द्वयवचना
त्। एतच्चोदयसंबंधिविषयं। अस्तमयसंबंधिन्यास्त्रिमुहूर्त्ताया एव ग्राह्यत्वाभिधानात्। ननु कल्पश्चावरूपक
कर्मार्थं। यदा तु युग्मदिने अस्तमयसंबंधिनी अयुग्मदिने उदयास्तसंबंधिनी। तत्रोभयसंबंधिन्योः प्रावस्थ

न्नेव त्याज्या। युग्मदिनसंबंधिन्याः क्रियानर्हाया असंकल्पत्वात्। यदा तु युग्मदिने तु अस्तमयात्प्राक् न दृश्यते तदा यु
ग्मदिने अस्तमयात्प्राक् एव समाप्यते। तत्रोक्तं। ज्ञानबालिद्विजगौतमाद्यैः। अहस्तु तिथयः पुण्याः कर्मानुष्ठान
तो दिवा। नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते। अहोरात्रसाध्यव्रतस्य तु न युग्मयोगिन्यामेव कार्यं न तु यु
ग्मत्वानादरः। तथा च वृद्धयाज्ञवल्क्यप्रोक्तपद्मपुराणयोः। दिवारात्रौ व्रते यच्चाक्रमे वा तिथिर्गता। त
स्यां तु न परयोगिन्यामाचरेत्सद्व्रतं व्रती। न चैवं सति षष्ठीसप्तम्यादियुग्मे सप्तमीव्रतसंकल्पः। कदाचन तावत्स
प्तम्यादिकाले प्रातःसंकल्पयेदिति ह्यानुपवासव्रतादिकमिति तस्य प्रातःकाले विधानात्। न च प्रातः। शुक्लपक्षे
रविदिने षष्ठ्यां चेदुत्तरायणे। पुनामधेयनक्षत्रे गृह्णीयात्सप्तमीव्रतं। इत्यादिवचनैः सप्तम्यादिकालसप्त
म्यादिव्रतसंकल्पश्रवणात्। न वा युग्मदिने युग्मपुण्यत्वाभिधानात्। तदतिक्रमे दोषश्रवणाच्च। अत्र केचिदा
हुः। युग्मदिन एव प्रातःसंकल्पः करणीयः। युग्मपुण्यत्वाभिधानात्। पूर्वापरयोरपि तिथ्योः साकल्यविधा
यकवचनानामभेदर्शयिष्यमाणत्वात्। स्वीयस्वीयकार्यकरणार्हत्वातिरिक्तसाकल्याभावात्। तेन षष्ठ्या का०द्वे० ४९

दिकाले तु सप्तम्यादिकार्यमित्यवगम्यते। न च प्रातःसंकल्पग्रहणमित्यपि नियमः। नीमवादद्रूपादिव्रतेषु
स्याप्यतदुपदेशात्। तस्मात् युग्मतिथावेव संकल्पः। स च प्रातरेव न सप्तम्यादितिथिकाल इति ज्ञेयं। अपरे
त्वेवमाहुः। यदा एकस्मिन् दिने कर्मोपक्रमकालसंबंधिनी तिथिः। नापरस्मिन् दिने तदा कर्मोपक्रम
कालसंबंधिन्येव ग्राह्या। तथा बौधायनः। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे। तिथिर्या निमता सा
तु कार्या नोपक्रमोज्झिता। स्कंदपुराणेपि। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे। विद्यमानो न वेदं
गं नोज्झितोपक्रमेण तु। इति युग्मपुण्यत्वाभिधानसाकल्याभिधाने च। बौधायनोदितवचनविषयपरि
त्यागेनाप्युपपद्यते। अन्ये त्वाहुः। यदैकस्मिन् दिने कर्मोपक्रमकालसंबंधिनी अपरस्मिन् दिने च
कर्मसमाप्तिकालसंबंधिनी तद्विषयमेव बौधायनादिवचनमिति। एवं युग्मादिवाक्येष्वपि पूर्वेद्युर्या
युग्मायालाने अयुग्मतिथियोगिनी वेधदोषग्रासिस्पर्शादुक्तं। दोषदोषसनारदीयपुराणे दर्शितः
हानवाऊतु॥ ॥अस्माकं त्वसतिर्ध्वसन् कस्मिंस्थाने न विष्यति। निराधाराः कृताः सर्वे किन्तु नो ह्या

मनोजनेन॥ब्रह्मोवाच॥द्वितीयां ते स्थितिं नैकानागाते च द्वितीयकैका॥अष्टम्यादौ तृतीया तु दशम्या चतु
र्थिका॥प्रतिपद्दिनः कृत्स्नापं च मानवतां स्थिति॥षष्ठी त्रयोदशी घाते आरुद्रे कृष्णचतुर्दशी॥तथापि नववर्ता
वासः सुदृढः परिकीर्तितः॥एवं प्रोक्तास्तु तिथयः पद्मजाब्रह्मणा पुरा॥तेषां संमिश्रितानां चापि हन्यु स्ताम
थ्यं वदिष्ये यादि विविधकालः कीर्तितः पापनाशनः॥समस्या है मदा पान प्राणो ते श्यादसः स्थितिः॥विपरीतो
मुहूर्तमस्तु पदशोवक्षणापुरेति॥विधयोगाच संपेचवर्तेदशिनी॥कीदृशास्तु नवेदैवेदेधा योगा विषेदकीदृश
॥योगं वधो समाचक्ष्वयया दृष्टमुपोषणमिति द्वष्टे॥याति थिस्तदा तेरा जन्म घात वंचकावलोकिनी॥सावेध
तिविज्ञेयायोगः सूर्योदयेमतः॥इतिकथितं॥यत्तु ब्रह्मवैवर्ते॥व्यासउवाच॥ ॥चतस्रो घटिकाः प्रातरु — का०दे०
णोदय निश्चयः॥चतुष्टय विनाशो च वेधादिना विलोकितः॥अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम्॥अ — ५०
तिवेधो द्विघटिका प्रभासंदर्शनाद्रवेः॥महावेधानतेऽत्र दृश्यते नैव दृश्यते॥तुरीयस्तत्र विहितो योगः सू
र्योदये वुधैः॥तस्मिकरणात्दौकादशीव्रतविषयं॥यत्तु नागो वा दशनाडीभिः दिक्वचदशानिस्तथा॥भूता षा

दशनाडीनि प्रदूषयस्युत्तरां तिथिं॥इति तद्दिनद्वयेऽपि कर्मकालव्याप्तितिथि संवेद्य द्वष्टव्यं॥उपवासविषय
तातु नदेशस्थुक्ता॥अविद्वानिनिषिद्देश्वेतन लभ्यते दिनादौ॥मूहूर्तैः पंचभिर्विद्धा या स्यैवैकादशी तिथिः॥त
दर्शविद्वान्यानि दिनान्युपवसेन्नरः॥अविद्वाना मलोत्रे नेपयोदधि फलादि वा॥सकृद्वाल्पमश्नीयात्तु
पवासस्तत्समो नवेद्विति॥स्कंदपुराणवचनात्॥उपवासे च घटिकामात्रवेधोऽपि दूषयेदसुत्तरां तिथिमिति वे
चनांतरसिद्धं॥नचैवं नक्तायाचितविषयं तेषां दशमादिव्याप्तिमाति थौ नियेन कर्तव्यताविधानात्॥द्वितीयस्क
नीचतदसंनवहेन्नाप्रसज्येत॥यत्तु पद्मिदशन्मतवचे॥घटिकार्धत्रिनागं वा स्वल्पं वा दूषयेत्तिथिं॥पंचगव्यव
टपूर्णस्मृगया विंदुकोयथा॥तथेति॥तदुक्तादेवदेतोरुपवासविषयं॥एतेन यत्केचिदुक्तं॥घटिकार्धत्रिना
गं वेति वचनं वेदनिंदार्थवादतया अवधेयं॥अन्यथा॥नागो वा दशनाडीभिरित्यनर्थकं स्यादिति तन्निरस्तं॥
उक्तप्रकारणवाक्यापप्रनोलक्षणया यथावाहकल्पनायाअनाप्युतात्॥अन्येतावत्॥एकादशी तावद्दिनद
येपि कर्मकालव्याप्तित्वहूयेश्वर्वा पासापष्ठी पूर्णिमेति युग्मवाक्यैरिति तत्र सा दशवर्या दैकादशी प्राप्तिरेवन

रत्रनिषिध्यत इतितदयुक्तं। दिनद्वयेपिकर्मकालव्याप्तिचेयुग्मवाक्यस्यचद्विकाम्यवाक्यकर्मकालव्या
प्तिवाक्यविषयव्यवस्थापाल्लदुक्तायानिराकृतत्वाच्चतस्माच्चदिनद्वयेपिकर्मकालव्याप्तितिथिसंभव
इदंद्रष्टव्यं। अन्येतुदिनद्वयेपिकर्मकालव्याप्त्यभावइदंवचनमित्याहुः। अन्येत्वन्यविषयमंगीकुर्वंतितत्
स्मान्नयात्तातिथीनांकेवलानांपुण्यत्वंतासामेवविधव्यवस्था। यासांतिथीनांवारनक्षत्रयोगेनपुण्यत्व
तासांवेधदोषोनभवति। तत्रवेधदोषेंगी। क्रियमाणेद्वितीयेह्निवारादियुक्तेतिथौस्नानादिकर्मैवलुप्येत
उक्तंचा चतुर्थीयुक्तस्तबुधेवैवर्ज्ञे। अंगारकयुतापातुसा ऽन्तथैवफलप्रदेति। तथैवगुणयुग्मनिरपेक्ष
वारादियुगेन। लिंगपुराणे। दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिः। श्रवणेनचसंयुक्तासाशुनासर्व
कर्मदा। गोभिलः। यातिथिऋक्षसंयुक्तायाचयोगेनभारत। मुहूर्तत्रयमात्रापिसापिसर्वाविज्ञास्यते। स
र्वापिदुष्टयुग्मस्थापितेनकेवलतिथिविषयएववेधदोषः। तस्मान्निषिद्धतिथिविशापरित्याज्या। अभ्यु
दयसंबंधिन्यस्तमयसंबंधिनीवा। सातिथिःसकलाज्ञेयाइतिवचनादुपादेयेतिसिद्धं। अस्यापवादमाह॥

नारदीयपुराणेवसिष्ठः। पारणेमरणेनृणांतिथिस्तात्कालिकीस्मृता। पित्र्येस्तमयवेलायास्पृष्टापूर्णा
निगद्यते। इति। पारणेमरणेयाता। तात्कालिकीतिथिः। नपुनःसातिथिःसकलाज्ञेयेतिनभवतीत्य
र्थः। असंगेवोदयिस्तानेदंतधावनमैथुने। जातेचनिधनेचैवतत्कालव्यापिनीतिथिः। मन्वादौचयुगा
दौचग्रहणेचंद्रसूर्ययोः। व्यतीपातेचवैधृत्यांतत्कालव्यापिनी। क्रिया। मन्वादौयास्नानदानश्राद्धादिकाक्रि
यासामन्वादिकालव्यापिनीकार्यानकालांतरइत्यर्थः। एवंयुगादौत्यादिव्याख्येयं। तथा। नक्तव्रतेतु
संप्राप्तेतत्कालव्यापिनीतिथिः। इतितस्यनक्तव्रतस्ययःकालःप्रदोषाख्यःतद्व्यापिनीतिथीग्राह्येत्य
र्थः॥ ॥ इतिश्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्री
हेमाद्रिविरचितेचतुर्वर्गचिंतामणौपरिशेषखंडेकालनिर्णयेतिथिसामान्यनिर्णयःसमाप्तः॥ छ॥
अथव्रतविशेषेणतिथिविशेषनिर्णयः। तत्रब्रह्मवैवर्ते। कृष्णाष्टमीतथारंभातृतीयावटपैतृका
इष्टव्रतथाचस्मिन्कर्तव्यासंमुखातिथिः। नान्येषुसंमुखाकार्याचतृतीयाचाष्टमीद्विज। षष्ठिचैकादशीच

ञ्जन्तिसेवंनृणांस्वनिर्णयः॥ संमुखापूर्वविद्धा। कृष्णाष्टमीव्रतसंबंधिन्यष्टमी। केचित्तु कृष्णाष्टमीजन्मा[illegible]
तिथ्या वक्ष्यते। अस्या अपि पूर्वदिन एव रोहिणीयुक्ता या पूर्वविद्धा या उपोष्या तां तां नाष्टमीयां वा व्रत
संबंधिनी द्वितीया। द्वादशपादद्वादशपसंबंधिनीतिथिः। तच्च व्रतं त्रिविधं दस्य प्रतिपादितं। नरतं प्रतिउत्त
कउवाच। । शृणुष्वैकं महाराज द्वादशपद्दति व्रतं। कृतेन येन विश्वात्मा शिवा श्री प्रसीदति। एवं द्वा
दशपोव्रतमिदं ब्रह्मकृत्या विशेषणं। इत्यादिना। केचिद्देवद्रतमपश्यंतोप्ययं द्वादश इति पारमुक्त्वे स्वध
श्रुन्यरायन द्वितीयाव्रतार्थे लेनमाचक्षते। तत्क्वचिदपि स्मृतीतिहासपुराणतन्त्रबंधनादिषद्द
रपमानवानप्रमाणपूर्वीमुपारोहुमर्हति। संवर्त्तः कृष्णाष्टमीद्वादशपा सा वित्रीवटपैतृकी। अ
नंगत्रयोदशी रंभाकर्त्तव्या पूर्वसंयुता। अनंगत्रयोदशीकामाव्रतसंबंधिनी त्रयोदशी। द्वादशपातप
रं। सा सावित्रीवटपैतृकी। कृष्णाष्टमी सनृताच कर्त्तव्या संमुखा तिथिः। व्रतसेवे वर्त्ती च तुर्थ्युत तृतीयायां
महापुण्यफलप्रदा। कर्त्तव्या व्रतिनिर्वत्सगणनापसुतीपणी। चतुर्थीविनायकव्रतसंबंधिनी चतुर्थी।

का॰दे॰
५२

पेगिनसिः। कृष्णाष्टस्कंदषष्ठी। शिवरात्रिचतुर्दशी। एतां पूर्वयुतां कार्या स्तिथ्यंते पारणं नवेत्। स्कंदष
ष्ठीव्रतसंबंधिनी षष्ठी। स्कंदपुराणे। जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्त्तव्या ति
थ्यंते चैव पारणं। ब्रह्मयमः। श्रावणी दुर्गनवमी दूर्वा चैव कृताशनी। पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्व
लेर्दिनं। श्रावणी--पूर्णिमा। दुर्गनवमी दुर्गव्रतादिसंबंधिनी नवमी। दूर्वाष्टमी। कृताशनी होलिका
पूर्णिमा स्त्वव्रतसंबंधिनी तिथिः। बलिबलेः प्रतिपत्पद्मपुराणे। श्रावणी दुर्गनवमी तथा दूर्वाष्टमी
च या। पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलिर्दिनं। स्कंदपुराणे ब्रह्मा स्कंदं प्रति। अश्वयुक्शुक्लपक्षे च याष्टमी
मूलसंयुता। समहानवमी प्रोक्ता त्रैलोक्ये सुदुर्लभा। कन्यागते सवितरि शुक्लपक्षेष्टमीयुता। साम
हानवमी प्रोक्ता त्रैलोक्ये सुदुर्लभा। मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता। अष्टमी च नवम्यां च ज
गन्मातरमंबिकां। पूजयित्वाश्विने मासि विशोको जायते द्विजः। दूर्वाष्टमी च सिंहस्थे नाना नाडपरस्थ कृष्णा
मी नवतिथ्यादिचाष्टम्याः पूर्वां व्यगस्तिरुदेति तदा पाकद्व कृतेन पक्षे कार्या। तथा चलोगाक्षिः। तदानिका

शिवपवित्रमेषादिश्रवणाद्वाष्टमीफलविरूढकजागराणि स्त्रीणां व्रतानि निषिद्धान्यपि वार्षिकाणि कुर्यादिग
स्युरिति तेन शुक्लानि निषिद्धुः॥ ।इति व्रतविशेषेण तिथिविशेषनिर्णयः॥ ।अथैकभक्तकालनिर्णयः॥ ।त
त्रैकभक्तलक्षणं स्कंदपुराणे। दिनार्द्धसमयेतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवै
व हि॥ दिनार्द्धसमयेतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रोक्तं नक्तं ग्रासत्रयेण तु। तच्च मध्याह्नव्यापि
न्यां कार्यं तथा च पद्मपुराणे। मध्याह्नव्यापिनी या स्यादेकभक्ते सदा तिथिः॥ बौधायनः॥ उदये तूपवासस्य न
क्तस्यास्तमये तिथिः। मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिः॥ अत्र च त्रिधा विभक्तस्याह्नो मध्यमभागो म
ध्याह्नः॥ ननु चतुर्धा विभक्तस्याह्नो द्वितीयभागोपि मध्याह्नशब्दप्रयुक्तः॥ पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं
तथा। आतृतीयादपराह्णः सायाह्नश्च ततः परः इति गोभिलवचनात्। तथा पंचधा विभक्तस्याह्नस्तृतीये भागे
पि। लेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते रवौ। प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचमः॥ संगवस्त्रिमुहू
र्त्तस्तु मध्याह्नस्तत्समः स्मृतः॥ ततस्त्रयो मुहूर्त्तास्तु अपराह्णो विधीयते। पंचमो दिनभागो यः सायाह्न इति स स्मृ

का॰ दे॰ ५३

तः॥ यद्यदेकेषु विहितं तत्कौतुकार्यं विजानतेति। पराशरवचनात्। तत्कथं निर्णयः॥ उच्यते। स्वरसतस्तावन्म
ध्याह्नशब्दः पूर्वोत्तरभागद्वयापेक्षो मध्यमभागे वर्त्तते भागांतरापेक्षया चतुर्धा विभक्ते द्वितीयभागे पंचधा
विभक्तस्य तृतीया नो चेद्विलंबितप्रतीतिरियं तेन त्रिधा विभक्तस्य तृतीयभागे मध्याह्नशब्दोयं। तथा च श्रा
नपथश्रुतिः। तस्मैद्रस्मपूर्वाह्णे देवा अशनमभिहरंति। मध्यंदिने मनुष्या अपराह्णे पितर इति। अतः पूर्वो
क्तवचनपर्यालोचनया दिनार्द्धोपरितनो मध्याह्नो मुख्यः कालः॥ तदुक्तमस्तमनावधिर्गौणः॥ दिनार्द्धसमये
तीत इति वचनात्। दैवे चेत्सन्निधानाच्च। मध्याह्नव्यापित्वं च कर्मणो यस्य यः काल इत्यादिवचनपर्यालोचन
येकदेशलक्षणया दिनार्द्धोपरितनमध्याह्नव्यापित्वं विवक्षितं। पटो दग्ध इतिवत् यद्वा तु मुख्यकालैकदेशं
समव्याप्नुतः। एकाग्रेणमपि तद्देशव्यापिनी ग्राह्या। ननु तिथिह्रासे न वत्तेवं न तु सा स्याद्द्वैधो वा। खर्वदि
र्पस्त्यादिसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ हिंस्रा हिंसा स्यात्पूर्वकालिकी तिथ्या प्रवचनादिति चेत्। उ
च्यते। यथासममयकर्मकालव्यापिन्याः पूर्वायाः कर्मणो यस्येत्यादिवचनबलेन ग्रहणेन खर्वदर्पादितिवच

नविरोधः तथाधिककर्मकालैकदेशव्यापिन्याः पूर्वग्रहणेपीति। किंच। व्रतविषये युग्मवाक्यमेव प्रवर्त्तते। न खर्वद-
र्पवाक्यमिति सामान्यतिथिनिर्णयप्रस्तावे दर्शितं। यद्वा तृतीयाधिकमुख्यकर्मकालैकदेशं व्याप्नोतीति। पूर्वा तु त-
तो न्यूनं व्याप्य गौणमपि तद्देशत्रैव यावत्स्यात्। वक्ष्यमुख्यकर्मकालव्यापकत्वात्। यो यस्य विहितः कालः कर्मणस्त-
दुपक्रमे। विद्यमानो न वैगुण्यं नोज्झितोपक्रमेण तु। इति वचनात् तुरीयाच। खर्वदर्पवचनविरोधपरिहारन्याये-
नात्र हिंसा पूर्वकालिकीति वचनविरोधः परिहरणीयः। यद्वा न्यूनेऽपि मुख्यकालैकदेशमपि नाप्नुतः। पूर्वा
गौणैकदेशं व्याप्नोति। तद्वा पूर्वैव ग्राह्या। मुख्यकालस्यैकांशेपि कर्मकालसमाप्तिः। अत्र केचिदाहुः। गौणका-
ल एकैकनक्तं कार्यं। तथा सत्युत्तरानुग्रहो न विष्यति। एकनक्ततिथेर्गौणकालस्य च। मध्याह्ने चैकक्रियमा- का०दे०
णोत्यन्तविशिष्टमध्याह्नलक्षणगुणानुरोधेनोत्तरविशिष्टतिथिविशेषो बाधितो न भवति। तत्राप्युक्तं। मुख्या- ५४
सं न वै च सर्वत्र गौणकालमिश्रितं। तस्माद्गौणकाल एकैकनक्तं कार्यमिति। तदयुक्तं। तिथ्यादिषु न वैधाव-
न्तकालो हविः परेहनि। नावाप्नुयात्सः पूर्वेद्युरदृष्टोपि स्वकर्मणि इति वचनात्। यस्यां तिथौ यद्विहितं कर्म ति-

स्याः स्वस्वमतेन मध्याह्नकालोपि तत्तिथिलाभात् तत्रैवैकनक्तं कार्यमिति। यदा तु दिनद्वयेपि कर्मकालव्यापिनी त-
दा युग्मादिवचनान्निर्णयः। अयं च कालस्वातंत्र्ये कनक्तविषयः। यत्त्वन्यव्रतांगमेकनक्तं तत्स्वयमंगत्वेन तु बल-
लत्वाद्गगुणविरोधन्यायेन प्रधानकालेबाध्यते। उपवासस्थानीयं चैकनक्तमुपवासतिथावेव कार्यं। ननु
स्वतंत्रैकव्रते मध्याह्नव्यापिन्याग्राह्यत्वप्रमाणेनायां निषिद्धतिथिप्रयुक्तापि प्रसज्येत। निषिद्धतिथिः परस्यागेषु तु
मध्याह्नव्यापिनी न लभ्यते। तत्र किं क्रियतां। मध्याह्नशास्त्रस्य बाधो निषेधस्य वेत्युच्यते। तत्र निषेध एव युक्तः।
नागविद्धा तु या षष्ठीत्यादिनिषेधव्रतविशेषानुपादानात् मध्याह्नशास्त्रस्य व्रतविशेषवतो बलीयस्त्वात्।
ननु निषेधबाधो युग्मवाक्यस्यापि बाधात् गौरवमिति चेत्। न। तुल्यत्वशास्त्राणां बाधगौरवागौरवतुल्यत्वादवि-
शेषो न भवति। न सामान्यविशेषशास्त्रयोः विशेषस्यैव बलीयस्त्वादिति। ननु उपवासव्रतादीनां घटिकैका-
पि वा न वेद्य। उदये सा तिथिस्तत्र विपरीता तु पैतृकी। इत्यादिविशेषशास्त्रस्य निषेधयुग्मवाक्याभ्यां बाधो य-
था। एवमिहाप्यस्तु। उच्यते। उपोष्यापरसंयुक्ताः परा पूर्वेण संयुता इत्यादिवचनांतरविरोधादत्र युग्म

वाक्यतो व्यवस्थैव विषमं। नागा नागदन्ता नाडिनिः दिक्कुपेव दन्तास्तिस्तथा। तृतीयाष्टादन्ता नाभिर्निर्दिष्यस्तु नक्तं तिथि
मिति वचनाद्वितीये दिने मध्याह्नाभावेप्येकनक्तं कार्यमिति चेत्। तदयुक्तं। कर्मकालव्यापिन्यालस्य मानाया
मन्यस्याश्च नाश्रयणात्। यस्मिन् काले तु यत्कर्म तत्कालव्यापिनी तिथिः। कर्मणो यस्य यः कालस्तत्कालव्यापि
नी तिथिः। मध्याह्नव्यापिनी ग्राह्या एकनक्ते सदा तिथिरिति वचनात्। तस्माद्दस्मदुक्तैव व्यवस्था युक्तेति। छ॥
इत्येकनक्तकालनिर्णयः समाप्तः॥ ।अथ नक्तकालनिर्णयः॥ ।देवलः। नक्तव्रते तु संप्राप्ते तत्कालव्यापिनी
तिथिः। वत्सोपि। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। एकादशीं विना सर्वाः शुक्ले कृष्णे समाश्रिताः। ए
कादशी तु नक्तेन प्रदोषव्यापिया स्यात्। तत्रोपवाससामर्थ्येन नक्तविरोधात्। अनेनोपवासदिन एव तत्कार्य
मित्यर्थः। प्रदोषपरिमाणं तु स्कंदपुराणोक्तं। उदयास्ताक्रनासंध्या घटिकात्रयमुच्यते। सायंसंध्या त्रिघटि
का अस्तादुपरि भास्वतः। त्रिमुहूर्तः प्रदोषः स्याद्रवावस्तंगते सति। इति। यत्तु अमरसिंहेनोक्तं प्रदोषो रज
नीमुखमिति। तत्र रजनीमुखशब्देन मुहूर्तत्रयमुच्यते। पूर्ववाक्यानुसारात्। अनेकार्थस्यासार्थत्वा

का० दे०
५५

त्। विद्यादरेरेव प्रदोषोस्तमयादूर्ध्वं घटिकात्रयमुच्यते इत्युक्तं। अत्र केचिदाहुः। प्रदोषशब्दे घटिकात्रयं संध्या
शब्दवाच्यं। तत्र च भोजनं निषिद्धं। चत्वारि मानि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां स्वाध्या
यं च चतुर्थकमित्यादिना। अतः प्रदोषोत्तरघटिकात्रये भोजनं कर्तव्यमिति। तदयुक्तं। मुख्यसंध्याशब्दार्थपरि
त्यागे कारणाभावात्। तत्रैव निषेधप्रवृत्तेः। तथाहि। आदित्यास्तमयादिस्तारकोदयांतः सर्वजनप्रसिद्धो मु
ख्यः संध्याकालः। किंचिदालस्यतारकात्कालात् सूर्यदर्शनाच्च विशिष्टः तस्मिन्नेव काले भोजनं निषिद्धं। तथाचास्य
संतते न हि तत्र दर्शनात् संध्यासायंतनस्य तेः स्थितौ। तत्परा रजनी ज्ञेया तत्र धर्मान्निपरित्यजेत्। अस्तु वा घटिका
त्रयं संध्याशब्दार्थः। तथापि न तत्र निषेधः। तस्य रागप्राप्तभोजनविषयत्वात्। यदा तु दिनद्वयेपि प्रदोषव्या
पिनी न भवति। तदापि स्कंदपुराणोक्तं। प्रदोषव्यापिनी स्यात् दिवा नक्तं विधीयते। आत्मनो द्विगुणच्छायेमं
दी भवति भास्करे। तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनं। एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुंजीत क्रियां। कु
र्यान्नक्तव्रती नक्तफलं भवनिश्चितं। तत्र केचिदाहुः। प्रदोषव्यापिनी न स्यादित्युपलक्षणं। आदित्यवारादौ रा

त्रिभोजननिषेधात्। तेन नक्तापि दिवा नक्तं कार्यमिति। तदयुक्तं। निषेधस्य रागप्राप्तभोजनविषयत्वात्। विधिप्रा
प्तस्य न चास्य तेनाम्भगकालनिर्णयावसरे दर्शितत्वात्। लक्षणप्रसंगाच्च। तस्माद्द्वादशीवारादौ रात्रावेव न
क्तं कार्यमिति। सौरधर्मेषु। यदा तु द्विगुणच्छायां कुर्वंस्तपति भास्करः। तन्नक्तं विजानीयान्न नक्तं निशिभो
जनं। एतदपि पूर्वेण समानविषयं। न विष्णुपुराणे। मुहूर्तोनं दिने नक्तं प्रवदन्ति मनीषिणः। नक्षत्रदर्श
नान्नक्तमहं मन्ये गणाधिप। नक्षत्रदर्शनादूर्ध्वं नक्तस्य मुख्यः कालः। अहं मन्य इति वचनात्। इति गौणः
परमतत्वेनोपदेशात्। एतद्वचनपर्यालोचनया या च नक्षत्रदर्शनोपरितनप्रदोषव्यापित्वं वस्वाक्य
विवक्षितं। अत्र केचित्स्वप्रमातिक्रमे कारणाभावात् नक्तकालसंनिधानाच्च नक्षत्रदर्शनात्पूर्वं नक्तम
हं मन्य इति व्याचक्षते। अत्रोच्यते। किमत्र नक्तशब्देन कालो विवक्षितः। भोजनं वा। न तावत्कालः। नक्षत्रदर्श
नात्पूर्वकालस्य संध्यात्वात्। तस्याश्च न दिवा नक्तमिति वेदेन नक्तशब्दवाच्यत्वनिषेधात्। नापि भोजनं। नक्तव्रते
तु संध्यागतकालव्यापिनी तिथिरिति दक्षवचनात्। नक्तकालयोगाच्च भोजने नक्तशब्दप्रवर्तते। तस्मिन्काले का॰ दे॰ ५६

क्रियमाणं न नक्तं स्यात्। तस्मान्नक्षत्रदर्शनादूर्ध्वं भोजनमहं मन्य इत्येवार्थः। शिष्टसमाचारश्च तथैव दृश्य
ते। तस्मान्नक्षत्रदर्शने सति नक्तं। देवलः। नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं। यतेर्दिनाष्टमे भागे त
स्य रात्रौ निषिध्यते। न विष्णुपुराणे। नक्षत्रदर्शनेन नक्तं प्राकृपामास्यंतरायनं। शेषमेकनक्तकालनि
र्णयवदवसेयं। इति नक्तकालनिर्णयः। अथोपवासविधिनिर्णयः। तत्र वसिष्ठः। द्वितीया पंचमी
वेधा दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी। उपवासे सप्तमी तु वेधाद्धंत्युत्तरं दिन
मिति। द्वितीयाद्यास्तिथयो वेधादुपवासे स्वपूर्वोत्तरे तिथी हन्युः। सप्तमी स्वोत्तरामेवेत्यर्थः। अनेन प्रति
पत् द्वितीया च द्वितीया विद्धा नापोष्या इत्युक्तं भवति। एवं पंचम्याद्यास्वपि द्रष्टव्यं। नारदीयपुराणे तु द्वि
तीया पंचमी वेधा द्विति श्लोकं पठित्वैवं चयनं। तृतीयैकादशी षष्ठी नवमी चैवाष्टमी तिथिः। वेधादधस्ताद्धन्यु
स्ता उपवासे तिथिस्त्विमाः। उपवासे सप्तमी तु वेधाद्धंत्युत्तरं दिनं। पक्षयोरुभयोरेष उपवासविधिः स्मृतः।
द्वितीयाद्यास्तिथयः तृतीयादियुता नोपोष्या इत्यर्थः। अत्र तृतीयायुतायां द्वितीयायां तृतीयायामुपवासो निषिद्धः

भृगुस्मृतिविष्णुधर्मोत्तरे स्फुविहितः॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। अमावास्या तृतीया च ता उपो
ष्याः परान्विताः॥ विष्णुधर्मोत्तरे शंकरगीतास्वपि। एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी
अमावास्या उपोष्याः स्युः परान्विताः॥ इति तत्रैव व्यवस्था। शुक्लद्वितीया परयुतोपोष्या। कृष्णद्वितीया तु पूर्व
युता॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति विष्णुध
र्मोत्तरवचनात्। अत्र द्वितीयाविद्धतृतीयानिषेधो रंभाव्रतव्यतिरिक्तविषयः॥ तथा च निगमः॥ कृष्णाष्टमी बृ
हत्तपा सावित्री वटपैतृका। अनंगत्रयोदशी रंभा उपोष्याः पूर्वसंयुता इति। रंभातोऽन्यत्र तृतीया चतु
र्थीयुतैव। तथा च गार्ग्यः॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः॥ पराः पूर्वेण
संयुताः॥ परा अनंतराः॥ अथ पंचमीयुतायां चतुर्थ्यामुपवासो द्वितीयापंचमीवेधादिति वचनेन निषिद्धः॥
गार्ग्यवचनेन तु विहितः॥ अत्र केचिदाहुः॥ शुक्लचतुर्थी परयुतोपोष्या। कृष्णचतुर्थी पूर्वयुता। शुक्लपक्षे ति
थिर्ग्राह्येति वचनादिति। तदयुक्तं। चतुर्थ्यास्तु तृतीयायां मतियां चतुर्थ्यामुपवासनिषेधो नायात्। तृतीयायुते

कालनि० ५७

ह्यपुण्यफलप्रदो। कु[illegible]र्न्याव्रती निर्विघ्नगणनायस्तोषणीति। ब्रह्मवैवर्तवचनात्। पंचमीयुतायां चतु
र्थ्यामुपवासनिषेधेनायात्। तृतीयायुतायामुपवासविधानस्य विनायकव्रतविषयत्वप्रतीतेः॥ अन्यत्र
तद्विषयत्वे हि गणनायस्तोषणीत्यसंगतं स्यात्। सर्वत्र शिष्टास्तृतीयायुतायां चतुर्थ्यां विनायकव्रत
माचरंति। शुक्लपक्षे तिथिर्ग्राह्येति वचनस्य विषयः सामान्यतिथिनिर्णयप्रस्ताव एवेति॥ तस्माद्विनायक
व्रतचतुर्थी पूर्वयुतोपोष्या। अन्या तु परयुतेति व्यवस्था। पंचमी तु चतुर्थीयुतोपोष्या। एकादश्यष्टमी ष
ष्ठीति गार्ग्यवचनात्। द्वितीयैकादशी षष्ठीति नारदीयपुराणवचने षष्ठीयुतायामुपवासनिषेधाच्च। षष्ठी
तु परयुतोपोष्या द्वितीयापंचमीवेधादित्यादिकवचनात्। तथा शिवरहस्यसौरपुराणयोः॥ नागविद्धा तु
या षष्ठी शिवविद्धा तु सप्तमी। दशम्येकादशी विद्धा नोपोष्या स्यात्कदाचन। ज्ञा वेवसूर्यचंद्रान्मा तिथिः स्फुट
तरा व्रते। एकादशी तृतीया च षष्ठी चोपवसेत्सदा। अत्र पंचमीयुतायां षष्ठ्यामुपवासनिषेधः स्कंदषष्ठी
व्यतिरिक्तविषयः॥ सप्तमीयुक्तायामुपवासविधिश्च। तथा च पद्मपुराणे। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्च

तुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत्। सप्तमी तु षष्ठीयुतैवोपोष्या। एकादश्यष्टमी षष्ठीति गार्ग्य
वचनात्। नागविद्धा तु या षष्ठीति शिवरहस्यसौरपुराणयोरष्टमीयुतामुपवासनिषेधाच्च। षष्ठ्येकादश्यमा
वास्या पूर्वविद्धा तथाष्टमी। सप्तमी परविद्धा च नोपोष्यं तिथिपंचकमिति स्कंदपुराणे निषेधाच्च। अष्टमी
तु पक्षद्वयेपि पूर्वयुतैव। पक्षयोरुभयोरित्यभिधानात्। कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्त्त
व्या परविद्धा न कर्हिचित्। उपवासादिकार्येषु ह्येष धर्मः सनातनः इति वचने कृष्णव्रतविषये। कृष्णव्रतेषु सर्वेषु क
र्तव्या सप्तमुखा तिथिः। अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपवसेदिति वचनात्। नवमी तु पूर्वयुतैव। द्वितीयापं
चमी वेधादिति वचनात्। दशम्यपि पूर्वयुतैव। तृतीयैकादशी षष्ठीति न विष्णुपुराणवचनात्। एकादशी
तु परयुता। द्वितीया पंचमी वेधादित्यादिना दशमीविद्धायामुपवासे निषेधात्। एकादश्यष्टमीति नृगवादिवचने
परयुतामुपवासविधानाच्च। शेषमेकादशीनिर्णयप्रस्तावे वक्ष्यते। द्वादशी तु पूर्वयुतैव। एकादशी तथा षष्ठी
ति गार्ग्यवचनात्। अत्र केचिदाहुः। शुक्लत्रयोदशी पूर्वयुता कृष्णत्रयोदशी परयुतेति सामान्यतिथिनिर्णयप्र

का॰ हे॰
५८

स्तावे दर्शितं। तथैवोपवासेपि ज्ञेयं। ननु एकादशी तथा षष्ठी तु विष्णुधर्मोत्तरशंकरगीतावचनात्। शुक्लत्रयोद
श्युपवासविषये द्वितीया कस्मान्न गृह्यते। उच्यते। द्वितीयापंचमीवेधादिति चतुर्दशीप्रयुक्तायां त्रयोदश्यामु
पवासप्रतिषेधाद्दर्शपंचाविनिशादशीयुक्तायां तस्यामुपवासे षष्ठ्यष्टमी तथामावास्या कृष्णपक्षे त्रयोदशी। ए
ताः परयुताः पूज्या इति निगमवचनात्। कृष्णत्रयोदश्युपवासे परान्विता शुक्लत्रयोदशी तु पूर्वान्वितेति वृत्तां
तरैव देयव्यवस्था स्वीक्रियते। अपरे त्वाहुः। अत्र चतुर्दशीयुतायां त्रयोदश्यामुपवासनिषेधोऽनंगत्रयोदशी
विषयः। चतुर्दशीयुतायां त्रयोदश्यामुपवासविधिरनंगत्रयोदशीव्यतिरिक्तविषयः। कृष्णाष्टमीति द्वन्द्वेपे
ति निगमवचनात्। एतद्वचनपर्यालोचनया पूर्वव्यवस्थानाश्रयणीया। त्रयोदशीयुतचतुर्दशीनिषेधस्तूप
द्वयेपि। यद्वाह द्वद्व वसिष्ठः॥ एकादश्यष्टमी षष्ठी अमावास्या चतुर्दशी। तृतीया पूर्वविद्धा च तथा उपोष्याः परे
द्युरिति। एकादश्यादयः परयुता उपोष्याः। तृतीया पूर्वविद्धा च तत्रापि व्यवस्था। रंभातृतीया पूर्वविद्धा। अन्या
त्तरत्रैवेति। चतुर्दशीयुतयोः पौर्णमास्यामावास्ययोरुपवासनिषेधः सावित्रीव्रतव्यतिरिक्तविषये॥ व्रति

पद्युतयोरुपवासवि।धश्च। अस्नाष्टमी कृष्णपेति निगमवचनात्। यत्तु पद्मपुराणे। षष्ठैकादश्यमावास्या पूर्ववि-
द्धा तथाष्टमी। पूर्णिमा परविद्धा च नोपोष्यं तिथिपंचकमिति तत्सावित्रीविषयं। स्कंदपुराणेपि। भूतविद्धा सिनीवा-
ली न तु तत्र व्रतं चरेत्। वर्जयित्वा तु सावित्रीव्रतं तु ऋषिवाहन। विष्णुधर्मोत्तरे। एकादश्यष्टमी षष्ठी पौर्णमा-
सी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विताः। अन्याश्च तिथयः सर्वा उपोष्याः पूर्वसंयुताः। अन्या-
श्च तिथयः सर्वा इति वचनांतरविहितपरविद्धोपोष्यतिथिव्यतिरिक्तविषयं। अस्य सामान्यशास्त्रत्वेन वि-
शेषशास्त्रावरुद्धे विषये प्रवृत्त्यनुपपत्तेः। न चेदमयुक्तं। सर्वशब्दवैयर्थ्यप्रसंगात्। अन्यास्तिथय इत्यनेनैव व-
चनांतरविहितपरविद्धोपोष्यतिथिव्यतिरिक्ततिथिलाभात्। यदि तु वचनांतरविहितपरविद्धोपोष्यतिथी-
नामपि विकल्पेन पूर्वविद्धातिरिक्तास्तिथयो विकल्पेन पूर्वयुताः परयुता वोपोष्याः। तथा चान्यासामुपोष्यत्वार्थं
सर्वशब्दः तदा प्रयोजनः। तेनैतदपि विशेषशास्त्रमित्येकादश्यादितिथिसप्तकव्यतिरिक्तावन्याधिकरणसिद्धे
तेजाघन्याज्यविकल्पे वार्त्तिककृतोक्ते न वदेवेनोक्तं। इदं विद्वद्वक्तव्यकथं सामान्यविहितेनान्येन विशेषे वि-

हितायानाच नृणां विकल्पः। सर्वत्र सामान्यविशेषशास्त्रयोः बाध्यबाधकभावोच्छेदप्रसंगात्। नैतद्द्वयोरपि वि-
शेषशास्त्रत्वात्। तथाहि यदि खल्वाज्यविधौ यज्ञायेत्येतावन्मात्रं श्रूयते। अत्र च पत्नीसंयाजरूपो विशेषस्तथा-
न वत्येव। सामान्यविशेषन्यायः। किंतु सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति यज्ञायेति सामान्यम-
भिधावैयापि पुनस्तत्समानाधिकरणसर्वशब्दोच्चारणं तेनैतज्ज्ञायते। यदुत्पत्तिशिष्टद्रव्यानवरुद्धप्रकृ-
तसकलयागविषयत्वमेवाध्ययनविध्यभिमतं। यज्ञशब्दस्येति तेन द्वयोरपि विशेषविषयत्वाद्विक-
ल्प इति तदयुक्तं। यदि हि वचनांतरविहितपूर्वपरोपोष्यतिथिष्वेतद्वाक्यं प्रवर्त्तते। तदैकत्र शास्त्रांतरबा-
धसापेक्षा निषेधः। अन्यत्र निरपेक्ष इति विधिवैषम्यं प्रसज्येत। किंच। पूर्वोपोष्यतिथिषु नित्यवद्विधिः परो-
पोष्यतिथिषु च विकल्पेनेत्यपि वैषम्यं स्यात्। सर्वस्मै वा एतद्यज्ञाय गृह्यते ध्रुवायामाज्यमित्यपि न विहितद्र-
व्यके योगेऽज्यविधानं उक्तादेव हेतोः। किंच। यागोद्देशेनाज्यविधौ विहितद्रव्यकयागलाभार्थं सर्वस्मै इ-
ति विशेषणं विशिष्टानुवादात् वाक्यभेदः प्रसज्येत। तस्मात् सर्वशब्दः प्राप्तानुवादः तस्य च सर्वयज्ञसंबंध

प्रतिपादनद्वारा आउ स्तुतिः प्रयोजनकथं तदिंगाघन्याघयो विकल्प उक्तः ॥ उच्यते । यद्याज्येन प्रयाजा इष्टं
त आज्येन पत्नीसंयाजा इति तैत्तिरीयवचनात् पत्नीसंयाजेष्वाज्यप्राप्तेः । अथोच्यते । लिंगं तु वाचनविधिशेषो
यमर्थवादः न तु पत्नीसंयाजेष्वाज्यविधिः । एवं हि श्रूयते । जामि वा एतद्यज्ञस्य क्रियते । यदाज्येन प्रयाजा इज्य
न्ते आज्येन पत्नीसंयाजयः । ऋचमस्तु अपत्नीसंयाजानामृचा यजस्य ज्ञामित्वाय इति । तदुक्तं । सिद्धवदनुवाद
न्यथानुपपत्त्या त्र विधेराश्रयणात् । उपरीडादेवैमाधारयतीतिवत्तत्र वार्त्तिकनिबंधकारास्तु न्ये आज्येन
पत्नीसंयाजान्यजतीति श्रुत्यंतरादाज्यप्राप्तिं मन्यंते । तन्न युक्तं । तत्र विकल्पाभिधानं न तु तत्रैव नवउ । सर्वथा
ष्टस्य स्तुत्यर्थत्वेन सप्रयोजनत्वात् । अत्र तु न तथेति कथमेतदिति चेत् । उच्यते ॥ यथा सर्वत्राष्टः प्राप्तानु
वादः । पस्मोन यंद्विरात्रिमाष्टोदित्यत्रोनयपवत् । अथ तत्र प्रथमं वा नियम्यते त्यग्नियद्विरात्रित्रमाप
नोदनार्थमुनयग्रहणं । तत्त्वत्रापि बह्वृचवचनस्य निषेधवचरितार्थत्वात्प्रतिपादनादितिषित्रयग्रहणमिति चेमा
पनोदनार्थसर्वग्रहणं न विष्यति । अथवा वक्त्रमापनोदस्य प्रकारान्तरेणापि सिद्धेः न प्रयोजनता । तर्हि नयप

का०हे०
६०

दस्यापि न स्येति त्रस्य स्वार्थः । यद्वा । किमनेन प्रयोजनगवेषणेन उनयपादयागतिः । सैवेदापीत्यलमतिप्रसंगेन
यद्यपि बह्वृगार्प्यवचने तिष्युपोषणे पूर्वपरपक्षयोः पूर्वा परेण । परा पूर्वेणोपोष्याः । तदपि वचनान्तराविरु
द्धविषयं वदितव्यं । अथेदं विचार्यते । यदोदयादारभ्योदयांतरं व्याप्यानंतरेतिथिर्वर्द्धते । सा च परोपोष्या त्र
योदश्यादिर्न वेति । तत्र किं पूर्वोपोष्या उत परेति । अत्र केचिदाहुः । परैवोपोष्या युग्मादिवचनात् । ननु दिवा
रात्रौ व्रतं यच्च एकमेव तिथौ गते । तस्यामुनयपोगिन्यामाचरेत्व्रतं व्रतीतिवचनात् । दिवारात्रौ व्रतं यत्र युग्म
तिथिपरित्यागेन पूर्वेद्युरेव व्रतानुष्ठानं युक्तं । मुख्यकालस्यासंनवेत्यवोरात्रादिसाध्यव्रतादेः षंडतिथोक
र्मुमहाव्यस्त्वेन न त्वस्य सास त्रानियतति प्यत ग्रहणे प्राप्ते युग्मामि युग्मत्तनानामित्यादिवाक्ये स्तिथिविशेषानिय
म्यते । तत्कथमुच्यते । संपूर्णतिथिपरित्यागेन युग्मवाक्यबलात् षंडतिथेरपि ग्रहणमिति । --- तिथ्यादिषु न
वेद्या वा नक्तासा वह्निः परेहनि । नावाव्याप्तः स पूर्वेद्युरदृष्टोपि स्वकर्मणि । इति वचनपर्यालोचनया त्वरेद्युर्याव
तो तिथिर्वर्द्धते तावती पूर्वेद्युरपि तरा तिथिर्विद्यते एव । ततश्च पूर्वसिद्धतिथेरपिखंडत्वात्तत्परित्यागेन युग्म

वाक्यानुग्रहाय परेद्युरेवानुष्ठानं युक्तं विष्णुधर्मोत्तरे। तिथिः सखण्डा परिवर्जनीया धर्मार्थकामेषु बुधैर्मनुष्यैः॥
विहीनखण्डापि विवर्जनीया यद्यग्रतो वृद्धिमुपैति पक्षः॥ इति स्मृत्यंतरमपि। यथा मलिम्लुचः पूर्वो मासो दैवस
यान्तरः। तथा तिथिस्तथा पूर्वा वृद्धौ कार्या तथोत्तरेति। तदप्ययुक्तं। उपवासो ह्यहोरात्रसंपाद्यस्तेन पूर्वस्यां स
कार्यः। तस्याः सकलकर्मव्यापित्वात्। यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिरिति वचनात्। यत्तूक्तं पूर्वापि
खण्डतिथिरेव। तिथ्यादौ तु न वेद्या वा न्क्षासे वृद्धिः परेऽह्नीति वचनात्परेह्येव। तिथिवृद्धिस्तावत्पूर्वतिथेः कैरुद
यादूर्ध्वयामैरिति। तदप्ययुक्तं। अत्र हि स्वकर्मणि स्तूयते। यस्यां च तिथौ यद्विहितं कर्म तत्तस्याः स्वकर्म तेन त्रयो
दशरूपा विहितमुपवासव्रतं तस्या एव कर्म न द्वादरूपाः। तत्र स्वकर्मविहितह्रासवृद्धिग्रहणं त्रयोदशी व्रते शुद्ध
रूपा तिः प्रमाणकं। दिवा रात्रौ व्रतं यच्चेति वचनस्योपवासव्यतिरिक्तविषयत्वे संकोचे कारणाभावात्। युग्मादि
वाक्यपर्यालोचनया संकोचस्तूपवासव्यतिरेकेपि न वेत्। अथोच्यते। प्रातः संकल्पयेद्विद्वानुपवासव्रतादिक
मिति वचनात्संकल्पः प्रातरेव करणीयः। एवं च द्वितीयादिने संकल्पयोग्यातिथेरलाभे पूर्वतिथिग्रहणं लोके

का०हे०
६१

तु सर्वस्मिन्नप्यहोरात्रे व्यापके कर्मणि द्वितीयायामेवेति। तदप्ययुक्तं। दिवा रात्रौ वेति विशेषणानर्थक्यप्रसंगा
त्। तथा सर्वव्रतानां पूर्वेद्युरेवाचरणात्। कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत
ह्रासवृद्धी न कारणमिति कर्मकालव्यापिन्यां लभ्यमानायां ह्रासवृद्ध्योः पूर्वत्वपरत्वप्रतिकारणत्वनिराकरणा
च्च। अविद्यमानह्रासवृद्धिग्रहणप्रयोजनस्य सर्वतिथिसामान्यतिथिनिर्णयप्रस्तावदर्शितत्वात्त्रासंभवाच्च।
तिथिः सखण्डेति वचनं चैकादशीविषयं। सखण्डा दशमीविद्धा विहीनखण्डा संपूर्णैकादशी सापि द्विविधापिसा
ज्यापदोत्तरेद्युरेकादशी किंचिद्वर्धते तेन संपूर्णैकादशी यत्र प्रभाते पुनरेव सेत्यादिवचनेन समानविषयमि
दमिति ज्ञेयं। एवं वचनान्तरविरोधः परिहृतो भवति। मूलभूतश्रुत्यन्तरकल्पनापि न भविष्यति। सर्वतिथिविष
यत्वे तु सा यथा पद्योत इति यथा मलिम्लुचः पूर्व इति वचनं खर्वदर्पौ परौ पूज्या वित्यनेन समानविषयं। न संपूर्णति
थिबाधनाय प्रभवति। तस्माद्दैवे विधे विषये पूर्वैव ग्राह्येति सिद्धं। यद्वा तु परा उपोष्यास्ति यथा द्वितीयेह्नि घ
टिकामात्रा विद्यते तदा सा एवोपोष्या। न तु स्वल्पतिथिविशात्। तथा च विष्णुपुराणे। व्रतोपवासनियमे घटिकै

कार्यं तन्नवेत्। सा तिथिः सकला ज्ञेया पित्र्ये चापराह्निकी। षट्त्रिंशन्मतेपि। घटिकार्द्धं त्रिनागं वा स्वल्पं वा दृश्य
ये तिथिः। पंचगव्यं घटं पूर्णं सुराया बिंदुको यथेति। यदा तु नोत्तरेद्युरुदयव्यापिनी किंतु पूर्वेद्युः। निषिद्धतिथि
विद्धैव। तथा च ऋष्यशृंगः। अविद्धानि निषिद्धैश्चेन्न लभ्यंते दिनानि तु। मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः।
तदर्द्धविद्धान्यन्यानि दिनान्युपवसेत्सुधीः इति निषिद्धैर्दिनैरपि विद्धानि दिनानि यदि न लभ्यंते। तदा कलञ्जगणानिया
मागात्पर्यः। मुहूर्तैः पंचभिर्विद्धा ग्राह्येति अरुणोदयघटिकाचतुष्टयांतरभावेन अस्मादधिकवेधो यदा न
भवति दिनांतरे च शुद्धतिथिर्न। तदेव शुद्धतिथ्यभावः। तदापि स एवादः। अविद्धानामलाभे तु पयोदधिकलानि
वा। सद्भूदेवाल्पमध्यायाद्युपवासस्ततो न वेदिति केचिदाहुः। अयमेकादशीवर्जमुपवासप्रत्याम्नायैः वे
दितव्यः। एकां तंतुपानमेवोपवासप्रत्याम्नायः। भोजनस्य निषेधात्। अंबुपानमपि उपवासप्रत्याम्नायवे
नदृष्टिं वायुप्रोक्तो उपवासनिषेधे तु न स्मात्किंचित्प्रकल्पयेत्। न दुष्यत्युपवासेन तदुपवासफलं लभेत्। न
क्तं हविष्यान्नमयो दनं चा फलं तिलाः क्षीरमथांबु चाज्यं यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं।

का० ३०
६२

च दिनि। तद्युक्तं। रागप्राप्तलाभे विधिप्राप्ते निषेधाप्रवृत्तेः॥ इति तिथिनिर्णयः॥ अथ नक्षत्रोपवासादि
निर्णयः। विष्णुधर्मोत्तरे। राम उवाच। नक्षत्रे देवदेवेश तिथिर्वापि विनिर्गता। दृष्टा कथं तु कर्तव्यं इदं मे संश
यं वद। देव उवाच। उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः। यत्र वा युज्यते राम निशीथे शशिना सह।
कविचन्यपावः। उपोषितव्यं नक्षत्रं यस्मिन्नस्तमइविः। येन वा युज्यते राम निशीथः शशिना सह इति। यत्र
वा निशीथेर्द्धरात्रे शशिना नक्षत्रेण संयुज्यते तन्नक्षत्रमुपोषितव्यमित्यर्थः। तथा च सुमंतुः। यत्रार्द्धरात्रं
क तु नक्षत्रं प्राप्यते तिथियोतस्य नक्षत्रव्रतं कुर्यादरतीते पारणं न वेत् प्राप्यते पारस्यत इत्यर्थः। अतीते तस्मिन्नक्ष
त्र इति विशेषः। तदुक्तं प्रचेताः। तन्नक्षत्राणि समस्ता निष्ठूत्यपिबत उपारणं। अत्र केचिदाहुः। पारणमत्र व्रतस्य
समाप्तिर्न तु भोजनं। तस्य पुरुषार्थत्वात्। तथा च पारतीरकर्मसमाप्ताविरस्य धातोरूपं पारणमिति। तस्य
च दानहोमश्राद्धात्मकत्वादेषां चराकुदर्शनादिनां रात्रौ कर्तव्यतायाः प्रतिपिद्धत्वादंते नक्षत्रमुपोषितव्यमि
ति। न च नक्षत्रोपोषणं एव नक्षत्रपुरुषार्थ इष्टव्यं। यदा नक्षत्रच्छेदो दिवा न कथंचनापि प्राप्यते। तदा प्राङ्

त्रत्रुटेः देवपूजादिकं विधाय नक्षत्रविच्छेदे भोजनं कर्त्तव्यमित्येव युक्तमिति। तदप्युक्तं। राजकुद्दर्शनसंक्रां
तिविवादास्य पद्वदिषु। स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च। इत्यादिना वचनेन रात्रावपि काम्यव्र
तेषु दानादिविधानात्। नक्षत्रपुरुषव्रतादीनां च काम्यत्वात्। यदप्युक्तं। यदा नक्षत्रच्छेदादि वा न कथं च ना
दिप्राप्यत इत्यादि। तदप्युक्तं। एवं विधे विषये न वक्ष्यमाणेन द्वितीयदिनसंबंधिनक्षत्रग्रहणस्य युक्तत्वात्। त
स्मादेवं व्यवस्था। यदा पूर्वस्मिन्नेव दिने अस्तमयसंबंधि नक्षत्रं तदा तद्दिवे पोष्यं। यदा तु दिनद्वयेपि न
स्तमयसंबंधि। योयस्य विहितः कालः कर्मणस्तदुपक्रमे। विद्यमानो भवेदंगं नो क्लितोपक्रमेण तितिव
चनात्। यत्तु विष्णुधर्मोत्तरवचनं। सा तिथिः तच्च नक्षत्रं यस्यामस्तमुदि रविः। तया कर्मणि कुर्वीत ह्रासवृद्धी
न कारणं। तदुपवासव्यतिरिक्तव्रतादिविषयं। तदपि बोधायनवचनं। सा तिथिस्तच्च नक्षत्रं यस्यामस्तमुदि
तो रविः। वर्द्धमानस्य पक्षस्य नानो यस्तमयं प्रति। तत्सिद्धकार्यविषयमिति ज्ञेयं। विष्णुधर्मोत्तरबोधायनव
चनयोरेकविषयत्वे विरोधप्रसंगात्। एकत्र ह्रासवृद्ध्योः कारणत्वाभ्यनुज्ञानं त्वन्यत्र वैपरीत्यं। तिथिसादच

का०दे० ३३

र्येण तत्तद्देवतानक्षत्रनिर्णयस्य युक्तत्वात्। तिथिनिर्णयश्चैवं। पितृकृत्ये ह्रासवृद्धिचोदना। नान्यत्रेति। नापुन
यमुपवासविषयत्वे। तस्य विशेषशास्त्रावरुद्धत्वात्। तस्मादस्मदुक्तैव व्यवस्था युक्ता। इति नक्षत्रोपवासा
दिकालनिर्णयः। अथ जन्माष्टमीनिर्णयः। सा च या रोहिणीयुक्ता पूर्वा परा वा सैवोपोष्या। तथा च विष्णुरह
स्ये। प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। मुहूर्त्तमपि लभ्येत सोपोष्या सा महाफला। मुहूर्त्तमप्यहोरात्रे य
स्मिन्युक्तं हि लभ्यते। अष्टम्या रोहिणीऋक्षं तां सुपुण्यामुपावसेत्। किं च। या रोहिणीयुक्ता सा जयंती। सा चोप
वासादौ महाफलेति सैव ग्राह्या। तथा विष्णुधर्मे। रोहिणी च यदा कृष्णपक्षेष्टम्यां द्विजोत्तम। जयंती नाम सा प्रोक्ता
सर्वपापहरा तिथिः। ~~सनत्कुमारसंहितायां। शृणुष्वावहितो राजन्~~ यन्नाल्पं यच्च कौमारे यौवने वार्द्धके त
था। बहुजन्मकृतं पापं हंति सोपोषिता तिथिः। सनत्कुमारसंहितायां। शृणुष्वावहितो राजन्। कथ्यमानं मया
नघ। श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप। रोहिणी यदि लभ्येत जयंती नाम सा तिथिः। स्कंदपुराणे।
प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत्। श्रावणे बहुले सा तु सर्वपापप्रणाशिनी। जयं[illegible]पुण्यं च कुरुते

वि

जयंतीतेनतांविदुः॥कृष्णेस्फुटरहस्ये।अष्टमीकृष्णपक्षस्यरोहिणीऋक्षसंयुता।भवेत्प्रौष्ठपदेमासिजयंतीनामसा
स्मृता॥प्रौष्ठपदइतिकृष्णप्रतिपदादिमासविवक्षया।श्रावणइतिचशुक्लप्रतिपदादिमासविवक्षया।ए
वंसत्यष्टमीएकैवप्रतिपादिताभवति।भविष्यद्विष्णुधर्मयोः।जयंत्यामुपवासश्चमहापातकनाशनः।सर्वैः
कार्योमहाभक्त्यापूजनीयश्चकेशवः।वह्निपुराणे।कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीस्मृता।जयंती
नामसाज्ञेयाउपोष्यासाप्रयत्नतः॥सप्तजन्मकृतंपापंराजन्नृथत्रिविधंनृणां।तत्क्षणाज्जयतिगोविंदस्ति
थ्यौतस्मात्स्तुताविदः॥उपवासश्चतत्रोक्तोमहापातकनाशनः।जयंत्यांजगतीपालविधिनानेनसंशयः।त्रे
तायांद्वापरेचैवकलौराजन्कृतयुगेपुरा।रोहिणीसंयुताचेयंविद्वद्भिःसमुपोषिता।तथा।रोहिणीतुकला
प्येकाकृष्णाष्टमीजयंतिका।यदानप्रात्रार्द्धरात्रेविहायुरोहिणीयोगस्तदात्त्रेरेवोपोष्या।सर्क्षापिनकर्तव्या
सप्तम्यासंयुताष्टमी।इतिवचनात्।यदातुपूर्वस्यामर्द्धरात्रेरोहिणीयोगउत्तरस्यामपितथैवतदापूर्वत्रैव
सर्क्षापिनकर्तव्यासप्तमीसंयुताष्टमी।इतिवचनात्।यदातुपूर्वस्यामर्द्धरात्रेरोहिणीयोगः।उत्तरस्यांच

का०३०
६४

र्द्धरात्रंविहायतदापूर्वैवोपोष्या।तथाचभविष्यविष्णुधर्मयोः।रोहिण्यामर्द्धरात्रेचयदाकृष्णाष्टमीभवे
त्।तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं।प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी।सोपवासोहरेःपूजां
तत्रकृत्वानसीदति।अर्द्धरात्रेतुयोगोयंतारापत्युदयेतथा।रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी
अर्द्धरात्रादधश्चोर्ध्वंकलयापियदाभवेत्।तत्रजातोजगन्नाथःकौस्तुभीहरिरीश्वरः।वह्निपुराणे।सप्तमी
संयुताष्टम्यांनिशीथेरोहिणीयदि।भवितासाष्टमीपुण्यायावच्चंद्रदिवाकरौ।तथा।समायोगेतुरोहिण्यां
निशीथेराजसत्तम।समाजायतगोविंदोबालरूपीचतुर्भुजः।तस्मात्तंपूजयेत्तत्रयथावित्तानुसारतः॥
भविष्योत्तरे।मासिभाद्रपदेष्टम्यांकृष्णपक्षेर्द्धरात्रके।शशांकेवृषराशिस्थेऋक्षेरोहिणीसंज्ञिते॥यो
गेस्मिन्वसुदेवाद्धिदेवकीमामजीजनत्।तस्मान्मांपूजयेत्तत्रशुचिःसम्यगुपोषितः।अग्निपुराणेपि।
तस्मात्कृष्णाष्टमीपूज्यासप्तम्यांनृपसत्तम।रोहिणीसंयुतोपुष्यासर्वाघौघविनाशिनी।तथा।अर्द्धरात्रादधश्चो
र्ध्वंकलयावायदाभवेत्।जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनी।पद्मपुराणेपि।कार्याविद्धापिसप्त

म्यां रोहिणीसहिताष्टमी। न कृत्वोपवासं कृत्वा न तिथिभांते च पारणं। विष्णुधर्मे विजयंतीशिवरात्रिश्चका
र्येन गजयान्विते। कृत्वोपवासं तिथ्यंते न तदा कुर्याच्च पारणं। नृगुरपि। जन्माष्टमी रोहिणी च शिवरात्रिस्त
थैव च। पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं। यदा त्वर्धरात्रादूर्ध्वं कलामप्यतिक्रम्याष्टमी प्रवृत्ता। रोहिणी
च द्वितीये किं मुहूर्तमर्धमुहूर्तं वा। तदा द्वितीयैव ग्राह्या। तथा च स्कंदपुराणे। सप्तमीसंयुताष्टम्यां भूत्वा
ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीये किं मुहूर्तार्धं भवेद्यदि। तदष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरेति। पा
द्मेपि। मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्। किं पुनर्नवमीयुक्ता कुलकोटिविमुक्तिदा। यदा तिथिन
क्षत्रद्वयं दिनद्वयेऽर्धरात्रे रोहिण्यष्टमीयोगः। तदा परदिने जयंतीव्रतं। तथा च ब्रह्मवैवर्ते। वर्जनीया प्र
यत्नेन सप्तमीसंयुताष्टमी। सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी। यदा तु द्वितीयदिवसे अर्धरात्रे रोहिण्य
सा- ष्टमीयोगः। तदासावेव जयंती [illegible]युक्ता। तत्रैव बुधवारादियोगे प्रशस्तातिशयः। तथा च स्कंदपुराणे। उद का॰ हे॰ ६५
ये चाष्टमी किंचिन्नवमी सकला यदि। भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते।

नवा वा यवा। पद्मपुराणेपि। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता।
किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा। अत्रैवमाहुः। य
दा पूर्वार्धरात्रे रोहिणीयुक्ता नोत्तरा च न भवति सा चेद्बुधवारे सोमवारे न भवति। तदोत्तरैवोपोष्या। न पूर्वा
उदये चाष्टमी किंचिदिति। स्कंदपुराणवचनात्। प्रेतयोनिगतानामिति पद्मपुराणवचनाच्च। सप्तमीसंयुता
ष्टम्यामिति। मुहूर्तेनापि संयुक्तेति वचनद्वयं च बुधवारसोमवारविषयमिति। तदप्युक्तं। यद्यप्यर्धरा
त्रे तु रोहिण्यामिताद्विवाक्यं च द्वितीये एव रोहिणीयोगे। तथापि बुधसोमवारवाक्यसंकोचे कर्मकाल
व्यापितिथिसंनवादर्धरात्रवाक्यसंकोचो न तद्बाधस्यागात्। बुधसोमवाक्यस्यैव संकोचः। नार्धरात्रवाक
स्य। उदयविषयत्वेन सप्तमीसंयुताष्टम्यामिति मुहूर्तेनापि संयुक्तेत्येतद्वचनद्वयस्योपपादः। बुधसोमवा
रविषयेन संकोचे प्रमाणानावात्। यत्तु केचिदुक्तं। एतद्वचनद्वयं नोपवासविषयं। उपवासस्त्वाष्टम्यश्रवणात्
संपूर्णत्वमात्राभिधानात्। किं चार्धरात्राद्यश्चार्धमिति वाक्यपर्यालोचनया पूर्वस्मिन् दिन उपवासे कृते दि

नायेऽह्नि यत्तु ब्राह्मणभोजनदक्षिणादानादि विहितं तेन दृष्टिक्रम्यातिक्रियमाणं सकलत्वाभिधानेनाष्टमीरो
हिण्योरेव व्रतेन वा नातिमहाफलत्वमुपवासस्य ज्ञापयति । तदुक्तं । संपूर्णत्वाभिधानस्योपवासविषयत्वे
नाप्युपपत्तेः ॥ अर्धरात्रादधश्चोर्ध्वमिति वचनविरोधस्य परिहृतत्वात् । तस्मादुक्तैव व्यवस्था युक्ता । अन्ये के
सं चिदाहुः । कल्पकालकरोहिणीयोगे जयंती नामाष्टमी । अर्धरात्रियोगे रोहिण्यष्टमीति । तदसत् । जयंती
रात्रिस्यार्धरात्रयोगेपि श्रवणात् । अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत् । जयंती नाम सा प्रोक्ता इत्युदाहृ
तवचनात् । यत्तु जयंतीव्रतमुक्तं । मुहूर्तमपि लभ्येतेति । तदर्धरात्रयोगे नोपपद्यते । जयंतीरात्रिस्य चाल्प का° टे°
कालकरोहिणीयुक्ताष्टमीवचने त्वेव प्रमाणतावाच्या । गुरुहृतसकलवाक्यपर्यालोचनया रोहिणीसं ६६
हितरुभयाष्टमीवचनत्वप्रतिपत्तेः । यच्च जन्माहि न जन्मोपलक्षितरात्रिविशेषवचनो जयंतीशब्दः । अभिजि
न्नाम नक्षत्रं जयंतीनाम शर्वरी । मुहूर्तो विजयो नाम यत्र जातो जनार्दनः ॥ इति ब्रह्मांडपुराणवचनात् । यद्
तु रोहिण्यमीषु युक्ता तदा जयंत्यष्टमी चेवतद्यपि हि त्वेवतदृशी । पूर्वविद्धोत्तरकर्तव्या परविद्धा न कस्यचि

हित्यावचनेन ॥ पूर्वविद्धैव ग्राह्या । अत्र केचित् स्थूलस्थानयनेन किंचित् न्यूननवतिघटिकात्मिका रोहिणी नवति
इत्याचक्षाणास्तावेति कालेकास्मिन्नेवामुहूर्तादिनावयवेनवा योगविशिष्टाष्टमी रोहिणीसहिता जयंतीति
मातन्वेदं व्रतमित्याहुः । तन्नेदं चक्रस्य किं गगने परिवर्त्यमानस्यार्कादिविशेषो रोहिणी उत । तदुक्तं । काल
का सोपि किं कालमात्रमथवा तद्विशेषः । आद्ये नार्कविशेषस्य नवतिघटिकात्मकत्वमनुपपन्नं । कथं ।
कालो नाम द्रव्यांतरं तस्य वयवा घटिका यामादायस्तदात्मकत्वस्य तेजसे तारा विशेषे असंभवात् । ते
षां ताराविशेषं प्रत्यनुपादानत्वात् । उक्तकालपक्षेपि यदि कालमात्रं तर्हि कालस्य नित्यत्वप्रत्यभिज्ञाभ्यां
सर्वदा सर्वत्र तस्य रोहिणीत्वमापद्येत । तथा सति अयं बहुतिकाश्चो रोहिणी परश्चो मृगशिर इति व्यव
स्थायां ज्योतिर्विदां व्यवहारो नावकल्पेत । अथ स्थूलत्वस्थानयनान्यायावान् कालो रोहिण्युपलक्षितो
नवतिघ . टिकात्मको लब्धः स रोहिणीत्युच्यते । तेन स्थूलानयनेन षष्टिघटिकात्मिका रोहिणी सिद्धा या
त्रिंशद्घटिकात्मकस्थानयनसिद्धा स्तोकस्थूलानयनसिद्धेति को नु राद्धं मध्यवर्तिन्यस्त्वविनियेता ॥ नच

ना सा रोहिण्यां त्वमुख्यं संभवति। न ह्यन्यदन्यद्भवति विरोधात्। यथा दिनार्द्धे दिनमेव न रात्रिः। तस्माद्रजनि-
कार्द्धस्य स्थानापन्नायां रोहिण्यां तत्काले रोहिणीफलसंबंधेन रोहिणीतुल्यत्वात्। दैवहतस्यासि-
द्धत्वमिव। एवं च सति मुख्यासंभवे सा रोहिणी रोहिणीसहितत्वमष्टम्या ग्राह्या मुख्यासंभवे गौणा।
श्रयणस्य न्याय्यत्वात्। किं च प्रथमपक्षे तत्त्वेन स्थूलमार्गसिद्धस्य तिथिनक्षत्रादेर्ग्रहणं युक्तं ज्यो-
तिःशास्त्रमपि स्थूलानयनेनैव मुख्यफलमेवानयति। न मुख्यस्वरूपं च। यद्वा। स्थूलेन हुतं मानयन्नेत दे-
वत्वेऽति विद्वांसं भवद्वारहेतोः। श्रूयते च वैष्णवमुनिवर्णी तद्विवाहयात्रादिफलप्रसिद्धेरिति। किं च।। का०हे०
स्थूलाद्वन्यप्रकारेणादृष्टार्थेषु विधिनिषेधेषु नक्षत्रादीनां ग्रहणेऽव्यवस्थापत्तेः। वारनक्षत्रादि वि-
शेषविहितस्य प्रतिषिद्धस्य स्थूलनयने सिद्धे तद्दोषप्रसंगात्। अविगीतशिष्टाचारविरुद्धं चैतत्।।
तस्मात्स्थूलानयनमेवात्राश्रयणीयं। ।इति जन्माष्टमीनिर्णयः। ।अथ जयंतीपारणकालनिर्णयः। त-
त्र तिथ्यंते च कर्तव्या। गारुडाद्युक्तवचनात्। प्रातःपारणादिने इतराच्चादुपरि नातः तिथ्यंतो वा न वति। तस्मा

ईशाने पारणं कार्यं तिथ्यृक्षयोर्यदा च्छेदो न ज्ञायते तमपापि वा। अर्द्धरात्रे पारं वा कुर्यात्पारणं त्वपरेऽहनि इति व-
चनात्। अत्रैके विद्वांसः। नक्षत्रांतमपापि वेति पक्षो जयंतीश्रवणद्वादश्योर्व्यतिरेकेण। यः कश्चित्तिथ्ययः सो-
ऽयं तु एषा नक्षत्रसंयुता। ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति वचनात्। ब्रह्मवैवर्तेपि। अष्टम्या-
मथ रोहिण्यां न कुर्यात्पारणं क्वचित्। हन्युः सुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गु-
णं। तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति। किं चास्थालाद्यन्येन प्रकारेणादृष्टार्थेषु विधिनिषेधेषु
नक्षत्रादीनां ग्रहणेऽव्यवस्थापत्तेः। अविगीतशिष्टाचारविरुद्धं चैतत्। तस्मात्स्थूलानयनमेवाश्रयणीयं।।
संग्रहदर्शनाच्च। शुक्लाविद्धा एवायाने वतिय द्विसामान्येनावस्थिता या। प्राजापत्यर्क्षसंयुक्ता नवं तु विहिता ने-
न वा सर्वप्रसाकार्या सर्वैः फलार्थकथितवचनतः कृष्णजन्माष्टमीयं। पक्षे स्वष्टा सुनक्षैः सकलकलिमलघ्ना-
लनार्थं च ततः विधा विद्धाष्टमी सा उनयदिवसयोर्दृश्यते नैव किं वा प्राजापत्यमिने दिनद्वयेपि हि तु वचनस्तत्रा-
विद्धापि कार्या शुद्धाष्टैकाष्टमी स्यान्न उनयदिवसयोर्दृश्यते नैव किं वा प्राजापत्यं दिनद्वयेपि हि तु वचनस्तत्र विद्धा

का० ६०

नरयुक्तं। केवलतिथ्यंते नांते वा जयंतीव्रतप्रकरण एवाग्निपुराणे पारणविधानात्। नांते तु यो तिथ्येवा

न्यपि त्राज्यं नारत पारणमिति। तथा। रोहिणीसंयुता चेयं विद्वद्भिः समुपोषिता। वियोगे पारणं कुर्युर्मुनयो ब्र

ह्मवादिनः। सांयोगिके व्रते प्राप्ते यत्रैकापि विमुच्यते। तत्र पारणकं कुर्यादेवं वेदविदो विदुः। तस्मात्केवलति

थ्यंते नांते च पारणविधानं समर्थविषयं इतरत्त्वसमर्थविषयमिति ज्ञेयं। ।इति जयंतीपारणकालनिर्णयः।।

अथ प्रसंगात् जयंतीव्रतनित्यत्वनिर्णयः।। प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी। वर्षे वर्षे तु कर्तव्या

तुष्ट्यर्थं चक्रपाणिनः। इत्येतद्वचनात् वसंते वसंते ज्योतिषेति। तद्वीप्सायुक्तत्वात् नित्यत्वमवगम्यते। तेन ज्यो

तिष्टोमादिवदेकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायेन नित्यत्वमपि स्वीक्रियते यत्तु केचित्। नित्यत्वेन

हले। तत्र हि वाक्यांतरेण फले विहिते ज्योतिष्टोमादि फलरहितमेव। वीप्सायुक्तो वसंतकाले विधीयते तेन

तस्य वाक्यस्य नित्यत्वावबोध एव फलं। इह तु तुष्ट्यर्थं चक्रपाणिन इति तुष्टिलक्षणे फले एव व्रतं विधीयते तेन

काम्यस्य सतो न चाङ्गोति नित्यतावबोधयोऽनपपरत्वे वाक्यभेदप्रसंगात्। तस्मात् वर्षे वर्षे इति वीप्सा: र. न

तुष्ट्यर्था। न नित्यत्वार्था अन्यथासंगतत्वापातात्। प्राजापत्यर्क्षसंयुक्ताष्टमी वर्षे वर्षे यतो न संतनव निरति। तन्न

रयुक्तं। वीप्सायास्तेरानर्थक्यप्रसंगात्। न च फले तुष्ट्यर्थासेति वाच्यं। फले व्रतविधानेन तद्रूपस्य च तद्व

र्त्तिविधानमिति न च मन्तेपि वाक्यभेदप्रसंगात्। अथ फलं व्रतविधिरेवादृष्टार्थो फलं तुष्ट्यस्य सिद्धेः नन्त

त्वरसा वीप्सा। श्रुतेरिति मन्यसे तथा सत्यानर्थक्यं तु परिहरः। फलं तुष्ट्यर्थत्वे च प्रति वर्षमवश्यकर्त्त

तारूपस्य मुख्यार्थस्य हानिप्रसंगात्। न च तत्र वानौ कारणमस्ति। यतोऽस्य वाक्यस्यायमर्थः। यतः श्रावण

स्यापि सिताष्टम्यां प्राजापत्यर्क्षसंयुक्तायां चक्रपाणिनस्तुष्ट्यर्थं व्रतं वाक्यांतरेण विहितं। तद्वर्षे वर्षे कर्त्त

व्यमिति न च मुख्यार्थपरित्यागेनाष्टमीशब्देन लक्षणया व्रतानिधानं लमयुक्तमिति वाच्यं। अनुवाद

स्य शास्त्रानुरूपत्वात्। न च तोपि समानत्वाच्च। फले व्रतविधानांगीकारात्। इयांस्तु विशेषः। तत्र विशेषलक्ष

णमप्यनुवादे। उक्तं च। नाप्यकारेण विधीर्हि न परः। त्राष्टार्थः प्रतीयत इति ज्ञनो अन्यथार्थसंगतत्वापातात्।

दित्यादि युक्तं। तत्परिहृतं। नित्यस्यापि तुष्टिफलत्वोपपत्तेः श्रावणस्य अमावास्या व्रतात् पुरुषेण परः पुमान्। वि

ष्णुराराध्यते पंथा नान्यस्तत्तोषकारकः इति विष्णुपुराणवचनात्। किं च। किमुपात्तदुरितक्षयफलं नित्यमुता
करणनिमित्तप्रत्यवायपरिहारार्थं। तत्राद्ये पक्षे नित्यत्वमस्याप्यवसिष्टं। अर्द्धरात्रे तु रोहिण्यां यदा कृष्णा
ष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजं। इति वचनात्। द्वितीयपक्षेपि नित्यत्वमेव रुद्र। तथा च
देवकीसूनोर्जयंतीसंभवं व्रतं। कर्तव्यं वित्तमानेन भक्त्या भक्तजनैरपि। अकुर्वन्याति निरयं यावदिंद्रा
श्चतुर्दश इति। अकरणे महादोषश्रवणात्। यत्तत्रीकं केचित्। नैतन्नित्यत्वबाधकमपि तु फलं। अन्यथैवो
पपत्तेः। तथाहि। अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजं॥
इत्यादि। अनेन त्रिजन्मसंचितपापक्षयफलमुक्तं प्रायश्चित्तवत्। तस्याकरणे पापक्षयाभावे
तस्माद्देव त्रिजन्मसंचितात्पापान्नरकं यातीत्यर्थः। तत्र याज्ञवल्क्यवाक्यं। प्रायश्चित्तमकुर्वाणाः पापेषु
निरता नराः। अपश्चात्तापिनः कष्टान्नरकान्यांति दारुणान्। इत्यत्र न प्रायश्चित्ताकरणनिमित्तपापात्
नरकपातः। किं तु तदकरणे पापक्षयकारणाभावेन विद्यमानात्पापात्। एवमिहापीति। तदप्युक्तं। वो

का०दे०
६९

स्यावाक्येन नित्यत्वावधारणात्। व्रतस्याकरणे प्रत्यवायसिद्धेस्तदकरणे दोषविधायकवचनस्य मुख्या
र्थत्वसंभवात्। तत्परित्यागेनार्थांतरकल्पनायां प्रमाणाभावात्। यदि चैतज्जयंतीव्रतमेकमेव पापक्ष
यकरं स्यात्तदैवं भवेन्नाम। यदा त्वन्यान्यपि व्रतप्रायश्चित्तादीनि पापक्षयकराणि संति तदा तस्यैवाकर
णे कथं निरयपातः। एवं प्रायश्चित्तेपि प्रायश्चित्तं चरितव्यं नो नित्यमिति। उक्ते निःसंशये पापे न तु जीतानु
पस्थितः। भुंजानो वर्द्धयेत्पापं पर्षद्यावन्न गच्छति। पर्षदीत्यादिवाक्यैरावश्यकत्वावगमात् तदकरणे प्रत्यवायसि
द्धेस्तदकरणे दोषाभिधायकस्य प्रायश्चित्तमकुर्वाणा इत्यादिवाक्यमुख्यार्थत्वसंभवात्तत्परित्यागेनार्था
तरकल्पने प्रमाणाभावात्। यदप्युक्तं। यदि व्रतस्य नित्यत्वेनाकरणे निरयपातः। तर्हि नित्यहुतासार्थं प्राय
श्चित्तं स्यादेव। तथा ज्ञानतोनादितो मितयोः। तु यावन्निमेषकाद्यावत्तस्याकरणे अष्टम्यां च तु द्वयंशा
द्विवानुक्तं स्वयं चरेत्। एकादश्यां दिवारात्रौ न भक्तं चैव तु पर्वणीति। तदप्ययुक्तं। सर्वत्रौपदेशिकप्रायश्चित्ता
भावात्। तथा सति प्रायश्चित्तेष्वकल्पस्याप्यत्र वोक्तानि निःज्ञानि। ज्ञाणायामशतं कार्यं सर्वपापानुत्तये। उ

पपातकजातानामनादिष्टस्यैव द्विः। सादिवचनानर्थक्यप्रसंगात्। यच्चास्मदुक्तं केश्चित् यद्यकरणे प्रत्य-
वायोन विष्यत्। अनुकल्पोपि व्यर्थः स्यात्। यथा एषामसंनवे कुर्याद्दिष्टिं वैश्वानरीं द्विजः। तथा एकादश्यां प्र
तेनित्य एकभक्ते नक्तेन वा गौणं हराउश्लोके पि हि तस्य समर्थप्रस्तनुक्तः स्यो विधीयते। न तथात्रास्तीत्युक्तं। न हप्र
युक्तः। अनुकल्पविधानानावेपि नित्याकरणे प्रत्यवायस्यावश्यंभावित्वात्। पुराणान्तरे धारणानुकल्पोद
र्शितः। उपवासेसमर्थश्चेदेकं विप्रं तु भोजयेत्। तावद्धनानि वा दद्यात् यद्भक्ताद्द्विगुणं तथा। सहस्रसंमितं
देवीं जपेद्वा प्राणसंयमान्। कुर्याद्द्वादशसंख्याकान् यथाशक्त्या तु सोनरः। इति तस्मान्नोरणमनवचनस्य
नित्यतावबोधः। फलमिति सिद्धं। स्कंदपुराणे। अनाचरण दोषश्चाकल्पप्रतिपादनेन नित्यत्वमेव स्पष्टीकृतं
तथाहि। श्रूयतान्नेन उयसंपूर्णा ब्रह्मसेनतो जनेन। तस्मापलस्मृते पुनिर्जयंत्यां भोजने कृते। प्रभ्रमासस्वरकाकं का०३०
रूपेणं वा पुनिसत्तम। मांसं वापि पद्मानुक्तं कृष्णजन्माष्टमीदिने। कृष्णामीदिने शासेयेननुक्तं द्विजोत्तम। नैकभक्त ७०
नवं यापेनुक्तं तेनन संशयः। ब्रह्मघ्नस्य सुरापस्य गोवधस्त्रीवधोपि वा। न लोकोमुनिशार्दूल जयंति विमुख।

स्यचानकुर्वंति च जानंतः कृष्णजन्माष्टमीव्रतं। न कुर्वंति महापापास्ते मालानवंतिकानने। श्रावणे बहुले पक्षे
कृष्णं कुर्यात् रोहिण्यष्टमी कृष्णजन्माष्टमीव्रतं। न करोति नरो यस्तु स भवति क्रूरराक्षसः। श्रावणे बहुले पक्षे न करो
ति यदाष्टमी। क्रूरासुधा क्रूरसुखाहिंसनियमकिंकराः। न करोति यदा विष्णोर्जयंतिसंभवं व्रतं। यमस्य व
शमापन्नः सहते नारकीं व्यथां। जयंतीवासरे प्राप्ते करोत्युदरपूरणं। स्वाद्यते तिलमात्रं तु यमदूतैः कलेवरं।
याते नीन विमूढात्मा जयंतीवासरे नृप। नरकान्नैन तस्यास्ति यावदिंद्राश्चतुर्दश। यद्दासद्वजयंत्यां तु करोत्य
न्नादृशी व्रतं। तस्य सौरिपुरे वासो यावदाकृतसंप्लवं। रटंतीह पुराणानि भूयो भूयो महामुने। अतीतानागतं तेन
कुलमेकोत्तरं शतं। पातितं नरके घोरे भुंजता कृष्णवासरे इति। अनेपुरुक्तं। यस्तु नरकं नत्रयुक्तं भोजनं वा
कामतश्च तु नोजनं प्रतिषेधेन। न हिंसा सर्वत्र नानै निवर्तनेन जयंत्याकथं नित्यता। तस्माद्दाम्भिकथं तत
स्यपावः। तेयोरसेवा धावा। उपवासजयंती प्रकरणपागनेददर्श्य व प्रतिषिद्धस्यपत्ते। तथापि तेन जयंत्या नि
त्यता। राका न वादो न हि खलु नान्वतवेदेहिसनेन भक्षवर्ज प्रतिषेधेन कृतो। नित्यत्वसिध्यति। किंच। उपवा

सोनामसेतिकर्त्तव्यताकोऽत्र भोजनसंकल्पः॥ तन्निवार्हार्थमेव भोजननिवृत्तोसि द्वादश्यां कोर्थः प्रतिषेधेने-
ति। तस्य तिषेधवाक्यस्यापि गमेनैव परिहृतेः। तस्मादष्टम्यामग्निश्चेत भोजनान्तरिथेनादिवीतव्रता।
क्ष्यताभावयथानिर्मांसोनुवाहवेनास्मद्भिरण्पनिधानस्तु समर्थनानूत्। एवमिहापि भोजनप्रतिषेधरू
पनिसजन्माष्टमीव्रतस्तु समर्थनावेदितव्या। अन्नकरणे दोषाभिधायकत्वेन काम्यव्रतविधिस्तु समर्थनाउ
पपत्तेः। भोजननिंदावाक्यानां तु नित्यव्रतविधिशेषत्वं स्पष्टमेव फलसंबंधवचनात् काम्यत्वमाप्यत
व्रतस्यावगम्यते। तद्यथा विरहस्ये। आजापमहं संपुण्यात्ततस्मानंनसितवाष्टमी। मुहूर्त्तमपिलसो
पोष्यासामहाफला। स्कंदपुराणे च। व्रतेनाराध्यतेदेवं देवकीसहितं हरिं। सन्तापमपपघं घोरं याति का॰ हे॰ ७१
विष्णोः परं पदं॥ २जन्माष्टमीव्रते ये वै प्रकुर्वंति नरोत्तमाः। कारयंति च विधेड्जलक्ष्मीस्तेषां सदा स्थिरा॥
स्मरणेवासुदेवस्य मृत्युकाले न वेत्सुते। सिध्यंति सर्वकार्याणि कृत्वेन जन्माष्टमीव्रते। धर्ममर्थं च कामं
च मोक्षं च मुनिपुंगव। ददाति वांछितानन्कामानन्यं चान्यपि दुर्लभं। तथा। ममाज्ञयाकुरुष्व त्वंजये प

तां मुक्तपनवानविषोत्तरे वतिविंशविधानेनमद्भक्तो धर्मनंदनं॥ नरोवाथदिवानारीयथोक्तफलमाप्नुयात्। पु
त्रसंतानमारोग्यसौभाग्यमतुलंलभेत्। इहैवधर्मरतिर्भूत्वामृतो वैकुंठमाप्नुयात्। तत्र दिव्येनमानेनवर्षलं
क्षंयुधिष्ठिर। भोगान्नानाविधान्भुक्त्वा पुण्यशेषादिहागतः॥ सर्वकामसमृद्धेन सर्वासुखविवर्जिताः सर्वधर्म
युते पार्थसर्वगोकुलसंकुले। कुले नृपवरिष्ठानां जायते ह्मद्ययोपमः॥ यस्मिन्संदेवदेशेषु लिखितं वा
पटार्पितं। ममजन्मादिनं पुण्यं सर्वालंकारशोभितं। पूज्यते पांडवश्रेष्ठ जनैरुत्सवसंयुतैः। परचक्रनयंत
त्र नकदाचिन्नवस्तुतः। पर्जन्यः कामवर्षी स्यादीतिभ्यो न भयं नवेत्। गृहे वा पूज्यते यस्मिन्देवक्याश्चरितं
मम। तत्र सर्वसमृद्धिः स्यान्नोपसर्गादिकंनयं। पशुतोनकुलाद्यालात् पापरोगाच्चपातकात्। राजतश्चौरत
तो वापि नकदाचिद्भयंभवेत्। तस्मादेनद्व्रतेनित्यं काम्यं चेति सिद्धं॥ ॥ इति जयंतीव्रतनित्यत्वनिर्णयः
अथैकादशीनिर्णयः॥ । तत्रैकादशीमहिमा तत्वसागरात्। मातेव सर्वबालानामौषधंरोगिणामिव॥
रक्षार्थं सर्वलोकानां निर्मितैकादशी तिथिः॥ तथा॥ एकादश्युपवासि च सधनः सच बुधिमान्। तथा॥ एकाद

शीपरित्यज्यसन्मत्रमुपासते।।४।।सकरस्तुमहाराजेनेलक्ष्मालोष्टंहियावने।।नथा।।एकमेकादशीवापिसमुपो
ष्यजनार्द्दनं।।३।।कामेनापिसमभ्यर्च्यसंसारान्मुक्तिमाप्नुयात्।।पुराणंनेनतेरे।।नोपेनापिसमभ्यर्च्येतिपावः।
प्रसंगाध्वावालेनातूर्द्दमासावित्रिदशाधिप।एकादश्यामुपनःस्नातासर्वदुःखाद्विमुच्यते।संसारास्मैमहाघो
रदुःखिनांसर्वदेहिनां।।एकादश्युपवासोयंनिर्म्मितःपरमौषधं।संसारीरुगदृष्टानांनराणांपापकर्मणां
।।एकादश्युपवासेनसद्यरावमुखंनवेत्।नारदीयपुराणेवशिष्टः।।एकादशीसमुछेनवह्निनापातके
धनं।७।नस्मनोपातिराजेन्द्रश्चपिजन्मशतोद्भवं।नेदृशंपावनंकिंचित्नराणांभूपविद्यते।८।यादृशंपद्म
नाभस्यदिनंपातकहानिदं।नावसापानिदेहेस्मिंस्तिष्ठंतिमनुजाधिप।९।यावन्नोपवसेज्जंतुःपद्मनाभदि
नेशुभे।।अश्वमेधसहस्राणिवाजपेयशतानिच।।१०।।एकादश्युपवासस्यकलांनार्हन्तिषोडशीं।।एकादशो
द्रियैःपापंयत्कृतंनवविप्रनो।।११।।एकादश्युपवासेनतत्सर्वंविलयंव्रजेत्।।एकादशीसमंकिंचित्पापत्राणं
नविद्यते।।१२।।स्वर्गमोक्षप्रदाह्येषाराज्यपुत्रप्रदायिनी।।सुकलत्रप्रदाह्येषाशरीरारोग्यप्रदायिनी।।१३।।नगंगा

का॰दे॰
७२

नगयानृपनकाशीनचपुष्करं।नचापिकौरवंक्षेत्रंनरेवानचदेविका।।१४।।यमुनाचंद्रभागावैगोतुल्यानृपहरेर्दि
नात्।।ध्याजेनापिकृताराजन्नेदृशंपतितेकं।।१५।।अन्नमयासेनराजेन्द्रप्राप्यतेवैष्णवंपदं।विनामणिसमाले
पापेवात्त्वपनिधेःसमा।।१६।।कल्पपादपवत्ख्यावैवेदवाद्यौपमातथा।।ब्रह्मैवैवनौसर्वप्रायश्चित्तमिदंस
सारोन्नारकारकं।।१७।।एकादशीव्रतेविप्रऊर्व्वन्मुक्तिमवाप्नुयात्।।नरोदिनैर्यदृशानिश्चतुर्निश्चकरोत्सयं।।१८।।
उपोष्यपंचदशामंहिनंविष्णोर्हिमुच्यते।इतिसर्वपुराणेषुमुनीनांनिश्चितंमतं।।१९।।उपोष्यैकादशीपापात्मु
च्यतेनात्रसंशयः।।कलावस्मिन्नराणांमहिंसापावितात्मनां।।२०।।एकादशींविनाविप्रसंसारान्नविमोक्षणं
पद्मपुराणात्।उपोष्यैकादशीमेकांप्रसंगेनापिमानवाः।।२१।।नयातियातनांयामिमीतिनोयमतःश्रुतान्तथा।।
एकादशेन्द्रियैःपापंयत्कृतंवैस्पमानवैः।।२२।।एकादश्युपवासेनतत्सर्वंविलयंव्रजेत्।।एकासमंकिंचित्पुण्य
लोकेनविद्यते।।२३।।व्याजेनापिकृतायैस्तुवंद्यपयांतिनतास्करे।।स्कंदपुराणेपि।।विनापिकृतसंयोगात्संदेव
कादशीन्नृणां।।२४।।विनिहंतिद्यपापानिकृतरूपोविषंपपथा।।ऊपुत्रसुतकलत्रपदकृतंनारीसुपतिंयथा।।२५।।

—धर्म· । प. ३नः। ततः धर्मेण पद्मानपञ्च... । नाप्याप्यक्षयावः जीवितो यथा। २६। अश्वमेधसहस्र
वाजसमं चैव कृतेन हि। यथा स्नेन हि सदृश स्यपि नापूर्वरेव पः। २७। यदा या र्तना द्वानेन दोविस्मयकारणा
ता। अत्रि श्रीष्ठो हि यथा पुण्यगा वो दुर्गमाश्रयणे। २८। संकृतेन यथा मन्त्राद्धं यथा वितनमवर्त्तनात्। यथा तमी हता
तज्ञानेन फलानीव रवर्णिनि। २९। नन्दपञ्चगुःश्चनं संघा नाथो श्रीयं गाह श्रीसुते। ब्रह्महत्या सुरापानं स्तेयं गुर्वंगना
गमः। ३०। अन्नाचे समुपेक्षन्ति न न था च विशुद्धरे। न चापि नेमि पंश्रोवेन न च कौरव सन्निते। ३१। अन्नान्ने समुपे
श्रमा सनगया देवीन रेवा न सरस्वती। कालिन्दी यमुना चैव द्विवेका न च का च ना। ३२। नयान्यतीर्थसंघातो नैव तु
ल्योत्र रेहिनात्। नदानेन जपःस्नानेन न वाप्य स्तु ष्टेन रुक्तवितं। ३३। सुकृपेन न च स्तुत्य मुकै करिवासरा। सत्य
श्रोपाषणे त्रा स्पोन स्पति पापराशयः। ३४। एकतः पृथिवी दानं एकतो हरिवासरः। न समं कवितिः प्रोक्तं वा
सरो ह्यधिको स्मृतः। ३५। विष्णुधर्मोत्तरे। त्वमा साहरिं यस्तु न स्मा ध्यायति मानवः। तज्ञ ष्य जीवितं कर्म रतस्त
ज्ञ न मानसः। ३६। निःक्रामो हैनवश्चद्रपदमा मोत्म सराय। नविष्णुपुराणे। एकादशी महापुण्या सर्वपापविना

का०दे०
७३

त्रिनी। न तत्रे सुदापिनी विष्णोः परमार्थगतिप्रदा। या पुपोष्य नरो न स्मान संसारे न विष्णुति। एकादश्यां निराहा
रो यो तु श्रेणादशीदिने। न स दुर्गतिमाप्नोति नरकाणि न संशयः। कृत्वा पापसहस्राणि एकादश्यामुपोषि
तः। द्वादश्यामर्च्य देवेशं न स दुर्गतिमाप्नुयात्। एषा तिथिः परा पुण्या विष्णोरीशस्य वल्लभा। संचैव जग
न्नाथो अस्य मूर्त्तिर्मूर्त्तिमास्थितः। तेन सा सर्वपापघ्नी सर्वदुःखविनाशिनी। पासा विष्णुमयी शक्तिरनन्ता लं
तपारमृता। सा तेन तिथिरूपेण द्रष्टव्यैकादशी सती। सनत्कुमारप्रोक्तो। कृत्वा पापसहस्राणि ब्रह्महत्या
दिकानि च। एकामेकादशीं न स्नात्समुपोष्य सुविनर्वृतः। एकादशीव्रतादन्यत् अन्नप्राक्किपते नरे। निष्फलं
न दिनानि यान्तु दुःखोद्भवमिवाङ्कुरं। नारदीयपुराणे। सम्प्राप्य वासरं विष्णोर्यो नरः संयतेन्द्रियः। उपवास
परो भूत्वा द्वजयेन्मधुसूदनं। सदहेत्सर्वपापानि किं तपोभिः किमध्वरैः। एकादशीव्रतं पुण्या येन राजन् रवरो
त्तमा। नहरे च कोटिनागारि कृत्वेकेन ना। अग्रेण पातकस्याद्धि इह याति हरिमन्दिरं। एवं ब्रवतो हि मृपाकृ
दश्यां परिकीर्त्तिताः। पापं धनस्य घोरस्य पावकास्या पदीपते इति। देवीरहस्य स्कन्दपुराणयोः। पापेपवि

धर्म्मा कं पातकं हरति पातकं। उपपातकसंज्ञं च महापातकनाम च। यत्किंचित्कं च तत्सर्व्वमेकादश्यामुपोषणात्।
विलयं याति नोपस्थ यथा मृन्मयभाजनं। नविष्णुपुराणे। वैष्णवे महातन्त्रे। एकादश्युपवासीयः किंतस्यामे
नकर्मणा। सौरधर्मेषु। एकतश्चाग्निहोत्रादि एकादशीमेकतः घृतः। तुलया तोलयत्तत्र एकादशी च विशिष्यते
देवीरहस्ये। गायत्री हि यथा सर्व्वपापप्रणाशने दिने। स्कन्दपुराणेपि। अन्नेनान्नेन नाजातमगम्यागमनाद्य
पतं। अयाज्ययाजनाद्यं च अन्नदानाच्चनत्मणात्। त्रसत्त्वस्यरूनाद्यं च परेषां निंदनाच्च यत्। आत्मसं
वदनाद्यं च परदारार्थहृतं च यत्। विहिताकरणाद्यं च परविज्ञापदारतः। ज्ञानाज्ञानकृतं यच्च पातकं चोपप
तकं। तत्सर्वं विलयं याति एकादश्यामुपोषणात्। वैष्णवे तन्त्रे। एकादशी महापुण्या विष्णोरीत्याश्वत्थना कालनि० ७४
तस्यामुपोषितो यस्तु द्वादश्यां द्विजयेद्धरिं। तस्य पापानि नश्यन्ति विष्णोर्नान्यत्र संशयः। ज्ञानेन वत्ता द्यत्तुपेन
संसाराद्धि दह्यते नरः। स्कन्दे नविष्णुपुराणयोः। ये द्वादशीमुपवासस्य निलाद्युत्र ज्ञापेवा गमगते स्तुमेहरि
मर्च्चयंति ते यांति परमां पदं पयोनिधि राजहंसाः संसारसागरजलस्य तरन्ति पारं। वायुपुराणे। एकादश्यां व्रते

यस्तु नक्तिमानुत्कुरुते नरः। सर्वपापविनिर्मुक्तः स विष्णोर्याति मंदिरं। विष्णुधर्मोत्तरे। एकादश्युपवासं यः श्र
द्धया कुरुते नरः। स सर्व्वपातकादिभ्यः सद्य एव विमुच्यते। न पश्यति यमं वापि नरकं न च यातनां। स नमस्यः
सपूज्यश्च वासुदेवप्रियोपि सः। गरुडपुराणे। एकादशीव्रतं नक्तमायः करोति नरः सदा। स विष्णुलोकमाप्नोति
याति विष्णोः सरूपतां। आग्नेयपुराणे। एकादश्यामुपवासं यः सदा कुरुते नरः। स याति परमं स्थानं यत्र देवो ह
रिः स्थितः। रुद्रयामले। यः करोति नरो नक्तम् एकादश्यामुपोषणं। स याति विष्णुसालोक्यं याति विष्णोः स
रूपतां। विष्णुपुराणे। ॐकारः सर्ववेदानां पृथिव्यां द्विजः। तथा सर्वव्रतानां च द्वादशीव्रतमुत्तमं। इ
ति एकादशीमहिमा। ॥ । अथैकादश्यां विषये निषेधवचनवाक्यनिर्णयः। तत्र एकादश्यां कानि विहि
तानि भोजननिषेधपराणि। कानि विहितविधिपराणि। तत्र भोजननिषेधपराणि तावदुदाह्रियंते। तत्र देव
लः। न शङ्खेन पिबेत्तोयं न खादेत्कूर्म्मशूकरौ। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। नारदीयपुराणेपि। यानि
कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे। तानि पापान्यवाप्नोति तु

ज्ञानां हरिवासरे। रटंतीह पुराणानि भूयो भूयो वरानने। न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे। स्कांदपुराणेपि। मा
तृहा पितृहा चैव भ्रातृहा गुरुहा तथा। एकादश्यांतु भुंजानो विष्णुलोकात् च्युतो भवेत्। नारदीयपुराणेतु॥
अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न हि पूर्यते। यो भुंक्ते मामके राष्ट्रे विष्णोरहनि पापकृत्। सामदंड्यश्च वध्यश्च
निर्वास्यो विषयाद्बहिः। विष्णुस्मृतावपि। एकादश्यां न भुंजीत कदाचिदपि मानवः। ब्रह्मवैवर्ते। स केवलम
घं भुंक्ते यो भुंक्ते हरिवासरे। दिने तु सर्वपापानि निवसन्ति स्थितानि तु। तानि मोहेन योश्नाति न स पापैर्विमु
च्यते। विधवायास्त्वेकादश्यां ह्येष विशेषः वृहत्स्मृतिः। कात्यायनेन। विधवा या भवेन्नारी भुंजीतैकादशीदि
ने। तस्यास्तु सुकृतं नश्येत् भ्रूणहत्या दिने दिने। अत्र चानशनादेः कर्मस्थक्रियावित्वादि निषिद्धसनिषेधसमूलि का० ३० ७५
त्वाहृतत्वे एकादश्यां न भुंजीत पक्षयोरुभयोरपीत्यादेः निषेधपरत्वमेवाध्यवसीयते। न चैतेषु वाक्येषूपसंह
तकरणत्वेन व्रतशब्दसामानाधिकरण्यादि श्रूयते। अतो भोजननिषेधा इमे न त्वेके विधायकाः। एतान्यपि वचना
न्युपवासपराण्येव। एकविंदुपक्रमेकविंदुपसंहारेकविंदुपक्रमोपसंहारयोरुपवासस्य प्रतिपादनात्॥

नयर्थविधेश्च मूलभूतं वेदांतरकल्पनाप्रसंगाच्च। एकमूलत्वाय लक्षणापि स्मृतितंत्रप्रसिद्धैव। यच्चैकादश्यां
मुपवसेदित्यभिधायैकादश्यां न भुंजीतेति वचनं देवलादिस्मृतिषु तदुपसंहारार्थं गुणविधानार्थं वा।
तथाचोपवासप्रकरणपठनमप्युचितं भवति। तन्न स्वतंत्रनञर्थविधिपरत्वमेवमादिवचनमिति मतम
पास्तमिति। अपरे त्वाहुः। तेन युक्तं। मुख्यार्थसंभवे लक्षणाश्रयणस्यानुचितत्वात्। न च मूलभूतवेदांतरक
ल्पनाप्रसंगभयात् लक्षणाश्रयणमुचितमिति वाच्यं। सर्वविधिनिषेधानामेकार्थत्वापत्तेः। न चैवं क्वादि
शब्दसामानाधिकरण्याभावान्निषिद्धानां ब्रह्महत्यादीनां परित्यागे कश्चिद्धर्मो जायते। ब्रह्महत्यानुष्ठाने
ऽधर्मो भवति। अननुष्ठाने अधर्मपरिहारमात्रेण पुनर्धर्मसंभवः। ग्रावकनिषेधो यदीनो धर्मो भवेदपि न
पुनः स्वतंत्रो निषेधस्तथा न व्रतानि स्याद्धर्मव्रतशब्दसामानाधिकरण्यादवगम्यते। नाव्रतरूपं किंचिद्विधेयमस्
तीति प्रजापतिव्रते स्विवनार्थस्य व्रतशब्दसामानाधिकरण्यात्। अतः सर्वेषेकादश्यां भोजननिषेधवा
क्यसर्वशाखान्यायेन व्रतस्थयतिधर्मयमित्यस्योपसंहाराद्धर्मशब्दसामानाधिकरण्यं पर्युदासाश्रयण

कारणं न विष्यतीत्युच्यते। सत्यं। यद्येतद्वाक्यं विहितं नित्यमेकादश्युपवासव्रतं स्मृत्यंतरे मुख्यपक्षे मुख्य-
संनवाबालवृद्धानां विधीयते। यथा कात्यायनः देवलस्मृतौ। एकादश्यामुपवसेत् पक्षयोरुभयोरपि। वि- दि१
ष्णुरहस्ये स्कंदपुराणे। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि इत्याद्युक्तं। यथा च नविष्णोत्तरे। एकाद-
श्यां न भुंजीत पक्षयोरुभयोरपि। ब्रह्मचारी च नारी च शुक्लामेव सदा गृही। आग्नेयपुराणे। गृहस्थो ब्रह्मचारी
च आहिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। इत्यादिषु वचनेन। तत्रैतत्स्मृतिगतस्य वन-
स्थयतिधर्मोपमितिविनिर्मोक्षस्य तत्स्मृतिगतस्य ब्रह्मचारी चेति। गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव का०३०
च इति विशेषस्य त्वकर्मकस्याद्युपसंहारो युज्यते। यत्तु मुख्यार्थसंनवेन निषिद्धत्वनिश्चयादुपवासव्र- ७६
तविधानेनास्ति तत्र कथं व्रतगतस्योपसंहारः। न स्यादिहोत्तरगतो विशेषः शास्त्रांतरेऽन्यकर्मण्युपसंह्रि-
यते। उपसंहारादेव व्रतविधानेन विष्यतीति चेत्। न उपसंहारे सति व्रतविधानं व्रतविधाने च सति क-
र्मैक्यादुपसंहार इति। इत्यन्योन्याश्रयप्रसंगात्। सर्वत्रोपसंहारे च देवलस्मृतौ। व्रतबोधायकत्वा-

कांतरसद्भावात् पौनरुक्त्यप्रसंगात्। नैवैकं व्रतविधानार्थं द्वितीयं तदुपसंहारार्थं चेति वाच्यं। नञ्श्रुतत्वेनपि
वेन्नोपमिमादि निषिद्धव्यवधानेनाबुद्धिस्थस्योपसंहारानुपपत्तेः। भिन्नार्थत्वे संनवस्तूपसंहारार्थत्व-
स्यानुवृत्तत्वाच्च। नापि गुणविधिः। प्राप्तार्थविषयत्वेन विधित्वस्यैवानुपपत्तेः। नञ्श्रुतत्वेनापि वेन्नोपमिमा-
दिनिःसंपत्तिपक्षनिषेधेः। स्यादेवं यद्येणपवितताश्च। एतेन कथंचिदुपसंहारे उद्वीपेसप्रतिपादनादिम-
पि निरस्तं। एकतिथिसंबंधात् वा उपवासप्रकरणपठनमप्युक्तं। तस्मात् स्वतंत्रनञर्थविधिपरमेव
मादिवचनमिति मन्तव्यमीविनेत्। कथं ब्रह्मचार्यादिवाक्येषु मुख्यार्थसंनवात् लक्षणया उपवासव्रतवि-
धानमिति चेत्। उच्यते। मुख्यार्थपरिग्रहे त्वेषां वाक्यानामयमर्थो न वेत्। गृहस्थब्रह्मचर्याहिताग्निना-
रीणां पक्षद्वयेऽप्येकादश्यां भोजननिषेधः। तद्व्यतिरिक्तानां भोजने च स्यपानाव्रः। यत्स्थस्य तु शुक्लायामे-
व भोजननिषेधः। नेतरव्यतिरिक्तानां कृष्णायां भोजने प्रत्यवायः चावश्यापत्तेन। विशेषनिषेधस्य शेषाभ्य-

तुत्वाविषयत्वात्। तथा सत्येकादश्यां तु भुंजीत न कदाचिदपि मानवः॥ इत्यादि वचनविरोधः॥ न च सामान्यनिषेध
स्य विशेषनिषेधेनोपसंहारः। यथा पुरोडाशं चतुर्धा करोतीति सामान्यविधेर्यस्य विशेषनिषेधस्य आग्नेयं च
तुर्धा करोतीति विशेषविधिना न विष्णुतीति वाच्यं निषेधस्य निवृत्तिफलत्वेन विशेषापानपेक्षत्वात् उपसंहारानु
पपत्तेः॥ एवमप्युपसंहारे न हिंस्यात्सर्वभूतानीति सामान्यनिषेधस्य ब्राह्मणो न हंतव्य इति। विशेषविधिनो
पसंहारापत्तौ क्षत्रियादिवधे प्रायश्चित्तोपदेशानर्थक्यप्रसंगात् ब्राह्मणो न हंतव्य इति च। पापयोगरक्षा
पनार्थविशेषनिषेध इति चेत्। न तदनावात्। न हि वनस्थयतीनामेकादश्यां भोजने न्यूनः प्रत्यवायो गृहस्थ
नामधिकः। गृहस्थस्य च अध्याये भोजने न्यूनः स्मृत्यामधिक इति संनवति। प्रायश्चित्ताधिक्याभिधानात्।
प्रत्युत गृहस्थापेक्षया वनस्थादीनां दोषवैलक्षण्यं न चोक्त इति प्रायश्चित्ताधिक्याभिधानात्। प्रायश्चित्तोप
देशादेवानुपसंहार इति चेत्। न। अनुपदिष्टप्रायश्चित्तप्रसंगात्। सामान्यतो विहितप्रायश्चित्तेन सर्वत्रास्तीति
चेत्। न नवत्वमते प्रत्यक्षनिषेधसत्त्वे पि कल्पनाप्रसंगात्। अस्तु तस्यैवोपसंहारानावमात्रं तस्माद्भविष्यतीति। का०दे०
७७

चेत्। न। उपसंहारनिवारणार्थत्वाभावे मानवपदस्य वैयर्थ्यात्। शास्त्रस्य मनुष्याधिकारत्वेनैव तत्सिद्धेः। पर्यु
दासे। पर्युदासपक्षे गृहस्थो ब्रह्मचारी चेत्यत्र वाक्ये न पक्षद्वयेप्युपवासप्रसक्तेः गृहस्थग्रहणमनुपपन्नं स्या
त्। अस्तु तामेव सदा शूद्रो साधिनिः ब्राह्मणो विरोधादिति। तदप्ययुक्तं। अविरोधस्यानुपदमेवोपपादयिष्यमा
णत्वात्। अपरे त्वाहुः। यानि व्रतानि शास्त्रसामानाधिकरण्यरहितानि वाक्यानि तानि निषेधपराणि वा नानुप
र्युदासपक्षेपि लक्षणा नास्त्येव। न च भावे च सा दृश्यते तद्विरुध्यते तन्यापर्यपि इति स्मरणात्। अतश्च वाक्या
न्तरपर्यालोचनया भोजनविरुद्धमभोजनसंकल्पमभिदधदुपवासः परः स्यात्। अन्यथा नानुयाजेषु येय
जामहे करोति। तत्रापि लक्षणा न स्यात्। पर्युदासानस्मात्। निषेधपक्षे अष्टदोषदुष्टविकल्पप्रसंगात् लक्षणा
पि स्वीक्रियत इति चेत्। न। एवं सति पवै यजेते नस्त्रापि ब्रीहिलक्षणाप्रसंगात्। न च व्रीही निर्यजेत्येव प
वलक्षणा ब्रीहिनिरिस्तस्य वकुम्बवाक्ये पुपद्यमानत्वात्। अष्टादोषदुष्टविकल्पाच्च वरं वाक्यद्वयविहितम
स्तु द्वयकारि न वर्ति इति कल्पना। अनेकसंस्कारवाक्यगतयेव लक्षणा तावर्मेकस्मिन्नेव वाक्ये ब्रीहिलक्षणा

युक्तास्तस्माद्विकल्पनपात् लक्षणांगीकारे अवश्यस्थाप्रसंगान्न पर्युदासपक्षेण आलक्षणामुख्यामेवानेन पर्युदा-
स एवास्तु इति चेन्न तेन प्रधानाख्यातयोगेन निषेधत्वे च । नामधात्वर्थयोगे च पर्युदासो न भवति । न तु निषेधः । सत्यं
उच्यते । पर्युदासपक्षेपि लक्षणाभावेपि निषेधा एवैते । सर्वे हि प्रधानेनैव सन्ति संबन्धेन संपद्यते । आख्यातयोगे
तदुक्तं । नामधात्वर्थयोगी च नैव नञ् प्रतिषेधक इति तस्मान्निषेधोऽगीक्रियते । प्रतीयमानप्रधानाख्यातसंब-
धेवाधकाभावात् । न तु लक्षणाप्रसंगनियात् । पूर्वविकल्पनयात् । लक्षणास्वीकारे यववाक्ये सा प्रसज्येत । तदुक्तं ।
तदुक्तं । व्रीहिवाक्ये यववाक्ये वा सा स्वीकार्येति हि निगमे दोषाभावात् । न च व्रीहिशब्दस्य वक्तृवाक्यपायोति-
याभवः । संस्कारवाक्यगतव्रीहिशब्दस्य यवलक्षणकल्पनाभावात् । प्रहृदय प्रकृतिमात्रलक्षणोपपत्तेः । गृहस्थो ब्र-
ह्मचारी वेति वचनमपि निषेधपरमेव । न वैकादश्यां नानुज्ञातकराविरमानवइति वचनविरोधः । उपसंहाराभा-
वात् । न च विशेषग्रहणवैयर्थ्यं । आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नन्त एव सिध्यन्ति नैषां सिद्धिर-
नश्नतां । यो गृहस्थो नानुज्ञात आहिताग्निस्तथैव च । प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः । इत्येवमादि ।

पीतो च न यामान्न च परसंकोचपरिहारार्थत्वात् । यो गृहस्थो नानुज्ञातो नेति वचनान्नैकादश्यां नतिरिक्तविषयाणि । गृ-
हस्थादिविषये तेनोक्तं न निषेधपर्यालोचनया एकादश्यां नानुज्ञाते समस्तापि तत्व्यतिरिक्तविषयताप्रसंगात् । नेनैव
क्रमापनोदार्थं गृहस्थो ब्रह्मचारी वेति ब्रह्मचारी च नारी चेति वचनमिति न दोषः । यानि पुनर्वाक्यानि व्रतादिश-
ष्टवंति दृश्यन्ते । तानि न निषेधपराणि नोद्यन्तमादित्यमीक्षेतेतिवत् । अस्य न विष्णुपुराणयोः । एकादश्यां नि-
राहारो यो नु तेकादशीदिने । अश्नुते वा यदि वा तत्क्षणेन भवेत्स्वमन्दत् । आग्नेयपुराणे । एकादश्यां न तु जी-
तव्रतमनन्हि वैष्णवे । एवमन्यान्यपि वाक्यानि व्रतविधिपराणि ज्ञेयाणि । यान्युपवाससंज्ञा श्रवन्ति यानि च फ-
लश्रवन्ति वचमाणानि तान्यपि व्रतविधिपराण्येव । निषेधपरत्वे फलसंबंधानुपपत्तेः । व्रतविधिपराण्य-
पि वाक्यानि द्विधा । नित्यव्रतविधिपराणि । काम्यव्रतविधिपराणि च । नित्यव्रतविधिपराणि चैतान्युदाह्रियं-
ते । तत्र नारदः । नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः । पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणं । अत्रोपोषणनि-
त्यं कर्त्तव्यमित्यन्वयः । गारुडपुराणेपि । उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि । एकादशी सदोपोष्या पक्षयो-

शुक्लकृष्णयोः। सनत्कुमारप्रोक्तेपि तथा। एकादश्यामुपवसेन्नकदाचिदतिक्रमेत्। तथा न करोति हि यो मूढ एका-
दश्यामुपोषणं। स नरो नरकं याति रौरवं तमसावृतं। एषु वाक्येषु सदा नित्यनातिक्रमेदिति क्रमेश्रवणात्।
पक्षेपक्षे इति वीप्साश्रवणात्। अकरणे दोषसंकीर्तनाच्च। एकादशीव्रतं नित्यमिति गम्यते। तथा च विष्णुरहस्ये
दशी न भोक्तव्या यावदायुः प्रवृत्तिभिः। अग्निपुराणे। उपोष्यैकादशी राजन्यावदायुः प्रवृत्तिभिः। इति। यति
विधवयोरेकादश्युपवासातिक्रमे दोषविशेषो दर्शितो। नारदीयपुराणे। एकादश्यां विना रंडा यतिश्च सुमहा-
तपाः। पच्यते ह्यंधतामिश्रे यावदाभूतसंप्लवं। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोयं
शुक्लामेव सदा गृही। इति गालवचनादपि नित्यत्वमेवावगम्यते। सदाशब्दान्वयात्। सदा सर्वकाले। एकादश्यां न
भुंजीत इति व्रतं तु। न तु गृहिणैव। सदाशब्दान्वयात्। एवं इतरेष्वप्युपवासेषु नित्यकाम्यप्रकारविशेषः। न च
साधुपरिहारार्थं सप्तविंशति सदाशब्देनान्वयात्। त्रिकालं मंत्रं न स्नात्। सदा सदा सुरापः स्यात् सत्त्रियोगुरुतल्प-
गः। विचारयति यो मोहादेकादश्यैपुसितास्तिनो। इति वचनं नित्यत्वप्रतिपादकं। इदं च यद्यप्यर्थवादमात्रं। तथा-

का०ह०
७९

पि स्वर्गे नार्थवादत्वात् विधिमंतरेण तदनुपपत्तेः विधिं कल्पयति। उदुंबरो यूपो भवतीतिवत्। तथापि दोषस्य
चावश्यकत्वात्। स्वातिक्रमे मम नित्यत्वादावश्यकं विधिं कल्पयतीति। यदतिक्रमे दोषश्रवणमुपपद्यते न तु
नः काम्यकल्पयते। न चावश्यकत्वेतिविधिः किंविषयमित्यपेक्षायामन्यदस्तु कल्पयित्वा तस्याः वाच्यत्वं विधिं अक-
ल्प्यं तद्विषयावश्यकत्वविधानादरं वाक्यांतरावगतस्यैकादश्युपवासस्य नित्यकाम्यप्रकारविशेषाकां-
क्षस्येदापि वाक्ये एकादशीशब्दश्रवणात् बुद्धिस्थस्य सदाशब्दापेक्षिताऽवश्यकत्वविधानेन संबंधः
प्रकल्पनालाघवात्। ननु निंदाश्रवणान्निषेधः किमिति न कल्प्यते। उच्यते। निषेधानिषेधो नयकल्पनागौरवा-
पत्तेः। ननु न विचारयति यो मोहादिति विचारो निषेधोवगम्यते। किंविषयो विचारः सन्निधानादेकादशी-
विषय एव सः। मैवं। अविचारीतस्यानुष्ठातुमशक्यत्वेन विचारनिषेधासंभवात्। न तु उक्तं। अविचार्य किं वि-
देवोपादानो व्याहन्येतेति तस्मादुपवासस्तु सर्थविचारनिंदा किमर्थं विचार्यते। विचारगाथामेवेतत्॥
तस्मान्निर्विचारमेकादश्यामुपवसनीयं। अन्यथाऽवश्यं दृष्टादिदोषापत्तिरित्याकार्थः। अथैकादशीक-

स्यव्रतविधिपराणि वाक्यानि। तत्र विष्णुरहस्ये। पद्मे विष्णुना संस्मृतं संपद्यमात्मनः। एकविंशकुलवद्रस्त्वा
नेपुत्रपदं प्रयाते। कूर्मपुराणे। पद्मे विष्णुसायोज्यमिष्यं संपत्तिमात्मनः। कात्यायनः। संसारसागरोत्तारमि
च्छन्विष्णुपरायणः। एकादश्यां संततिलुं भुंक्ते वा यथा विधि चेत्। एतेषामुत्तरार्धे। एकादश्यां न भुंजीत पक्षयोरुभ
योरपि॥ स्कंदपुराणे। य इच्छेद्विपुलान्भोगान्मुक्तिं चासंतदुर्लभां। एकादश्यामुपवसेन्पक्षयोरुभयोर
पि। नारदीयपुराणे। स्नात्वा सम्यग्विधानेन एकादश्यामुपोषितः। यच्च पापस्यति निर्वाणं दारिद्र्यं तत्क्षयं व्रजेत्। विष्णु
मार्गशीर्षशुक्लैकादश्यामुपिता नवं गते वासुदेवमभ्यर्च्य पेत्। धूपधूपादिभिर्गंधलेपनदीपनैवेद्यैर्भक्तिभावस
एतत्परेण भ्यव्रतमेसैते दुर्लभं तापापेभ्यः पूतो भवति। यावज्जीवेद्व्रताश्चेत्वीष्मवामोति उत्तया तादृशा का०हे० ८०
देवं सेवकः स्वर्गलोकं प्राप्नोति। यावज्जीवं विष्णुलोकमित्यादि। नारदीयपुराणे। स्वर्गमोक्षप्रदा ह्येषा शरी
रारोग्यदायिनी। नह्येषा पापोऽशोकस्मरणवत्परार्थवादिर्यफलश्रुतिरर्थवादोयमुच्यते। परार्थता नाम पापक्ष
यार्थता। ज्ञानिपेतामसापि वनस्यष्टविष्णुदृष्टेन गम्यते। किं तर्हि वादमात्रत्वरणेव सत्यार्थवादः स्वर्गादिवप्य

वक्षि इति। तान्येव फलान्यंगीक्रियंते। यथा नित्यावश्यकर्तव्यतायामर्थवादिकफलसंबंधो गीयते। तत्र
चैवतन्मतं वेदानुवचनेन ब्राह्मणा विविदिषंति। यज्ञेन दानेन तपसानाशकेनेति तपसोपि विद्यांगता। ज्ञानमात्र
पारंपर्येण मोक्षार्थत्वमस्तीति मन्यमानेनोक्तं। मोक्षप्रदेति। ॥ इत्येकादशीविषयनिषेधव्रतवाक्यनिर्णयः॥
अथास्मिन्व्रतेऽधिकारी निरूप्यते। तत्र काम्यव्रतपक्षे तत्तत्फलकाम एव नित्यव्रतपक्षे त्रिकांडमंडनः प्राह।
नित्यत्वानुकल्प्याज्जीवनवधीकारी कल्प्यते। तत्रापि त्रैवर्णिकाधिकारितान्धर्मशास्त्राणामत्रैवर्णिकत्वुद्र
सः। ननु वनस्थयतिधर्मोयमिति स्मरणाद्गृहस्थस्यापि मुद्रासः कस्मान्न भवति। वनस्थयत्योरास्वातप्रस
क्त्यासंभवात्। ननु धर्मशास्त्रोपसर्जनतया पक्षयोरेकादश्यां न भुंजीतेत्यनेनान्वयः संभवति। एवं तु संभव
वति। वनस्थयतिधर्मोयमयमिति तुक्तेयेन तस्मैमेकादश्यां न भुंजीतेति किं वर्णो सो नोपपद्यते। धर्मस्यावेत
नस्योपवासकर्तृतासंभवात्। नहि वनस्थयतिधर्मोयमिति तुक्तेयेन तस्यानिर्वाच्यते। तस्मादेकादश्यां च यः ताह
श्योर्थो नास्ति पादश्योर्थः संभवति तो दृश्यो वाचकः शब्दो नास्ति। तस्मात्तस्तु सर्थ वनस्थयति निरूपदं। यस्मात्वन

स्थपत्योः कृत्स्नमाश्रमिणोरप्ययं धर्मः। किं पुनरेतयोरेषामिति। यथा देवो वै सत्रमासते। किं पुनरनेनेतरे इति। नान्यत्र म-
पि वाक्यशेषाद्वनस्थयतिनिर्णयः। कस्मान्न भवति। संदेहाभावात्। यत्र हि पूर्वतरे लघोः कृपणेनैव संदेहस्तत्र
तन्नैव पूर्वमिति वाक्यशेषात् निर्णयः कृतः। इह तु उपवासे जीवनमात्राधिकारनिश्चयान्न वाक्यशेषापेक्षा। न
नु जीवन्नुपवसेदिति न श्रूयते। सत्यं तथापि कल्प्यते। न त्वधिकारकल्पना वा वाक्यशेषात् तदाश्रयणे रथी यो रात्रिस-
त्रवदायुष्यते। कल्प्येन गौरवं न यावद्वाक्यशेषं गतयोर्वनस्थयत्योः परधिकारिणः। श्रूयमाणयोस्तयोरधिका-
रोद्देशो वाक्यभेदः प्राप्नोति। तथा हि। वनस्थयत्योरेकत्र पुरुषे युगपत्समावेशासंभवात् न सहैतयोर-
धिकारिविशेषणत्वं प्रत्येकमधिकारिविशेषणे गृह्यमाणे वनस्थ उपवसेत् यतिरुपवसेदिति वाक्यभेदः स्प-
ष्ट एव। ननु प्रत्युद्देशं वाक्यपरिसमाप्तौ को वाक्यभेदः। यथा पदे समाष्टिः। तत्र यथा ऐन्द्रवायवाग्रिषु प्र-
त्येकं सामर्ग्रितिधानेनापि न वाक्यभेदः। सत्यं तत्रैकस्मिन्न शब्दे न समस्तैः पूर्वं व्यस्तैः समाष्टिको व्यापार
प्रत्येकं ग्रहेषु नियमेनापि न वाक्यभेदिनि इति। इह तु न कश्चिदेकस्य शब्दस्यैकैकेन व्यापारो वनस्थयतिश-
ब्दयोः संभवति। वनस्थशब्देन यतेरनभिधानात् यतिशब्देन वनस्थस्याभिधानात् वाक्यभेदः। ननु राजपुरोहितयोरिव
वनस्थयत्योर्भिन्नशब्दोपात्तयोरप्येकोऽधिकारसंबन्धः। मैवं। तत्र हि साम्राज्यकामनेनैकमधिकारविशे-
षणं संभवति। इह तु वनस्थयतिभ्यामनुष्ठानयोस्तुल्यमेकमधिकारिविशेषणं न प्रमाणमः। किंच।
राजपुरोहितत्वस्य न्यायाश्रयणात् संहितयोरधिकारः प्राप्नोति। न तु वनस्थयत्योः। एकादशं न तु भीयात-
मिति स्यात्। न पुनरेकादशं नानुजीतेति। नत्वनुषङ्गेणान्यत्र संबन्धात् न हि वचननिर्देशाभावोद्देशप्रत्य-
ते। यत्र भिन्नवाक्यत्वं निश्चितं तत्र संपूर्णत्वात् वाक्यान्तरं किंचिदनुपपद्यते। भूनवाक्यप्रतिपत्त्या वसंते कपिल-
जलानालभेत इति। इह तु समापद्गतयोः वनस्थयत्योः प्रत्येकमाख्यातेन संबन्धयोग्यत्वेनानुपगमाभावः।
तस्मात् वनस्थयतिशब्दस्य कथंचिदप्यधिकारिसमर्पकत्वाभावात् गृहस्थादेरप्यधिकार इति सिद्धं। नन्वे-
वं सति वाक्यं विरुध्यते। गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत्। प्राणाग्निहोत्रलोपेन अवकीर्णी भ-
वेत्तु सः। इति उच्यते। किमनेन वाक्येन तपः प्रतिषिध्यते किं वा प्राणाग्निहोत्रस्यावश्यकत्वं विधीयते इति॥

का० ह० ८१

नतावत्प्राणाग्निहोत्रविधानेन तस्य हेतुवन्निगदनिर्दिष्टस्य विधेयत्वासंभवात्। नेनत्वन्नेक्रियत इति वक्तव्यं। यद्य
पि हेतुमन्निगदेनार्थो विधीयते। तथापि न प्राणाग्निहोत्रविधानत्वात्। किंतु तदीयो लोपः प्रागेव हेतुत्वेन निर्दिष्ट
इति। तद्वानापत्त्या अग्निहोत्रलोपपरावप्रसंगेनेतन्निष्ठापक्तिं वाग्निहोत्रनामधेयश्रवणात्। नैयमिकाग्निहोत्र
विध्यंतरप्राप्त्या तदीयद्रव्येषु क्षीरादिषु वक्ष्यति दिष्टेषु तेषां मध्ये क्षीरादिनोपद्रव्येनोपवासाविरोधिना पिप्रा
णाग्निहोत्रसिद्धौ नोपवासबाधकत्वं प्राणाग्निहोत्रनियमस्य अर्थवादगतस्य नान्यातिदेशकत्वान्नावा नैय
मिकाग्निहोत्रद्रव्येषु क्षारेषु प्राणाग्निहोत्रस्य मुखे क्रियमाणतया बुद्धिस्थेन भोजनार्थेन द्रव्येण प्राणाग्निहोत्र
कर्तव्यमिति विधीयते। न तस्मात्क्षिधार्थं भोजनापत्तेरुपवासविरोध उच्यते। यदि भोजनार्थेन द्रव्येण प्राणा
ग्निहोत्रं कर्तव्यं। न हि तस्य पुरुषद्रव्योपजीवित्वात् न स्वयमाहवनीयकवत्पुरोडाशाष्टाकपालेनेव पानावपतीतिवत्
निरूपितस्यापमर्थः। शारीरके तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्रा
णाय स्वाहेत्यत्रो ग्रहणात्। तस्मान्न प्राणाग्निहोत्रस्यावश्यकत्वविधायकत्वाकाङ्क्षित्वं। गृहस्थो ब्रह्मचारी वेति।

का० हे०
८२

नापि गृहस्थादेरुपवासप्रतिषेधकं। सर्वास्वुपवसेन्नही शुक्लामेवं सदा गृहीत्यादिविरोधात्। यथादित्यवारादि
कालविशेषप्रयुक्तोपवासपर्युदासादुपवासो न रामानुजाभ्यंगते। न परेति वाक्ये गृहस्थस्यन्यथा तु वा द्वादश्य
वि। प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यतेति प्रजोत्पत्त्यादिनाधिकृतत्वात् गृहस्थस्य सततं तपोनु
वादान्न गृहस्थानरस्यापि तपो युक्तमिति गम्यते। तथा वसिष्ठादयोपि ऋषयो गृहस्था एव संतो सुचीर्णतपा
सिच्चक्रिरे इति पुराणेषु श्रूयते। तथा स्मृतिधर्मेन विष्णोत्तरमत्स्यपुराणादिषूपवासव्रतान्युक्तानि गृह
स्थानां विधीयते। तथा धर्मशास्त्रेषु उपवासव्रतकुलानि प्रायश्चित्तानि गृहस्थानां स्मर्यते। अन्यापि न गृहस्थ
महात्मा न तपःपरायणादृश्यते। इति सदाचारादपि गृहस्थानां श्रेयोर्थिनां तत्राधिकारो गम्यते। एवं च सति
यानि साधारणानि तपोवचनानि तानि गृहस्थे संकोचलक्षणबाधं न प्रतिपद्यते इत्यवरोलानः। तथाहि तपो ना
नशनात्परं तप इति। यद्धि परं तपस्तद्दुर्धर्षं दुराधर्षं तस्मात्तपसि रमतेति। इत्यादि प्रकरणे यत्राश्रमविशेष
विवक्षा तत्र तदाश्रमग्रहणं स्यात्। तस्मात्साधारण्यं गम्यते। तथा तपसा देवा देवतामग्र आयन् तपसर्षयः

स्वर्णबिंदन्ततपसा संपन्नान्नगुह्यामरीतीत्तपसि सर्वं प्रतिष्ठितं। तस्मात्तपः परमं वदंतीति तपसा येन्न नाग्र
ह्यात्तपसा पेस्वर्णनात्तपो ये चक्रिरे महत्तास्ते दिवा अपि गच्छतादिति। तपसेव चयुक्तस्य ब्राह्मणस्य दिवौकसः
स्तृजो चपान्तगृहंति कामानुसंवर्द्धयंति चेति। यानि मोहिनीवचनानि अहोरात्रे रुक्मांगदन्तेवतो गृहस्थस्य
तेनोपवासाधिकारोस्ति। विशेषेण क्षत्रियस्य। किंतु यतीनां विधवानामेवायं धर्मोपि उपवासादिः। तस्मादेका
दश्यां व्रतोक्तम्बा नोक्तम्मिस्येतत् र्यप्रतिपादकानि नूयोनूपः कल्पितानि तानि विधिस्वरूपाणि परमार्थतो नवि
धायकानि। किंच तत्र विपरीतानि अर्थस्य विधेरुपवासानुष्ठानपरस्य रुक्मांगदकीर्तितस्यार्थवादत्वात् तानि ऊ
तः। मामेवं वदकल्पाणि किंतु त्वम्युपपद्यते। रामादिनातदुक्तप्रतिषेधकपूर्वकमुपवासविधानात्। प्रजेत्तिजयव
प्रवासान्नु कुरु या फ वेपु कयावात्या चेति पयसामिन्द्रोत्रे गुरु स्पार्थवादः। अन्नाक्ति वैजतिलागवेषु कार्यतिज्जर्ति
लगवेषुक प्रतिषेधकपूर्वकं पयोविधानात्। किंच। यदि मोहिनी पद्मारावसितं तस्मात्। किं न हितिदुक्तविपरीत
कारिणं रुक्मांगदं दस्तेनाज्ञप्यतगवान्वासुदेवच्चान्म सायुष्येनैवमित वान्। किंच यमस्यापकारार्थमनुष्ठानं नर

कं च पापिन्डमेव मोहिन्याः पार्ह्वित्रिस्तु यदेकुणादपि नरकवासिकालान्येवं मोहिनीवचनानि तानुष्टयार्थानि। तस्माद्गृ
हस्थोप्युपवासादावधिकृत इति सिद्धं। एतेन ब्रह्मचारी मा स्मातः। तपो विशेषे विविधैः व्रतैस्तु विधिनोदितैः। वेद
ऋतोधिगतं न्यः सरहस्यो द्विजन्मना। इत्यादि वचनेन तस्यापि तपः संबंधावगमात्। न चैवं तर्हि गृहस्थो ब्रह्मचारि
वेति वचनस्य को विषयः। प्राणान्तिकतपोनिषेधक्रमः। तथादि प्राणाग्निहोत्रलोपेनेति। द्वदगनंस्थे पुरुषः स्वर्ग
नूतलेस्रागाब तृतीयाविहितकर्मोपलक्षणार्थ प्राग्निहोत्रशब्दः। तथा चायमर्थो भवति। यो गृहस्थो ब्रह्मचारि
सा प्राणः बाधया विहितकर्मा बाधया वानपश्वेरेति। सो विकीर्णि दोषं प्रतिपिष्पते इति। एवं च योजना। प्राणस्या
ग्निहोत्रे च प्राणाग्निहोत्रे तयोः लोपेनेति। एतदुक्तं भवति। वानप्रस्थादेः प्राणाग्निहोत्रा यु परोधेनापि तपः कुर्वी
त। स्पनानी वद्दोषः। गृहस्थादेस्तु यदि प्राणां वा अग्निहोत्रादिकं वा उपरुध्येत तदा सदोष इति। धर्मार्थका
ममोक्षाणां प्राणः संस्थिति हेतवः। तान्नप्नता किं न हतं रक्षिता किं न रक्षितं। इति। कुर्वन्नेवेह कर्माणि जिजीवि
षेच्छतं समाः। इतिवचनात्प्राणकर्मणामबाधनीयत्वप्रतिपादनात्। यद्यप्युच्यते। शरीरपीडनं तेयेनसच्छ्रन्

नापि कर्मणा। अमसंतंतत्रक्रोवीतस्नानायामः स उच्यते। न दत्तं तपो न निवारकं। न त्तु पीनमात्रस्य। तस्मात्गृह
स्थ ब्रह्मचारिणोरुपवासाधिकारोस्तीति सिद्धं। न च स्वनामान्येषां गृहस्थानामाहिताग्नेश्च नास्ति। आहिताग्ने
स्तिर्नुग्रंथिश्च ब्रह्मचारी च ते त्रयः। अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामिति स्मरणात्। उच्यते। किमनेन
न वचनेनाहिताग्नेरनशनं विधीयते। किं वोपवासः प्रतिषिध्यत इति। यद्यप्यनशनं विधीयते तदापि किं स
र्वदानोक्तमिति उच्यते। किं वा भोजनेछायां सत्यां प्रतिबंधे वा सति तस्मान्नेव भोजने नोक्तमाहोस्वित्
शास्त्रांतरानुज्ञातेपि भोजने प्रतिप्रसवो विधीयत इति। तत्र सर्वदानशनविधानमशक्यत्वादेवानिष्टं। नापि
भोजनेछायां सत्यां प्रतिबंधे वासति तस्मान्नेव भोजने भोजनविधिर्युक्तः रागतः प्राप्तत्वात्। तदुक्तं। मा
यमंगरीकारेण। न हि बुभुक्षितोऽश्नीयान्मलिनः स्नायादिति विधानमुपपद्यत इति। न च प्रतिबंधेपि नोक्त
मिति वाच्यं अशक्यत्वात्। नापि शास्त्रांतरानुज्ञातं देशकालावस्थाद्यावशनं प्रतिप्रसूयते। तथा सति स
पद्यादावपि कालेस्मन्नशनादावपि देशे वास्तु विना प्याहिताग्निना पर्युषितादिकमप्यन्नं भोक्तव्यमित्यापद्येत

मवत्विति चेत्। हा कष्टमिदं श्रुतं। अहो महत्त्वमानलोलुपतायेन समस्तशिष्टजनप्रसिद्धिविपरीतं संग्रहा
ग्नेरपि भोजनमुच्यते। विरुध्यंते च बहूनि शास्त्राणि तद्विषयनिषेधकानि। चंद्रसूर्यग्रहे नाद्यादित्या
दीनि। ननु तानि सामान्यशास्त्रत्वात् अनाहिताग्निसाधारणत्वात् सामान्यशास्त्राणि उच्यते। यथानश
नशास्त्रमपि निषिद्धानिषिद्धविषयसाधारणत्वात्सामान्यशास्त्रमेव न हि विकल्पोस्तीति चेत्। तत्र वि
षयत्वोक्तेष्टत्वात् नथाहि। अश्नंत एव सिध्यंतीति वर्तमानापदेशत्वात् कल्प्यो विधिः। चंद्रग्रहे नाद्यादि
त्यादिषु प्रत्यक्षः। अतो न विकल्पः। न च स्त्वाने क्लिश्यते। आयुष्मतां याचनात्सग्रहादिष्वाहिताग्नेरशन
नोच्यते। किं त्वेकादश्यादावुपवसितव्यमित्युच्यते। कस्तत्र पक्षपातः। यथाहि। चंद्रसूर्यग्रहे नाद्यादि
ति स्पष्टः शास्त्रविरोधः। तथैव रात्रावप्येकादश्यां न भुंजीतेति शास्त्रविरोध एव। तस्मान्नविरोधिशा
स्त्रांतरावरुद्धविषयेनशनविधानामतदश्नंत एव सिध्यंतीति विषयांतरे विधायकत्वं पूर्वं निराकृतं
तस्मात्क्वचिदनेनानशनं विधीयते। ननूपवासाय प्रागेव द्विजातीनामशनं श्रुतेनोदितं। नांतरा भोजनं कु

र्यादयो होमसमो विधिरिष्येतेत्यनेन स्नानविधानेनार्द्धिष्ट्रवैदिकत्व इत्यपीत्युक्तं क्रियते। को ब्रूते तद् स्नानवि-
धानमिति। रागतः प्राप्तस्य भोजनस्य प्रातःकालान्तरे प्रतिषेधमात्रमिह क्रियते। सर्वमन्यदनूद्यते। ए-
वमत्र विधिपरत्वेऽसंभवति। कालविशिष्टभोजनविधानस्यायुक्तत्वात्। कालद्वयनियमे वाक्यभेदात्।
सायंप्रातरेवाशनं नान्तरा इत्येतावता नाग्निहोत्रसाम्यस्योपपत्तेर्नार्थरूपकतया समानत्वकल्पनाया
त्वर्थानुवादे नान्यपराण्येवंविधा विधयो निक्षिप्यन्ते। यथा प्राङ्मुखोऽन्नानि भुञ्जीतेत्येवमादयः। न तु हीहि
व्रतस्य सायंप्रातरावरूपकता कथमुच्यते। तत्रापि शरीरस्य धारणार्थमेवाव्रतस्य परिग्रहेण पुन-
रग्निरहस्याव्रूपकतया विधानं। अन्ये त्वाहुः। आवरूपकमेव व्रतमिति। तथा हि। मध्यंदिने मध्यरात्रे
च व्रतं व्रतयतीति व्रतं विधाय पुनराहानक्तं नव्रतयेद्दिति वैवचनेनैव व्रतस्य मध्यंदिनमध्यरात्रका-
लसंबन्धमस्ति देरगं। व्रताना व प्रतिषेधोऽनर्थको न वहूतं व्रतितव्यमेवेत्सवगमयति। यन्नूच्यते। रागप्रा-
प्तत्वाद्विधानमनर्थकमिति। तन्न। हुताशनावेऽप्यवरूपकिमात्रप्राशनियममिति विधानोत्रा। रोपनम् — का० दे० ८५

न्तोऽपि प्रतिपाद्य इत्यप्रयुक्तो रागाद्धनात्वेऽप्यावरूपकत्वं। सायंप्रातर्द्विजातीनामिति वाक्यस्य चान्तराल-
प्रतिषेधमात्रविधानेनापि गतिरुक्ता। आहिताग्निवाक्यस्यापि वक्ष्यते। तस्मान्नेदमशनविधायकं। न
तु प्राङ्न्विधायकमप्यनुज्ञातुं करोत्येव। उच्यते। तत्रापि द्विर्वैदिकनीयं। न तावदुपवासादिशास्त्राव-
रुद्धे विषयेऽभ्यनुज्ञा क्रियते। न च शास्त्रविरोधादेव नापि शास्त्रानवरुद्धे विषये। अभ्यनुज्ञानैवयर्थ्या-
त्। यदि नोक्तमिष्यते तस्मै ते च विधिविरोधश्च नास्ति। तदा वचनमन्तरेणापि भुज्यत एव। किमभ्यनु-
ज्ञावचनेन करिष्यति। उपवासप्रतिषेधवचनः पुनरतिपापिष्ठः। तथा हि। यत्र शास्त्रीयात्तूपवासप्रा-
प्तिरशनविधानमाग्निस्यापि न निवारयितुं शक्यत इति उक्तं। तत्र कथं नाम प्रतिषेधेन वार्यते। प्रा-
प्तिपरं नत्वात्। प्रतिषेधस्य न त्वहि षोडशिग्रहणवद्विकल्पो वास्यादाहिताग्निरुपवसेत्। न चेतिना-
नुया। नेष्टुपेयज्ञामहंकरोतीति विकल्पे पुद्रासः। आहिताग्निर्वनीर्थिना उपवसेयुरिति वचनप्रयानस

भवति। विकल्पस्याष्टदोषत्वात् पर्युदासे लक्षणाप्रसंगात् प्रधानाख्यातसंबंधाभावप्रसंगाच्चानुपास्यावरूपकान्युपवासादीनि नवेत्वाहिताग्नेरपि। यानि तु श्रेयोर्थितया क्रियंते तानि तस्य निवार्यंते। इदं तु स्तुनाषितं। तथाहि। नित्योप्युपवासो निवारयितुं न शक्यते। अनेन कथं नाम काम्यो निवार्यते। किमेतन्न श्रुतवानसि। काम्यो हि नित्याद्बलीयानिति वाक्यस्य न हि काऽगतिः। यदा क्षीणशक्तेराहिताग्नेरुपवासाद्यनुष्ठानानुष्ठाने आहिताग्निव्रते विरोधो भवति। तथाविधस्याहिताग्नेस्तानिरेव नारदेनाभिहितानि। स्मार्त्तमुपवासाद्यनुष्ठानं न निवार्यते। तत्प्रतिपादनार्थमेव वाक्यमाहिताग्निरनड्वांश्चेति। नन्विदमनुवादकं वाक्यं प्राप्नोति किमद्यापि न जानासि। स्मृतिवाक्यान्यनुवादकानीति। एकं कर्मांतरसामर्थ्यानुरोधेन व्याख्यायमाने प्रस्तुतानुसारो भविष्यति। तथाहि। तथा चात्मनोनुपरोधं कुर्याद्यथा कर्मसु समर्थः स्यात्। इति प्रस्तुतापस्तंबेनोक्तमाहिताग्निरनड्वांश्चेति। तस्मादाहिताग्निनाप्यग्निहोत्राद्यबाधेनोपव

सितुं शक्यते। वेदे एकादश्यादिषूपवसनीयमेवेति सिद्धं। तथा चाग्निपुराणेपि। गृहस्थादीनां उपवासोभिविहितः। गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। कात्यायनः। अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः। एकादश्यामुपवसेत्पक्षयोरुभयोरपि। उपनयनादि नियम इति च सर्वनियमानामुपनयनोत्तरकालस्मरणात्। अष्टवर्षपर्यंतमुपनीतस्याप्यनधिकारोष्टवर्षाधिक इत्यनेनोक्तः। नारदीयपुराणे। अष्टवर्षाधिको मर्त्यस्त्वशीतिर्न हि पूर्यते। ये भुंक्ते मामके राष्ट्रे विष्णोरहनि पापकृत्। स मे दंड्यश्च वध्यश्च निर्वास्यो विषयाद्बहिः। एतस्मात्कारणाद्विप्र एकादश्यामुपोषणं। कुर्यान्नरो वा नारी वा पक्षयोरुभयोरपि। इदमेकादशीव्रतं माहेश्वरैरप्यनुष्ठेयं। तथा च विष्णुधर्मे। लिंगार्चनरतः पापो व्रतं शिवदिने त्रयं। वाराणस्यां च मरणमुक्तिरेषां तु विधेस्तु कौक्तं। एकादश्यष्टमी चैव पक्षयोश्च चतुर्दशी। शिवस्य तिथयः प्रोक्ता मुनिभिः शौनकादिभिः। तासामाद्यामुपवसेद्दिवानाद्यात्तथा परयोरिति। तथा। विष्णवो वाथ शैवो वा कुर्या

दिकादशीव्रतं। एकादश्यामुपोषणं सौरे रथ्यनुष्टेयं सौरपुराणे तथाभिधानात्। वैष्णवो वाथ शैवो वा
सौरोप्येतत्समाचरेदिति। तेन त्रैवर्णिकस्य गृहस्थादेरुपवास इति सिद्धमिति। अपरे त्वाहुः। नाश
त्रैवर्णिकशूद्रासः। वर्णाश्रमेतराणां नोच्चूहि धमानशेषतः। इति वाक्यपर्यालोचनसर्वेषामधिकारात्
विशेषतश्चात्र मर्त्यग्रहणात्सार्वेषामधिकारः। यत्तु यतिग्रासमिति वचने द्विजग्रहणं तत्तेषां दोष
विशेषप्रदर्शनार्थं। अन्येतु ब्रह्मचर्यादेरप्यधिकार इति पाठनात्। मनुष्यमात्रोपलक्षणार्थमिमा
हुः। तत्र लक्षणप्रसंगात्। अत्र नासापासव्रतणवाधिकाज्ञातव्याः। तथा च ब्रह्मवैवर्ते। एकादश्यां
विनापि तनसंसाराद्विमोक्षणं। तत्राप्ययं विशेषोस्ति। कार्यः शक्तिमतानुसः। नतु देहविडुःशाखाःपी का०ई० ८७
डनीयामिहाशृहात्। शरीरं पीड्यते येन सुशुभेनापि कर्मणा। अत्यंतं तन्न कुर्वीत अनायासः स्मृ
तते। धर्मसाधनमाद्यं यत् शरीरं रक्षणं प्रयत्नतः। यथाकथंचिन्मोक्षेतन्नाशिपदेकहेलया। मूढयाहे
णात्मनो यत्पीडया कुरुते तपः। नासौ सुखमवाप्नोति न सिद्धिं न परां गतिं। अष्टिकारिणोसामर्थ्य

र्थ्यनिमित्तकोवाराहपुराणे। असामर्थ्ये शरीरस्य व्रते च समुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा वि
नयान्वितं। भगिनीं भ्रातरं वापि व्रतमस्य न लुप्यते। कात्यायनः। शंकस्य क्षत्रियार्थे च एकादश्यामुप
पोषितः। पुरोधास्तु क्षत्रियो वा द्वयोः सममितीरितं। उपवासफलं तस्मात्समग्रं सफलं तस्मात्सम
ग्रं समवाप्नुते। अष्टण्यां चान्मुद्दिश्य एकादश्यामुपोषति। यमुद्दिश्य कृतो विप्रः तस्य पूर्णं फलं भ
वेत्। कश्चिद्दशगुणं पुण्यं प्राप्नोसत्र न संशयः। अन्नानां वेयदा विप्र एकादश्यामुपोषितः। उपवा
सफलं तस्य समग्रं समवाप्नुते। शनरो भायंद्वा विप्र एकादश्यामुपोषितः। उपवासफलं तस्य स
म्यक् न भवति निश्चितं। एतस्मात्कारणाद्विप्र एकादश्यामुपोषणं। कुर्यान्नरो वा नारी वा पक्षयोरुभ
योरपि। वायुपुराणे। उपवासेत्वशक्तस्तु आहिताग्निरथापि वा। पुत्रान्वा कारयेदन्यान्ब्राह्मणान्वि
कारयेत्। अथवापि प्रमुख्ये स्माशाने दयात्स्वशक्तितः। उपवासफलं तस्य समग्रं समवाप्नुते। त
त्र नोजनदोषोपि तत्क्षणादेव नश्यति। कात्यायनोपि। पितृमातृ मातुरर्थे आचार्यार्थे विशेषतः।

उपवासं च कुर्वीणः पुण्यं शतगुणं लभेत् । प्रमुदित्य सकृत् सोऽपि संपूर्णं लभते फलं । नारी स्वपतिमु
द्दिश्य एकादश्यामुपोषिता । पुण्यं शतगुणं प्राक्तं मुनयः पारदर्शिनः । उपवासफलं तस्याः पतिः प्रा
प्नोति संशयमिति । तथा । स्वयं कर्त्तुमशक्तश्चेत्कारयीत पुरोधसा । हिरण्यं दक्षिणां दद्यात् स्वशक्त्या
वानुरूपतः । उपवासं प्रकुर्वीणः पुण्यं शतगुणं नवेत् । कात्यायनः । एवं करोति यः कश्चिदेकादश्या
मुपोषणं । पितृमातृमातुरर्थे गुर्वर्थे च विशेषतः । दक्षिणा नात्र दातव्या शुश्रूषा विहिता सदा । इत्थं
संपत्ति प्रशेषा एकादश्यामुपोषितः । इत्यदानोपवासस्य फलं प्राप्नोत्य संशयं । कर्त्ता नक्तमवाप्नो
ति नात्र कार्या विचारणा । इत्यन्या वाप्यमुद्दिश्य एकादश्यामुपोषिता यमुद्दिश्य कृतं विधं तस्य पूर्णफ
लं लभेत् । कात्यायनः । शतगुणं पुण्यं प्राप्नोत्यत्र न संशयः । पत्नुमनोक्तं । नास्ति स्त्रीणां पृथक्यज्ञो न व्रतं
नाप्युपोषितं । विष्णुनापि । पत्यौ जीवति या नारी उपवासव्रतं चरेत् । आयुः संहरते भर्त्तुर्नरकं चैव
गच्छति । तत् न त्रांघ नतुमतौ पर्वस कर्ट स्त्री विषयं । तथा च शंखलिखितौ । कामं भर्त्तुरनुज्ञया व्रतो

का० ३०
८४

॥

पवासादीनाचरेत् । मार्कण्डेयपुराणे । नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा । निःफलं तु भवेत्तस्या यत्क
रोति व्रतादिकमिति । नित्यैकादश्युपवासासामर्थ्ये एकभक्तादिकर्त्तव्यं । तथा च मार्कण्डेयः । एकान्
क्तेन तथैवायाचितेन च । उपवासेन दानेन निर्द्वादशिको भवेत् । एकभक्तेन नक्तेन वाप्यशक्तातुरः
क्षिपेत् । पयोमूलफलैर्वापि न निर्द्वादशिको भवेत् । बौधायनोऽपि । उपवासे चाशक्तानामशीतेरूर्द्ध
जीविनां । एकभक्तादिकं कार्यमाह बौधायनो मुनिः । विष्णुपुराणे द्वादशीकल्पे । एकादश्यां च तु वि
ष्णुं समभ्यर्च्य कदाचन । उपोषितेन नक्तेन तथैवायाचितेन च । एकभक्तेन दातान न निर्द्वादशिको
भवेत् । तदेकनियमी नित्यं नसौ इति नवे नवे । कायक्लेशाक्षरं देवं नबलाद्धर्ममाचरेत् । उपोषितो
वा नक्तं वायाचितैकाशनोऽपि वा । द्विदिने पूजयेत्तात हरिं संसारपारदं । एकाशनेन रात्रौ दानेन एका
शनफलं स्मृतं । अयाचितफलं विद्धि दक्षिणाद्विगुणेन च । नक्तस्य च गुणं मुपोषणं सदक्षिणाफ
लं । दानाद्व्रत न गोपि लभ्यते । एकादश्युपवासी यः पक्षयोरुभयोरपि । दुराचारोऽपि वेज्ञेयस्तान स

न्यमुच्यते। नक्तं तृतीयमप्युक्तं व्रते शाप्तरिरूपिणं। नक्तत्र द्वादशीने पुत्रेणं प्राप्यमाने तरात्रानां। स्मृतः
ह विष्णोर्जनं स्नानं समम्माहारलाघवं। अग्निकार्यमधः शय्या नक्तेनो जिपडावरेत्य न विष्णुपुराणे द्वा
दशीकल्पे। सतांबूलमतांबूलं सभोजनमभोजनं। साहारं च निराहारं चतुर्विधमुपोषणं। पावक्तं ताम्ब्लि
कोनस्मात्यावन्नापतेद्धरिं। तावच्च ग्रावतांबूलं तस्मात्तांबूलमुच्यते। पूजयित्वाच्युतं सर्वं पूर्णं तुच्या
मुनक्तिपः। नवानुक्तं पुनर्भुक्ते तत्सभोजनमुच्यते। तृणधान्याशनं मूलपयसाज्येन वा फलैः। हरेर
त्युपवासव्रतस्साहारमुदाहृतं। पयोवैतेरहितं शुद्धमुपायैः समुपोषणं। अतांबूलमनाहारं अभोजन
मतोदितं। बोधायनेनापि। व्याधिभिः परिभूतानां पित्ताधिकशरीरिणां। त्रिंशद्वर्षाधिकानां च नक्तादिप का०द्वे० ८९
रिकल्पना। त्रिंत्रिंशद्वर्षाणामित्यपि क्वचित्पाठः। तत्र नवतिवर्षाणामित्यर्थः। कूर्मपुराणे। एकभक्ते
न नक्तेन फलेनाशाठरः क्षिपेत्वा नातिक्रामेद्द्वादशीं च उपवासव्रतेनेव। एतच्च व्रतं शुक्लकृष्णपक्ष
योः द्वयोरप्यनुष्टेयं। तथा विष्णुरहस्ये। स्कंदकूर्मनारदीयपुराणेषु। यथा शुक्ला तथा कृष्णा विशेषो

नास्ति कश्चनेति। सनत्कुमारप्रोक्तेपि। यथा शुक्ला तथा कृष्णा यथा शुक्ला तथेतरेति। न विष्णुपुराणेपि। शु
क्ला वाथ हि वा कृष्णा विशेषो नास्ति कश्चन। सौरधर्मेषु। एकादशी सदोपोष्या शुक्ला कृष्णा तथैव चेति। वि
ष्णुरहस्ये सौरपुराणयोः। यथा सुपूजितो गौरः कृष्णो वा वेदविद्विजः। संतारयति दातारं द्वादश्यौ च त
था स्मृते। विष्णुरहस्ये स्कंदपुराणे च। तैलं शुक्लेतराणां वै तिलानां सदृशं यथा। कृष्णाया अपि सितायाश्च
गोः क्षीरं सदृशं यथा। द्वादश्याः सदृशं पुण्यं शुक्लासितयोर्द्वयोः। दर्शश्च पौर्णमासी च पुण्ये नश्चय
या समे। तथा सितासिते पुण्ये द्वादश्यौ मुनिभिः स्मृते इति। स्कंदपुराणे। यथोक्ते दक्षिणे च उत्तरायने द्वयो
र्तिने। तुल्यं पुण्यमवाप्नोति द्वादश्योस्तु तथानयोः। तथा सोमसूर्यग्रहे पुण्ये यथैव मुनिभिः स्मृतौ। त
था सितासिते पुण्ये द्वादश्यौ विष्णुतुष्टिदे। तथा। सायंप्रातर्यथा कृते। तथा सितासिते पुण्ये द्वादश्यौ ध
र्मतः स्मृते। तथा। यथा विष्णुः शिवश्चैव समपूज्यौ मुनिभिः स्मृतौ। तथा पूज्यतमौ ज्ञेयौ द्वादश्यौ शुक्लकृ
ष्णके। वाराहपुराणे। एकादश्यामुपवसेत्पक्षयोरुभयोरपि। द्वादश्यां योऽर्चयेद्विष्णुं समुक्तिफलनाग

नवेत्। विष्णुरहस्येपि। दुस्तराणि च घोराणि नरकाणि सहस्रशः। यमस्य सदने घोरे यातना यमकिंक
रैः। यमस्य सदने घोरे यातना यमकिंकरैः। यत्किंचित्तद्विघातार्थं यममार्गस्थितं वद। ।ब्रह्मोवाच। ।
मनसापि चिकीर्षति द्वादश्यां यो नरोत्तमः। नैव पश्यति घोरं नरकं नैति संसारदुःखसागरं। शुक्ले वाथ दिवा कृ
ष्णे विष्णुपूजनतत्परः। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। यथा संहृजितो गौरः कृष्णो वा वेदविद्वि
जः। संतारयति दातारं द्वादश्यां फलं तथा। सर्वपापप्रणाशाय विष्णोः संतोषणाय च। उपोष्या द्वाद
शी शुद्धा पक्षयोरुभयोरपि। शुक्लकृष्णविवेके पापमश्नवर्णाश्वा। तथा च कूर्म्मपुराणे विष्णुधर्म्मोत्तरे।
स ब्रह्महा सुरापः स्यात्। कृतघ्नो गुरुतल्पगः। स्कंदपुराणे। स ब्रह्महा स गोघ्नश्च सुरापो गुरुतल्पगः। का०दे०
कालिकापुराणे। सर्वेषामिह पापानामाश्रयः समुदीरितः। कृष्णेनैषां मुरारातौ विवेचयति यो महा ९०
हात्। एकादश्यौ सितासिते। नविष्णुपुराणे। एवं ज्ञात्वा नराः पोष्या द्वादशी शुक्लकृष्णजा। तयोर्भेदं न
कुर्वीत भेदान्नरकं व्रजेत्। गरुडपुराणे। शुक्ला वाथ दिवा कृष्णा विशेषो नास्ति कश्चन। विशेषं कुरु

ने यस्तु पितृहा स उदीरितः। न च सागरात्। यथा शुक्ला तथा कृष्णा यथा शुक्ला तथेतरा। तुल्ये ते मनु
ते यस्तु स वै वैष्णव उच्यते। कामदेवीदुरक्षीणां शुक्ला नाकृष्णता न तथा। एकादश्यां स्वरूपं तु सस्या
याः सैव केवला। अतः कृष्णसिततादिरात्रिनो गुण उच्यते। एकान्ते नास्ति दूषणं येन कुर्यते। यदि
वा स्यागुणोपि स्यात्तत्रापि न दूषणं। तथाहि तिलविशारोकृष्णचैनेदूषणं। सनत्कुमारप्रोक्ते। ए
कादश्यां द्वयोः पक्षयोर्विशेषं कुरुते नृप। तस्यैवांतं न पश्यामि यावदाभूतसंप्लवं। तेन शुक्लकृष्णपक्ष
योरुपवासः कार्य इति सिद्धं। अथादित्यवारादौ कृष्णैकादश्यां च उपवासप्रतिषेधास्तत्र हृदवस्थि
ष्टः। कृष्णपक्षे तु संक्रांत्यां ग्रहणे वापि पुत्रवान्। उपवासं न कुर्वीत सुतबंधुधनक्षयात्। मत्स्यपुरा
णे। दिनक्षये तु संक्रांतौ ग्रहणे चंद्रसूर्ययोः। उपवासो न कर्त्तव्यः पुत्रपौत्रसमन्वितैः। कूर्मपुराणे।
संक्रांते कृष्णपक्षे च रविशुक्रदिने तथा। एकादश्यां न कुर्वीत उपवासं च पारणं। केचित्त्वेवं वारे
यस्मात्सः स्यादिनक्षयः। तस्मिन्स्नानं जपो होमो नोपवासो गृहाश्रमे। स्मृतिमीमांसायां जैमिनिः। आदि

स्येऽहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः। उपवासो न कर्तव्यो गृहिणा पुत्रिणा॥ तथा। कात्यायनः। एकाद-
श्युत्रस्मासु रविसंक्रमणे तथा। चंद्रसूर्योपरागे च न कुर्यात्पुत्रवान्गृही॥ उपवासमिति शेषः। गौत-
मः। आदित्येऽहनि संक्रान्तावसिते काऽदश्यां तु च। व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद्गृही॥ आदित्यवारे
संक्रान्तौ व्यतिपाते दिनक्षये। पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही॥ नारदोऽपि। संक्रान्त्यामुपवासं
तु कृष्णैकादशीवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही॥ हरिवंशेऽपि। आदित्यवारे संक्रान्ताव-
सितैकादशीदिने। व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद्गृही॥ स्कंदपुराणेऽपि। संक्रान्त्यामुपवासे न पारणे
न युधिष्ठिर। एकादश्यां च कृष्णायां ज्येष्ठपुत्री विनश्यति॥ तत्र तेषु वाक्येषु आदित्यवारादावुपवासाभ-
दिग्रयुक्तोपवासनिषेधपराः। न त्वेकादशीव्रतयुक्तोपवासनिषेधपराः॥ तथा च जैमिनिः। आदित्येऽह-
नि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः। पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही॥ तन्निमित्तोपवासस्य निषेधो
मुद्राकृतः। नानुरवगकृतो ग्राह्योऽपतो नित्यमुपोषणं॥ तन्निमित्तस्यादित्यवारादिनिमित्तस्यायं प्रति-

का०हे० ६१

षेधः। न पुनरेकादश्यामादित्यवाराद्यन्वयसंबंधेनोपवासप्रतिषेधः। यत एकादश्यां नित्यमुपोषण-
मित्यर्थः॥ कात्यायनोऽपि। तत्प्रयुक्तोपवासस्य निषेधोऽयमुदाहृतः। प्रयुक्तांतरप्रयुक्तस्य न विधिर्न नि-
षेधनं॥ केचिदस्यैकादशीप्रकरणपाठात् नष्टस्य प्रकरणसन्निधिनैकादशीपरत्वादनुषंगत-
श्चामोपवासपरत्वान्नावान्त्। पुत्रवतः संक्रान्त्यादियुक्तायामेकादश्यामुपवासः निषेधपरमेतदिति
वर्णयंति। तन्मंदं। वाक्यसंनिधेः श्रीघ्रमाविज्ञात्। प्रयुक्तं चैतत्। अथैकादश्यां। रुक्मांगदेनासन-
वेन कथं तत्। ज्येष्ठो पुत्रपित्रोः। तत्र रुक्मांगदेन परत्वेन हि सकृदुच्चरितस्याप्यर्थद्वयपरत्वमिति वैरू-
प्यस्यात्। अतः पूर्वोक्तैरस्माभिर्व्याख्या साधीयसी। न च संक्रान्त्यादीनामेकादशीविशेषणत्वे चंद्रग्रहण-
सूर्यग्रहणसाहचर्याद्युक्तं। समानविभक्तिनिर्देशात्। संक्रान्त्यादीनां स्यामेकादश्यामुपवासवि-
धानाच्च। तथा सनत्कुमारप्रोक्ते। नानुवारेण संयुक्ता तथा संक्रान्तिसंयुता। एकादशी सदोपोष्या
सर्वसंपत्करी तिथिः। तथा। व्यतीपाते च धृतौ वा एकादश्यां यदा न वै तत्। उपोष्या सा तु विज्ञेया पुत्रसं-

पद्विवर्द्धिनी ॥ नारदः ॥ नानुवारसमापेतान्तथा संक्रांतिसंयुता ॥ एकादशी सदोपोष्या पुत्रपौत्रविवर्द्धनी ॥
स्कांदपुराणेपि ॥ एकादश्यां यदा तु स्यादादित्यस्य दिनं नवेत् ॥ तदोपोष्या प्रयत्नेन पुत्रपौत्रविवर्द्ध-
नी ॥ विष्णुधर्मे ॥ एकादश्यां यदा रामवारश्च सवितुर्नवेत् ॥ उपोष्या सा महापुण्या पुत्रपौत्रविवर्द्ध-
नी ॥ नचैतानि वाक्यानि पुत्रवद्गृहस्थव्यतिरिक्तविषयाणि ॥ पुत्रपौत्रविवर्द्धनी सादिवाकरेपाना-
यस्मात् ॥ संक्रांत्यादिनिमित्तश्चोपवासः सर्वत्रैनोक्तः ॥ अमावास्या द्वादशी च संक्रांतिश्च विशेषतः ॥
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥ अत्र स्नानं जपो होमो देवतानां च पूजनं ॥ उपवासस्तथा
दानमेकैकं पावनं स्मृतं ॥ इत्येकादश्युपवासनिषेधस्तु पुत्रवद्गृहिविषयः ॥ तथा च इत्येकादश्युप-
वासनिषेधपरेषु तेषु वाक्येषु पुत्रवान् गृही ज्येष्ठः ॥ पुत्रो विनश्यतीत्यादि विशेषणं ॥ निंदा च श्रूयते
सुतबंधधनक्षयादिति च ॥ गोभिलः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ वनस्थयतिधर्मोयं शु-
क्लामेव सदा गृही ॥ इति ॥ एवं ब्रह्मचार्यादेरपि द्रष्टव्यं ॥ अत एव स्मृत्यंतरे ॥ एकादश्यां न भुंजीत पक्षयोरु-

का० दे०
९२

भयोरपि ॥ ब्रह्मचारी च नारी च शुक्लामेव सदा गृही ॥ इति ॥ तथा च भविष्योत्तरे ॥ उत्पन्नैकादशीप्रारंभे यु-
धिष्ठिरवचनं ॥ कस्माच्छ्रेष्ठा च विख्याता द्वादशी केन हेतुना ॥ किं स्नानं तत्प्रियादेव किं वा ख्यातेन युज्य-
ते ॥ कृष्ण उवाच ॥ यथा शुक्ला तथा कृष्णा द्वादशी मे सदा प्रिया ॥ शुक्ला गृहस्थैः कर्त्तव्या नोगसंता-
नवर्द्धनी ॥ पुत्रस्तु निस्तथा कृष्णा तेन तेनोपदेशिता ॥ तस्मात्पुत्रवता गृहस्थस्य शुक्लायामेवोप-
वासः न कृष्णायां ॥ क्वचित्तु नैमित्तिकः ॥ कृष्णायामेकादश्यामुपवासोस्ति ॥ तदुक्तं भविष्योत्तरे ॥ नि-
त्या शुक्ला समाख्याता कृष्णा नैमित्तिकी स्मृता ॥ शुक्ला पार्थ सदा कार्या नित्या ज्ञासंकटेष्वपि ॥ शुक्ला-
यां पक्षे चैनं भुंक्ते स भुंक्ते किल्बिषं नरः ॥ कृष्णा नैमित्तिकी नित्ये न वा नैमित्तिकी निमित्तं च शयनी-
बोधिनीमध्यवर्त्तिनां ॥ शयनीबोधिनीमध्ये या कृष्णैकादशी नवेत् ॥ सैवोपोष्या गृहस्थेन नान्या
कृष्णा कदाचन ॥ केचित्तु नानाविधनिमित्तं व्याचक्षते ॥ तदेवं शास्त्रार्थः संपद्यते ॥ सर्वेषां सर्वदा पक्ष-
द्वयेपि भोजनमात्रनिषेधव्रतिपालनार्थं ॥ पुत्रवद्गृहस्थव्यतिरिक्तानां पक्षद्वयेप्युपवासव्रतमनु-

ष्यायां गृहस्थस्य तु शुक्लायामेव व्रतं। बोधिनीशयनीमध्यस्थकृष्णायामपि। तदपि पुत्ररहितस्य न तु पुत्रव
तः। किमिति न त्ववगतिः। पुत्रवतो गृहस्थस्य कृष्णैकादश्युपवासनिषेधानां शयनीयबोधिनीवाक्यवि
हितोपवासव्यतिरिक्तविषयतोपपत्तेः। उच्यते। शुक्लामेव सदा गृही इति वचनपर्यालोचनया सकल
कृष्णैकादशीषूपवासाभावप्राप्तौ शयनीबोधिनीमध्यवर्तिकृष्णैकादशीषु उपवासनियमार्थमन्य
त्वस्यास्य नावाच्यं। यस्यां कृष्णैकादश्यां गृहस्थोपवासस्तस्यामेव विशेषनिषेधस्योपपद्यमानत्वात्॥
एतदेवाद्यपूर्वकमन्यैरुक्तं। इमानि वचनानि पुत्रवतो गृहस्थस्योपवासनिषेधे इति। तत्कथमेतदनुप
पद्यते। न हि कृष्णैकादश्यामुपवासो वचनतो रागतो वा प्राप्तिपूर्वकश्च निषेधः। अन्यविधिविषया
नावेशप्राप्तिनावेन निरूपानुवादात्। प्रतिषेधवचनानामानर्थक्यप्रसङ्गेन। उच्यते। शयनीबोधिनीम
ध्ये इत्यादिना गृहस्थमात्रसंबन्धेन कृष्णैकादश्युपवासप्राप्तिरस्ति। तामपेक्ष्य पुत्रवतो गृहस्थस्य कृष्णै
कादश्युपवासप्रतिषेधाः। अवश्यं हि न तदेकादश्यां निषिद्धत्वात् षोडशीग्रहणाग्रहणवद्विकल्पः। प्राप्त

भिन्नविषयत्वात् विधिप्रतिषेधयोः। सामान्यविषयविधिं विशेषविषयो निषेधो बाधते। पुन
रेकविषयौ विधिप्रतिषेधौ। नावेव षोडशीग्रहणाग्रहणवद्विकल्प्येते। इति तदयुक्तं। प्रतिषेधप्रदेशे
नारम्भविधानेन प्राप्तिप्रतिषेधकत्वात्। विकल्पः स्यादित्यधिकरणविरोधात्। अयं तु पर्युदासाश्रये
ण न परिहारमुपरिष्टाद्वक्ष्यामः। पुत्रवद्गृहस्थविषयकृष्णैकादश्युपवासनिषेधानामनूपसंनवत्व
मेते शयनीबोधिनीवाक्यविहितोपवासस्तु कृष्णैकादशीषु संकोचः प्रसज्येत। अस्मन्मते तु शयनीवाक्य
स्यैवापुत्रविषयतासंकोचः। तेषामपि हि पितरः पितृणां पितरस्तथा। तेषां पितामहानां च तेषां ये
न कालस्तथा। तेषामपि जानतां रोगेन निरयं। अपवर्जिताः। प्रयान्ति वैष्णवं लोकमुपोष्य हरिवासरं। एवं दे
उपदेशे पितृन्वषड्ढा नियोजितः। लोकपालत्वमतुलमर्जितं जेन नूनं। एवमेकं वदतां श्रेष्ठ संयामे
हरिवासरे। यदि बालपसे धैर्याकुतो हृष्टैव किंकरः। इति। तत्रापि हरिवासरग्रहणं कृष्णाग्रहविहि
ते एकादशीपरमित्यवगन्तव्यं। अतो गृहिणः पुत्रवतः कृष्णैकादश्यामुपवास इतरेषां कृष्णयोरपि

सिद्धं। अन्ये त्वाहुः। एकादश्युपवासनिषेधाः काम्यव्रतोपवासविषया न तु नित्यव्रतविषयाः। इति विष-
यानिषेधाः कल्प्यन्ते। विकल्पोपपत्तेः। न च समानन्यायत्वात् विहितोपवासबाध इति वाच्यं। प्रतिषेधविधि-
त्वामिति सापेक्षत्वात्। असंनिहितबाधकत्वानुपपत्तेः। तेनायुक्तमेतत् पुत्रवद्गृहस्थव्यतिरिक्तस्यैव नैका-
दश्युपवास इति। अन्ये तु वैष्णवानामुपवासमित्याहुः। तत्रापि गृहिणः पुत्रवतः शुक्ले कादश्यु-
पवासो नैकादश्यामित्याहुः। तथा गौतमः। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वनस्थय-
तिधर्मोयं शुक्लामेव सदा गृही। इति। तन्न। इदं वैष्णवानामेवोपवास इत्यत्र प्रमाणाभावात्। न चैतद्व्र-
तं वैष्णवमिति प्रमाणं। तस्य विष्णुसंबंधकीर्तनमुखेनैकादश्युपवासप्रशंसार्थत्वात्। वैष्णवो वा
प्यथ शैवो वा कुर्यादेकादशीव्रतं। इति मत्स्यपुराणवचनविरोधात्। वैष्णवस्य गृहिणः पुत्रोरुक्ता।
गृहादेरेकादश्यामुपवासश्रवणाच्च। शुक्लामेव सदा गृहीति मत्स्यामि स्मर्यः। अन्यथा विहि-
तप्रतिषेधे विकल्पप्रसंगात्। तेन सर्वेषामुभयैकादश्यां नित्यव्रतोपवासेधिकार इति युक्तमिति

का० ३०

तद्युक्तं। पुत्रवांश्च सभार्यश्च वैष्णवः शुक्लस्तथैव च। उभयोः पक्षयोः काम्यव्रते तु यतिवैष्णवमिति
पुत्रवतो गृहस्थस्य निषेधादेकादश्युपवासस्य काम्यव्रतत्वमिति प्रसंगस्मरणात्। न विष्णोरेव
एकादश्यां पुत्रवतो गृहस्थस्य युधिष्ठिरस्य काम्यो न पक्षद्वयीव्रतोपदेशाच्च। काम्यस्यापि विहितत्वे-
न विकल्पप्रसंगस्य तद्वदत्रापि साम्यात्। तस्माद्विकल्पनया सत्पुत्रद्दासविषय गृहिणः पुत्रवतः कृष्ण-
पक्षगतस्यैवैकादश्युपवासस्मरणमुक्तवाक्यपर्यालोचनया काम्यविषयमिति ज्ञेयं। तस्मात्पुत्र-
वतो गृहस्थस्य न काम्यैकादश्युपवासविषया निषेधाः। किं तु नित्यैकादश्युपवासविषया इति
सिद्धं॥ ॥अथैकादश्यां श्राद्धप्राप्तावुपवासकर्तव्यता व्यवस्था। तत्र च पतितोयाते जातेऽश्राद्धे पुत्रो नोपवसे-
दिति। तथा। द्वन्द्वतादयो विशीर्णे तु शुक्ले पितृसेविते। दर्विंदेवा न गृह्णन्ति कव्यानि पितरस्तथा। इत्यादिना
पत्नुश्राद्धदिने उपवासनिषेधः। स एकादश्युपवासविषयः। तथा व्याघ्रपादीयकल्पे। उपवासो यदा
नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितं। मातापित्रोः क्षये प्राप्ते भवेदेकादशी

यदि। अमर्त्यपितृदेवांश्च अजिप्रेतपितृमेविनं। अन्येवेवर्त्तेपि उपवासदिनं नाप्यपद्यानवति नारदपितृ
श्राद्धमथान्यदा न तदा कार्यं च न छृणु। व्रतभंगो महापापं तु कृत्रोषं च नो जयेत्। शेषामन्नं कुलेष्टेभ्यो वोर्क्क
ष्टेउ संदेवत्तु। तत्र यत्तु उकर्त्तव्यं तच्छृणुध मयेरितं। सर्वमन्नं समुद्धृत्य दद्यात्तिणे नरकेण तु। भाणणघा
णेउ कर्त्तव्यं व्रतभंगोन्यथा न वेत्। अन्नं ते तु मुनिश्रेष्ठ घ्राणाघ्राणेन नारद। आहलोकः श्रन्तस्तेन मा
द्दशापितृष्टा न वेत्। एवं ज्ञात्वा तु विद्वद्भिरुपायः स्थितो द्विजैः। स्कंदपुराणे। यस्मिन् दिने पितुः श्राद्धं
मातुर्वाथ न वेत्कुरु। तस्मिन्नेव दिने तात न वेद्दकारश्री व्रतं। अमन्त्रापि व्रतं स्कंद तदा कार्यं च तच्छृणु
न लुप्येत तथा श्राद्धं उपवासो थवा गुरुः। इति विप्रतिपन्नेर्थे उपशः परमो मयाह दृष्टो द्विनार्थः सर्वे
षां नराणां त्रिशिखिवादिना। श्राद्धदिने समासाद्य उपवासो यदा न वेत्। तदान्नात्तु वे श्राद्धं नुक्तशेषं तु
यद्भवेत्। तस्सर्वं दक्षिणे पाणौ गृहीत्वानुं ने त्रिशिखिद्युजः। आवर्जितं सत्तेनाथ तेन श्राद्धत्रिशिखिद्विजः।
पितृणां दत्तमिदं ताता न व्रतभंगो न विद्यते। श्राद्धे जन्मदिने चैव संक्रान्तौ राहुसूतके। उपवासं न कुर्वीत यः

का०ं३०
८५

दीर्घे त्विष्टमात्मनः। अत्र श्राद्धग्रहणं दर्शवाक्यापर्यालोचनयैकादश्यतिरिक्तविषयं दृष्टव्यं। सं
क्रान्त्यादिकन्तु प्रयुक्तोपवासनिषेधः। जन्मदिनदर्शपि साद्धर्यादेकादश्यतिरिक्तविषयः। अ
परे। अरागप्राप्तोपवासविषयता माहुः। वृद्धिं ज्ञात्वा तु षण्मासान्नोपवासो विधीयते। इत्येतद्गृ
हीतव्रतविषयमिति प्राचः। अगृहीतमथावश्यकं कार्यमित्यपरे। अन्ये तु रागप्राप्तोपवासवि
षयमिति वदंति। तन्न। नोपवासो विधीयत इति वाक्यमनुगुणत्वात्। अथास्य व्रतस्य सूतकादा
वपि कर्त्तव्यत्वे। तत्र विष्णुरहस्ये परमापद्गमापन्नो हर्षे वा समुपस्थिते। सूतके मृतके चैव न त्या
ज्यं द्वादशीव्रतं इति। अत्र वाराहपुराणोक्तो विशेषः। सूतके तु नरः स्नात्वा प्रणम्य मनसा हरिं। ए
कादश्यां न भुंजीत व्रतमेवं न लुप्यते। एकादश्यां न तो भुक्ता सूतके वे जनार्द्दनं। पूजयित्वा विधा
नेन पूजयेच्च द्विजोत्तमान्। मृतके न तु भुंजीत एकादश्यां जनार्द्दन। द्वादश्यां तु समश्नीयात्स्नात्वा
विष्णुं प्रणम्य चेति। दर्शसंकल्पितं यत्तु व्रतं समुन्नीयत व्रती। तत्कर्त्तव्यं नरैः श्राद्धे दानार्चनविवर्जितं।

माषम्
॥अथ दशमीनियमाः॥ स्कंदपुराणे। कांस्यं मांसं मसूरं च क्षौद्रं चानृतवीसरं। पुनर्भोजनमायासं दशम्यां प
रिवर्जयेत्॥२॥ कूर्मपुराणे। कांस्यं मांसं मसूरं च चणकं कोरदूषकान्। शाकं मधु परान्नं च त्यजेदुपवसं
स्त्रियं। उपवसन् उपवासं करिष्यन्नित्यर्थः। ततश्च दशम्यामेते नियमाः कार्याः। तथा। कांस्यं मांसं म
सूरांश्च पुनर्भोजनमैथुनं। द्यूतमत्यंबुपानं च दशम्यां समसंस्त्यजेत्॥ क्वचित् द्यूतपदस्थाने घृतपदं
पठ्यते। देवलः। दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः। एकादश्यामुपवसेत् पक्षयोरुभयोरपि
मत्स्यपुराणे। कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणं। व्यायामं च प्रवासं च दिवास्वापमथांजनं।
तिलपिष्टं मसूरं च दशैतानि सत्यजेत्। स्मृतावपि। दशम्यामेकभक्तं तु व्रती नियतेंद्रियः। आ
चम्य दंतकाष्ठं च खादयेत दंतनंतरं। ततः स्नानंतरं विप्र ब्रह्मचारी जितेंद्रियः। रात्रिं यजेत् ततः प्रश्वास्वा
तः स्नापी समाहितः। उपवासे च संकल्पमंत्रपूतं जलं पिबेत्॥ अथोपवासादिनियमाः। तत्रोपवा
सस्य स्वरूपं वृहद्वसिष्ठकात्यायनविष्णुधर्मोत्तरेषु। उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह। उप

का०द०
९६

वासः स विज्ञेयः सर्वभोगविवर्जितः॥ इति पापेभ्यः परिवर्जनीयेभ्यः उपावृत्तस्येत्यर्थः। तत्र वर्जनीयाना
हसुमंतुः। विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः। निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः॥ हा
रीतः। पतितपाखंडिनास्तिकादिसंभाषणानृतादिकमुपवासदिने वर्जनीयमिति। आदित्यपुराणे
नहिंसेंद्रियचापलादिरतो। विष्णुधर्मोत्तरे उक्ताः। तज्जप्यं तज्जपध्यानं तत्कथाश्रवणादिकं। तद
र्चनं तन्नामकीर्तनं श्रवणादयः। उपवासकृतां ह्येते गुणाः प्रोक्ता मनीषिभिः॥ विष्णुधर्मेषु। उपवा
सी हरिं यस्तु नक्तं ध्यायति मानवः। तत्राप्यजापी तत्कर्मरतस्तन्मानसः। निष्कामो देहमेव ब्रह्म
न्यद्माप्नोत्यसंशयं। वैकादश्यां प्रातर्दंतधावनं कार्यं प्रातः संध्यामुपासीत् दंतधावनपूर्वक
मिति श्रुतेः। ननूपवासदिने दंतधावनं निषिद्धं। वृद्धवसिष्ठेन। उपवासे तथा श्राद्धे न खादेद्दंतधाव
नं। दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं। इति। मैवं काष्ठसंयोगे दोषश्रवणात् काष्ठेन दंतधा
वनं न कार्यमित्येतदर्थपरत्वाद्वचनस्य। एवं च पर्णादिना दंतधावनं उपवासदिने न कार्यं। अत्रके

विराकृः॥ दंतधावनमेवात्र प्रतिषिध्यते येन केनचित् काष्ठग्रहणं निशार्थं वा दंतगतमविच्छिन्नं स्यात्॥
निषेधनिवृत्तिफलत्वेन विशेषस्यानाकांक्षितत्वात् न हि विशेषमनुपादाय सामान्यत्वात् निवर्त्तयि
तुं न शक्यते। लशुनादिभक्षणे निषेधवत्। अश्नाः श्वार्करा उपदधातीति विध्युद्देशस्य तु न विशेषमनु
पादाय सामान्यानुष्ठानोनुपपत्तेराकांक्षितो विशेषस्तेजो वै घृतमिति वाक्यविशेषणतो गृह्यते। तद
युक्तं। अलाभे वा प्रतिषेधे वा काष्ठतो दंतधावनं पर्णादिना विष्णुधर्मे न जिह्वोल्लेखः सदैव चैस्मादिपेगी
नसिवचनात्। यत्तु व्यासवचनं। प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनं। पर्णैरन्यत्र काष्ठैस्तु जिह्वो-
ल्लेखः सदैव चेति। तत्र प्रतिपद्ग्रहणं निषिद्धदंतकाष्ठदिनोपलक्षणार्थं पक्षान्तरमाह। स्मरणं वा अस्नाने
दंतकाष्ठानां निषिद्धायां तथा तिथौ। अपां द्वादशगण्डूषैर्विदध्याद्दंतधावनं। तदनंतरं शानःस्ना
दिकर्म कृत्वोपवासः कार्यः। तत्र मंत्रमाह देवलः। एकादश्यां निराहारो भूत्वाहमपरेहनि। भोक्ष्यामि
पुंडरीकाक्ष शरणं मे भवाच्युत। इति क्वचित्तु स्थित्वाहममपरेहनीति पाठः। कात्यायनेन तु। स्थित्वाहं

का०हे०
९७

नितनः परेहनि पर्वीनं मंत्रेणोच्चारणानंतरं समणवाड्। इत्युच्चार्य ततो विद्वान् पुष्पांजलिमथार्पयेत्।
श्रुतसर्वालोचनया च पुष्पापूर्णमंजलिं कृत्वा तेन मंत्रेणोपवाससंकल्पं पुष्पांजलिं विष्टवेपये
दितिगम्यते। स्कंदपुराणे। रात्रिं नयेत्ततः पश्चात्स्नातः स्नापीसमाहितः। उपवासं तु संकल्प्य मंत्रपू
तं जलं पिबेत्। रात्रिंदशमिरात्रिं मंत्रेणाष्टाक्षरेणाभिमंत्रितं जलं पिबेदित्यर्थः। तथा च मार्कंडेयः
अष्टाक्षरेण मंत्रेण त्रिजपेनाभिमंत्रितं। उपवासफलप्रेप्सुः पिबेद्वारि समाहितः। देवार्चनं ततः
कृत्वा पुष्पांजलिमथापि वा। संकल्पमंत्रमुच्चार्य देवाय विनिवेदयेत्। स्कंदपुराणे तु। पुष्पांजुलिम-
थापि वा इत्यस्यानंतरमयं श्लोकः पठितः। संपूज्य देवदेवेशं नत्वा परमया पुनः। अहोरात्रं हि पा-
फीमानुपवासफलाप्तये। पात्रस्थं कृत्वा जलपानार्थं पुनः पिबेदित्युक्तं। अथवा देवतार्चनयज्ञान्ते
पुष्पाणां पूर्णमंजलिं कृत्वा ततः संकल्पानंतरं तेन पुष्पांजलिना समर्पयेद्देवदेवेशमिति। शैवानां
तु संकल्पमंत्रः शिवधर्मेषु दर्शितः। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्।

सौराणां तु सविज्ञानान्नावासंकल्पः साविज्ञाप्य पूर्वानाम्नां संकल्पं तु समाचरेत्। सौरपुराणे निधा-
नात्। प्राचीनमध्यरात्रस्योपरि किंचिद्दशमी वर्त्तते। तदा एकादश्याः प्रथमयामचतुष्टये संकल्प-
ज्ञा संकल्पावनुष्ठेयो दशम्याः संगदोषेण अर्धरात्रात्परेण तु। वर्जयेच्चतुरो यामान्संकल्पाचन-
योस्तदेति वचनात्। यदा तु दिनोदयेपि दशम्या तु वर्त्तते। तदा रात्रौ विशेषोपवासेन भस्तु दिने सकाम-
माह्नि। ततः रात्रौ संपादयेद्विष्णुसंकल्पं च तदाचरेत्। इति वचनात्। नारदीयपुराणे। दशम्यां संग-
दोषेण नोपोष्यास्तान् पूजयेन्नेव वर्जयेत्तिन्। रात्रिस्तत्र यामांश्च चतुरो हि गः। तनद्ध्यात्वा नत्वा पूजादिकं
मो तदुपोषितैः। न दिवा शुद्धिमाप्नोति तदा रात्रौ विधीयते। दिनकार्यमशेषं च कर्त्तव्यं रात्रावरीमुखे॥
अत्र देवलः। गृह्णीयादौडुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयात् यद्वा संकल्पयेद्बुधः॥
औडुंबरं पात्रमय ततज्जलं पूर्णं उदङ्मुखः आदाय उपवासं च गृह्णीयात्संकल्पयेत्। उपवासंकल्पमा
त्रेऊर्यादित्यर्थः। स्कंदपुराणे। उपवासं च गृह्णीयात् यद्वा वार्यधीरपान्निति पठितं। तत्र जलपुष्पाग

का०दे०
९८

लौ विकल्पः। तेन यथोक्तविधिसमंत्रक उपवाससंकल्प इति सिद्धं। अथ यत्र नोक्तविधिः तत्र किंस-
मंत्रक एव संकल्पः। अथोपवास एवाभिहितः। उपोष्यः। अश्रुते मंत्रस्यामंत्रकमिति केचित्। तद-
सत् एकभक्तेन यो मर्त्य उपवासव्रतं चरेत्। तथा उपोष्य नक्तेन च तारकं जगत्संयुताः इत्यादिना-
स्कंदपुराणादिषु नक्तादिषूपवासशब्दप्रयोगो मासाग्निहोत्रन्यायेन उपवासधर्मनिर्देशार्थ इ-
ति स्थितं। तत्र धर्मातिदेशो सत्सुपवाससंबंधिमंत्रस्य यथाश्रुतस्यार्थानावे सति प्रकृतार्थप्रकार-
नापेक्षायां एकादश्यां नक्ताहार इत्यादिरूपादितपरसाद्द्वितेन मंत्रेण तत्कार्यमिति गम्यते। तेन नक्ता-
दावपि समंत्रक एव संकल्प इति सिद्धं। अथोपवासपरैरनुष्ठेया अन्ये नियमाः कथ्यंते। तत्र संक-
ल्पप्रवृत्ति पारणपर्यंतं पाषंडसंभाषणादि न कार्यं। तदुक्तं विष्णुधर्मेषु। पाषंडिभिरसंस्पर्शोस-
भाषणमेव च। विष्णोराराधनपरैर्न च कार्यं उपोषितैः। विष्णुपुराणे च। तस्मात्पाषंडिभिः पा-
पैरालापस्पर्शनं त्यजेत्। विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षित इति। वेदबाह्या विहितकारिण

पाखंडिनां तद्देषां दर्शने प्रायश्चित्तमुक्तं। विष्णुपुराणे। तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः॥ सं
स्पर्शे च प्रायश्चित्तमुक्तं। विष्णुधर्मेषु। संस्पर्शे स्नानं तु धः स्नात्वा शुचिरादित्यदर्शनात्। संभाषणे च प्राय
श्चित्तमुक्तं। तत्रैव। संभाष्य तानुशुचिषदं चिंतयेदच्युतं बुधः॥ इदं चोक्तादरे स्नानमकृत्वा। तत्स्मरणमनः
शारीरमंतःकरणप्रधानत्वाच्च विष्णुर्भगवानच्युतः। शमनयवस्तु ममेदं श्रमपापाहनां तर्हिदिसं
निविष्टे। अंतःशुद्धिं वक्शुद्धिं शुद्धो धर्मोपगमोच्यता। सकरोवमलेतस्मिन् शुचिरेवास्मि सर्वदा। व
स्यापद्योतनेन घौर्बोधं श्वनगवानजः॥ शमनयवनंतात्मा विष्णुश्चेतसि संस्थितः। एतच्च नाप्यजस
प्रपाखंडिनिरूपोषितैः॥ न संशुचिषद्देस्त्रात्सूर्यं पश्येत दिद्गितः॥ इति। किंचित्कायिकवाचिकप्रा
नसिकनियमलोपे प्रायश्चित्तमिमं विदुः। तन्मद्वप्रमाणं नावात्। न च मंत्रलिंगप्रमाणं। तस्य वाक्य
दुर्बलत्वेन वाक्यविरोधे सत्यप्रमाणत्वात् विरुद्धं च वाक्यं। एतच्च नाथ्यमित्यादि। वाचिकलोपे प्राय
श्चित्तमिदमाह। योगियाज्ञवल्क्यः॥ यद्दिवाकावि लोपः स्यात्स्नानदानक्रियादिषु। व्याहरेद्वैष्णवं म

का० ई०
४८
नसप्र २

त्रं स्मरेद्वा विष्णुमव्ययमिति। मनसि नियमालोपे तु स्नानं दीप्राणायामोसुक्तं। एतन्मस्तिदमेव। उपवासी च
ब्रह्मचर्यं कुर्यात्। तथा च कात्यायनः॥ ब्रह्मचर्यसमायुक्तं उपवासं चरेन्नरः॥ उपवासश्च व्रतं चैतेन्
ब्रह्मचर्यादि च उद्दिष्टं कार्यं। तथा च देवलः॥ ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं। व्रते चैतानि चत्वा
रि चरितव्यानि नित्यशः॥ ब्रह्मचर्यविपत्तिर्हेतुर्नाह। स एव। स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथ
नादपि। विद्यते ब्रह्मचर्यं वस्त्वदारेष्वसंगमात्। उपवासदूषकानपि स एवाह। असकृज्जलपाना
च्च तांबूलस्य च भक्षणात्। उपवासः प्रदुष्येत दिवास्वापाच्च मैथुनात्॥ अशक्तौ च सकृज्जलपानं। पु
तुष्यासवचने। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनं। उपवासेन दुष्येत दंतधावनमंजनं। तत्स
एपत्नीविषयमिति। ।अथ साहस्रीनियमाः॥ ।तत्राह कात्यायनः॥ प्रातःस्नात्वा हरिं पूज्य उपवा
सं समर्पयेत्। अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव।
पारणं तु ततः कुर्यात्सम्यगासं न वमागतः॥ अत ऊर्ध्वं पठेद्द्विस्तु कारयेत्तु यथारुचि। यथा तु साहस

न्ना पारणमात्रपर्याप्ता तदा रात्रिशेषे स्नानादिकं सर्वं कर्म कृत्वा द्वादशीमध्ये पारणं कार्यमिति यथा
पद्मपुराणे। यदा न भवति अल्पापि द्वादशी पारणे दिने। उषःकाले द्विपञ्चर्या स्यात् तदा मध्याह्निकं त
था। नारदीयपुराणे। अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दान
होमादिसंयुताः। त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलं। शतयज्ञाधिकं वापि नरः प्राप्नोत्य
संशयं। एतस्मात्कारणाद्विप्रः प्रत्यूषे स्नानमाचरेत्। पितृतर्पणसंयुक्तमस्तो दृष्टैव द्वादशी॥
तथा च सारदाराणे। दिनकर्म दिने सर्वं कर्त्तव्यं यदि तद्दिने। नैव सिद्धिमवाप्नोति तदा रात्रौ वि
धीयते। नारदीयपुराणे। एतस्मात्कारणादिति पूर्वोक्तः श्लोकः पठितः। भविष्यत्पुराणे। अ
ल्पायामपि भूपाल द्वादश्यामरुणोदये। स्नानार्चनक्रिया कार्या दानहोमादिसंयुता। कालि
कानारदपुराणयोः। कलाद्वयं त्रयं वापि द्वादशी यत्र दृश्यते। स्नानार्चनादिकं कर्म तदा रा
त्रौ विधीयते। कात्यायनः। अक्रमवतस्तु वृत्तेषु पथ्येन समपद्यते। न दोषः सर्वपापकर्षः स्यात् अन्य

का० ३०
१००

थाक्रमबाधनात्। तेन निमित्तद्वादश्यतिरिक्तेषु यावदर्तनमपकर्षः स्यादिति। ।अथान्येपि द्वादशीनिय
माः। ब्रह्माण्डपुराणे। कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं। व्यायामं च प्रवासं च दिवास्वप्नमथा
ञ्जनं। तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः। द्वादश्यां वर्जयन्नित्यं सर्वपापैः प्रमुच्यते। पुनर्भोज
नमध्वानो भारमायासमैथुने। उपवासफलं हन्युर्दिवानिद्रा च पञ्चमी। हरस्मृतिरपि। दिवानिद्रा
परान्नं च पुनर्भोजनमैथुने। क्षौद्रं कांस्यामिषं तैलं द्वादश्यामथ वर्जयेत्। कांस्यं मांसं सुरां द्यूतं व्या
याममक्रोधमैथुनं। तथा। कांस्यं मांसं मसूरांश्च द्यूतं व्यायाममैथुने। हिंसासत्ये च तैलं च लोभं
निर्माल्यलंघनं। वर्जयेदिति। स्कन्दपुराणे। क्षौद्रं मांसं सुरां तैलं व्यायामं क्रोधमैथुने। परान्नं कां
स्यताम्बूलं लोभं निर्माल्यलंघनं। द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्। इक्ष्वाकोः पुत्र वि
कारमिव तिष्ठतीति क्वचित्पाठः दोषो फले प्रस्तुरिति क्वचिदुपवासफलं हन्युरिति। फलसंबन्धः
श्रूयते। तेनैते निगम्यन्ते। कामाधिकारविषयाणि मानि वचनानि। यत्र पुनर्द्वादशीनियमवाक्येषु

नश्रूयते। फलसंबंधस्तेषस्य वगम्यते। काम्यविषये साद्रूपेणोपागतं सर्वकाम्यविषयमवसीयते
सायमाद्यंतयोरंगाः साध्यं प्रातस्तु मध्यमे। उपवासफलश्रुतेरंगत्वात्तु क्तिचतुष्टयमिति। तत्र केचि
दाहुः। अनेन वचनेन काम्योपवासांगतया नक्तचतुष्टयविधानं विधीयते। नित्यांगेषु श्रुतग्रहणानुपप
त्तेः। न हि नित्येषु फलनिबंधनमनुष्ठानमिति। तदुपपन्नं। अंगत्वे प्रमाणाभावात्। इह हि वाक्यप्रक
रणसंनिधयो प्रमाणांतरं तु शंकास्पदमपि न भवति। न तावत्प्रकरणेनांगत्वं। तथा हि। फलवत्सं
निधावफलमनुष्ठानमिति। तदंगं भवति। न च नक्तचतुष्टयहनेस्य फलश्रुत्या हेन फलकामशब्द
पर्यायेण संबंधमानस्याद्वाक्यतेवक्तुं। तस्मान्न प्रकरणेनांगत्वं। नापि वाक्येन। वाक्यादुपवास
फलेन संबंधमाह। न पुनरुपवासेन काम्यमनर्थतयैव क्रियाणां सरस्वतासंबंधावगमात्॥ का०३० १०२
अतस्तस्योपवासफलेनैव संबंधः। नहि पि न तत्र पश्चाद्यविशेषितस्य फलसामान्यस्यानपेक्षि
तत्वेन तत्संबंधायोगात्। अथोपवासफलश्रुतिस्तु उपवासविशेषणसामर्थ्यादेवोपवासस्य

फलविशेषः। तेन संबंधस्तत्र लभ्यते। तत्र। उपवासविशेषिणेन चेत् फलविशेषेण संबंधस्तर्हि
तस्योपवासफलसंबंधः। विधायवाक्यप्रमितिपूर्वकत्वात्तद्विरोधितयोपवाससाधनके फलेसाध
नांतरं विधातुं न शक्यते। स्वयं तदधीनत्वेन तेनसह विकल्पसमुच्चयोरसंभवात्। अस्तु तर्हि गुण
फलेसंबंधकल्पनमुपवासस्य यादृशः फलविशेषस्तादृशफलश्रुतेः अंगत्वान्नक्तचतुष्टयमिति
तदपि न फलशब्दस्य तादृशलक्षणाप्रसंगात्। तस्माद्गुणफलसंबंध एवेष्ट वक्तव्यः। उपवाससाध्य
मेव फलं यदा प्रकृततरमिष्यते तदा तत्त्वान्नक्तचतुष्टयमिति। तदपि न फलशब्दस्य तादृशलक्षणा
प्रसंगात्। तस्माद्गुणफलसंबंध एवेष्ट वक्तव्यः। उपवाससाध्यमेव फलं यदा प्रकृततरमिष्यते तदा
तत्त्वान्नक्तचतुष्टयमिति। यथाग्नौतिष्टोमसाध्यफलं निशायार्थिना मुंजीयाद्युपवासे विधीयते। ए
वं सति फलश्रुतिरिति प्रशस्तापि प्रकर्षवाचकतयार्थवान् भवति। न तु नक्तह्रानस्य स्वयं क्रियात्म
त्वात्। क्रियांतरमसाधयतः कथं फलाय विधानं। यथारथंतरीयसाम्नो गीतिक्रियात्मकस्य क्रियाम

प्रवृत्तं यागमसाधयतः फलेसंबंधायोगात्। प्रवृत्तेन क्रियेविशिष्टविधानमाश्रित्य उच्यते।। ईदृशिरूपस
कारकस्य क्रियामसाधयतः फलप्रयोजकत्वायोगात्। प्रवृत्तक्रियानिष्पत्तिरितरन्नापेक्षते। यथागो
दोहनस्य क्रियायां। उभयमेव क्रियात्मकत्वात्क्रियांतरनिष्पादनापेक्षा। किं तु न दुग्धजीवनेन विना फल
साधकत्वायोगात्। तद्वाश्वयस्यपदेश्मलनेते। न तु कामसंयोगमंतरेणापि दृश्यामामेकं तत्क्षेत्ररू
पेण वचनेन विधीयते। तद्यथा। शातईरिरिने लोकास्तिष्ट ध्रुवैकभोजना इति। उच्यते। कार्तिकशुक्लैका
दशीविषयं तन्नैकादशीमात्रविषयं। तत्प्रकरणोपयोगे नाद। एषासा कार्तिके शुक्लायोगनिशाव्य
फेदति। शातरेकादशी शास्त्रामाक्र्जध्रुपगमोजनमिति। अथैकादशीनियमाः।। सा च द्विविधा। संपूर्णा वि
द्धा च। तत्र केचिदुदयादुदयपर्यंतमवस्थितैकादशी संपूर्णेत्याहुः। तथा च ज्योतिःसिद्धांते सर्वास्विति
थिषु संपूर्णा उदयादोदयस्थिताः। नारदीयपुराणे। आदित्योदयवेलाया आरभ्य षष्टिनाडिका। सा तिथि
स्तासंपूर्णेति विज्ञेया साधीयः। प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः। संपूर्णा इति विख्याता हरिवास का० हे० १०२

र वर्जिताः। इति स्कंदपुराणवचनविरोधात्। कीदृशात्तर्हि संपूर्णेद्विरिवासर इत्यपेक्षितः। गरुडपुराणे
शिवरहस्ये चोक्तं। उदयात्प्राक्यदा विप्रा मुहूर्तद्वयसंयुता। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही। ज
विष्णुपुराणे। आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता। एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता
प्रकारांतरेण संपूर्णत्वमुपरिष्टाद्वक्ष्यामः। संपूर्णैकादशी च द्विविधा द्वादश्यामसती सती च। तत्राद्या
सर्वैरुपोष्या। त्रयोदश्यां द्वादश्याभावे सतीति निर्वाहात्। त्रयोदश्यां द्वादशीसद्भावे केचिदाहुः। एकाद
श्यामुपवासो न द्वादश्यां। एकादशीलक्षणस्य मुख्यकालस्य द्वादश्यामभावात्। एकादशीकार्यकं तथा
न द्वादश्यां ग्राह्या। मुख्यकालसंभवे हि तत्कार्यकरणं कालांतरस्य नोपपद्यते। यत्तु वचनं। एकादशी
तहोरात्रं द्वादशी च कलाधिका। त्रयोदश्यां यदा प्रातः उपोष्या द्वादशी तदा। इति। तद्दशमीविद्धैकाद
शीविषयं। द्वादश्यां विद्यमानाक्रियन्माज्जैकादशीविषयं चेति। अपरे त्वाहुः। परतो द्वादशीसद्भावे तु
द्वादश्यामुपवासो नैकादश्यां विद्धाप्यविद्धा वा विज्ञेया परतो द्वादशी न चेत्। अविद्धापि नथा विद्धा परतो

द्वादशीपदातिपुरुषपुराणवचनात् । तथा च ब्रह्मपुराणे । एकादशी तु संपूर्णा यदि ह्रस्वा यदा न वेत् । तत्र
थैवैकादशी नास्ति द्वादश्यां वा यथसंयुता । सकलाप्यकाष्टा द्वादश्या यदि स्यात्परेऽहनि । द्वादश्यां द्वादशी
हन्ति पूर्वस्मिन्पारणे कृते । अत्र पूर्वपारणयोरपारणं विधीयते । पारणं चैवोपवासमंतरेणानुपप
न्नं । पारणं तत्रानुपवासस्य । यदुक्तं विष्णुरहस्ये । पारणान्तं व्रतं ज्ञेयमिति । तेन शुद्धद्वादश्यामुपवासो ।
वसीयते । न चोत्तमविशिष्टैकादश्युपवासो धेदोषः । पुरस्तान्तरेण तत्र द्वादशी व्रते द्वाभिधानात् । पेउपा
दितानेकादशीविषयमेवेदं वचनमूचिरे । ते प्रकरणानभिज्ञाः ॥ अथ वैकादशी नास्ति द्वस्यापि स्यात्तत्र
कृते । पेचद्वादशीवारैकादशीविषयमेवेति तेपि तथा । द्वादश्यां वा यथ संयुतेति तत्र प्रकृतत्वात् । द्वितीयै काद्शी

कादश्युपवासविधेरेकादश्युपवासे च शुद्धद्वादश्युपवासे च परतो द्वादशी सत्त्वस्य प्रयोजकत्वाप
वक्तमाणत्वाच्च । तथोक्तविषयमिदं वचनं । स्कंदपुराणे । एकादशी न चेत्पूर्णा परतो द्वादशी यदा । त
दा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् । विष्णुरहस्ये । एकादशी तु संपूर्णा सदश्याचोत्तरा न चेत् । पूर्वा

का०ई०
१०३

मुपवसेत्तद्वेयातिथिवृद्धिः प्रशस्यते । उत्तरा द्वादशी सद्दश्यामशेषात्र योद्वश्यामपि स्यादिसर्थः । पूर्वा
एकादशी पूर्ववद्द्वादशीवद्दानुष्ठेयोपोष्य इसर्थः । कालिकापुराणे । एकादशी तु संपूर्णा परतो द्वादशी न वे
त् । उपोष्या द्वादशी तत्र तिथिवृद्धिः प्रशस्यते । गारुडपुराणे । पूर्णा न वेद्यदा न दानवैवविवर्द्धते ।
न दोपोष्या उभ द्वास्या न्नथिवृद्धिः प्रशस्यते । नविष्णुपुराणे । उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणं ।
निर्गता यांत्रयोदश्यां कलावाप्यधिकलापिवा । विकलायां द्वादश्यां पारणं यः करोति हि । तामुपोष्य मद्विपा
लनगर्गे विज्ञाते नरः । स्मृत्यन्तरे । संपूर्णैकादशी यत्र द्वादश्यां वापरे दिने । तत्रोपोष्या द्वादशास्या
त् द्वादश्यामेव पारणं । नगवता दिनत्रे । संपूर्णैकादशी नास्ति परतो द्वादशी यदि । उपोष्या द्वाद
शी शुद्धा द्वादश्यामेव पारणं । नगर्गे विज्ञाते तं तु हिंसात् नगवान् हरिस्तस्मादेवं विधे विषये द्वाद
श्यामेवोपवासः इति त्रिस्पृगिमिति केचित् । अपरे त्वेवं व्यवस्थामाहुः । एकादश्याः संपूर्णत्वे द्वाद
श्या वा सत्त्वे द्वादश्या श्च त्रयोदश्यां सत्त्वे उदयास्मात्परा विप्रमुरुर्नद्रयसंयुता । संपूर्णैका ।

दशी नाम तत्रैवोपवसेद्गृहीति। स्मृत्यर्थं गृहिणामेकादश्यां उपवासः॥ अथ चैकादशी नास्ति दशा-
म्याचा घसंपुतेति। एकादशी न चेत्पूर्णा परतो द्वादशी यदि इति। इत्यादि वचनानि। उपोष्या द्वादशी
शुद्धा द्वादश्यामेव पारयेत्। निर्गतावेव चयोदश्यां कलावाह्निकलापि वा। द्विकलायां तु द्वादश्यां पार-
णं प्रकरोति हि। नामुपोष्य महीपाल नगर्ने विज्ञाते नरः। संपूर्णैकादशी यत्र द्वादशी वा परे हनि। त-
त्रोपोष्या द्वादशी स्यात् द्वादश्यामेव पारणं। नागर्ने विज्ञाते जंतुरित्याह भगवान् हरिः इत्यादि वचन-
पर्यालोचनया मुमुक्षुविषयाणि। गृहिमुमुक्ष्वतिरिक्तानां तत्रोपवास इति संदेहो। वक्तवाक्य-
विरोधेन संदेहो ज्ञापते यदा। द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमिति स्मृते द्वादश्यामुपवा-
सः। एकादश्यां तु वेधाभावे सन चेति द्वादश्या मन्नावे द्वादश्यास्त्रयोदश्याम् नावे एकादश्युवासनि-
मित्ताभावेन संदेहो नावात्। द्विकलायां तु द्वादश्यां पारणं प्रकरोति हि। इति कलाद्वयपर्याप्तद्वाद-
शी सत्त्वे द्वादशीमध्ये पारणविधानात् द्वादशी कलाद्वयद्वादशी सत्त्वे त्रयोदशी उपारणमित्युप-

पन्नेरविद्धैकादश्यामभावे द्वादश्यास्त्रयोदश्यां सद्भावे गृहिमुमुक्ष्वतिरिक्तानां तत्रैवोपवासे गृहिपति-
वदेकादश्यामुपवासनिश्चयहेत्वभावान् नागर्ने विज्ञाते जंतुरिति वच द्वादश्युपवासनिश्चयहेत्वभावा-
त् संदेहे सत्येकादश्यामुपवसेत्। अथ चैकादशी नास्तीति वक्तवाक्यविरोधोपपत्तेर्द्वादशी यात्स्य-
र्थः। वक्तवाक्यविरोधस्यापि विषयव्यवस्थया परिहारसंभवे व्यवस्थानिश्चयेन संदेहाभावात् संभवे
तत्तुल्यबलत्वे बलवदनुसारेण निश्चयोपपत्तेः। संदेहाभावात्। तुल्यबलत्वे विकल्पनिश्चयेन संदेहाभा-
वाद्विषयव्यवस्थापर्यालोचनात्। कथं विसंदेहो सद्भावप्रसादृष्टार्थानियुक्तस्मृतित्वाविशेषेणैकत-
रपक्षनिश्चयायोगात् वक्तवाक्येन तु विरोधसंदेहापनयनार्थं चैनैतद्वाक्येन व्याख्यानयुक्ता। वक्तवाक्य-
विरोधेषु व्यासणेषु विवादिषु। एकादशीं परित्यज्य द्वादशीं समुपोषयेत्। इत्येषा स्मृतिर्गृहिमुमुक्षु-
व्यतिरिक्तविधवादीनां व्यवस्था। एकादश्यभावे पि विवादिषु विपरीतवाक्यादिषु एकादश्यामुपवासा-
दिषु व्यासणेषु वक्तवाक्यविरोधोपपत्तेः। विधवादिरेकादशीं परित्यज्य द्वादशमुपवसेदित्यर्थः। वक्त-

वाक्यविरोधायेषां न च वाक्यविरोधा इति वक्ष्यामि॥ सन्दिग्धेषु वाक्येषु द्वादश्यां समुपोषयेदि-
त्यपि वचनं यस्मिन्विधवादिविषये। अथ चैकादशी नास्ति मादि वाक्यानि सन्दिग्धानि सविधवाहिः
द्वादश्यां समुपोषयेदिति व्याख्येयं। तदयुक्तं। उदयात्प्राक्यदा विद्धेति वचनपर्यालोचनया गृहिस्म-
तिरिक्तानामुत्तरत्रोपवासः प्राप्तः॥ यदपि वक्ष्यावाविरोधनस्यादिवचनस्याख्यानं तदपि वचनानाम-
वादयुक्तं। तिथिप्रमाणे ज्योतिःशास्त्रविप्रतिपत्तेः। दशमीवेधसंदेहविषयत्वेनार्जवेनोपपत्तेश्च।
यद्यपि मार्कण्डेयप्रद्युम्नसंवादे वचनं विवादेषु च सर्वेषु द्वादश्यां समुपोषणं। पारणं हि त्रयोदश्यां
समुपोषणं। पारणं हि त्रयोदश्यां मातेयं मामकी मुने। हेतुवादेन कर्त्तव्यो हेतुनापतते नरः इति। का॰ हे॰ १०५
तदयुक्तं। वेधविषयत्वेन व्याख्येयं। या या यो विषयव्यवस्था निश्चेतुं न शक्नोति। तद्विषयाणि तथा
सन्दिग्धेषु वाक्येषु इत्युक्तं। अविद्धैकादशी उपवासमात्रेण मोक्षासिद्धेः॥ न गर्नेविषतेजं तु रिसस्या-
र्थवादत्वात्। सत्यशुद्धिद्वारेण प्रयोगिनां गृहस्थादि विशिष्टेति। न फलपरत्वेपि बाधः। तस्माद्यथो-

क्तमेव साधीयः। द्वितीयापि त्रयोदश्याम विद्यमानद्वादशीका विद्यमानद्वादशीका वा तत्राद्यायां व्यवस्था
गारुडपुराणे। उदयात्प्राक्यदा विप्र मुहूर्त्तद्वयसंयुता। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही। पुनः
प्रभाते समये घटिकैका यदा भवेत्। अत्रोपवासो विहितश्चतुर्थाश्रमवासिनां। विधवानामपि तत्रैव प-
रतो द्वादशी न चेत्। अत्र च दशैनवनस्थादिग्रहणं। प्रचेताः। एकादशी विद्धा चेत् तत्र शुक्लपक्षे विशेषत-
उत्तरां उपयतिः कुर्यात् पूर्वामुपवसेद्गृही। हव्यवसिष्ठोपि। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। लु-
प्यते द्वादशी तस्मिन् उपवासः कथं भवेत्। उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः। तस्मिन् त्रयोद-
श्यां क्रिया यदा द्वादशी नास्ति। तदा पूर्वोक्तगृहस्थाश्रमिचतुर्थाश्रम्यधिकारिभेदेन द्वे तिथी उपोष्ये
न त्वेकैवेत्यर्थः। अपरे तु तिथिद्वयोपवासपरत्वेनैव व्याचक्षते। अन्यथाधिकारिभेदकल्पनाप्रसंगा-
त्। इतरेतरयोगविहितं द्वे उपवासैकदेशोपद्वन्द्वेनादितरेतरयुक्ततिथिद्वयस्योपोष्यत्वप्रतीतेश्च
विष्णुप्रीतिकामिनोधिकारिणोपि श्रुतेश्च। न च तिथिद्वययुक्तं दिनमेकमुपोष्यमिति व्याख्यायुक्ता॥

ग्र१८

तिथिः पूर्वैकदेशो लक्षणया प्रसंगात्। स्कंदपुराणेपि। प्रथमेह्नि त्रिसंपूर्णा व्याप्याहोरात्रमास्थिता। द्वाद
श्यां च तथा नातं दृश्यते पुनरेव च। घटिका च पुनर्दृश्येत द्वादश्यां त्रिःपि वा दिना। पूर्वा कार्या गृहस्थैस्तु य
तिभिस्तु तथा विभो। द्वादश्यां संयुता कार्या सदा दैवे मोक्षकांक्षिभिः। एतद्वचनपर्यालोचनया पुनः प्र
नातसमय इति वचने। अहोरात्रव्यापिन्या संपूर्णायां द्वितीयदिने। विद्यमानैकघटिकायां इत्यादिव्य
वस्थोक्तेति प्रतीयते। तेनैवारुणोदयाद्यारभ्यारुणोदयं यावदवस्थितोदयागामिनि। वाक्ये संपूर्णा वि
क्षिता। पुनः प्रनातसमय इति वारुणोदये विद्यमानैकघटिकायामित्यादिव्यवस्थोक्तो यदि सूर्यो
दयउत्तरावधित्वादारुणोदयवाची प्रनातशब्दो नोपपद्यते। तथा हि। प्रत्युषोहर्मुखं कल्यमुषःप्र
त्यूषे स्नानमाचरेदित्युपसंहारात्। तथा। यदा न वर्तितो नैव वचने प्राप्नवचने उषःकाले स्नानादि
कार्यमिति निहितं। प्रत्यूषसी अपि। प्रनातं चेत्यादिनामरसिंहादिभिः प्रत्यूषपर्यायः प्रनातशब्दोऽभि
हितः स चारुणोदयवाची। अथेति द्वादश्यानियमदर्शनावसरपठितनारदीयपुराणवाक्ये चारुणोदय

का०दे०
१०६

ये स्नानमिति निधाय। अल्पायामपीति न विष्णुपुराणवाक्येऽरुणोदये नेरुणोदयवाच्युषःशब्दपर्या
यः प्रनातशब्दस्तद्वचनः। तथा परतो द्वादश्याश्च वेदिति नोपपद्यते। परमहृदेरनंतरदिने षट्घटि
कानक्षत्रस्फ्रोतिःशास्त्रप्रसिद्धत्वादित्युच्यते। यथा पुनः प्रनातसमय इति वाक्यं प्रथमेह्नि त्रिसंपू
र्णेत्येतद्वचनसमानार्थं संभवेत्। तदेतन्मूलभूतयेव श्रुत्यसोपपन्नेन्न मूलांतरकल्पना। अन्यथास्या
व्यानवसह्नेव समय प्रातःशब्दे वै यथ्यादस्मात्सहेव प्रनातसमय इति षष्ठीसमासाश्रयणात्। न कश्चि
द्दोषः। अतएव प्रनाते पुनरेतिसे तिवचनानि वर्तमानानि प्रनात इति च सप्तमी प्रनातसमय इति
च कर्मधारयपक्षे सर्वाभ्यो तावस्संपूर्णा इत्यादिवाक्योक्तोत्तरावधित्यागे कारणाभावाच्चान चेद्दरि
वासरवर्जिता इति कारणं वाच्यं। गौरवप्रसंगात्। अन्यथापुपपन्नेश्च संपूर्णेति तिथिर्षष्टिघटि
कात्मकत्वमेवाधितमवस्थितं वाच्यं चैव तत्सूर्योदयरूपोत्तरावधेरपि दर्शनाच्चानवादित्योदयवे
लायां इति वचनप्रतिपादितषष्टिघटिकात्मकत्वमबाधितमवस्थितं वाच्यं। उभयावधिवे संपूर्णा

त्राद्रस्यानेकार्थपातात् । षष्टिघटिकात्मकत्वावबोधेपूर्वोक्तदोषप्रसंगात् । आकांक्षितवाक्यविरो
धनिर्णयार्थत्वेनोदयात्प्रागित्यादिसोदयवेलायाइतिवचनद्वयेपुदयात्प्राचीनमुहूर्तद्वयेविद्य
मानासंपूर्णत्येतदर्थपरत्वेनव्याख्यानोपपत्तेश्च । तेनद्विधैकादशीसंपूर्णा । अहोरात्रव्यापिनी । अ
रुणोदयादारभ्यद्वितीयसूर्योदयपर्यंतमवस्थितावातत्रापिसर्वतिथिसाधारणःपूर्वस्याःसंपूर्णत्वा
त्रामुख्यः । तेनद्वितीयायाअनेकार्थपातात् । उदयात्प्राक्घटिकाचतुष्टयेपिविद्यमानायाःसंपूर्णत्व
निधानंवारुणोदयवेधनिराकरणार्था । हरिवासरवर्जिताइतिच । अपरेत्वाहुः । पूर्वविधियुक्तेवसं
पूर्णत्वनिधीयते । नद्वितीयावधिनियमायेह । अस्मिन्नपिपक्षेव्याख्यापूर्वैवपर्वतयात् । अन्येत्वेवंव्या	का०हे०
चक्षते । उदयात्प्राक्यदिमुहूर्तद्वयंसाचाहोरात्रव्यापिनीभवति । तन्नाप्रतिपत्स्मृतयासर्वाद्यत्वेने	१०७
नसर्वतिथिसाधारणेसंपूर्णत्वनिषेधेप्रकारांतरेण । चतुर्नुक्तायामाकांक्षितप्रतिपादनेववाक्य
स्योपपत्तेः ॥ तथाचमार्कंडेयः ॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा । पूर्वामुपवसेत्कामीनिष्कामस्तू

त्तरांवसेत् । गृहस्थमात्रवचनयेचगृहिणोनिःकामस्यद्वितीयैकादश्यामुपवासोनस्यात् । तथाचानि
ःकामस्तुपरांकुर्यात् । उत्तरैकादशीसदाभातनैवउमाबाबादशीचद्विजोत्तमाः ॥ इतिस्कंदपुराण
वचनविरोधःस्यात् । अन्येतुयतिगृहिपदयोरन्यथाश्रुतत्वेइदंकारणमाहुः । यदिगृहस्थेवपूर्वामुप
वसेत्यदिचोत्तरां । तदावानप्रस्थादेःकोपवासःस्यात् । नतुयतिपदंनियतिपदयोगेनवर्तमानं
वनस्थादिकमपिवदत्येते । तथाचोत्तरस्यामस्योपवासइतिचेत् । नगृहिणामपिनियतानांउत्तर
त्रोपवासप्रसंगात् । तथाच । पूर्वामुपवसेद्गृहीवचनानांनसंस्यात् । नतुयतिगृहिव्यतिरिक्तोपल
क्षितंयतिपदमितिवनस्थादेरुत्तरत्रोपवासइतिचेत् । मैवं । मनुपसंज्ञातविरोधितयायतिपद
स्योपलक्षकत्वानुपपत्तेः । प्रत्युतोपसंहारगततेनगृहिपदस्ययतिव्यतिरिक्तोपलक्षणकत्वेस्या
त् । तथाचपुनःप्रजानतसमयइत्यादिवचनविरोधःस्यात् । अपगृहीपूर्वामेवोपवसेत् । यतिरुत्त
रामेवेतिविधानं । तथाचवानप्रस्थादेरन्यतरत्रोपवासइतिचेत् । मैवं । पूर्वामुपवसेद्गृहीतिवचन ।

स्वविवेकव्याप्तेः । परतो द्वादशी सत्त्वनिमित्तो द्वितीयदिनोपवासः परतो द्वादश्यामिति वचनात् । प
रतो द्वादश्यभावात् । पूर्वस्यामेकादश्यामुपवासः सर्वेषामा सह इति पूर्वामुपवसेत् । गृहीति वचने
फलमेवास्यात् । ननु वचनस्थादेस्तिथिद्वयोपवासः । किमिति न स्यात् । सो ऽप्यस्मिन्नेव विषये विहित
सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा । लुप्यते द्वादशी तस्मिन्नुपवासः कथं न स्यात् । इत्युपक्रम्य उपो
ष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वचनात् । तत्र सकामस्य वचनस्थादेरुपवासो ऽस्तु नाम निःकाम
स्य पुनः को ऽपवास इति वाच्यमे । किं च । तिथिद्वयोपवासे ऽपि द्वादशीदिनद्वये सत्येव सम्पूर्णैकादशी य
त्र परतः पुनरेव सा । त्रयोदशी उषःकाले उपोष्या न त्र का न वेत् । इत्युपक्रम्य उपोष्ये द्वे तिथी तत्र
विष्णुप्रीणनतत्परैरिति स्कन्दपुराणवचनात् । किं च । निष्कामस्य त्रयोदश्यां पारणं स्मर्यते । सम्पू
र्णैकादशी यत्र प्रभाते पुनरेव सा । बोधायनः । कलाप्येकादशी यत्र परतो द्वादशी न चेत् । गारुड
पुराणे । एकादशी कलाप्येका परतो द्वादशी न चेत् । एतेषामुत्तरार्द्धं । तत्र क्रतुशतं पुण्यं त्रयोद का० हे० १०८

श्यां तु पारणे इति । नारदीयपुराणे । त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलं । शतयज्ञाधिकं वा
ऽपि नरः प्राप्नोत्यसंशयं । विष्णुरहस्ये । एकादशी कला प्राज्ञा येन द्वादश्युपोषिता । तस्याः क्रतुशतं तेन
स्यात् त्रयोदश्यां तु पारणं । बोधायनः । एकादशी कलायुक्ता उपोष्या द्वादशी नरैः । त्रयोदश्यां तु
जातो विष्णुसायुज्यमृच्छति । स्मृत्यन्तरे । एकादशी तु सम्पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं
त्रयोदश्यां तु पारणं । ननु च त्रयोदशीपारण इति निषेधो ऽपि दृश्यते । कूर्मपुराणे । एकादशीमुपोष्यै
व द्वादश्यां पारणं स्मृतं । त्रयोदश्यां नैव कुर्यात् द्वादश द्वादशीक्षयात् । स्कन्दपुराणे । उपोष्यैका
दशीं यस्तु त्रयोदश्यां तु पारणं । करोति तस्य नश्यन्ति द्वादश्यो द्वादशैव तु । नविष्णुपुराणे । पारणं
तु त्रयोदश्यां यः करोति नराधमः । द्वादश्या द्वादशी तेन त्रकार्या विचारणा । इति । मैवं । सकामविष
यत्वात् त्रयोदशीपारणनिषेधवचनानां । न यथान्यस्यामेकादशीमुपवासे त्रयोदशीपारणप्रसक्ते
र्वा सकामो ऽपनोवसेदिति निषेधवचनसामर्थ्यात् । ननु निष्कामो नोपवसेदिति त्रयोदशीपारणविधा

नानां निर्विषसेदिति यत्तापपत्तेः। तेन निष्कामविषयास्त्रयोदशीपारणविषयः। तथा च गारुडपुरा
णे। पारणं तु त्रयोदश्यां कर्त्तव्यमफलार्थिभिः। स्कन्दपुराणे। पारणं तु त्रयोदश्यां निःकामानां विमुक्ति
दमिति। तस्माद्द्वितीयतिथिपदेन यथाश्रुतेः। ब्रह्मपुराणे। श्रवणैकादशी यत्र न या विद्धा तु द्वादशी। स्वर्ग
रापोषिता ह्वी उत्तरा स्वर्गमोक्षदा। त्रयोदश्यां विद्यमाना द्वादशी काचिदुत्तरे व सर्वै रुपोष्या। तथा च भृ
गुः। सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि। इति। अपरो अस
म्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ~~तत्रोपोष्या द्वितीया तु~~ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही
मेवं वाच्यः। सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। तत्रोपोष्या द्वितीया तु परतो द्वादशी यदीति। का०३०
अपरः। अत्र केचिदेवं व्याचक्षते। पूर्वश्लोके विधिद्वयं। तत्रैकेन विधिना गृहस्थस्य विशेषेण पूर्वै १०८
कादशीनियमः। अपरेणोत्तरैकादशी यतेर्नियम्यते। एवं गृहस्थस्य विशेषविहितां प्रथमैका
दशीमुपोष्य द्वितीयदिने द्वादशीसत्त्वविषये कादशी विधीयते। तदनुपपन्नं। तथाहि। द्वादशाव

दशी वा कथं गृहस्थपरं तावन्न श्रूयते। न त्रैकेन विशेषेण गृहस्थविषयं गम्यते। विषयान्तराभावादिति
चेन्न। यतिविषयं कस्मान्न भवति। अथ यतिविषये कादश्या वचनान्तरविहितत्वेन पुनर्द्वादशी वा
क्यमपुत्तरैकादशीविधानार्थं नो मेवं सत्यनर्थकं प्राप्नोति। तावद्रूप्यपरिच्छिन्नत्वेन प्रमितिजननान्नाके
रिस्तु च्यते। गृहस्थे पितद्विश्वैकादश्या विरोधात्तूत्तरैकादशीविधातुं न शक्यते। तद्विपर्ययपरिच्छिन्न
न विरोधात्त्वमिति जननानुपपत्तेरानर्थक्यस्य तदवस्थत्वात्। अथ विरोपि द्वादशीवचनस्य विशेष
विधित्वेन बाधकत्वात्सामर्थ्यमुच्यते। न त्रा विशेषविधित्वमेव तावन्नास्तीति वक्ष्यामि। अस्तु वा वि
शेषविधित्वं तथापि न तावत्। पुनरुक्तनया गमयितुं शक्यं न इव विशेषविधित्वेनैव सामान्यशा
स्त्रोत्तरैकादश्युपवासे दानतया सार्थकं च संभवात्। तथाहि। यद्यपि नेरुत्तरैकादशीविधानं तदुपरि
द्वादशीसत्त्वविषयेऽवेवान्यत्रेति। न रूपसंहारे उपसंक्रियमाणसंकोचापत्तेरसामञ्जस्यात्। तदपवादेऽप
पोह्यमानस्यासमञ्जस्यमेव। न तु द्वादशी न चेदिति तस्य निर्विषयत्वापत्तेर्गृहिवाक्यस्यासमञ्जस्येय

पवादो गौणिक्रियते । इतन एवंर्देतोर्यतिशास्त्रोपसंहारः । नन्वपवादपक्षेत्वत्सर्गापवादाभ्यां महान्विष
यो व्याप्यते । उपसंहारे त्वल्पविषयता प्राप्नोति । सत्यमल्पविषयतानामैकोपदेशः । अप्रस्तुतार्थोप
लाघवं च गुण एव । यस्तु सत्रको वा पक्षो बाधक इत्युच्यते । सोपवादपक्षोऽथवा स्तिष्टत्वक्रमेव । न तूप
संहारो नाम सामान्यवत्नस्य शास्त्रेण क्रियते । यथा नारस्याधीतं सामद्वयं शास्त्रेणोपसंक्रियते । वा
दशीवाक्यं तु न यतिशास्त्रान्तरो विशेषः । यत्स्य यति साधारणत्वेन प्रवर्तते । तत्र कथमुपसंहारः । ए
वं तत्तु पवादोपि सामान्यविशेषेण न वर्तते । यथा यदाहवनीये जुहोति संस्थाप्युहोमत्वेनेन वादशी
वाक्यं तु गृहस्थशास्त्रान्तरो विशेषः । गृहस्थगृहस्थसाधारणत्वात् । विशेषो नाम सन्न वर्तिपः सामा
न्यविषयाद्वहिर्न वर्तते । तस्मान्नापवादकत्वं । अथ गल्नावादशीवाक्यस्य गृहस्थशास्त्रान्त
रविषयत्वं । कल्प्यित्वापवादः क्रियते । इतेयतिशास्त्रं चान्तरविषयतां कल्पयित्वोपसंहारः कथं ना
म लभ्यते । न चापवादपक्षेऽत्सर्गापवादयोः विषयपसन्नावाद्वाक्यद्वयं नार्थकं । उपसंहारपक्षे तु

पसंहृते कविषयत्वात् वाक्यद्वयमनर्थकं प्राप्नोति सत्यं । विषयद्वयाभावेपि विधिद्वयसद्भावात्सा
र्थकत्वमेव । तथापि उपसंह्रियमाणं स्वरूपमेकेन विधीयते । तदुपसंहारस्त्वपरेण । न तु ब्रा
ह्मणेभ्यो दधिर्दीयतामिति स्यशास्त्रस्य गर्गेभ्यो दधिर्दीयतामिति इदमुपसंहारकं । तत्र गर्गशा
स्त्रमात्रे सति यावदनुष्ठानं तावदेव ब्राह्मणशास्त्रेपि सति । तस्यापि गर्गविषयएवोपनिमज्ज
नात् । गर्गदधिदानानुष्ठानानतिरेकात् । तस्माद्ब्राह्मणशास्त्रमेदप्रयोजनं । अपवादपक्षे तु न
विशेषशास्त्रेण ब्राह्मणेभ्यो दधि सिध्यति । नापि सामान्यशास्त्रमात्रेण कौडिन्यायतक्रं प्राप्यते । त
स्मात् शास्त्रद्वयं सप्रयोजनमित्युच्यते । उपसंहारपक्षे शास्त्रद्वयमर्थवत् । एकेन दधि विधीय
ते । गर्गस्तिवं धोपरेण । सप्तदशसामिधेन्यो द्वापप्यन्तरेस्मोतीति तेन वाक्येन सप्तदशत्वमुपसंहारकृतसामिधेनी
संबंधः कथ्यते । अतः शास्त्रद्वयमर्थवत् । यत्तु विशेषशास्त्रे सति पूर्ववदनुष्ठानं तावदेवान्यस्मिन्न
पि सतीत्यानर्थक्यमुच्यते । नद्भागुद्रा । तीसाद्वावपि शाकं वक्तुं । तथाहि । अग्निहोत्रं जुहोतीत्युक्ते

विधिमंगीकृत्य द्वादश्यानुष्ठीतीत्यस्मिन् विशिष्टविधावाश्रीयमाणे यावदनुष्ठानं तावद्देवोसन्निधियोगेनैदे-
नोनयस्मिन्नाश्रीयमाणेपीत्युपसन्निविधिरनर्थकः प्राप्नोति। तस्मादेकैकविधानेनानेकशास्त्रोपपन्नेने-
कमस्तके बकुनार आरोपणीय इति। प्रत्युतानुष्ठानभेदमापतितोः शास्त्रयोर्विषयो वा सप्रयोज-
नत्वं लभ्यते। तदेव तदिन्न्यायः। तस्मादपवादो ५ सद्वारैयोरन्यतरानवधारणादुभयपरत्वे वाक्यभे-
दप्रसंगात् न द्वादशीवाक्यस्यैव तद्विषय इति सर्वदैव गृहस्थस्य पूर्वैकादशीयते रुक्तैरेवेतिसि-
द्धं। द्वादशीशास्त्रस्य तर्हि को विषय इति ब्रूमः। तथा हि। वानप्रस्थादयः किंपुनर्वेद्युपवसेयुरुतोत्तर-
मुतानयामितिसंदेहे व्यवस्थाप्यते। परतो द्वादशीसद्भावे उत्तरामुपवसेयुरन्यथा पूर्वामिति। एव- का०दे०
मपेक्षितार्थविधानाद्वाक्यस्य स्पष्टार्थता भवति। इतरस्य वाक्यस्यापि संकोचः परिहृतो भवति। तदे- १११
तच्चिंकाडमंडनमतं। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि।
ति। नारदवचनाद्दर्शननिबंधनमित्युपेक्षणीयं। एकादशी विष्णुना चेद्द्वादशी परतः स्थिता। उपोष्या

द्वादशी तत्र यदीच्छेत्परमं पदं। विद्धा द्वादशी सद्भार्थेत्वितीया। द्वादशीयुक्तेत्यर्थः। ब्रह्मपुराणेपि। स्मा-
र्त्तैकादशी पूर्णा द्वादश्यप्यथ तयासह। परेद्युनित्यथाकुर्यात् द्वादश्यामर्चनादिकं। अथ संपूर्णदश-
मीविद्धैकादशी त्रिविधा। तत्राशेषे द्वादश्यायुक्ता। परेद्युः द्वादश्यां वर्तमाना च। तत्राद्य सर्वैरुपोष्या॥
तथा च नारदः। दशमीशेषसंयुक्तो नोपोष्यैकादशी तिथिः। एकादश्यां त्रिशेषे द्वादशी चेत्प्रदृश्य-
ते। यदि दैवानुसंसिध्येदेकादश्यां दिनत्रयं। तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत्। कूर्मपुरा-
णेपि। द्विस्पृगेकादशी यत्र तत्र संनिहितो हरिः। तामेवोपवसेत्कामः अकामो विष्णुतत्परः। दशमी-
द्वादशी च यास्पृशति सैकादशित्रिस्पृशक। पद्मपुराणेपि। एकादशी दशाविद्धा परतोपि न वर्द्धते॥
यतिनिर्दिष्टहिनिश्चैव सेवोपोष्यद्वयेतिथिः। दिनक्षयेपिकृष्ण द्वादश्युपवासविधानं मुमुक्षुविष-
यं। तथा च स्मृत्यंतरे। दिनक्षयेपितद्वै द्वादशीमोक्षकांक्षिभिः। उपोष्या दशमीविद्धनोपो-

ष्येकादशी सदा। नारदपुराणे। उपोष्या द्वादशी शुद्धा एकादश्यां दिनक्षये। मुमुक्षुभिर्दशमीविद्धा नो
पोष्यैकादशी तिथिः। यत्तु वचनं। न विष्णुपुराणे। दिनक्षयवती जाता तिथिरेकादशी यदि। प्रथमा
तत्र तोपोष्या उपोष्या चोत्तरा न वेत्। तत्सर्ववाक्यपर्यालोचनया न मुमुक्षुविषयं। दिनक्षये उ संप्राप्ते
संपूर्णे वासरद्वये। विशुद्धा द्वादशी राजन् समुपोष्यानिवेक्षादेति। ब्रह्मपुराणमपि तद्विषयं। स्कंद
पुराणे। एकादश्यां यद्दृश्येत दशमी घटिकाऽपि। द्वितीयेऽह्नि न चाप्नोति यद्वा चैकादशी तिथिः।
तथा कार्या च विद्भिर्दशमीसंयुता तिथिः। तिथिक्षये उ सेनानि न दोषो उ कदाचन। वृद्धपराशर
र्तव्या क्षये पूर्वा उ कारयेत्। पद्मपुराणे। दिनक्षये मृते देवि नोपोष्या दशमीयुता। सैवोपोष्या सदा
युक्ता परतश्च त्रयोदशी निद्वादश्यां यदि त्रयोदशी स्यात् थो निगमेपि। पूर्वविद्धा न कर्तव्या षष्ठ्येकाद
श्यष्टमी। एकादशी उ कार्वे तिस्त्रीपते द्वादशी यदि। अपरेऽह्न परेऽह्नि चेत् तत्र द्वात्रयोदशी न वा का०दे० ११२

दशी किं विद्धाप्ति तद्दिनक्षया नावात्। दिनक्षयेपि दशमीयुतोपोष्येति। सदाशब्दवतो वचनस्यार्थः। स्या
ऽः। यद्वा चास्मिन्नेव विषये द्वादश्यां त्रयोदशी न वेत् तत्र ष्पष्टं गृह्य। एकादशी न लभ्येत सकला द्वादशी न वेत्
अनयोरुत्तरा ग्राह्या। उपोष्या दशमीविद्धाप्यृषिरुद्दालकोऽब्रवीत्। अविद्धानि निषिद्धैश्च न लभ्यंते दिनानि
उ। मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः। तदविद्धान्यसानि दिनान्युपवसेद्बुधः। केचिदेवं व्याचक्ष
ते। निषिद्धैर्मुहूर्तैरविद्धानि दिनानि यदि न लभ्यंते तथैकादशी त्रिभिर्द्वाभ्यां वा मुहूर्ताभ्यां विद्धा ग्राह्यैव।
व्यस्तयोरपि संख्याया लाघवार्थं पंचशब्देनाभिधानं। नन्वेतदुपपद्यते। एवंविधविषये द्वादश्यामेका
दशी लाभात्। न च तस्यालभ्यमानायामपि द्वादशी विद्धा ग्राह्येति कश्चित्स्मर्यते। तदप्युक्तं। दशम्यामरु
णोदयवेधो नर्जवितन्मुहूर्तपंचावधिषट्घटिकात्मके च क्षये द्वादश्यामेकादश्यभावेन त्रयोदश्यां
च द्वादश्यभावेनोक्तवक्ष्यमाणवाक्यपर्यालोचनया दशमीसंयुताऽपि ग्रहणोपपत्तेः। तस्मान्न क्लि
ष्टव्याख्याश्रयणीयेति। तथा पारणाहे न लभ्येत द्वादशी सकलापि चेत्। इदानीं दशमीविद्धाप्युपोष्ये

कादशीतिथिः।हारीतोपि।त्रयोदश्यांयदानस्यात्द्वादशीघटिकाद्वयं।दशम्येकादशीविद्धासैवोपो-
ष्यासदातिथिः॥विष्णुरहस्येपि।दशमीशेषसंयुक्ताउपोष्यैकादशीनदा।यदानस्यात्त्रयोदश्यांमुहू-
र्त्तंद्वादश्यांमुहूर्त्तंद्वादशीतिथिः।स्मृत्यंतरे।पूर्वविद्धानकर्त्तव्याषष्ठीचैकादशीतथा।विद्धाप्येकादशी
कार्यापरतोद्वादशीनचेत्।नविष्णुपुराणे।दशम्यासहसंयुक्ताउपोष्यैकादशीतदा।यदानस्यात्त्रयो-
दश्यांद्वादशीघटिकाद्वयं।पुराणांतरे।त्रयोदश्यांनलभ्येतद्वादशीयदिकिंचन।उपोष्यैकादशीतत्र
दशमीमिश्रितापिया।स्मृत्यंतरे।उपोष्यैकादशीतत्रद्वादशीनलभेद्यदि।दशम्यापिहिमिश्रैवएकाद-
श्येवधर्मवित्।द्वादशीस्वल्पमल्पापियदिनस्यात्परेहनि।दशम्यामिश्रिताकार्यानदोषोस्तीतिवैध- का०द्वे० ११३
सः।वचनमितिशेषः॥विष्णुरहस्ये।मुहूर्त्तंद्वादशीनस्यात्त्रयोदश्यांयदामुने।उपोष्यादशमीमि-
श्रासदैवैकादशीतिथिः।तथा।यदिनस्यात्त्रयोदश्यांमुहूर्त्तंद्वादशीतिथिः।दशम्येकादशीयुक्ता
समुपोष्यानवेतदा।बृहद्वसिष्ठोपि।द्वादशीस्वल्पमल्पापियदिनस्यात्परेहनि।दशमीमिश्रिता-

---

कार्यामहापातकनाशिनी।यदार्कोदयमात्रापिद्वादश्यपरेदिने।त्रयोदश्यांनदश्यांनतदाकार्यादश-
मीशेषसंयुता।एकादशीद्वादशीयेयदिदिनत्रयं।नद्वादशीपरेचैवकर्त्तव्यादशमीयुता।पुराणांत-
मिश्रितापिनकर्त्तव्यादशम्येकादशीसदा।मिश्रितापिविकर्त्तव्यानविंदेद्वादशीयदि।उपोष्यापार-
णेप्राप्तेनविंदेद्वादशींयदि।दशम्यापिहिविद्धास्यात्एकादश्येवपुण्यदानाकु।विद्धाप्येकादशीय-
त्रद्वादशीचेन्नलभ्यते।द्वादशाद्वादशीहंतित्रयोदश्यांतुपारणे।अत्रचामुहूर्त्तद्वयघटिकाग्रह-
णंमविवक्षितं।कलाचेत्स्वल्पमल्पापिचेदितिवचनांतरेनियानादितिकेचित्।अपरस्त्वाहुः।कल-
यापिचेदितिवाक्यमुमुक्षुविषयं।द्विकलायांतुद्वादश्यांपारणंयकरोतिह।तामुपोष्यमहीपालन
गर्भेविशतेनरः।इतिलिंगात्।सर्वविषयत्वेच।त्रयोदश्यांयदाराजन्द्वादश्यास्तुकलाभवेत्।सा-
तिथिःसकलाचेतिवसिष्ठःप्राहधर्मवित्।इतिसाकल्योक्त्यानर्थक्यापत्तेः।मुहूर्त्तादिग्रहणंचावि-
वक्षितंस्यात्।अन्येतु।दिवानागदयादग्धमानिशायाचेन्निशि।द्विजभोजनकालोपंवालदृष्टाद्वैते-

विना। इति मुहूर्त्तद्वयात्स्वाकृदिवसे वा भोजननिषेधस्य नित्यत्वादेकादश्यामप्यपारणनियमेन काम्यत्वे वि
नामोऽत्र काम्यैकादश्युपवासविषयत्वेऽसावकाशेन बाधायोगात् मुमुक्षुमात्रविषयत्वमेतत्सर्वत्रत्रयो
दशीविषयमिति वर्णयंति। एतच्च पुत्रवद्गृहिव्यतिरिक्तावद्विषयं। पुत्रवद्गृहिणस्त्वेकादशीदिन
त्रये प्रतिषिद्ध उपवासः। तथा च। एकादशीदिनत्रये उपवासं करोति यः। तस्य पुत्रा विनिश्यंति म
घायां पिंडदो यथा। न च दिनत्रयनिमित्तोपवासस्यायं निषेध इति वाच्यं। एकादश्यां श्रवणे वैयर्थ्यप्रसं
गात्। न चायं दोषाधिक्यप्रदर्शनार्थमिति वाच्यं। दोषाधिक्यानभिधानात्। दिनत्रयप्रसंगे जैमिनिवच
नेन कात्यायनवचनेन वा प्राकृतत्वेन सर्वनाम्ना परामर्शानुपपत्तेः। तथा हि जैमिनिनोक्तं। आदि का०३०
त्येऽहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः। पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही। इति। तन्निमित्तोपवा २१४
सस्य निषेधोयमुदाहृतः। नानुषंगकृतो ग्राह्योपतो नित्यमुपोषणं। कात्यायनेनापि। एकादशीषु
कृष्णासु रविसंक्रमणे तथा। चंद्रसूर्योपरागे च न कुर्यात्पुत्रवान्गृही। इति। तत्स्वयुक्तोपवासस्य निषेधो

यमुदाहृतः। प्रयुक्तं तदयुक्तस्य। न विधिर्न निषेधनं। पितामहोपि। एकादीनत्रये उपवासं करो
ति यः। तस्य पुत्रा विनिश्यंति मघायां पिंडदो यथा। दिनत्रये त्वसंप्राप्ते नोपोष्या दशमी युता। यदी
छेत्पुत्रपौत्राणां वृद्धिं संपदमात्मनः। एवं च पुत्रवद्गृहिणः पूर्वेद्युः प्रतिषिद्धे सत्युपवासे व्रतलो
पार्थं शुद्धद्वादश्यामेवोपवासः। व्यासोपि। एकादशीदिनत्रये उपवासी तु चेद्गृही। अन्नानावेति
रुद्धो वा सकल्याद्वाविशेषतः। धर्महानिश्च भवति संततिर्न्नश्यति ध्रुवं। तस्यायुः क्षीयते नित्यं सं
वत्सरमिति श्रुतिः। तथा। एकादशीषु कृष्णासु रविसंक्रमणे तथा। पारणं चोपवासं च न कुर्यात्पु
त्रवान्गृही। तथा च गोभिलः। एकादश्यां पक्षयन्दिनत्रये तिथिर्भवेत्। तदा त्वेकादशीं त्यक्त्वा
द्वादशीं समुपोषयेत्। तत्र कृत्वा तु पुण्यं त्रयोदश्यां तु पारणं। पितामहोपि। एकादश्यां यदा व्या
प्य दिनत्रयं तिथिर्भवेत्। अत्रोपोष्या द्वादशी स्यात् त्रयोदश्यां तु पारणं। नारदीयपुराणे। त्रयं वा
प्यथवा द्वौ सं प्राप्ते च दिनत्रये। उपोष्या द्वादशी पुण्या त्रयोदश्यां तु पारणं। कूर्मपुराणे। दिनत्रये

उसंपूर्णे सेउपोष्या द्वादशी न वेत् । दशमीशेषसंयुक्तां न कुर्वीत कदाचन । तथा । तिथिवृद्धौ तथा ह्रासे सं-
पूर्णे वा दिनत्रये । संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेदिति । नविष्णुपुराणे । दिनत्रये तु संपूर्णेनो-
पोष्या दशमीयुता । उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणं । ब्रह्मपुराणे । तिथिच्छेदे तु संपूर्णे द्वाद-
शीं समुपक्रमेत् । परेयी तत्र यो दश्यां यदीच्छेच्छ्रेय आत्मनः । एकादशी विनष्टा च द्वादश्यां समुपोषणं
उपोष्या वार्द्धये हि स्तु मुनयोरपि पक्षयोः । जाम्येदो मे तथा दाने ब्राह्मणानां च तर्पणे । पारणे चापि राजेन्-
द्र वर्जा स्यात्त्रयोदशी । कूर्मनारदीयमार्कण्डेयपुराणेषु च । कलार्द्धेनापि विद्धा स्याद्दशम्येकादशी
यदा । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् । द्वादश्यामुपवासो त्र त्रयोदश्यां तु पारणं । एवं कुर्वन्न- का०द्वे०
रो नक्षा विष्णुसायोज्यमाप्नुयात् । अन्यथा कुरुते यस्तु स पतति नरके ध्रुवं । तथा । एकादशी यदा विद्धा ११५
परतोपि न वर्त्तते । उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणं । तथा । एकादशी त्वृषीणां तु द्वादशी चक्र-
पाणिनः । एकादशी यदा न स्यादुपोष्या द्वादशी तदा । तथा । द्वादश्यामुपवासो त्र त्रयोदश्यां तु पारणं ॥

नविष्णुपुराणे । पूर्णा विद्धामुपास्यैकोनं दाचेद्बलाअपि । को वेदवचनात्त्यागो सर्वेषां निर्द्दृतिर्वै । दश-
मीशेषसंयुक्तामाश्रयेको व्रतं व्रती । तस्मादेकादशीं त्यक्त्वा दशमीपलमिश्रिता । उपोष्या द्वादशी शु-
द्धा त्रयोदश्यां तु पारणं । यदा चास्मिन्नेव विषये द्वादश्यां त्रयोदश्यात्तिनदा द्वादश्यामेवोपवास । तथा
चाव्यासः । एकादशी यदा लुप्ता परतो द्वादशी न वेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिं । लुप्ता
न पंगता तत्र त्रयोदश्यामित्यर्थः । यदा दशमी विद्धैकादशी उदयमात्रे शास्त्रा द्वादश्यां नास्ति त्रयो-
दश्यां विद्यते । तदा शुद्ध द्वादश्यामेवोपवासः । तथा च नारदीयपुराणे । शुद्धा तु द्वादशी राजन्समु-
पोष्या सदा तिथिः । दशम्येकादशीमिश्रा कर्त्तव्या न कदाचन । पद्मपुराणेपि । दशमी गर्भिता पूर्वा तु-
ष्ये नैकादशी परा । उपोष्या द्वादशी तत्र दश्यां स्यान्न कदाचन । नारदीयपुराणे । यदा न प्राप्यते विप्रान्
द्वादश्यां पूर्वसंनवा । पलार्द्धेनापि विद्धा च दशम्येकादशी यदा । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपो-
षयेदिति । न दोपवासो हि कथं कर्त्तव्यो मानवैर्वद । उपवासदिने विद्धं यदा न वति पूर्वजा । द्वितीया-

क्षिपन्न स्यात्स्वल्पापैकादशी तिथिः। तत्रोपवासो विहितः कथं तद्वद सूत तत्वतः॥ ॥सूत उवाच॥ यदा
न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः। रविचक्रार्द्धमात्रोपि तदोपोष्यं परं दिनं। उपोष्या द्वादशी शुद्धा द्वादश्या-
मेव पारयेत्। निर्गताविरयोर्द्वादश्यां कलावाप्यधिकलापि वा। अर्क्से वेवर्त्ते। एकादशी द्वादशी च तत्र संनिहि-
तो द्विसिते न शुद्धादि कर्त्तव्या द्वादशी फलकांक्षिभिः। एकादशी यदा लुप्ता परतो द्वादशी न चेत्। उपोष्या
द्वादशी तत्र यदीच्छेत्परमं पदं। अत्र यदीत्यर्थवादमात्रं उदाहृतवचननिचयपर्यालोचनया सर्वेषां
द्वादश्युपवासावगमात्। यदा तु दशमीविद्धैकादशी उदयमात्रपर्यन्ता द्वादशी च समा न्यूना वा तदा
गृहीणां पूर्वस्यामेवोपवासः। तथा च स्कंदपुराणे। पारणाहे न लभ्येत द्वादशी यदि किंचन। ऋष्यशृंगः। पा-
रणाहे न लभ्येत द्वादशी कलयापि चेत्। अन्नयोरुत्तरार्द्धं तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिः। प-
द्मपुराणे। विद्धाप्येकादशी ग्राह्या परतो द्वादशी न चेत्। एकादश्या द्वादशी हंति त्रयोदश्यां तु पारणं। विद्धाप्य-
विद्धा विज्ञेया परतो द्वादशी न चेत्। अविद्धापि तथा विद्धा परतो द्वादशी यदि। हारीतोपि। त्रयोदश्यां यदा

का०हे० ११६

न स्यात् द्वादशी घटिकाद्वयं। दशमीकादशीमिश्रा सैवोपोष्या सदा तिथिः। तत्त्वसागरसंहितायामपि। द-
शम्येकादशी यत्र नोपोष्या सा कुलापहा। सैवोपोष्या कलामात्रा द्वादश्या चेन्न विद्यते। न विष्णो। एकाद-
शी कलाप्येका परतो न विवर्द्धयेत्। गृहिभिः पुत्रवद्भिश्च सैवोपोष्या तदा तिथिः। अस्मिन्नेव विषये यप-
त्यादेः मुमुक्षुरुत्तरेद्युरेवोपवासः। तथा च विष्णुरहस्ये। दशमीमिश्रिता पूर्वा लुप्यतेकादशी परा।
एकादश्यां महाभाग उपवासः कथं भवेत्। शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। तथा च व्या-
सः। दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते। एकादश्यां महाभाग उपवासः कथं भवेत्। शुद्धैव द्वा-
दशी राजन्नुपोष्या मोक्षकांक्षिभिः। पारणं तु त्रयोदश्यां न त्र क्रतुशतं तन्न वेत्। यद्येव दशमी विद्धं न
वत्येकादशी दिने। उपोष्या तु यदा शुद्धा द्वादशी मोक्षकांक्षिभिः। पारणं तु त्रयोदश्यां तत्राक्षयफलं
लभेत्। या। एतानि वचनानि कूर्मपद्मपुराणयोः। एकादशी दशाविद्धा परतो द्वादशी न हि। उपोष्या द्वा-
दशी तत्र त्रयोदश्यां तु पारणं। स्कंदपुराणे। एकादशी दशाविद्धा द्वादशी न च वर्द्धते। तदोपोष्या द्वादशी

स्यात्त्रयोदश्यां तु पारणमिति। तदत्रानुदाहृतवाक्यपर्यालोचनया मुमुक्षुविषयाणि। यदा तु दशमीवि
द्धैकादशी द्वादश्यां विद्यते द्वादशी चोदयपर्यन्तं विद्यते च। तदा वर्द्धितैवोपोष्या नित्या काम्या च। तथा
च नारदः। द्वादश्येकादशी यत्र संगता त्रिदशाधिप। तामुपोष्य ततः कुर्यात् त्रयोदश्यां तु पारणं। स्कन्द
पुराणेपि। एकादशी कला यत्र परतो द्वादशी न चेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणात्। स्कन्दपु
राणेपि। एकादशी समायुक्ता याति वृद्धिं परां तिथिं। द्वादशी पारणीथीय नोपोष्यं पूर्ववासरं। बोधायनोऽ
पि। कलाप्येकादशी यत्र परतो द्वादशी न चेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं। पद्मपुराणे
पि। द्वादशीमिश्रिता ग्राह्या सर्वत्रैकादशी तिथिः। द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा। तथा च
सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः। प्रातर्भवेत्तु वा मा वा यतो नित्यमुपोषणं। तथा सागरसं
हितायामपि। द्वादश्येकादशी यत्र संगता त्रिदशाधिप। तामुपोष्य ततः कुर्यात् त्रयोदश्यां तु पारणं
नारदः। द्वादश्ये यत्र द्वादशी परतोपि च। द्वादशीं पारणं कुर्यात् क्रतुकोटिफलं लभेत्। ब्रह्मपुराण॥ का०द्वे० ११७

द्वादश्येकादशी यत्र तत्र संनिहितो हरिः। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं। पद्मपुराणेपि। ए
कादशी कलायुक्ता येन द्वादश्युपोषिता। किं तस्य बहुभिर्यज्ञैरश्वमेधादिभिर्नृप। एकादशी द्वादशी
च तत्र संनिहितो हरिः। उपोष्या रजनीमेकां ब्रह्महत्यां व्यपोहति। तथा सागरसंहितायामपि। द्वादश्ये
कादशी यत्र संगता त्रिदशाधिप। तामुपोष्य नरः कुर्यात् त्रयोदश्यां तु पारणं। द्वादश्येकादशी यत्र
द्वादशी परतोपि हि। द्वादशी पारणे कुर्यात् क्रतुकोटिफलं लभेत्। द्वादश्येकादशी यत्र ~~द्वादशी परस्ता~~
~~स्थिता द्वादशी पारणे~~ कुर्यात् परतो न त्रयोदशी। उपोष्या द्वादशी नक्त्या द्वादश्यां चैव पारणं। किं च। एवं वि
धे विषये द्वितीयैव ग्राह्या। दशमीविद्धायाः निषेधात्। तथा च स्कन्दपुराणे। तिस्रः सर्वप्रयत्नेन पूर्वविद्धां
विवर्जयेत्। नारदीयपुराणे। पूर्वविद्धा न कर्तव्या तृतीया षष्ठ्यपि दिना। अष्टम्येकादशी चैव धर्मकामा
र्थमोक्षिभिः। अत्रैकादश्यादयः परविद्धा उपोष्या वतीयन्ते। विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वा
त्। अन्यथा नोपोष्या इति वाच्यं। न तु पूर्वविद्धा नोपोष्येति। परविद्धैकादश्युपोष्येति वचनाच्च। तथा सुमं

उसनत्कुमारौ। तृतीयैकादशी षष्ठी। पौर्णमासी चतुर्दशी। अमावास्याष्टमी चैव ता उपोष्याः परान्विताः। पू-
र्वान्विता। नारदपुराणे। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। तृतीया च चतुर्थी च अमावास्याष्टमी त-
था। उपोष्या परसंयुक्ता नोपोष्या पूर्वसंयुता। पैठीनसिः। एकादशी तथा षष्ठी शुक्लपक्षे चतुर्दशी। तृतीया
च चतुर्थी च ता उपोष्याः परान्विताः। यदा च दशमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रा विद्यते। रात्रिशे-
षे त्रयोदशी। तदा गृहस्थव्यतिरिक्तानां तत्रोपवासः। तथा च पद्मपुराणे। द्वादशीसंयुता तत्र नवले-
कादशी कला। दिनक्षयेपि सा पुण्या न दशम्या कथंचन। त्रिस्पृगेकादशी यत्र तत्र सन्निहितो हरिः। पुण्यं
क्रतुशतस्योक्तं त्रयोदश्यां तु पारणं। नारदीयपुराणे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रि- कां०३०
स्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। यउपोस्ते सदानक्ता २२८
सनरो दिवि मोदते। एकादशी कलायुक्ता सुपोष्य द्वादशी नरः। त्रयोदश्यां तु यो भुंक्ते तस्य विष्णुः प्रसी-
दति। एकादशी द्वादशी च विशेषेण त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं। कूर्मपुराणे।।

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिभिर्मिश्रा तिथिः प्रोक्ता सर्वपापहरा स्मृता। उपवासः कृ-
तस्तस्यां सर्वपातकनाशनः। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्र-
योदश्यां तु पारणं। पुराणांतरे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। दिनक्षयेपि सा शस्ता दिव-
सस्यापरे हनि। द्वादशीसंयुता तत्र नवम्येकादशी तिथिः। दिनक्षयेपि सा पुण्या न दशम्या कथंच-
न। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। सोपोष्या च प्रयत्नेन महापुण्यविवर्द्धनी। न विष्णु-
पुराणे। एकादशी कलाप्येका द्वादशी सकलं दिनं। त्रयोदशी उषःकाले वैष्णवं तद्दिनत्रयं। सर्व-
पापहरं प्रोक्तं तदुपोष्यमिति श्रुतिः। स्कंदपुराणे। एकादशी कलायुक्ता द्वादशी क्षीयते यदा। उ-
पोष्या च महापुण्या सर्वपापहरा तिथिः। सुमंतुः। एकादशी कलायुक्ता द्वादशी लुप्यते यदा। एका-
दशी तदोपोष्या द्वितीयामोक्षकांक्षिभिः। अस्मिन्विषये पुत्रवतो गृहस्थस्योपवासनिषेधः। तथा
च पद्मपुराणे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। अहस्पृक् तद्दशोरात्रे नोपोष्यं तत्सुता

नार्थिभिः। कूर्मपुराणेपि। एकादशीं च द्वादश्यां रात्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वि-
तः। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः। एकादशी द्वादशी च
रात्रिशेषे त्रयोदशी। द्वादश द्वादशीर्हंति त्रयोदश्यां तु पारणं। इत्यपि तद्विषयं। तस्यैवोपवासनिषेधस्य
तितस्मिन्नेव दिने उपवासप्रत्याम्नायत्वेन नक्तं विहितं। वृद्धशातातपेन। दशम्येकादशी विद्धा द्वादशी च त्र-
योगता। स्नानं सा द्वादशी ज्ञेया नक्तं तत्र विधीयते। इति प्रचेताः। एकादशी द्वादशी च तच्छेषे च त्रयोदशी।
तत्र स्नानं जपं होमं कृत्वा ब्राह्मणवाचनं। निवर्त्य द्वादशीकर्म ततो नक्तेन वर्त्तयेदिति। विष्णुधर्मोत्तरे। एका-
दशी यदा विद्धा द्वादशी च त्रयं गता। तत्र नक्तं प्रकुर्वीत नोपवासं गृहाश्रमे। पद्मपुराणे। एकादशी कला- का० ३०
युक्ता लुप्यते द्वादशी यदा। क्षीणा सा द्वादशी प्रोक्ता नक्तं तत्र विधीयते इति। ननु नोपोष्यं तत् सुतार्थिभिः। ११६
सुतार्थिनां पुत्रकामानां उपवासप्रतिषेधो प्येन निःकामानां गृहस्थानां कामान्तरयुक्तानां वा। नहि सत्या-
यं पुत्रकामाय लाभाय प्रतिषेधः। किं तु। त्रिस्पृशैकादशी यत्र तत्र संनिहितो हरिः। इत्यादिवचनैर विशे-

षेण सर्वेषां तत्रोपवासे प्राप्ते नोपोष्यं तत् सुतार्थिभिरित्यनेन निवार्यते पुरुषविशेषमात्रस्य। तत्रा-
पि सुतार्थीशब्देन गृहस्थमात्रमभिधीयते तस्य सुतार्थित्वसंभवतीति न स्वरूपेण सुतार्थिता यत्र
विद्यते। दिनत्रयेपि सा पुण्या याती नामुत्र मा तिथिरिति यत्नेरेवता दृश्यात् उत्तमा चानिधान्नात्।
तत्र किं प्रतिशब्दः किं सुतार्थितारहितः परः सुतार्थिशब्दो वा सुतार्थित्वासंभावनापर इति संदेहे
सुतार्थिशब्द एव संभावनापरो ग्राह्यः। उत्तरं उपपत्तिः कुर्यात्लक्ष्मीमुपवसेज्जडो ति गृहस्थमात्रस्यउ-
पवासं न कुर्वीत पुत्रपौत्रसमन्वित इत्यनयोरेकार्थत्वात् पुत्रसंबंधिमात्रपरत्वे वयुक्तात्र पुत्रसंबं-
धित्वं च गृहस्थादिज्ञानसंभवतीति न दोषः। एतावतैवास्य चरितार्थत्वेपि किं इति विध्यनपेक्षितो
वाक्यभेदापादको विशेषणी कर्त्तव्यः। द्वौ तिथ्यंतावेकवारे यस्मिन्स्तः स्याद्दिनत्रयः। तस्मिन्स्नानं ज-
पो होमो नोपवासो गृहाश्रमे। इति गृहस्थमात्रस्य दिनत्रये निषेधदर्शनाच्च। अन्ये त्वाहुः। एकादशी
द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः इति वचनात् सुतार्थिभिरिति

सामान्यश्रुतार्थित्वं । पुत्रपौत्रसमन्वित इति विशेषे उपसंक्षिप्यते । पुत्रवतापि त्रिस्पृशायां नक्तं वा का-
र्यं न त्वेवं वा किं विच्छिद्यापि वोपवासः कर्तव्यः । उपवासनिषेधेऽपि किंचिद्भक्ष्यं प्रकल्पयेत् । न दुष्यत्युपवासे-
न उपवासफलं लभेत् । इत्यादिवचनानुरोधादिति । अपरे त्वाहुः । अत्रोपसंहारमनुमन्यामहे न
तु भक्ष्यकल्पनं । उपवासनिषेधे तु नरस्य नित्यस्य सामान्यशास्त्रैकादश्यां यदि न त्वप नक्तं विधाय
कविशेषशास्त्रेण बाधात् । तेन भक्ष्यप्रकल्पनमन्यत्र वेदितव्यं । तच्चानेकप्रकारं । नक्तं हविष्यान्न-
मनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यं । यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति
अन्ये त्वाहुः । यदत्र नक्तविधानेन सकामविषयो नोपवासो गृहाश्रमस्थितकाम्युपवासः प्रतिषिध्य- का० दे०
ते । एकादशीकला यत्र द्वादश्यनुगता न वेत् । लुप्यते द्वादशी तत्र नोपवासः श्रियोऽर्थिनामिति वच- २२०
नात् । नित्योपवासनिषेधात् विकल्पप्रसंगाच्च । तथा पुत्रवदादिविषये निषेधमपेक्ष्य कविधाने
तदितरविषये नित्यवद्विधानमिति वैरूप्यकाम्ये तु फलं रागादेव प्रवृत्तेः निषेधो घटत इति विनक्त

त्यो नास्ति विधिव्यापारवैरूप्यं पर्युदासे संभवे युक्ते स उक्तः उपवासे च निषेधे सकामः किं कुर्यादित्यपेक्षि-
ते न नक्तविधानमुचितं भवति । एवं च । एकादशीकलाप्येका द्वादशी यत्र लुप्यते । तत्रोपवासं कुर्वीत नि-
ःकामो विष्णुतत्परः । इति वचनं अनुपपन्नं भवतीति । तदयुक्तं । पापपरिहारकामविष्णुसायुज्यकाम-
योरुभयोरुपवासविधानात् । एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्रिभिर्मिश्रा तिथिः प्रोक्ता स-
र्वपापहरा स्मृता । उपवासः कृतस्तस्यां महापातकनाशनः । द्वादश्यां तु यदा भूप दिनक्षयतिथिर्भवे-
त् । तदोपवासः कर्तव्यो विष्णुसायुज्यमाप्नुयात् । इति सायुज्यमिच्छतेति कविसार्गः । एकादशी द्वादशी च
रात्र्यंते च त्रयोदशी । उपवासः कृतस्तत्र मोक्षमेव प्रयच्छति इति । तथा । दिनक्षये तु कर्तव्य उपवासो
मुमुक्षुभिः इति काम्यस्यापि विहितत्वेन विकल्पस्य तदवस्थत्वाच्च । तथापि विधिप्रवृत्तिलक्षणापरिह-
तेति तस्माद्यथोक्तमेव न्याय्यं । अन्ये त्वाहुः । यदत्र नक्तविधानं तदसामर्थ्यविषयं न च विशायारश्चाक्तेस्तु-
त्यचाद्यते तद्विधायां नैमित्तिकविशेषविधानं । तदसमर्थविषये सत्यमंजसं स्यादिति वक्तव्यं । विद्यायां

दिएकनक्तादिरुपवासश्चत्याम्नायेोऽर्धघटश्चप्रतीयते। रात्रावुपवाससंकल्पविधानात्। विद्धोपवा
सेन श्रेयस्तु दिनं सद्भासमास्थितः। रात्रौ संपूजयेद्देवं संकल्पं तु तदाचरेत्। तस्मात्तथाम्नायस्यापि स एव
कालो युक्तः। एकनक्तकालस्यासौ न भवति। दिनार्धसमयेतीते तु स्पृते नियमेन यत्। एकनक्तमिति
प्रोक्तमतस्तस्याद्दिवैव हि। इतरस्य विधेश्च विहितत्वान्नक्तमेव तदानीं भवतीति सम्यगुक्तं समर्थ
विषयमिदमिति युक्तं। सामान्यतो दिनद्वयव्यापिन्यां दिनद्वयविशेषे च पुत्रवतो गृहस्थस्योपवासनि
षेधादनियमेन नक्तकल्पनायां प्राप्तायां नियमविधानार्थत्वेनाकांक्षितसमर्पणेनार्जवेनैव वाक्य
स्योपपत्तेः। तेन यथोक्तमेव साधुर्यतेनैतन्निरस्तं। एकादश्यां तथा नक्तं यश्च कुर्याद्यथाविधि। मा — का०द्वे०
र्गशीर्षशुक्लाद्दावारभ्य श्रुविव---। वाराहपुराणोक्तेः। ---विषयं द्वादशीद्वये नक्तविधा — १२१
नं एकादश्यां चेद्युक्ता हन्ताव वचनेषूपवासविधायकैः विरोधादिति। सामान्यशास्त्रस्य विशेषशा
स्त्रेण बाधात् उपवासनिषेधे चाकांक्षितसमर्पणेन वाक्यस्योपपत्तेः। उत्तितिशिष्टैकादशीवाध

प्रसंगाच्च। कालादर्शे एकादशी यत्र द्वादश्यनुगता भवेत्। दिनद्वयेपि सा पुण्या यतीनामुत्तमा ति
थिः। अत्र च यतीग्रहणेनेतरव्यावृत्त्यर्थं तथा सति पुत्रवतो गृहस्थस्याश्रम्यभावेन निषेधानुपप
त्तेः। तेन यतीनां वैशिष्ट्यमात्रप्रतिपादनपरमेतत् तदुक्तं उत्तमेति। दिनद्वयेपीत्यपिशब्देन दिन
द्वयमन्तरेणापि यतीनां द्वितीयैवोत्तमेति दर्शितं। यत्तु ऋष्यशृंगवचनं। पूर्वविद्धा न कर्तव्या षष्ठ्ये
कादश्यथाष्टमी। एकादशीं तु कुर्वीत न ज्ञायते द्वादशी यदि। इति तत्शुद्धिकामविष्णुसायुज्यकाम
मुमुक्षुव्यतिरिक्तविषयं उदाहृतवाक्यानुरोधात्। अविद्धानि निषिद्धैर्वैश्चेत्तु न लभ्यंते दिनानि तु
मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः। तद्वद्विद्धान्यानि दिनान्युपवसेद्बुधः। निषिद्धैर्दि
शाम्यादिभिः। अविद्धान्येकादश्यादितिदिनानि। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवा
सेन कुर्वीत पुत्रपौत्रसमन्वितः। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। अहस्रक्रतुदद्धोरा
त्रेनोपोष्यं तस्तु तिथिभिः। इत्यादिवचनादुपोष्यत्वेन न लभ्यंते न स्वरूपेण चेत्यर्थः। यत्तु केश्चिदुक्तं। श

दशी दिनत्रये द्वादशी विद्धां नित्यम् । एकादशी गृहस्थैः कार्येति वचनव्याख्यानं कृतं । तदेवं विधसंको
चे पारणाभावादयुक्तं । विद्धैकादश्युपवासनिषेधवचनान्युदाहरिष्यंते । तत्र वसिष्ठसंहितायां । द
शम्येकादशी यत्र तत्र नोपवसेद्बुधः । अपत्यानि विनश्यंति स्वर्गलोकं न गच्छति । ब्रह्मपुराणे व्रत
खंडे । उपोष्यैकादशीं मोहात् दशमीशेषसंयुतां । स नरः सुखमाप्नोति इह लोके परत्र च । धृतराष्ट्रे
णा मैत्रेयः पृष्टः श्रीह नराधिप । यदर्थं ते वियोगोभूत् पुत्राणां भार्यया सह । पूर्वं त्वया सभार्येण द
शम्येशेषसंयुता । कृता चैकादशी राजन् तस्येदं कारणं मतं । तस्मादेकादशी युक्ता दशम्या नरस
त्तम । न कर्तव्या प्रयत्नेन निःफला द्वादशी यदि । यथा चैकादशी राजन् द्वादशी च तथा नृणां । सम
ना तत्फला प्रोक्ता व्रते स्मिन् शूलपाणिनः । न चाहं स्वैरिणी भार्या न चाहमपतिव्रता । न चेह कलुषं ये
न किं पापं चान्यजन्मनि । अमर्चितस्त्वया देवि तस्येदं कर्मणः फलं । उपोष्यैकादशी यत्र नोपोष्या
दशमीयुता । तत्र कृत्वा ते पुत्रपौत्रयोर्हत्या उपायं । वसिष्ठः समुवाचेदं पृष्टो मांधातृनायर्या । द

का०द० १२२

शम्येकादशी देवि पुरा चोपोषिता त्वया । तेन ते कर्मणा चेह सन्नष्टस्तव बांधवाः । वियोगः समनु
प्राप्तः सत्यं विद्धि पतिव्रते । यानि यानीह पापानि त्रैलोक्ये संभवंति हि । तेषां स्थानं दशम्यां वै सह
चैकादशी मता । सप्तजन्मकृतं पुण्यं नश्यते नात्र संशयः । नारदः । दशम्यनुगता यत्र तिथिरेका
दशी न वेत् । तत्रापत्यविनाशश्च परेत्य नरकं व्रजेत् । नोपोष्या दशमीविद्धा सदैवैकादशी ति
थिः । तामुपोष्य नरो जह्यात् पुण्यं वर्षशतोद्भवं । तथा । दशम्या चैव विद्धायामेकादश्यामुपोषि
तः । तस्यायुः क्षीयते नित्यं नारदोहं ब्रवीम्यहं । सत्यं सत्यं विनश्येत संततिस्तु न चान्यथा । दश
म्यनुगता यत्र तिथिरेकादशी न वेत् । तत्रापत्यविनाशः स्यात् परेत्य नरकं व्रजेत् । तथा चामु
क्तं नापि संसक्ता दशम्येकादशीयुता । तामुपोष्य नरो मोहात् सुखाद्धर्माच्च हीयते । कूर्मनार
दीयपुराणविष्णुरहस्येषु । दशमीशेषसंयुक्तामुपोष्यैकादशीं किल । संवत्सरकृतेनेह नराध
र्मेण मुच्यते । दशमीशेषसंयुक्तां गांधार्या समुपोषिता । तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्

ह्मवैवर्तेपि।दशमीशेषसंयुक्तांयःकरोतिविमूढधीः।एकादशीफलंतस्यनस्यात्द्वादशवार्षिकं।इ
तिपैःकृतादशमीविद्धाविद्धामोहेनमानमानवैः।तेगतानरकंघोरंयुगान्येकोनसप्तति।सौरधर्मो
त्तरे।एकादशीमथवापुनः।मिश्रितांवापिकुर्वीतनदशम्याकदाचन।नविष्णुपुराणे।पूर्णाविद्धाप
लार्द्धेनतंद्वांपूर्णामपित्यजेत्।यदीछेद्धात्मसंतानंचतुर्षुनियमेष्वपि।नोपोषितंचनक्तंचनैकनक्त
मयाचितं।नद्धायांपूर्णविद्धायांकुर्यादैश्वर्यमीहता।ब्रह्मवैवर्तेपि।दशम्यायत्रशेषंचएकादश्यां
नवेद्यदि।सातिथिःसकलाज्ञेयादशमीकालमिश्रिता।गंगोदकस्यसंपूर्णंयथासाज्यघटंनवेत्।पु
रायोविंदुसमायुक्तंतत्सर्वमद्यतांव्रजेत्।हालाहलंविषंपूर्णंकःपिबेन्मूढधीश्वरः।दशमीशेषसं का०द०
युक्तंकउपोष्यतिसद्व्रती।एवंज्ञात्वामुनिश्रेष्टदशमीशेषसंयुता।वर्जितामुनिभिःसर्वैर्वासुदेवम १२३
नीषुभिः।नारदीयपुराणे।लवेवेधेपिविप्रेंद्रदशम्येकादशींत्यजेत्।सुरायाविंदुनास्पृष्टंगंगां
भइवसंत्यजेत्।तथा।एकादशीमुपोष्यास्याद्यजोदशमायुतां।स्वर्दत्तोपंचगव्यंचदशम्यादूषितांत्यजेत्।

दशमीमिश्रिताद्वंतिफलमेकादशीकृतंकौशिकः।दशम्येकादशीविद्धापुरैश्वर्यविनाशिकापिठिनसि
।नागविद्धातुपाषष्टिशिवविद्धातुसप्तमी।दशम्येकादशीविद्धातत्रनोपवसेत्बुधः।वायुपुराणे।सूत
विद्धाचमावास्यादशम्येकादशीयुता।द्विशाविद्धातुसामार्गद्वंतिपुण्यंपुराकृतं।गारुडपुराणे
पि।विद्धामेकादशींविद्धात्यजेवेषांमनीषिणः।तस्यामुपोषितोयाद्वारिद्यंदुःखमेवच।स्कंदपुरा
णे।द्वापरांतेतुगांधारीकुरुवत्राविवर्द्धनी।करिष्यतिचसेनानीमूढत्वावात्त्रिखिदूजातेनपुत्र
त्रा।तंतस्यानाशमेसम्यसंशयः।एवंतद्दानकर्तव्यादशमीसंयुताविभो।कलाकाष्टापियाचेवदृ
श्यतेदशमीविभो।एकादश्यांतुसेनानी।कर्तव्यानकथंचन।एतानिवाक्यानिविद्धैकादश्यनुत्ता
व्यतिरिक्तविषयाणि।कौस्तोपि।अरुणोदयवेलायांविद्धाकाविदुपोषिता।तस्याःपुत्रशतंनष्टं
तस्मात्तांपरिवर्जयेत्।नविष्णुपुराणेपि।अरुणोदयकालेषुदशमीयदिदृश्यते।ननत्रैकादशी
कार्याधर्मकामार्थनाशिनी।तथा।अरुणोदयकालेषुदशमीयदिदृश्यते।पापमूलंसदाज्ञेयंए

काद्र्युपवासिनां। तथा। अरुणोदयदशमीगंधमात्रेण वेधदि। दृष्टं तत्स्वयत्नेन वर्जनीयं नराधि
प। नारदीयपुराणे मोहिनीवाक्यं। मोहिन्युवाच। दशम्याः प्रांतमादाय याहादेति दिवाकरः। तेन स्पृष्टं हरि
दिनं तद्दत्तमसुरायवै। सूर्योदयविहीने हि द्वादश्यां दृश्यं पचलाचलं। दशम्यंते दृष्टपंक्तिः स्पृष्टं हरिदिनेन
हि। अग्नेर्विहारकाले च बध्वा उत्थापनेन तथा। प्रातःसंदोहकरणे पक्षिसंनदनेन तथा। विरामे पूर्वदेव
नां मार्जनीग्रहणेन तथा। द्वारोद्घाटनवेलायां स्नानकाल उपस्थिते। यतीनां दीक्षितानां च वा हित्र नि
दने कृते। यात्राक्रांता दशम्यत्र एकादशी समन्विता। वृद्धी यतां निवासार्थं यद्यस्ति मयि वेदया। नय
वेन्या दयं देवानयाचेत हिनं दरा। वैनतेयोदयो मध्ये दीयतां सुरसत्तमाः। ड्गधायामुनिना देवही का०दे०
णा याप्यथसंचयेः विश्रामार्थं च पुण्यार्थं एतस्यां तेन दीयतां। वसिष्ठ उवाच। तस्मो हि न्याव च स्तु १२४
वासुराः सर्वे महीपते। संमं प्रसुचरितं काले हिगंबरपुरोगमाः। यमसंस्थापनायैव वैकुंठ ध्वंस
नाय च। पोषडिनां हि विध्यर्थं पापसंजननाय वै। पुरस्कृतस्तु वेत्रेण तथान्यो असुराण्णपः। तेषु स्नेमो

हिनी देवलोकसंमोहनाय वै। इत्थं मोहिनि ते स्थानं च स्तूषसमयांतिकं। दृष्टं हरिदिनोपेतं दशम्या
प्रांतमेव हि। तेन जन्मेन दुष्टेन तद्वैवेर्न च मानवैः। अरुणोदयविद्धं परित्यजेदिति भावः। अरु
णोदयो पि पुराणे दर्शितः। चतस्रो घटिकाः प्रातररुणोदय उच्यते। यतीनां स्नानकालस्तु गं
गातःसदृशः स्मृतः। इति यतीनां स्नानकालः इत्यनेनोदयात् पूर्वागपि घटिकाचतुष्टयमरुणोद
य इत्युक्तं भवति। एतान्यरुणोदयनिषेधवाक्यान्यपि यदा वा दशी किंचन्मात्राद्येकादशीद
श्यते। त्रयोदश्यां च किंचन्मात्रा वा द्वादशी तदा परित्याज्यस्वेवं पराणि दृष्टव्यानि। काम्यैकादशी
श्रोमे विषयाणि वा। गारुडपुराणे। उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदा। संदिग्धैक
दशी नाम वर्जयेद्धर्मकांक्षितः। पुत्रराज्यसमृध्यर्थं द्वादश्यामुपवासयेत्। तत्र क्रतुशतं पुण्यं
त्रयोदश्यां तु पारणं। उदयात्प्राक् मुहूर्तेन व्यापिन्येकादशी यदा। संयुक्तैकादशी नाम व
र्जयेद्धर्मवृद्धये। पुत्रपौत्रसमृध्यर्थं द्वादश्यामुपवासयेत्। तत्र क्रतुशतं पुण्यं त्रयोद

द्वयं तु पारणं। आदित्योदयवेलायामारभ्य षष्टिनाडिकाः। संपूर्णैकादशी नाम तस्यां धर्मफलेप्सुभिः।
पुत्रपौत्रसमृद्ध्यर्थं द्वादश्यामुपवासयेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं। काण्वोपि। अरु-
णोदयवेलायां दशमी यदि संगता। तत्रोपोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणं। पुराणेपि। अरु-
णोदयवेलायां दशमी यदि संगता। रविचक्रार्द्धमात्रापि द्वादशीमुपवासयेत्। तत्र क्रतुशतं पुण्यं
त्रयोदश्यां तु पारणं। गोभिलोपि। अरुणोदयवेलायां दशमी यदि संगता। संयुक्तैकादशीं तां तु मोहिन्या
दत्तवान् विभुः। उदयादुपरि विद्धा द्वादशीमेकादशीं यदा न वेत्स्यं श्रीणनार्थं दत्तवान्पाकशासनः। तत्
तस्मात्सर्वप्रयत्नेन संपूर्णैकादशीं त्यजेत्। द्वादशीमुपवासो त्रयोदश्यां तु पारणं। नारदीयपुराणे
पि। बहुवाक्यविरोधेन संदेहो जायते यदा। द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणं। दिनक्षये च
संप्राप्ते उपोष्या द्वादशी न वै। दशमीशेषसंयुक्तां न कुर्वीत कदाचन। एतानि काम्यैकादशीव्रत
विषयाण्येव। तथा च तेषु तेषु वाक्येषु धर्मकांक्षिन पुत्रपौत्रसमृद्ध्यर्थ इत्येवमादीनि फलान्यश्रूयंते॥

का०दे०
१२५

पद्मा। अरुणोदयविद्धोपवासनिषेधवाक्यानि वैष्णवविषयाणि। शैवादीनां चैकादश्युपवासाधि
कारित्वेन तत्रोपवासे नास्ति दोषः। तथा च विष्णुपुराणे। दशमीशेषसंयुक्तो यदि स्याद --- । वै
ष्णवेन न कर्त्तव्यं तद्दिनैकादशीव्रतं। काम्यैकादशीनिर्णयः। ब्रह्मवैवर्त्ते। एकादशी द्वादशी वा अ
रुणोदयवेधनिर्णयां॥ शौनक उवाच। व्रतमेकादशीस्तत विशेषेण प्रकीर्त्तय। सर्वपापप्रशम
नं हन्ते यस्मिन्ननवन्नृणां कीदृशैकादशी कार्या कथं कार्या कथं हरिः। पूजनीयः कीदृशं किं च न वेत्तु
सूत कीर्त्तय। उद्यापनविधानं च कार्यं व्रतफलाप्तये। तत्तथा सूत सर्वं हि वद संप्रति --- नः। छ॥
सूत उवाच। इममर्थं पुरा शूरो वासुदेवपिता मुनिं। कृष्णद्वैपायनं व्यासं पप्रच्छ तनयन्मतः। कपि
तो वैष्णवो धर्म --- ॥

अथ शिवरात्रिनिर्णयः। जन्माष्टमीरोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभांते च
पारणमिति। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनं। जयंती
शिवरात्रिश्च कार्ये भद्राजयान्विते। कृत्वोपवासं तिथ्यंते सदा कुर्याच्च पारणं। अत्र वृहस्पतिस्मृतिटीकाकृ
तः केचिदाहुः। यदि तावन्निषिद्धा पात्स्ययोर्दृशा युक्ता याश्चतुर्दश्याः अतिप्रसवोयं ततः शुक्लपक्षच
तुर्दश्या विषयता स्यात्तस्याऽप्येव पूर्वविद्धाया निषिद्धत्वात्। इतरत्र तु। कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्द
शी। स्यादिना पूर्वविद्धाया एव ग्रहणत्। अत्र योपवासविषये अमावास्यायुक्ता चतुर्दश्या अपवादो

ष्यं तर्हि सत्। उपवासाश्रवणाच्छिवरात्रिशब्देनोच्यतेति चेत्। एवं तर्हि यत्र त्रयोदश्यामुपवासो विहित
श्चतुर्दश्यां पारणं तद्विषयं स्यात्। अथ शिवरात्रिशब्देन जागरणमभिधीयते। चेत्तर्हि दिनेदमुपवार
कमुपवासाविधानात्। उक्ता जागरणेनक्तेवं वाद्यर्थे शिवरात्रिशब्देन जागरणमभिधीयते चेत्तर्हि
नेष्टमवैपवादकमुपवासाविधानात्। उक्ता जागरणेनक्तेवं वाद्यर्थे शिवरात्रिशब्देन जागरणमभि
धीयते। चेत्तर्हि दिनेदमुपवादकमुपवासाविधानात्। उक्ता जागरणेनक्तेवं वाद्यर्थे शिवरात्रिशब्देन जा
गरणमभिधीयते। चेत्तर्हि दिनेदमुपवादकमुपवासाविधानात्। उक्ता जागरणेनक्तेवं वाद्यर्थे वेतेनथा
तरोर्द्ध्वं तेषु सर्वेषु रात्रियोगो विशिष्यत इति। जागरणस्य पूर्वविद्धायामेव विधानाद्नर्थकमिदं वच
नं तत्तुल्यार्थमिदमिति वचनं। शिवरात्रिशब्दस्याविवक्षाप्रसंगात्। तस्माद्यत्र द्वितीयेदिने चतुर्दशी।
न विद्यते तत्र पूर्वविद्धायाति आदित्योदयसमये वा विद्यते। तत्र पूर्वविद्धाया निषिद्धत्वादमावास्या
ग्रहणे प्राप्ते जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते। इत्युच्यते। यथा। भूयकैः पंचनिर्विद्धायाः स्या।

चैकादशीतिथिः। नद्यर्द्धविशन्नन्यानि दिनानुपवसेद्बुधः। अथ तदर्द्धविषया एव तिथेर्ग्रहणं यत्र चाधि-
कविशा न भवति। तत्र उपवासनिषेधे उक्ते किं विकल्पयेत्। इति नह्येवकल्पनायां प्रामायामिदमु-
च्यते। जयंति शिवरात्रिश्चेति। तदा तु दिनद्वयेपि चतुर्दशी विद्यते। द्वितीये इ निरात्रौ न विद्यते। रात्रौ जा-
गरणं विहितं तदा। एकादशी सुपोषिता वा द्वादशी मप्युपोष्ययेत्। न चात्र विधिलोपः स्यात् उभयोर्दैवतं ह-
रिरिति न्यायेन समानदेवताकत्वेनामावास्यायामेव जागरणे रेकार्यः। स दृष्टान्तश्च तथैव हि। अष्टम्यां
च चतुर्दश्यां पक्षयोः शिवं ध्यायसि तद्व्रतः। सुमुक्षुः पूजयेन्नित्यं सकलं नैनेप्सितं फलं। इति शिवव्रतं चतुर्दश्यां
दृश्यते। तथा। पर्वण्यपूज्य देवेशं गुरुमग्निं च नक्तितः। अदत्वा च बलिं तत्र शिवस्याष्टम्यां तत्र जपेत्। इ- का० हे०
त्यमावास्यायां दृश्यते च। अपि च शिवरात्रिशब्देन उपवासः शिवपूजाजागरणान्यभिधीयंते। देवाए- १२७
कं वा। आद्ये पक्षे उपवासस्य विहिता सेवेतरायारपि। द्वितीयपक्षे यद्युपवासव्यतिरिक्ते दृष्टमनिषी-
प्यते। तर्हि एकममावास्यायां न विष्यतीति द्वितीये च स्यात्। तृतीयः पक्षस्तावदुपपन्नः। यदि हि जागर-

---

णस्यास्यात्। शिवरात्रिशब्दवाच्यकालविशिष्टस्य विधानं स्यात्। ततोधिकारवाक्ये शिवरात्रिव्रतस्य फ-
लसंबंधेउच्यमाने जागरणे फलसंबंधउक्तो भवति। यथोक्तन्निवाक्येषूणामपि योगानां कालसंबं-
दर्श धे वगते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति दर्शपूर्णमासवाक्याः षडेव यागाः फले विनियोज्याः इत्यव-
धारिता न च तथास्ति। यत्र तावदुपथमं दुर्वाससा व्याधं प्रति। कृष्णपक्षे चतुर्दश्यां तत किंचिन्मृगमएव-
पि। प्राप्तवान्प्राणयात्रार्थं क्षुधासंपीडितोऽवंशाद्धस्युपक्रम्य। धनुःकोट्याहतान्येव बिल्वपत्राणि मान-
द। पतितानि महाराज तं शिरसि भूमिपात स्वैः स एव तत्रैव सर्वरात्रमतंद्रितः। स्वोदरार्थं महा-
राज मृगलिप्सुरंदंतः। रात्रिशेषं स्थितो व्याधः स्वदृष्टिरनामिषः। इत्युपवासशिवपूजाजागर-
णनिम्नासंगिकानि तव जातानि तस्य निधाय। प्रजाते विमले जाते दृष्टानन्वैव शंकरं। स्नात्वा शिरसि
राजेंद्र पूजयित्वा महेश्वरं। बिल्वपत्रैस्तु पैः श्रेष्ठकंदमूलेश्च पारितः। मित्येतावति कथिते केन विशेषे-
ण जागवाव्जागरणमेकं फलसंबंधं ब्रवीति। यदीश्वरवचनं पार्वतीप्रतिव्रतनिरूपणे। माघेकृष्ण

चतुर्दश्यां कर्तव्यं व्रतमुत्तममित्युपक्रम्य त्रयोदश्यां विशालाक्षि एकनक्तं समाचरेत्॥ उपोषितो वरा
रोहे चतुर्दश्यां वरानने॥ इत्यादिना ग्रंथसंदर्भेण स्नानगंधपुष्पादिभिरभ्यर्चनोपहारादिरस्य सर्वांग
पूजामभिधाय गोमयमंडलदीपमालानिवेदनपिष्टार्घपात्रदानांतां सर्वेश्च व्यतिपापेन त्रिविधेन वरा
नने इति शास्त्रस्य सहितमभिधाय जागरं तत्र कर्तव्यं। गीतवादित्रमंगलैरिति जागरणमभिधाय
कर्तव्यायाः सपूजा च स्नानं पंचामृतेन तु इत्येवमंते नक्तं तत्र तथान्यत्किंचिद्विशेषात्तस्मात्सर्वेषा
प्राधान्यं त्रयाणां द्वयोर्वा आद्यपक्षद्वये मुख्यं वा पूर्वस्यादृतादेशोक्तवदिति न्यायेनोपवासदिनए
व सर्वेषामनुष्ठानं। द्वितीयेपक्षे चतुर्दश्यां कालोत्कर्षपर्याने नामहत्वात्तथा जागरणरात्राविस्यत्र का०टी०
जागरणस्येन रात्रौ श्रवणात्। इतरस्य चतुर्दश्यामेव श्रवणात्। यदि परं खंडतिथौ चतुर्दश्यां तुरो १२८
धेन दिवैव पूजायाः प्रारंभः। तथापि दोषो नास्ति। अस्ति च पुराणांतरे प्रथमपूजांतो निशादिवा पूजेति
सेव सर्वस्याः पूजायाः प्रारंभः। वस्तुतस्तु त्रयाणामेव प्राधान्यमित्ययमेव पक्षः। मम नक्तोजनो देवि त्रि।

वरात्रिमुपोषकः। गणत्वं मोक्षदं दिव्यं स्वयं दिव्यत्वासनोसतक्त्वा। उतुनुजेनोगानमृतसेन वानिति
तथा। उद्दिष्टाहं नक्तस्य शिवरात्रिमुपोषकः। वरं दद्मि ते तुभ्यं देवदानवदुर्लभमिति। एवमादिबहु
वचनानि सारादुपवासोस्य प्राधान्यमेव। तस्मात्त्रयाणामपि फलसंबंधित्वात्। मेघेल्लस्य चतुर्द
श्यां कर्तव्यं व्रतमुत्तममिति प्रधानो व्रतशब्दवाच्यत्वात्। व्रतस्य च चतुर्दश्यायहेतत्वात्। षंडचतु
र्दश्यां स्वपंचदशीयुक्तायाः उपवासे ग्रहणादन्यत्र जयान्विताया एकदलत्वे चेर्दश्यायहणादि
वतदसंनवादेकस्मिन्नेव दिने उपवासपूजाजागरणानां चकर्तव्यत्वात्। देवक्रमन्यात रवाधायाम
पतितायाः पूजाजागरणकालस्य पाश्चात्यस्य बाधा युक्ता। उपवासस्य नयोः पूर्वमथनुष्ठेयत्वादनुप
संज्ञानविरोधित्वात्स्वकाल एवानुष्ठानं युक्तं। अपि चोपवासस्याहोरात्रव्यापकस्य तन्मध्यगतकालैक
देशेनुष्ठीयमानयोः पूजाजागरणयोस्तिथिविशेषाबाध्यत्वमेव युक्तं। नोपवासकालस्याद्यन्यान्य
तर्हतानयत्र नक्तोपवासं विना जागरणं दृश्यते। यथा कश्चित्पुण्यविशेषेण व्रतहीनोपियः पुमान्। जा

गरे कृते तेन त्रस्तरुदस्समर्ता घजेदिति। तत्र च तत्र चतुर्दशी विद्यायां यद्दर्णां उक्तं च तुक्ता जागरणेन क
र्तव्या दे। अन्येत्वन्यापसिद्दे पद्मपुराणमेवं पठंति। माघसितेतर दिने दिराजन्तुपैति योगं यदि
पंचदश्या। जयाप्रयुक्तं नेतु गंगाकुर्या छिवस्यरात्रिं प्रियकृच्छिवस्येति। तद्देनदर्पेण हालं। एकादश्यष्ट
मीषष्ठी उनेपक्षे चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विताः। इत्येवमादिनिर्दिष्टवासिष्ठादि
वचनैरुपवासतिथिनिर्णयप्रस्तावदर्शिनेरमावास्याविद्यायां चतुर्दश्यामुपवासो यथा विहितः। पथ
त्रयोदशीविद्धायां अपि तस्यां कृष्णपक्षे ऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा प्रकर्तव्या परविद्धा न
कर्हिचित्। उपवासेषु कार्येषु एष धर्मः सनातन इति निगमवचनेन विहितः। एवं विशेषसति जयंती
शिवरात्रिश्च कार्यैव जयान्विते। इत्येवमादिवायुहातवचनवृत्या छिवरात्रिचतुर्दशी पूर्वविद्धा
ग्राह्यते। अत एव शिवरात्रिव्रतस्य रात्रिप्राधान्यं युक्तं। स्कंदपुराणे निशि भ्रमंति भूतानि शक्तयः शू
लभृद्यतः। अतस्तस्यां चतुर्दश्यां सत्यां तत्पूजनं भवेत्। निशि भ्रमंति विचरंति भूतानि शक्तयो देव्यः श

लभृद्धंकरः पते। अतस्तस्यां निशि चतुर्दश्यां सुरेश्वराः। अद्दं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कले॥
लिंगेषु च समस्तेषु चलेषु स्थावरेषु च। संक्रमिष्याम्यसंदिग्धं वर्षपापविशुद्धये। तस्मात् शो द्विमे पू
जायकरिष्यंति मानवाः। मंत्रैरेतैः सुरश्रेष्ठ विपाप्मास न विष्यति। तथा। माघफाल्गुनयोर्मध्ये यास
छिवचतुर्दशी। अंगेन समायुक्ता कर्तव्या सा सदा तिथिः। अनंगस्य त्रयोदशीयुक्त्वा वचनं। माघासिते
भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या। जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छि
वस्य। जयात्रयोदशी। ननु परस्यां रात्रौ त्रयोदशीयुक्ता चतुर्दशी। तथा वास्मिन् तथा वास्मिन्वचने ज
याप्रयुक्तां रात्रिमिति प्रतीयते। तथा च पद्मपुराणे। त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः। जाग
रे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी। अननेन त्रयोदशीसंनिन्यपेदा चतुर्दशी रात्रिर्न भवति। किंतु
दिनभुक्तिप्रमाणतः दिनपर्याप्तात् दा जागरोपवासादि कर्तव्यं। इत्युक्तं भवति। एवं च माघमासस्य
कृष्णचतुर्दश्यां रात्रौ जयायोगस्य निषिद्धत्वात् दर्शरात्रात् पुरस्तात् त्रजयायोगो यदा न भवेत्। पूर्वविद्धैव

का०दे० १२९

कर्त्तव्या शिवरात्रिः शिवप्रियैरिति वचने। माघमासव्यतिरिक्तविषयमिति केचित्। शिवरात्रिव्रते
माघमासव्यतिरिक्तकृष्णचतुर्दश्यामप्युपवासविधानात्। आर्द्रा मार्गशिरे मासि दीपोत्सवदिने
पि वा। गृह्णीयान्माघमासे वा द्वादश्यां वसुपोषये इत्यादिना। दीपोत्सवमथासाद्य कृष्णायां च चतुर्द
शीं वा दश्याश्चापि मासेषु कुर्याद्दिव्यजागरमिति। सत्यखंडवचनेन जागरस्यापि विधानादिति तद्युक्तं
माघमासव्यतिरिक्तकृष्णचतुर्दश्यामुपवासविधानेपि न सा शिवरात्रिशब्देनोच्यते। शिवरात्रि
शब्दस्य माघ माघमासकृष्णचतुर्दश्यां निरूढत्वात्। तथा च स्कंदपुराणे। माघफाल्गुनयोर्मध्ये असि
ता चतुर्दशी। शिवरात्रिस्तु सा ख्याता सर्वयज्ञोत्तमोत्तमा। नन्वेवं सत्यखंडे। माघफाल्गुनयोर्मध्ये कृष्ण का०दे०
या च चतुर्दशी। दत्ते शिवफलं यस्मात्तेन सर्वोत्तमोत्तमा। शिवरात्रिसमाख्याता ---- पृथक्स्थि १३०
ता। न पा माघमासस्य शेषेया प्रथमा फाल्गुनस्य च। कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तिता। ना
गरखंडेपि। माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी। तस्या रात्रिः समाख्याता शिवरात्रिसमुद्भवा।

तस्यां सर्वेषु लिंगेषु सदा संक्रमते हरः। तथा च विष्णु। माघमासस्य कृष्णपक्षे चतुर्दशीं प्रकृत्योक्तं। यानि
कानि च लिंगानि चलानि स्थावराणि च। तेषु संक्रमते देवस्तस्यां रात्रौ यतो हरः। शिवरात्रिस्ततः प्रोक्ता ते
न सा हरवल्लभा। शिवरहस्ये। तत्र नृत्यर्थं देववर्षे माघे कृष्णचतुर्दशी। शिवरात्रिरिति ख्याता प्रियं ये
त्रिपुरद्विषः। तस्मादेवं विषयव्यवस्था। यदा दिनद्वयेपि प्रदोषव्यापिनी प्रथमदिवस एव वा त्रयो
दशी च दिनपर्याप्ता तदा पूर्वैव चतुर्दशी। पदा देवीति वचनात्। यदा तु प्रथमदिवस एव प्रदोषव्या
पिनी। त्रयोदशी च दिनपर्याप्ता दा ते पूर्वैव। प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी। रात्रौ जागरणं
यस्मात्तस्मात्तां समुपोषयेदिति वचनात्। ननु यदा दिनद्वयेपि प्रदोषव्यापिनी तदा किं मर्द्धरात्रात्पु
रस्ताच्चेदिति वचनात्। पूर्वा ग्राह्या। उत प्रदोषव्यानीति वचनादुत्तरेति कथं निर्णय उच्यते। यद्यप्य
र्द्धरात्रात्पुरस्ताच्चेदिति वाच्यं द्वितीयदिने प्रदोषव्यापित्वेनावेफ्पपद्यते। प्रदोषव्यापिनीति वाक्यं
चार्द्धरात्रादुपरितनयामयोगेपि तथाप्येवंविधे विषये द्वितीयचतुर्दश्याग्रहणे प्रागुदाहृतं विरुद्धशिव

रात्रिप्रतिपादकवाक्यसंकोचप्रसंगः।पूर्वशिवरात्रिग्रहणेनतन्नावइतिसैवग्राह्या।किंच।पूर्वो
क्तकर्मकालव्यापिनीउत्तरांनतथेतिसैवग्राह्या।यदातुदिनद्वयेप्रदोषकालेचतुर्दश्यभावः।तद
र्द्धरात्रात्पुरस्ताच्चेदितिवचनात्पूर्वैव।पक्षमावास्यातवचनंतदेतद्वाक्यपर्यालोचनयार्द्धरात्रादुपरि
जयायोगनिषेधकं।शिवरात्रिव्रतात्तन्नूतमाघमासस्यरितिकृष्णपक्षचतुर्दशीनिर्णयस्त्वयं।एकाद
श्यष्टमीषष्ठीतिवचनादमावास्याविद्धासाप्राप्तान्कृष्णपक्षेऽष्टमीचेतिवचनात्त्रयोदशीविद्धा।
एवंविरोधेसतिरात्रौयामचतुष्टयेपूजाविधानाज्जागरणविधानाच्चतदनुसारेणपूर्वोक्तकर्मकालव्या
पिन्येवेष्टा।यदायदातूक्तकर्मकालव्याप्तिस्तदाविशेषः।तदारूढव्रतेषुसर्वेषुकर्तव्यासंमुखा का०३०
तिथिः।अन्येषुव्रतकल्पेषुखर्वेदिष्टामुपावसेदिति।ब्रह्मवैवर्तवचनान्निर्णयः।अत्रकेचिदाहुः।। १३१
यदापारणपर्याप्तामावास्यातदापूर्वाभोक्तव्यापरो।भूताष्टम्योर्दिवाभुक्तारात्रौभुक्ताउपर्वणि।एकादश्यां
दिवारात्रौभुक्तोवाचान्द्रायणंचरेदिति।कात्यायनवचनेनामावास्यायांभोजनंरात्रौनिषिद्धं।तथाशिवर

त्र्यस्य।त्रयोदशीयदाभवतिदिनभुक्तिप्रमाणतः।जागरेशिवरात्रिस्यान्निशिपूर्णाचतुर्दशी।।दिनभुक्ति
प्रमाणतः।दिवसभोजनानुरोधेन।यस्मात्त्रयोदश्यामुपोषितायांतिथ्यंतेविदितेपारणं।रात्रौभोजनप्रप्य
ने।सात्रयोदशीदिनभुक्तिप्रमाणेनइत्युच्यतइति।तदयुक्तं।भुक्तिशब्दस्यभोजनवाचकत्वाभावात्।तिथि
नक्षत्रवारभुक्तिरिक्ताद्दिषुप्रयोगाणांशास्त्रेनिरूढत्वात्।एवंचभुक्तिशब्देनभोजनग्रहणेअर्द्धरात्रात्पुर
स्ताच्चेदितिसंकोचप्रसंगः।कालव्याप्तिग्रहणेनसंकोचइतिसैवात्रभुक्तिशब्देनोच्यते।किंचात्रत्रयोदशी
यदादेवीतिवाच्या।तिथ्यंतेविदिनेपारणं।यदादिनएवसंभवति।तदापूर्वाग्राह्यासेत्यपमर्थेनिलक्षणादि
क्तेंशंविनालभ्यते।दिनशब्देनचसंनिहितत्रयोदशीसंबंधदिनपरित्यागेनभवसन्देहेदिनांतरंग्राह्यं।।
द्वितीयदिनभोजनप्रमाणत्रयोदश्यांयदापूर्वदिनेनशिनिशिसंपूर्णाचतुर्दशीग्राह्याइत्युक्तेचयदात्र
योदशीघटिकादिपरिमितभोजनप्रमाणातदैवचतुर्दशीपूर्वविद्धाकार्येतिप्रसज्येत।ननत्रप्राग्युदा
हृतवाक्यविरोधः।अथवामुख्येनयस्मात्त्रयोदश्यामुपोषितायांदिवाभोजनंसंभवतिसाग्राह्येति।।

तदपिनसर्वस्यामपित्रयोदश्यामुपोषितायांदिवाभोजनसंभवात्।अथतिथ्यंतविहितभोजनंयदा
दिवासंभवति।तदाशर्वर्याहितित्रलक्षणप्रसंगाद्रात्रिभोजनेपिबाधकाभावाच।निषेधस्य
रागप्राप्तभोजनविषयत्वात्।रागप्राप्तेर्लोनविधिस्पृष्टेनिषेधप्रवृत्तेः।विधिवैषम्यविकल्पादिप्रसं
गात्।अग्निषोमीयहिंसादिवत्।उपपादितंचैवंतैलाभ्यंगादिकालप्रस्तावे।तस्मात्सकलदिनपरि
हारार्थमनुजिघ्राहेनकालव्याप्तिरेवोच्यते।नभोजनमितिसिद्धं।एवंरात्रौसकललोचनपर्यालोचन
याव्यवस्थायांकल्पनिकीदृहस्पतिस्मृतिटीकाकृतोक्ताव्यवस्थाहेया।शिवपूजाजागरणकालवा
धश्चविनापकारणंप्रसज्येत।उपवासस्यापिपूर्वविद्धायामुपपादितत्वात्।बहुतरवाक्यसंकोचप्र
संगाच।शिवरात्रिशब्देनोपवासपूजाजागरणान्यभिधीयंते।त्रयाणामपिप्राधान्यप्रतीतेः।तथास्क
दपुराणे।एवंद्वादशवर्षाणिशिवरात्रिमुपोषितः।योमांजागरतेरात्रौमनुजःस्वर्गमारुहेत्।शिवंच
पूजयित्वाचयोजागर्तिचचतुर्दशीं।मातुःपयोधररसंनपिबेत्सकदाचन।नागरखंडे।उपवासप्रभावे

का०हे०
१३२

नबलादपिचजागरात्।शिवरात्रिस्तथातस्यलिंगस्यापिप्रपूजया।नवोराजन्समासाद्यपिदृष्टपैता
महंमहत्।स्वयंभूलिंगमभ्यर्च्यसोपवाससजागरः।अजानन्नपिनिःपापोनिषादोगणतांगतइ
ति।अन्यान्यपित्रयाणांप्राधान्यप्रतिपादकानिवचनानिप्रागुदाहृतानि॥ ॥इतिमहाराजाधि
राजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमाद्रिविरचितेचतुर्वर्गचिंता
मणौपरिशेषखंडेकालनिर्णयेशिवरात्रिनिर्णयः॥ ॥अथपर्वसंधिनिर्णयः।तत्रपर्वद्वेपौर्ण
सीऽमावास्याचेति।तयोश्चस्वरूपंगोभिलेनदर्शितं।यःपरमोविप्रकर्षःसूर्याचंद्रमसोःसापौ
र्णमासी।यःपरमःसन्निकर्षःसामावास्याचेति।स्मृत्यंतरेच।यदास्तंगतेसूर्येचंद्रमाश्चमुदियात्।
सापौर्णमासीनितत्रपूर्णिमा।नामनिर्वचनंब्रह्मांडमत्स्यपुराणयोः।यदास्तोतव्यतीपातेदिवा
पूर्णपरस्परं।चंद्रादित्यौपराह्णेतुपूर्णत्वात्पूर्णिमास्मृता।अमावास्यायाश्चनिर्वचनंशतपथश्रु
तौ।तेदेवाअब्रुवन्नमावैनोद्यवसुरुपसतियोमःप्रावात्सीदित्युपक्रम्यतेदेवाअब्रुवन्नवाइममस्म

स्तो दितुयाज्ञेनमेवास्मा। संदं नरामेति तस्मै सोमं सममस्त्रेषैवै सोमो राजा देवानामन्नं यच्चंद्रमाः स य
त्रैतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहापश्चौषधीश्च प्रविशति स वै देवा
नां वस्वन्नं ह्येष तानेष एतां रात्रिमिहामा वसति तस्मादमावास्या नामेति। अत्र प्रथमवाक्ये चंद्र
वधानंतरं प्रोषिते ह्रिसमागमो देवानामुक्तो वसुनेंद्रियेण अमा सह निवासादमावास्येति द्वितीय
वाक्ये तु वसोश्चंद्रमसोऽस्यां रात्र्यामस्मिंल्लोके निवासादमास्येति द्विधा निर्वचनं। पद्मपुराणे। अग्नि
ष्वात्ता इति ख्याता यज्वानो यत्र संस्थिताः। अच्छोदा नाम तेषां तु मानसी कन्यका नदी। तमपश्यदमावसुं ना
म पितरं वीक्ष्य सांगना। वव्रे वरार्थिनी संगं कुसुमायुधपीडिता। योगाद्भ्रष्टा तु तेनासौ व्यभिचारेण भा
मिनी। धरां न स्पृशते पूर्वं प्रपाताथ भुवस्तले। तिथावमावसुर्यस्यामिच्छां चक्रे न तां प्रति। धैर्येण
तस्य सा लोकैरमावास्येति विश्रुता। पितॄणां वल्लभा यस्मात्तस्यामक्षयकारिणी। परमसंयमिपित्र
गणानि मत ब्रह्मचर्यप्रस्तुति देवेतु नूतावस्तु धेयी निर्वदण प्रतीतमहिमत्वादमावास्येत्युच्यते। दर्श

तिरास---- स्कांदे नागरखंडे। अमा नाम रवे रश्मिः सहस्रप्रमुखस्थितः। यस्यास्यां तन्नसात्सूर्यः
प्रोक्तस्त्रैलोक्यविश्रुतः। तस्मिन्विशति येनेंदुरमावास्या ततः स्मृता। मत्स्यवायुब्रह्मांडपुराणेषु। अ
मावसेतां ऋक्षे तु यदा चंद्रदिवाकरौ। एषा पंचदशी रात्रिरमावास्या ततस्तु सा। अमा सह एकत्रैस
थ्यः। स्कंदब्रह्मांडपुराणयोः। अमा नाम रवे रश्मीश्चंद्रो लोके प्रतिष्ठितः। तस्मात्सोमो वसत्यस्याममम
वास्या ततः स्मृता। मत्स्यवायुपुराणयोः। आश्रिताममावास्यां परस्परतस्तु समागमे। अन्योन्यं चंद्र
सूर्यौ तौ तदा तद्दर्श उच्यते। भगवतीपुराणे। कलाः षोडश सोमस्य शुक्ले वर्धयते रविः। अमृतेनामृतं
कृष्णे पीयते विबुधैः क्रमात्। कलामाद्यां पिबेद्वह्निर्द्वितीयां तपनः कलां। विश्वेदेवास्तृतीयां च चतुर्थीं
च प्रजापतिः। पंचमीं वरुणश्चापि षष्ठीं पिबति वासवः। सप्तमीमृषयो दिव्या वसवोऽष्टौ तथाष्टमीं। न
वमीं कृष्णपक्षस्य पिबतींदुः कलामपि। दशमीं मरुतश्चापि रुद्रा एकादशीं कलां। चतुर्दशीं पशुप
तिः कलां पिबति निम्नगाः। ततः पंचदशीं चैव पिबंति पितरः कलां। कलावशिष्टो निःपीतः प्रविष्टः सू

र्यमंडलं। अमा यावसते तस्माद् अमावास्या ततः स्मृता॥ पूर्वाह्णे प्रविशत्यर्कं मध्याह्ने तु वनस्पतिं। अपराह्णे
विशत्यप्सु तां योनिं वारितस्करः॥ अमां प्रविश्य सोमस्तु ओषध्या कलयैकया। तृणगुल्मलतावृक्षान्निष
दयति चौषधीः॥ तमोषधिस्थितं गावश्चरंत्यापः पिबंति यः। तदंगानुगतं गोभ्यः क्षीरं यमुपगच्छति। तत्क्षी
रममृतं भूत्वा मंत्रपूतं द्विजातयः। स्वाहाकारवषट्कारैर्जुह्वत्याहुतय क्रमात्। हुतमग्निषु सोमाय पुन
:सोमं विवर्द्धयेत्। एवं संक्षीयते सोमः सोमश्चाप्यायते पुनः। तेन पूर्णमास्यामामावास्ये द्विविधे पुरा
णात्। राका चानुमती चैव पूर्णा द्विधा स्मृता। सिनीवाली कुहूश्चैव अमावास्या द्विधैवतिति। अत्रानुमतिः
सिनीवाली चतुर्दशीमिश्रे राकाकुहू प्रतिपन्मिश्रे। तथा च काठकश्रुतिः। या पूर्वा पौर्णमासी सानु
मतिर्योत्तरा सा राका। या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति। वृद्धवसिष्ठः॥ राका चानुम
तिश्चैव पूर्णमासी द्विधा विदुः। राका संपूर्णचंद्रा स्यात्कलोना सानुमतिः स्मृता। पूर्णमासी दिवा दृष्टे शशिन्य
नुमतिः स्मृता। रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्तिता। भगवतीपुराणे। यदा त्वस्तमियात्सूर्यः पू

र्णश्चेंदुरुपागमत्। युगपत्क्षोत्तरा राका तदा भवति पूर्णिमा॥ मत्स्यब्रह्माण्डपुराणयोः॥ यस्मात्तामनुमन्य
ते पितरो दैवतैः सह। तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता। अत्यर्थं राजते यस्मात्पूर्णिमास्यां निशा
करः। रंजनाच्चैव चंद्रस्य राकेति कवयो विदुः॥ वृद्धवसिष्ठः॥ दृष्टचंद्रामावास्या सिनीवाली प्रचक्षते। एता
मेव कुहूमाहुर्नष्टचंद्रां महर्षयः। मत्स्यब्रह्माण्डपुराणयोः॥ सिनीवालीप्रमाणस्तु क्षीणशेषो निशाक
रः। अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता। सिनी सिता अवसिति तियावत् अवालो वाली सिनीवा
लो वाली च सिनीवालीप्रमाणः बालाग्रमात्र इत्यर्थः। कुहूरिति कोकिलेनोक्ते यावान्कालः समाप्यते। तत्
कालसंज्ञिता ह्येषा अमावास्या कुहूः स्मृता। तथा सोऽयानुमत्या या द्विलवो काल उच्यते। लवौ द्वावेव राका
याद्येयः कालो पराह्णिकः। तथा द्वौ द्विलवावमावास्या कालः पर्वसंधिषु। द्व्यक्षरस्तु कुहूमात्रः पर्वकाल
श्च संस्मृतः। तथा। अनुमती राका च सिनीवाली कुहूस्तथा। एतासां द्विलवः कालः कुहूमात्रे कुहूः स्मृता
इत्येष पर्वसंधीनां कालो वै द्विलवः स्मृतः॥ भगवतीपुराणे। अनुमत्याश्च राकायाः सिनीवाल्याः कुह्वं वि

ना। एतासां द्विलवः कालः क्षणमात्रे षुक्रस्तः स्मृता। तत्र संधौ यजेतेति संधौ यागः कर्त्तव्य इति तस्य चातिसूक्ष्म
त्वेन कर्म्मानुष्ठानायोग्यत्वात् संधिशब्दः स्वार्थसंनिहिते कर्म्मानुष्ठानयोग्ये पूर्वापरे काले लक्षयति। ननु
संधिमभियजेतेत्यभिशब्दस्योपरिस्थार्थप्रतिपादकत्वात् संध्येरुपरि यागकर्त्तव्यताप्रतीतेः संधिपूर्वका
ल यागो न प्राप्नोतीति। नैष दोषः। निपातानामनेकार्थत्वात्। अत्र संधिमभिलक्ष्य यजेतेति वाक्यार्थः।।
अन्यथा प्रतिपदमभियजेतेत्यत्राप्युपर्यर्थग्रहणप्रसक्तेः प्रतिपद्यतीतायां तत उपरिस्थितायां यष्ट
व्यमिति प्रसज्येत। तस्मात् पूर्वापरत्वाविनिकाले संधौ यजेतेति श्रुतियागं विधत्ते। अत एव श्रुत्यन्तरं सं
धिमभितो यजेतेति। तथा बौधायनः। सूक्ष्मत्वात् संधिकालस्य संधिविषय उच्यते। सामीप्यविषये ग्रा का० ३०
ह्यः पूर्वेणाथ परेण वा। तत्र संधिनिहित एव काले संगस्य कर्मणोनुष्ठाने प्राप्ते व्यवस्थयाह द्वये निय १३५
ममाह श्रुतिः। पूर्वेद्युरिध्माबर्हिः करोति। अग्निमेव संवारस्य परस्त्वोपविशति। तथा पूर्वेद्युरग्निं गृह्णा
ति। उत्तरमहर्यजतीति। तदर्थद्वयं प्रतिपत्तव्यं संबंधीत्याह गोभिलः। पर्वणोन्ता उपवसथः पश्चाद्

निश्चयस्याहुतिः पर्वणोन्ताः पञ्चदश्याः स्यात्। तस्यामन्वाधानादिकं कर्त्तव्यं पश्चाद्यः प्रतिपदः निगम उपेक्षां तय
जेद्वादिं पक्षयोः पक्षविंतक इति गोभिलोगाह्निया। आदिसांतश्च पर्वणां पञ्चयज्ञिय इति। कात्यायनः।।
पञ्चदशी यदि वरतिनरवाक्षः पञ्चाद्यायष्टव्यानवेति। आपस्तंबेनाप्यमावास्यायां दीक्षायजनीये वा पौ
र्णमास्यां यजनीये वास्तुत्यमहरिति पौर्णमास्यमावास्योपरितनदिनस्य प्रतियद्रूपस्य यजनीयत्व
मुक्तं। लौगाक्षिणा न विशेषो दर्शितः। श्रीनंश्चानोपवस्य तस्य यागस्य चतुरो विदुः। चावेशानुक्रजेदंतो
यागे चप्रतकर्मणि। इति। उपवासस्तस्योपवासस्याग्न्याधानादेस्त्रीनंशान्विदुः यागस्य चतुरो
शान्विदुः। अस्माने त्रीपंचदशीप्रतिपत्संबंधिनानुक्रजेत्परित्यजेत्। अंत्यमंशं पंचदश्या व्रतकर्म
णि यागे च प्रतिपदश्चतुर्थमंशं। पंचरेखावंशानुक्रजेदन्याविति पर्युदासदृतस्याचक्षते। आद्यः
पादः पञ्चदश्याः अपवस्तौ चान्वाधानादौ परिहर्त्तव्यः पश्चादेश्चास्य पादो यागे परिहरणीय इति
एतच्च संपूर्णपंचदश्यामिति। क्रविषयं। तस्याः प्रथमपाद एवान्वाधानानुष्ठानात्। अन्ये त्वस्मिन्ने।

वपावे प्रथमातिक्रमे कारणाभावादेतः पादः पंचदशपात्त्रैनकर्मेपि परिहरणीय इति। व्याचक्षते। एतच्च
संधेः कालस्य पौर्णमासीव्यतिरिक्तविषयं। तस्या पर्वचतुर्थांश एव तदनुष्ठानात्। कथं तर्हि यागे चतुरंशव्यापे
क्षते यज्ञपार्श्वः। पंचदशपाः परः पादः पश्चादेः प्रथमास्त्रयः। कालः पार्वणयोगे स्यादन्यथा तु न विद्यते॥
कात्यायनः। न यष्टव्यं चतुर्थांशो यागो प्रतिपदः क्वचित्। रंशास्ति तद्विलुंपति श्रुतिरेषा सनातनी। तथा।
प्रतिपद्दर्शयोर्भूता पादस्त्वेकः प्रतिष्ठति। यातयामः स विज्ञेयो न दिनस्य निरूप्यते। इति। न च पर्व
चतुर्थांशादिकस्याप्यागकालेऽपूर्यमाणे संधौ यजेतेति श्रुतिविरोधः। संधेरनिरूढत्वेन तत्र सां
गप्रयोगानुपपत्तेः। संधिश्रुतस्त्वपेक्षितसंधिसामीप्यावधिविधिपरा स्मृतेः। न च यावति काले यष्टुं श
क्यते तावत्कालः संधिविधिसामर्थ्यादेव सिद्ध इति किमवधिविधानांतरेणेति वाच्यं। सामर्थ्यानुसा का०३० १३६
रेण व्यवस्थायां कस्यचिद्द्रुतवाद्यनावात्पंचमीपर्यंतं प्रयोगं समापितुमशक्नुवतः पंचमीपर्यंतं काला
वधियात इति कालातिक्रमनिमित्तप्रायश्चित्तं वैश्वानरादीनामप्राप्तिः स्यात्। न च यः शीघ्रं समापयेदशक्त

स्तदीयसामर्थ्यसामीप्यावधिपरिच्छेदकं। अतोऽन्यैरपि तत्र यष्टव्यमिति। न तत ऊर्ध्वमुत्कर्षे एवायुक्तं कर्मेति
वाच्यं। कश्चिन्मुहूर्त्तत्रये समापयितुं शक्नुत इति मुहूर्त्तचतुष्टयेन समापयतः कालातिक्रमो जात इति
प्रायश्चित्तादिप्राप्तिप्रसंगात्। तस्मात्सामर्थ्यस्याव्यवस्थितपरिमाणत्वात्सामीप्यावधिपरिच्छेदकव
मिति स्मार्त्तमेव वचनमवधिपरिच्छेदकं। अत एव बौधायनेनोक्तं। न खलु संधिरुपपाद इति। किंचा
स्वयं विशेषाक्षेपरहितसमर्थो विविधदुर्बलप्रमाणप्राप्तिं तु विशेषं स्वीकरोति। अथोक्ताः शार्करा
उपदधातीति वाक्यविशेषोपस्थापितं घृतं। यथा पशुपतये यजेतेति मंत्रवर्णप्रापितं छागं। तथा संधौ
यजेतेति। स्मृतिवाक्यप्रापितं पर्वचतुर्थांशादिकं संधिपरिच्छेदकं स्वीकरोति। तस्मात्पर्वचतुर्थांशादिका
ले यष्टव्यं तेन पौर्णमास्यां यजेतामावास्यायाममावास्यायां यजेतेति श्रुतिद्वयमुक्तिसंधिविधिप
रमिति केचित्। अपरे तु पर्वचतुर्थांशेनेन व्याचक्षते। अत्रायं नियागः कर्त्तव्यः। पूर्वेद्युरग्निग्रह
णोत्तरमहर्देवताय कृत इत्यादिविधानात्। तथा च संकर्षसूत्रमहनिवानस्य ख्यानमिति। तत्रापि पूर्वा

ष एव। पूर्वाह्णो वै देवानामिति श्रुतेः। तत्रापि प्रातर एव। पर्वणो यश्चतुर्थो भागः स आद्याः प्रतिपदस्त्रयः। यागका
लः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति। स्मृत्यंतरात् प्रवचनात् प्रातर्यजध्वमिति अश्विनाविति मंत्रलिंगाच्च
तथांगिरसेवास्य यज्ञस्य प्रातरनुवाके रावं विवितिच। न तस्य तामयमध्यायाज्येन प्रातर्यज्ञमाणः स्यादिति
प्रातःकालयागसंबंधावगमाच्च। तथा कात्यायनेनापि सद्यो वा प्रातरिति सद्यः कालः कथितः। तथा सूत्रांत
रेणापि तत्र यत्रेन यत्रैनं पश्चाद्दस्तमितं पुरस्तादादित्योऽभ्युदेतीति। आदित्योदयकाले यजेतेत्यवगम्य
ते। उदित आदित्ये पौर्णमास्यास्तंत्रं प्रवर्तीत्युदयानंतरमेव यागानुष्ठानमापस्तंबेनोक्तं। यत्तु प्रागु
दमादर्शस्यायास्तंत्रप्रकरणमुक्तं। प्रागुदयादमावास्यादि इति तदुत्तयाम्नागुपक्रममात्रमेव न चिष्टिरे का०दे०
व। प्रागुदयादनुष्ठाने द्विति। दर्शविधानविरोधात्। अत्र गोभिलः। त्रयः पौर्णमासीकालान वेति। संध्या १३७
वास्तमितोदितावो चैव वा। संध्योदिते चंद्रे संध्या अस्तमिते रवौ। चंद्रोदया उत्तरा प्राग्व्यस्तमयादुच्चैरु
दितिः। तामुपवसेत्। तथा संध्यापौर्णमासीमुपवसेदाउत्तरामित्येके स्मृत्यंतरं। का पूर्वोदिते कालहीने।

चंद्रे पूर्वा विचक्षणः। उपवसेदिति शेषः। कात्यायनः। पूर्वां पौर्णमामुत्तरां वोपवसेत्। तत्रादिवा पूर्वसं
धौ। पूर्वेद्युरुपवासं नद्दर्शयागः। रात्रिपर्वसंधौ तद्दरुपवासः। परेद्युर्यागः। तथा च बौधायनः। अत्रो
हावोढारं स्पृष्टमर्धरात्रात्पौर्णमास्यां चंद्रमाः पूर्येत। स एतं चापरात्रे पूर्णो भवति। सर्वं चंद्रेरुत्तरस्यां रा
त्रेमास्याय उपवसथ्यमीदूर्ध्वमध्यंदिनाच्चंद्रमसमादित्योरनते। स एतं चापराह्णरथो भवति। स
र्वं चंद्रमा विमुत्तरस्य चाह्न आमध्यंदिनादेतं संधिमनियजेतेति। अस्यार्थः। अत्रोदाहरंतीति विशेषः। पू
र्णमास्यामिति विषयनिर्देशः। ऊर्ध्वमध्यरात्राच्चंद्रमाः पूर्यते। पूर्णमासी प्रवर्त्तत इत्युक्तं भवति। स तम
पररात्रमनंतरं च सर्वमहरुत्तरस्यां रात्रेरामध्यरात्रादनुवर्त्तते। ततो विच्छिद्यते। सोऽयं रात्रिसंधिरु
क्तः। अथामावास्याविषये अपवसथीयाहनि यागदिनात्पूर्वेद्युरूर्ध्वमध्यंदिनाच्चंद्रमसमादित्यो
रत्नतेमावास्या प्रवर्त्तते। सैवमपराह्णमनंतरं सर्वां रात्रिमुत्तरस्याह्न आमध्यंदिनादनुवर्त्तते। तत
प्रतिपद्भवति। स एष दिवासंधिरुक्तः। एतं संधीमभियाप्यसांध्यः पूर्वेद्युरग्निमन्वाधायोत्तरेद्युर्यजेत।

तथा एवं दिवासंधिमभिलक्ष्य तदहः प्रातर्यजेतेति। एवं श्रुतिमुदाहृत्य ततो मध्यरात्रमध्यंदिनं त्राष्ट्रौ
व्याख्यातुमाह। रात्रिर्हि पौर्णमास्यां संधेया नवत्यहरमावास्यायामिति। तेन श्रुतिगतौ मध्यरात्रमध्यंदि-
नत्राष्ट्रौ रात्रिसंधिदिवासंध्योरुपलक्षकौ विवक्षिताविति। अनयोश्च पौर्णमास्यमावास्याविषयश्रुत्योः प्र-
दर्शनार्थत्वं वक्तुमुत्तरं स्तवं द्वे पौर्णमास्यौ द्वे अमावास्ये पूर्वा पूर्णमासीमुत्तराममावास्यामिति। अय-
मर्थः। रात्रिसंधिदिवासंधिमत्यौ द्वे पौर्णमास्यौ दिवासंधिरात्रिसंधिमत्यौ च द्वे अमावास्ये। तत्र दिवासंधि
पूर्वामावास्या पौर्णमासी वा। रात्रिसंधिस्तूत्तरा तत्र पूर्वामावास्या ज्ञानं तु पौर्णमासीतामुपमाव्यजेना-
ह। पूर्वां पूर्वां पौर्णमासीमिति। अयमर्थः। पूर्वामावास्या वा पूर्वा पौर्णमासी उक्तामिवोत्तरामावास्यां जा-
नीयादिति। ततश्च रात्रिगममावास्या प्रतिपत्संधिमुपवास्य यागयोर्मध्ये कुर्यादित्यर्थः। अपरं स्तवस्त्वा-
त्वा। पुरस्ताच्चन्द्रमाः पूर्ण उत्सर्गे तु ततश्च दिवासंधिमत्यां पौर्णमास्यां यागः पूर्वेद्युरुपवास इति सिद्धं। तथा
उत्तरां पौर्णमासीमुक्तामिवोत्तरामावास्यां जानीयादिति। यां पौर्णमासीमुपवसथ्यापुरितेति। ववि-

का॰ दे॰
१३८

कां तृतीयां वाजसनेयेन समामनंति यदहर्न दृश्येत। तदहरमावास्यां स्यान्न दृष्टार इति तत्र स्वर्विकास्त्व-
त्रार्थ उपरिष्टाद्वक्ष्यते। यदहः पुरस्ताच्चन्द्रमाः पूर्ण उक्ताप्र्यत। यदहर्न दृश्येतेति तत्र द्वयस्यायमर्थः
सर्वदा तावच्चाकाङ्क्षकोरेव चंद्रमसः पूर्णत्वमदर्शनेन वेति ज्योतिःशास्त्रप्रसिद्धं। यत्र यस्मिन्पुरस्ताच्चंद्र-
माः पूर्ण उपसर्प्येत। उदीयान्न दृश्येत वा। तत्र यद्यपराह्ने रात्रौ वा पर्वसंधिः। यदा तां पूर्णमासीममा-
वास्यां चोपवसेदिति। यदा तु पूर्वे मध्यंदिने वा पर्वसंधि। यदा यस्मिन्नहनि चंद्रमाः पूरिता पूर्णो भवति
न पुनरभ्योदितकालानान्तरेण पूर्वव दिनं पञ्चदशास्तविति। तथा च सति चतुर्दशपादि श्रपितिथिषु यावद्य
वदृश्यत्तनति। यो यायस्य वा नदृष्टो रेणेन्दिता रोनवे पुः। तामनुमतीं सिनीवालीं चोपवसेदिति पूर्वप्-
रिताश्चेन्न दृष्टार इति सस्त्र द्वयस्यायमर्थः। उक्तं च। भाष्यार्थसंग्रहकारेण। अपराह्णे प्रवारात्रौ यदि प-
र्वसमाप्यते। उपोष्या तत्र राकास्या सा पूर्णाभिलक्षणा। पूर्वाह्णे या च मध्याह्ने यदि पर्व समाप्यते। उ-
पोष्या तु भवेत्कोरस्या त्वत्र साम्य पूरितलक्षणा। अपराह्णे हि पायां वा पर्वसंधिर्न वेषदि। उपोष्या तु कुत्र

त्र परेद्युरेवेति लक्षणं। पूर्वाह्णे वाथमध्याह्ने समाप्यते। पूर्वेद्युस्तत्रोपोष्या। पूर्णउत्सर्प्पिलक्षणं। पूर्वा-
ह्णे वाथमध्याह्ने पर्वसंधिर्यदा न वेत्। तत्रोपोष्या सिनीवाली श्वोनद्रष्टारलक्षणेति। न उक्तं। अपराह्णेथ
वा रात्रौ यदि पर्वसमाप्यते। तदहस्तत्रैवोपोष्या पूर्णउत्सर्प्पिलक्षणं। पूर्वाह्णे वाथमध्याह्ने यदि पर्वस-
माप्यते। पूर्वेद्युस्तत्रैवोपोष्या या श्वःपूरितलक्षणं। गृह्यकारिकायां। पंचदशी प्रतिपच्च समतिएकदि-
ने महनीयदि तस्मिन्। पंचदशी प्रकृतेति रुपवासः पंचदशीह तदुर्यदि यागः। इति तथा संकर्षणकांडे
गोविंदोपाध्यायेनोक्तं। यस्मिन्नहनि मध्यंदिने पूर्वएव विक्रमसन्निपातो तत्र पूर्वेद्युरुपवासश्च श्वःपूरि-
ते निवाश्वोनद्रष्टारइति वेतस्य विषयः। यत्रापराह्णे रात्रौ वा विक्रमसंनिपातो तत्रैव तदहरुपवासः।
परेद्युः पुरस्ताच्चेद्रमाः पूर्णउत्सर्प्पेयदहर्नदृश्येत तस्य विषय इति। देवस्वामिनाप्युक्तं। यदि पूर्वा-
ह्णे पर्वसंधिःस्तनाभ्येतनतो नितरामेव चन्द्रोनन्नं यदि पुनरपराह्णे रात्रौ वा ततस्तदहरुपोष्य श्वोभू-
ते याग इति तथा च लौगाक्षिः। पूर्वाह्णे वाथमध्याह्ने यदि पर्वसमाप्यते। उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्य- का॰नि॰ १३९

ते। अपराह्णेथवा रात्रौ यदि पर्वसमाप्यते। उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते। अत्र केचित्संध्यायां
पर्वसंधौ व्यवस्थापकवचनांतराभावान्न्यायेन तत्रापि रात्रिशेषयोगाच्च सापि रात्रिशेषेनयष्यते। इ-
त्याहुः। तदयुक्तं। संध्यारात्र्योर्यद्दानेहात्तल्लक्षणायां च कारणाभावात्। संध्यायां पर्वसंधौ च परेद्युर्या-
गस्यावर्ज्जनेयत्वात्। संधिरिस्तनैनेवस्तिद्वेः। एतेन सर्वे संप्रसेवोपवसेत सर्वा उत्तरामेवोपवसेदिति श्रु-
तिद्वयं च व्याख्यातं। शुक्लपक्षे तिथिर्ज्ञेया यस्यामभ्युदयाद्रविः। कृष्णपक्षे तिथिर्ज्ञेया यस्यामस्तमियाद्र-
विः। इत्यादीनि पक्षद्वयव्यवस्थायां वचनानि। तानि तिथ्यंतरविषयाणि। यत्तु पूर्वः पूर्वो यजमानो वन-
यानीति वाक्यं तद्वास्त्रचोदिते काले शामेयावद्यावत्सर्वं यजते तावत्स प्रशस्तमिति। प्रतिपादयत्तत्रैव का-
लविलंबं निवारयति। नेति पुनश्चोदितकालानादरेण पूर्वं वदिने प्रशस्तमिति। तथा च सति चतुर्द-
श्यादिषु तिथिषु यावद्यावदधस्तनतिथौ योगः क्रियते। तावत्तावत्सुतरां प्रशस्तमिसाप्रसज्येत। तस्मा-
त्पूर्वाह्णादिपर्वसंधिभेदेन व्यवस्था युक्ता। अत्र केचिदाहुः। पूर्वापराह्णमध्याह्णास्त्रेधाविनागाश्रयेण

नपंचपंचमुहूर्त्तात्मकाश्चनबंदितव्याः। इति नतु त्रेधा विभागोपास्तेः प्राप्नोति मध्यंदिनात्पंचघटिकायां पर्वसं
धौ प्रातःकाले पर्वचतुर्थांशानावात्तृतीये भागे यागः प्राप्नोति। तत्र पर्वणः पश्चचतुर्थांश आद्याघटि
प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः। इत्येतद्विरुध्येत। तदसत्। कथं प्रातःकाले पर्व
चतुर्थांशानावः। प्रातःकालस्य त्रिमुहूर्त्तमात्रत्वादिति। उक्तमेवापराह्णस्य पादित्यान्मुहूर्त्तास्त्रय एव
तु। प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचम इति वचनादिति चेत्। न तस्य पंचधा विभागपक्षाश्र
यत्वात्। अत्र तु पूर्वाह्णपरिमित एव प्रातःकालः। याति मीमांसान्याकारादिकृतायां उक्तोऽग्निः
प्रातर्दिवि देव ईयते। यजुर्वेदेन तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभि का॰हे॰
रेव सूर्य इति मध्याह्नात्प्राक्तनः सर्वोऽपि प्रातःकालः प्रतीयते। यदि मध्याह्नात्प्राक्तनः प्रातःकालस्तर्हि १४०
कालांतरं स्यात्। तत्र प्रातर्मध्याह्नास्तमयकालेषु ऋग्यजुःसामवेदैरागमने सूर्यस्य कालांतरे वेदस
यागमने स्यात्। तत्र च वेदैरशून्यस्त्रिभिरेति सूर्य इति विरुध्येत। कालांतरे ह्यग्निः। पूर्वाह्ण इति पाह

तरात्। प्रातःपूर्वाह्णयोरैक्याय मत्स्य एवं प्रथमं प्रहरमभिधायाह्नः स्यात्। स एवान्यैः संयुक्तं
प्रातरित्यभिधीयते। इत्येवमपि पूर्वाह्णाभिन्नश्चेत्प्रातःकालः। तर्हि तत्रोपक्रम्य पूर्वाह्णे योगः प्रदद्य
क्तः। प्रातर्दैवमिति प्रातर्नोपपद्यत इति चात उपक्रमाभिप्राये एव पूर्वाह्णिकादृशश्च प्रातःका
लः। पूर्वाह्णविवक्षया वचनद्वयेऽपि प्रातर्ग्रहणं। अर्थेन पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणा
मपराह्णः पितृणामिति श्रुतिविरोधः प्रसक्तः। एवकुर्वंति सदा पक्षादिकं च कं। पूर्वाह्ण एव कुर्वी
तिवीर्द्धेऽप्यन्ये मनीषिण इति। कात्यायनादिवचनात्। अथ यस्मात् रतनुदिते जुहोतीत्यत्रापि दर्श
नात्। षष्ठेऽध्याये जैमिनिना उदगयनपूर्वपक्षपुण्याहेदेवानि स्मृतिरूपाण्यन्यार्थदर्शनन्यर्थदर्शन
दित्युक्ते नाप्यकारेणार्थदर्शनं। पूर्वाह्णो वै देवानामिति दर्शनं। आह च कर्कोपाध्यायः पूर्वाह्णे द
र्शयाग इति। अनेन प्रातरुक्तो मनीषिभिरित्यादि व्याख्यातं। तेन इष्टिविषयस्त्रेधाविभाग इति सिद्धं। न
ह्युक्तं। अत्र हि पूर्वाह्णापराह्णौ द्विधाविभक्तस्याह्नः पूर्वापरभागौ विवक्षितौ। आवर्त्तनात्पूर्वाह्णो

चपराह्णस्ततःपरइतिवचनात्।मध्याह्नस्तुतयोःसंधिर्यदावर्त्तनमुच्यते।ननुशर्वाह्णादिशब्दानांत्रे
धाविभक्तस्याह्नःक्रमेणभागत्रयपरत्वे।आवर्त्तनेयदासंधिस्तत्रपूर्वमथापिवा।तदहर्यागइष्ये
तपरतश्चेत्सारद्वनीत्यादिवचनात्।वक्ष्यमाणबवेङ्केचनप्रसंगाच्च।किंचान्यस्मिन्पक्षेमध्याह्नस्या
पंचेके नुवर्त्तनादुपरिघटिकापर्यंतत्वात्तत्रसंधौदरेचयोगःप्रसज्येत।नचप्रसज्यतामितिवाच्य।तत्रप्रातः
पर्वचतुर्थ्यादिविहितकालासंभवेनपर्वणोयश्चतुर्थोंऽशइत्यादिवचनविरोधात्।प्रातःकालस्य
त्रिमुहूर्त्तत्वात्।तथाच।व्यासः।मुहूर्त्तत्रितयंप्रातस्तावानेवतुसंगवइति।पराशरोपि।लेखाप्रभृ
त्यथादित्यात्मुहूर्त्तास्त्रयएवतु।गनेरवो।प्रातःस्मृतस्तस्मात्कालोभागश्चाह्नःसपंचमः।पद्मपुराणे का०ह्ने०
रेषाप्रभृत्यथादित्यात्मुहूर्त्तास्त्रयएवतु।प्रातस्तुसस्मृतःकालोभागश्चाह्नःसपंचमः।एवमन्येपि।एवम २४२
न्येष्वपिप्रातःशब्दार्थप्रतिपादकेषुवाक्येषुत्रिमुहूर्त्तात्मकःप्रातःकालःकथितः।ननुत्रिधाविभक्तस्या
ह्नःप्रथमोभागःप्रातःकालःक्वचिदपिश्रूयते।यस्तूक्तोप्रयोगःसनमुख्यः।अनेकार्थत्वस्यान्याय्यत्वात्॥

त

सनाडिकायाःप्रातःकालइतिप्रोक्तःस्थापणारोपणादिष्विति।सोप्येवमेवननुसार्द्धप्रहरःप्रातः
कालःसएवाध्यर्द्धसंयुक्तः।प्रातरिसनिधीयेइतिवचनात्प्रहरःअर्धउपरीअर्द्धसंयुक्तःसार्द्धप्र
हरः।ननत्वमध्येदिनोसप्तघटिकायांपर्वसंधौपंचसुघटिकास्वतीतासुप्रातःकालःपर्वचतुर्थ्यांशश्च
भवतीतितदानींसांगोपांगःकरिष्यते।तदप्युक्तं।उदितआदित्येपौर्णमास्यास्तंत्रंप्रक्रमयति।प्रागुदया
दमावास्यायाइत्यापस्तंबवचनात्।त्रिमुहूर्त्तात्मकःप्रातःकालोयदापर्वचतुर्थ्यांसंभवः।तदेतद्वचनं
नविष्यतीतिचेत्।नसंकोचेकारणाभावात्।नवादित्येउदितेपौर्णमास्यास्तंत्रप्रक्रमः।आदित्योदया
त्प्रागमावास्यायांतंत्रप्रक्रमइत्यस्तुपंचघटिकास्वतीतासुकरिष्यतइतिवाच्यं।अंगप्रधानत्वसंभा
वनायांतुगपत्पुरुषप्रवर्त्तयत्वाप्रयोगवचनेनमध्येविलंबनिषेधात्।तस्माद्वचनद्वयपर्यालोचन
यात्रिमुहूर्त्तात्मकेसार्द्धप्रहरात्मकेप्रातःकालेगम्यमानेप्यापस्तंबवचनानुरोधात्त्रिमुहूर्त्तात्मकएव
ग्राह्यः।तस्मादस्मिन्कालेयोग्यस्तिधर्मस्मदुक्तएवविभागआश्रयणीयः।ननुद्वेधाविभागेपत्राव

त्रिनाड्युपरिवृद्धिमात्र एव संधिः।तत्रोत्तरेद्युरेव योग इति तत्रापि कालासंभवाद्वचनविरोधस्तुल्य ए
वमेवं।पर्वणो यच्चतुर्थांश इत्यादि कालस्य यागाद्यवगतेर्भवितव्यं।नादेवतद्यागस्य कालान्वयेने
त्याक्षपगंतव्यं।पर्वमात्रोत्तरेद्युर्यागे क्रियमाणेन यागस्य कालान्वय इति।पूर्वेद्युरेव याग इत्यविरोधः।
नन्वेवं तत्रापराह्णसंधावुत्तरेद्युर्यागविधानं विरुध्येत।मैवं।यत्रापराह्णे पूर्वसंधावुत्तरेद्युः प्रतिपच्च
तुर्थांशो यागो न भवति।तथाभूतस्यैवापराह्णस्य च ग्रहणमित्यविरोधः।युक्तं चैतत्।अन्यथा हि मंतका
लेऽतिस्वल्पतदह्नस्तत्र किंचिदूने चतुर्दंशे घटिकामात्र आवर्तनं भवति।तदा तत्रैव तिथिद्वैधे कद
विल्पोऽर्धनाडिकोऽपि चतुर्थांशो भवति।तत्रावर्तनाड्युपरि घटिकामात्रे संधावुत्तरेद्युरेव यागः प्रसज्ये
तान च तद्युक्तं।तत्र हि तत्कालासंभवात्।न यष्टव्यमिति निषेधात्।पूर्वेद्युः संभवाच्चातोऽत्रापराह्ण
शब्दसंकोच एव न्यायात्।आससमाप्त्युत्सर्गाद्दैवकार्यं प्रशस्यत इति वचनात्।प्रातःकालयागविधा
नात्व्यतिरिक्तविषयं भवताप्येतदंगीकार्यं।अन्यथा त्रिधा विभक्तस्याह्नस्तृतीये भागे प्रातरात्मके न व

का० ३७
१४२

तायागांगत्वेन स्वीकृते अतीते यागप्रसंगात्।तस्माद्द्विधा विभक्तस्याह्नः पूर्वापरभागावेव पूर्वाह्णाव
त्रगृहीतव्यौ।तत्रापराह्णादिगते पर्वसंधौ परेद्युर्यागः।पूर्वाह्णगते पर्वसंधौ तदहर्यागः।यत्तु द्वा पूर्वा
ह्णापराह्णयोः संधौ पर्वसंधिस्तदापि तदहर्याग इति प्रतिपादनार्थं मध्याह्नग्रहणं।मध्याह्नश्चात्रवि
पारिभाषिकं मध्याह्नमुत्सृज्याह्नो मध्यं क्षणमेवात्र प्रतिपादयति।अत एव शातातपो मध्यमस
वमेव पठति।पूर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते।तदोपवासः पूर्वेद्युस्तदहर्याग इष्यत इति।।
यत्तु पूर्वाह्णप्रहरणं सार्धं मध्याह्नप्रहरणं।तथा च द्वितीयादपराह्णः सायाह्नश्च ततः परमिति गोभिल
वचनाच्चतुर्धा विभागः।मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः।।मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोऽपि
तादृशः।।सायाह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिःकृत इति व्यासादिवचनात्पंचधा विभागवत्कर्मा
तरविषयः।आश्रितश्चापंचधा विभागः सकलस्तत्र नाप्युदाहृतिर्वक्तुमिरपि नं बधुनि।युक्तश्चेति
स एव स्वीकार्यः।तत्र रात्रिसंधौ पूर्वेद्युरेव यागः।अपराह्णे यथा रात्राविति लोगाक्षिवचनात्।पक्षा

तोउपवस्तव्याः पादह्नायोः नियष्टव्या इति गोभिलवचनात्। नन्वस्तमनादूर्ध्वं पर्वसंधौ चतुर्दश्या
मप्यस्तमयात्प्रागेवासमाप्तायाममावास्यायां कृत्स्नरात्रियोगिन्येतत्रैव देशादि युक्तं। तथादेष
एतां रात्रिमिहावसति तस्मादमावास्या नागते गोनिस्तु विष्टाप्यसमनरत्निति श्रुत्या रात्रियुक्ताया
ममावास्यायां दर्शादिरूपस्य सोमस्य संनतिर्देवैः कृतेत्यस्कत्वात्। न च पक्षादयो निमष्टव्या इति व
चनविरोधः। अहोरात्रव्यापिन्याममपि तस्य संभवात्। न चापराह्ण एव रात्रावित्येतद्विरोधः। तस्य
पौर्णमास्याम् अपि संभवात्। स्मृतित्वेन दुर्बलत्वाच्च। उच्यते। रात्रिशाश्वस्पतिथेरुपलक्षकत्वात्। तद
दकरेवैष पुरस्तान्न ददृशे तान्। तदहरुपवसेदिति क्वचिद्दृशः शश्वस्यादिदर्शनात्। स यत्रैष एतां रात्रिं   का॰३॰
न पुरस्तान्न पश्चाद्ददृशेत। तदहरुपवसेदिति। क्वचिद्दृशः शश्वस्यापि दर्शनात्। स यत्रैष एतां रात्रिं   १४३
न पुरस्तान्न पश्चाद्ददृशेत। इत्यत्र पूर्वस्मिन्नात्रिशेषे पुरस्ताद्दर्शने। उत्तरराज्यादौ पुरस्तादेकस्यामे
व वा पुरस्तात्पश्चाच्चादर्शने [illegible]ध्यः। आद्ये पक्षे याद्दिवामावास्या सैव स्यात्। द्वितीयपक्षे उत्तररात्रावपि त

इयं विद्यत इति सैव न वेत्। अथोच्यते। उत्तररात्रौ प्रतिपदो विद्यमानत्वात्। अस्याः ततो दर्शने प्रतिप
द्यपि भवतीति। स्पाइवकर्मोपाध्यायः। दर्शनं शास्त्रतः प्रतिपद्येव भवतीति। कात्यायनस्तु मार्ग
स्यात्रोषे चाह। अष्टमेऽह्नि चतुर्दश्याः क्षीणे भवति चंद्रमाः। अमावास्याष्टमेऽह्नि ततः किल भवेद
णु इति तदसत्। यदि रात्रिसंबंधादपि शास्त्रतो निषिद्धं सिद्धं। तत उदयास्याक्प्रतिपत्त्वविज्ञेत
षोपवासो न कर्तव्यः। सर्वदिने चतुर्दशी रात्रावपि विद्यत इति। तत्रापि चंद्रसद्भावान्न कर्तव्य एवाउ
केचस्मृतौ। भूतदिने चतुर्दशीमामां कुर्वतीये द्विजाः। विहारं पितृयज्ञं च तत्सर्वं निःफलं भवेदिति। वि
हारः विहरणमिष्यते माइवनीयादेरित्यर्थः। तत्र तल्लोपः प्रसज्येत। तस्मात्पक्षांतो उपवस्तव्याः प
क्षादयोः नियष्टव्या इत्येतदेवयुक्तं। तस्माद्रात्रिसंधौ परेद्युर्यागः। ननु रात्रियोगिन्यामपि चंद्रदर्श
प्रतिपदि त्रिमुहूर्तायां द्वितीयायां त्रिमुहूर्ता द्वितीया चेति वचनात् चंद्रदर्शनाद्यागः। कस्मिन्क्रियते वि
शेषावगमादिति ब्रूमः। यद्यपि रात्रिसंधिशास्त्रं तस्मादहव्यापिन्यां प्रतिपदि सावकाशं त्रिमुहूर्तद्वि

तीयायाग्रास्त्वद्विवासंधौ सर्वे कार्यः। यद्यपि पक्षाद्यो। निषिद्धयाग इत्येतदुपमर्देनैव तदेतद्बाधका-
श्रितदोषाभावः। तथापि रात्रिसंधिग्रास्त्रस्यान्यथासिद्धत्वात्पक्षाद्यो नियम्याग इत्येतदुपमर्देनै-
व तदेतद्बाधकाश्रितदोषाभावः॥ तथापि रात्रिसंधिग्रास्त्रस्यान्यथासिद्धत्वात्पक्षाद्यो निषिद्धयाग इ-
त्यत एवोत्तरदिने याग इष्यते। पर्वचतुर्थांशस्य प्रातः पूर्वदिने प्राप्यमाणत्वाद्यागप्रसक्ताविति मुहू-
र्त्तांशस्त्वियावत्पूर्वस्मिन्नहनि प्रापयितुमपेक्षते। तावद्रात्रिसंधिशास्त्रं दृष्टार्थविषयान्तरमेव वि-
तयति। तच्चोपरिष्टाद्वक्ष्यामः॥ तस्माद्रात्रिसंधौ परेद्युर्याग इति सिद्धं। अपराह्णसंध्यावपि परे-
द्युर्यागः। ननु चतुर्दश्यां चतुर्यामाश्रमायत्र न दृश्यते। क्षीणोनूते प्रतिपद्यत्र कन्यादिक्रियेतिवच-
नात्। पूर्वैव कस्मान्न गृह्यते। तथा च वचनांतरं। चतुर्दशी यामममावास्या न लभ्यते। क्षीणोनूते प्रतिप- का० ३० १४५
द्यात्र चेद्दःस्यात्पूर्वत्रैव कारयेदिति। यद्यपि चतुर्दश्यां यामचतुष्टयव्यापिन्यामावास्या न
लभ्यते। किंतु तदेकदेशव्यापिन्येव तथापि क्षीणोनूते यद्यस्ति तत्पूर्वेद्युरेवोपवास इत्यर्थः। कात्या-

यनेन च। पश्चादप्यदृष्टममावास्येनेष्ट्वापत्रोपवासदिने प्रतिपन्नत्वे विद्धविकृष्टिः प्रायश्चित्तं चैनोक्तमु-
च्यते। तस्य प्रतिपद्द्वितीयासन्नवेत्सुपपत्तिरन्यथासिद्धापराह्णग्रास्त्रस्यात्र बाधो न युक्तः। तस्माद्द्वि-
तीयेहनि यागः। ननु यद्यपि पूर्वेद्युः प्रातः पर्वचतुर्थांशाभावः। परेद्युश्च प्रातः प्रतिपच्चतुर्थांशस्तदाक-
स्मिन्नहनि यागः क्रियते। न तावत्पूर्वेद्युः। तत्र प्रातःकालपर्वचतुर्थांशादिसमावेशाभावेन यागका-
लाभावादपराह्णपर्वसंधिबाधाच्च नापि परेद्युर्यागः। तत्रापि विहितकालाभावात्। अत्र केचिदाहुः। अ-
परेद्युर्यागः कर्तव्यः। पूर्वेद्युः पर्वचतुर्थांशादिकालासंभवात्। प्रतिपच्चतुर्थांशे यागनिवर्त्तकाभा-
वात्। यद्यप्यस्ति निषेधो न कर्तव्यं न यष्टव्यं चतुर्थांशे यागे प्रतिपदः पवितु। राज्ञां सितदिलुपंतिश्रु-
तिरेषा सनातनी। उच्यते। मध्याह्नसंधिविषयोयं प्रतिषेधो नापराह्णसंधिविषयस्तत्रापरेद्युर्यागवि-
धानात्। अपराह्णसंध्यावेव परेद्युर्यागः। प्रतिषेधो नापराह्णसंधिं पर्वांशासंभवात्सामान्यशास्त्रैकवाक्यत्वाच्च नि-
षेधस्य। तत्रैव सामंजस्यं मध्याह्नसंधौ तु पूर्वेद्युर्यागविधानात्। प्रतिपच्चतुर्थांशगंधोपि नास्तीति निष-

मेतत्त्वच प्रतिपच्चतु२

धानुपपत्तेः। अत्रोच्यते। पक्षद्वयोः नियष्टव्या इति तत्र यागस्य विहितत्वाद्विहिते प्रतिषिद्धे च विक
ल्प एव स्यात्। उक्तं च भट्टवार्त्तिके। यद्यपि प्राप्यलिंगं विधिविधिना तुल्यगोचरः। प्रत्यवायमतिक्रम्यादि
त्याश्रयणान्नतत्। दृष्टौ विधिनिषेधौ हि तुल्यवीर्यैकगोचरौ। विकल्पेन तयोरेकप्रामाण्यमनुतिष्ठतो
ऽङ्गीकृतनिषेधानिराकृते चोदनालक्षणधर्मेन दोषोऽस्यानुतिष्ठतामिति। न च पक्षद्वयोः नियष्टव्या इ
त्यस्य प्रतिपदागतचतुष्टयेऽपि साधारण्येन सावकाशत्वात्। न यष्टव्यं चतुर्थांश इत्यस्य प्रतिपच्चतुर्थां
शैकविषयत्वेन निरवकाशत्वात्। विकल्पो न युक्त इति वक्तव्यं। यतः सामान्यविषयस्यापि विधेर्विशे
षे निषेधेन नासत्वं बाध्यः क्रियते। तदधीनामलक्षणत्वात्। तदुक्तं वार्त्तिककारैस्तन्त्रटीकायां। अस्त्येतदुब
लो विधिस्तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो न वर्ततीति प्रतिषेधप्रदेशेनारम्भविधाने चेत्यत्र वक्त
त इति तस्माच्छास्त्रप्राप्तस्यासंतं प्रतिषेधासंभवात्। नानुयाजेषु येयजामहे करोतीति विधिकल्पक
ननु तद्वदेव तद्धि पर्युदासाश्रयणात् विकल्पः परिहर्तुं शक्यते। तथाहि साक्षाच्चोदितकालस्य पर्वचतुर्थां

का॰नि॰
१४५

शप्रतिपदाद्यनागत्रयात्मकस्य प्रातःकाले दिनद्वयेऽपि विद्यमानत्वेन यागानुपपत्तेर्नित्यचोदित
स्य कर्मणः परित्यक्तुमयुक्तत्वात्। प्रयोगवचनसामर्थ्येन किंचिद्गुणेऽपि काले यष्टव्यमित्यपेक्षिते त
पूर्वेद्युः प्रातःकाले पर्वचतुर्थांशाभावेऽपि पर्वमात्रसद्भावाद्यष्टव्यं। अथवा परेद्युः प्रतिपदाद्यनाग
त्रयनाभावेऽपि प्रतिपन्मात्रसद्भावाद्यष्टव्यमिति। प्रतिपच्चतुर्थांशे याहिकी प्राप्तिर्नद्वैरपि वारयितु
शक्यते। तस्मात्क्षणस्य पर्युदासप्रतिपादनेऽपि विकल्पस्यापरिहार्यत्वाद्वरं मुख्यार्थत्वाय विकल्प
प्रसक्तावपि प्रतिषेधकवाचक एव नञस्तु। किंच पर्युदासासंभवादपि प्रतिषेधः। तथाहि। यदि ता
वत्प्रतिपच्चतुर्थांशवर्जितत्वाविशेषात्। अथ चतुर्थांशवर्जितायां प्रतिपदि यजेतेति तर्हि न हि
पर्वचतुर्थांशे यागो न प्राप्नोति। अथ प्रतिपच्चतुर्थांशवर्जिते चोदिते काले यजेतेत्युच्यते। तत्रापरा
ह्णपर्वसंधावुत्तरमहश्चोदितकालः। तत्रापि प्रतिपच्चतुर्थांशमेवावशिष्टमिति न पर्युदासेन कु
त्रापि न्यायविधीयेत अथ नो यंतमादित्यमीक्षेतेति वाक्यार्थेन नञ — मीक्षणसंकल्पवद्यागसंकल्पो

विधीयत इत्यत्रोच्यते। युक्तं तत्र रात्रौ ग्रामगमीक्षणं पर्युदस्यत इति। इह च पराह्णपर्वसंधौ परेद्यु
र्यागः शास्त्रप्राप्त इति न पर्युदासितुं शक्यते वा। तत्र यथा वोदकपात्रस्य पर्यवरणस्य नार्थ्यं दूषणं
त इति प्रत्यक्षोपदेशेन बलीयसा पर्युदासः। तथा शक्यते वक्तुं। उभयोरपि प्रतिपच्चतुर्थ्योः शापक
पर्युदासयोरुपदेशशास्त्रत्वात्। न च यथा यागमात्रे प्राप्तस्य ये यजामह इत्यस्य यागविशेषेष्वनूया
जेषु पर्युदासस्तथात्र संभवति। न हि पर्युदासशास्त्रस्य श्रुतित्वेन बलीयस्त्वं श्रुतिवाक्यैः। तथा हि॥
नाध्याकारेण चतुर्थ्यां निरोधः कात्यायनवचनादिस्फुटतानवष्टव्यं चतुर्थ्यामिति लोकपठित
तस्मा श्रुतिमूलानि प्रायेणाश्रुतिरेषा सनातनीत्युच्यते। ननु पर्युदासवचनेन न प्रसवाय श्रवणेन
निषिध्यस्य दृष्टतापराह्णादिपर्वसंधिवचने वर्तमानोपदेशत्वेन कस्य विधित्वादिलंबप्राप्तौ वैयर्थ्यमने
तादवे। प्रतिपिद्वा पर्युदस्यते चतुर्थीशेषो वा योगो वेति संदेहो यावता विलंबेनापनीयते। तावतैतरत्रा
पि वर्तमानोपदेशो वा पंचमलकारो वेति संदेहोऽपनीयत एव। पर्युदासेन श्रोपलक्षणत्वमित्य

का०दे० ०
१४६

धिको दोषः। तस्मात्पर्युदासासंभवात्प्रतिषेधोऽवश्यंभावी। एवं विकल्पे स्थिते मध्याह्नसंधिविषयं
विधिरिति यतो लोभाक्षिणा श्वोऽह्नापराह्णसंधिविषयेन श्वोऽन्तरदिने योपयोगव्यवस्थाऽकृता। श्व
वोऽक्रेचाथ मध्याह्न इत्यादिनाप्येतत्पर्वणो यश्चतुर्थ्यामिति वाक्यात्तदपि प्रतिपच्चतुर्थ्योर्योगं न निवा
रयति। तथा हि। न तावच्चतुर्थीमंशं निषेधति। अविहितत्वान्निषेधेनाप्रतीते। नापि पूर्वेषामन्येषामंशा
नां विधायकत्वे। नापीतरमंशं निवारयति। विधिविनक्तशून्यत्वेन विधिवत्तस्याप्रतीतेः। ना
प्युपरिदेवेत्यो धारयतीति चद्विधिः कल्पते। सिद्धवद्धेतुवादास्प्रमाणांतरविरोधाच्चादपयः कल्पते।
इह तु पर्वणो यश्चतुर्थ्यामित्यत्र प्रतिपद्भागत्रयविधानेन चतुर्थ्यामष्टत्रिंशद्धटीजनेकल्पमानेनय
ष्टव्यं चतुर्थ्यंशो चतुर्थ्याः स्यापाह्निकान्यनुज्ञाशास्त्रं विरुध्येत। नच वाच्यो विज्ञेय इति विधिप्रत्ययः। अ
द्रितस्तिद्वत्स्वप्रत्ययदर्थेनापि घटमानत्वात्तु नचैवा विधिप्रत्ययः। तथाप्यनपेक्षितेज्ञानानन्तु यज
तो ह्यथनिर्वपमालनति। वदनपेक्षितेन धातुगतोऽपि विधिरिष्टमर्थं विधत्त इत्युच्यते। सापि क्लिष्टकल्प

नैवेति न विस्पष्टं चतुर्थ्यन्तानुज्ञाज्ञास्त्वबाधा न सामर्थ्यात् तथाहि धात्वर्थः कस्मान्निधीयते । न द्रव्येना
वधावत्वेन्यत्र विधीयते । धात्वर्थो वा अन्यद्विधीयते । यत्रान्यद्देवतान्यत्र विधीयते । तदिति क्रुष्ट । अ
थत द्रोपपरिहारार्थं धात्वर्थज्ञानमेव विधीयते । कथं तर्हि कालस्य प्राप्तिः । अथ यज्ञानं विधीयमाने
ज्ञेयसंस्काररूपमिति ज्ञानसंस्कार्यस्य कालस्य कालस्य यागेन विनियोगमन्तरेणानुपपद्यमानं विनियो
गविधिं कल्पयतीत्युच्यते । नत्र संस्कारानुपपन्ना संस्कार्यविनियोगकल्पनायाः स्वधिकरणनिराकृत
त्वात् । ननु सोमानावेष्टीकानन्निषुणुयादिति न स्येन हंस पयच्छेदिति । न ज्ञानिषवसंस्कारायथानुप
पन्ना फलं च मसस्य इष्टीकानां च यागे विनियोगो यथा कल्पितस्तथेहापि ज्ञानसंस्कार्यस्य कालस्य का॰ह्र॰ १५७
विनियोगविधिः । कस्मान्न कल्पत इत्युच्यते । युक्तं तत्र सोमेन यजेतेति ज्ञातविनियोगस्य सोमस्य सोम
मभिषुणोतीति । सोमं चमसं इति च मसाख्यापनस्यापविषयसंस्कारविधिना विरुध्यत इति सिद्धेः ।
न ज्ञानिषवयोः सोमसंस्कारत्वेन रूढसंस्कारस्य द्रव्यान्तसंस्कारे विधाने न सुत्राक्यमेव तस्य द्रव्यस

सर्वद्रव्यसमानकार्यत्वकल्पने । इह त्वनिरूढो ज्ञानसंस्कारः । संस्कार्यस्य कालस्य तत्समानान्तरलभ्यविनियो
गो द्वितेन निर्वहतीति सत्त्वद्रकरणन्यायादितियुक्तः मेव । किं च सोमद्रव्यस्येव निर्युक्तस्य कदाचिदलभ्यमानस्या
पादेन प्राप्ते नियममात्रं क्रियते । इष्टीकानभिषुणुयादिति न तु पूर्वो विनियोगः क्रियते । न त्विह विनियोजको
तरेण विना सिध्यति । तस्मात् समुद्रं मनसा ध्यायति । दिव्यं च मनसा ध्यायतीति वदास्तु कारकत्वे मे कोका
लज्ञानविधानस्येति । न कालेप्यापकत्वेन वस्तु वा ज्ञानसामग्री सा निष्पेज्ञानस्यार्थसिद्धत्वेनाविधेयत्वा
त्कालविधित्वमेव । तथापि यागकाल इत्येकस्मिन्नपि किं चिदुद्दिश्यते । किं तु विधीयत इत्येतदनुपपन्ने
मेवापद्येत द्वंगैः स्विष्टकृतं यजतीति न वषट्कर्तुः प्रथमभक्ष इतिवच्च यथाहि वषट्कर्तृविशेषणस्येणाप
प्यन्यसंबंधो विधातुं न शक्यत इति । तथा पदान्तरोपात्ते पर्व चतुर्थ्यादि विशेषितस्य कालस्य शब्दार्थ
स्य यागकाल इति समासपदैकदेशस्य प्रतिपादितस्यैकार्थ्यान्तरार्थत्वेन सहपश्चात् संबंधो विधीयत
इति नोपपद्यते । समस्यमानपदयोः परस्परसंबंधान्यान्याकारान्तरसंबंधानुपपत्तेः । परिपूर्णपदपदान्तर

माकाङ्क्षतीतिन्यायात्। अथ पर्वणो यच्चतुर्थ्यन्याः प्रतिपदः स्यादिति। पदान्तरोपात्तस्य कालस्य यागेन सं
बन्धो विधीयत इत्युच्यते। तथापि यागकाल इति समासपदगतेनोपसर्जनीभूतेन यागेन सह संबन्धः प्राप्नो
ति। किं च फलेन वा कारकेण वा क्रियाणां संबन्धो भवति। न च कालो यागस्य फलमसाध्यत्वान्नापि कारकं
कारकविभक्तिनिर्देशाभावात्। ननु द्विप्रतिपदं यजेतेतिवत्सर्वचतुर्थ्यादेरधिकारणविभक्तिनिर्देशो
दृश्यते। तस्मात्सप्तम्यधिकरणार्थ॥ कस्मिन्यागे इत्यपरः श्लोकः॥ अस्तु वा कालविधिस्तथापि प्रति
पदाद्यनागतत्रयविधानेनोपपद्यते। तथाहि इदं कालद्वयमुपात्तं पर्वचतुर्थ्यंश प्रतिपदाद्यनागतत्रयं च
न चोभयमेकेन वाक्येन विधातुं शक्यते। यागानुवादेन कालद्वये विधीयमाने वाक्यभेदप्रसंगात्॥
अथ कालनिमित्तस्वरूपत्वात्कालयोर्योगो विधीयते। न तु योगे काला इत्युच्यते। तर्हि सुतरामेव वा
भेदः। तत्र कर्कलयागसंबन्धप्रतीतेः॥ ।अथ प्रतिपदं समार्गेषु विधीयमानेष्वपि यथा न वाक्यभेदस्तद्व
दिहापि प्रतिकालं यागे विधीयमानेऽपि न वाक्यभेद इत्युच्यते। तत्रोक्तं। तत्र यद्वत्संमार्गयोरेकेनैव यत्नेन।

संबन्धविधायश्रौतेन विधिनोत्पर्यवसिते समार्थिका व्यापारभेदः प्रतिशब्दमुपजायमानोऽपि न
वाक्यभेदं करोतीति। इह तु पर्वचतुर्थ्यां प्रतिपदाद्यनागत्रयस्यैकेन श्रौतविधिना स्वार्थेण यागसंबं
धो येन शब्देन विधीयते। तथाविधः शब्दो नास्त्यनयोः पृथगुपात्तत्वात्। तस्मात्प्राप्तस्य यागस्या
नैकस्मिन्संबध्यमाने रेवतीवारवन्तीयाकरणे पौर्णमास्याधिकरणादिवत्पूर्वपक्षवद्वाक्यभेदः
ननु तद्देवतद्विशिष्टविधानेन वाक्यभेदपरिहारः कस्मान्नेष्यते। उच्यते विशिष्टविधाने ह्यप
गम्यमाने यागान्तरापत्तेर्दर्शपौर्णमासयोरयं कालविधिः सिध्यति। दर्शपौर्णमासयोः शास्त्रान्तर
प्राप्तयोरेकेन वाक्येन कालद्वयसंबन्धं वाक्यभेदे उक्त एव। अथार्द्रमंतरवेदि मिनोत्यर्द्धं बहिर्वेदि
रित्यत्र लक्षणया वाक्यभेदपरिहार इत्युच्यते। तत्रोक्तं। तत्र संसंधिदेशलक्षिते अर्थप्राप्तेनो
नरुवेदिशब्दार्थयोरनुवादसंभवात्। इह तु संधिकाललक्षितेऽपि न पर्वचतुर्थ्याः प्रतिपदना
गतयोः स्वानुवादः सिध्यति पूर्वापरयोरप्युपात्तयोर्विषययोरप्राप्त्यभावात्। किं च संबन्धविधा

नस्य किल लक्षणाक्षेपेण संबंधो यजेतेति श्रुत्या संधिकाले विहितोऽपि अपायो योगोप्य इति तत्समीपकाल
लक्षणायां प्राप्तायां किं पर्वणः समीपकाल इत्यपेक्षायां पूर्वापरसामीप्यावधी विधानार्थं वाक्यमा
गतमिति वक्तव्यं । यदि पर्वचतुर्थ्यादिविधायकमेतद्वाक्यं न वेत्सर्वणो यश्चतुर्थांशस्तस्याः प्रति
पदस्थ इति । तदपि इदानीमनुपपद्यमाने यदि पुनरप्येवं संधिगतयागोऽनुगच्छेदिति न हि किं तेन त्वने
न भवति । तस्माद्योगस्य कालद्वयविधाने संबंधवाक्येनैवोऽपि परिहार्यः । अथ यो योगकालमनूद्य
तस्य पर्वणश्चतुर्थांशस्त्वाद्यः प्रतिपदस्त्वयोंऽशस्त्वेति विधीयते । तर्हि यागकाल इति विशिष्टानुवादा
देकस्माद्वाक्यभेदः । पर्वचतुर्थांशस्य प्रतिपदश्चाद्यंशस्य वानूद्य तयोरुभयोर्यागकालत्वे विधीयते
तर्हि पर्वणो यश्चतुर्थांश इति विशिष्टानुवादाद्द्वेषवाक्यभेदः । आद्यः प्रतिपदस्त्रयोंऽश इत्यपि
विशिष्टानुवादाद्द्वितीयो वाक्यभेदः तयोरुभयोर्यागकालत्वविधानात्तृतीयो वाक्यभेदः पर्वचतुर्थां

का०३०

शस्य प्रतिपदश्चाद्यांशस्य च विधायकत्वं न तदा तावदनुवादोऽपि न त्वाक्येनैकत्वमित्यतो दोषः । किंच कालस्या
नुपादेयत्वात्कालविधिपरेषु कालस्योद्देश्यकर्मत्वेनोपादीयते । तर्हि यदि पर्वचतुर्थांशमुद्दिश्य यस्य या
गकाल इति विधीयते । तर्हि विधेयस्य यागकालस्यापि कालरूपत्वेनानुपादेयत्वादुद्देश्यत्वमेव प्राप्नो
ति । न चोद्देश्यद्वयस्य मिथः संबंधः संभवति । न चानयोः समुच्चयीकारणार्थं एकः शब्दोऽस्ति येन समु
द्वयस्य यागसंबंधविधानाद्वाक्यभेदः परिह्रियते । ननु याग इति काल इति कालशब्देनोभयरूप
तया परामृष्टस्य यागसंबंधो विधीयते । यागकालशब्देन यागकालशब्दयोः संबंधविधानमशक्य
मित्युक्तत्वात् । किंच यागकालशब्देन पर्वचतुर्थांशादिकालोऽनूद्यते उत तेनैव शब्देन यागस्य यागका
लो विधीयते । तदा वाजपेयाधिकरणे वैरूप्यमापद्यते । न त्वेकस्मिन्नेव वाक्ये एकमेव वस्तु तद्वाक्यगतमेव
किंचिद्रूपेणानूद्यते किंचिद्रूपेण विधीयत इति संभवति । इति वैरूप्यपरिहारार्थं पर्वचतुर्थांशपदा
दिपरामर्शमन्तरेण शुद्धस्यैव कालस्य यागे संबंधो विधीयतेत इत्युक्तं । कालसंबंधविधानमंरेण

पि सिद्धे। अयप्रयोगकालस्तु विशेष इति तच्छब्देन पर्वप्रतिपन्नामानाम्परामृश्य प्रयोगसंबंधो विधीयते। त
त्रापि पूर्वोक्तवैरूप्यतदवस्थमेव। किंच सदस्य यत्तच्छब्द एकवचनेनैतस्य उत्तराकालनामानम्परामर्ष्टुं न श
क्यते। अथानुषंगन्यायेन प्रत्येकैकं परामृश्यत इत्युच्यते नैवं। एकस्मिन्वाक्ये प्रतिपदमनुषंगेण
कस्यानेकेषु संबंधेषु गुणप्रमाणेन वाक्यभेदप्रसंगात्। किंचैकवचनांतस्य सदस्य तच्छब्दस्य आ
द्याः प्रतिपदस्त्रयस्तत्र बहुवचनं भवति निर्देशोऽनुषंगोऽपि नोपपद्यते। यथा गच्छतामित्यस्य तय
त्रैरंगीनीत्यत्रानुषंगः। किंचायमदोनिसानिसंबंधा सर्वेणोपश्चतुर्थांश इति पर्वचतुर्थांशो यच्छब्द का॰ इ॰
म्रवणास्यैव तच्छब्देन परामर्ष्टुं युज्येते। न प्रतिपदन्तागः। अथ तत्रापि शीघ्या किमपर्ते। अतोऽपि क्ष १५०
नव्यादेतयोः श्रुतेश्शीघ्रसंप्रत्ययात्तु नरधिन तस्य परामर्शः। न च तु वाध्याहारे तथापि ये प्रतिपन्ना
समुदाय एकवचनांतेन तच्छब्देन परामर्ष्टुं शक्यंत इत्युच्यते। तत्र। एकाचर्मेकेदं मंतरेणासमुदा पा
यपदेतार्थेकेन तच्छब्देनोपादानां समुदायत्वमित्युच्यते। यथा विदवाके पौर्णमासा

दिवाशेपादानामाग्नेयादीनां समुदायत्वसिद्धिर्यथावाराजसूयशब्देनोपादानादनुमत्यादीनां मल्हादीनां प
वित्रादीनां च यागानां समुदायत्वसिद्धिः। तत्र तच्छब्दोपादानात्समुदायत्वं समुदायत्वादेकवचनांतशब्दोप
दानमितीतरेतराश्रयापत्तेः। आग्नेयादीनां चैकशब्दोपादानव्यतिरेकेणाप्येकोपाधिसंबंधो विद्यते। ए
वायहुतौ समस्तो कालविशेषप्रयोगित्वेन। मतद्रुक्तं एककालाभिसंयोगाद्भिन्नानामपि कर्मणां समुदाया
र्पणं शाक्यमेकदेशास्थवृत्तवदिति। एजस्तयेऽपि प्रकृतत्वविशिष्टयागत्वोपाधिसन्नावात्समुदायत्वेन
विवक्षैकफलसाधनाबाननत्रापि प्रकृतत्वविशिष्टकालत्वोपाधिनाचात्। पर्वचतुर्थांशप्रतिपन्नाग
त्रयस्य समुदायत्वेन विवक्षितमेवं। किं पदार्थरूपेणैकालयोः प्रकृतत्वं किं वा क्रार्थरूपेण। न तावद्वाक्या
र्थरूपेण। नहि पर्वणो यश्चतुर्थांशस्तत्रैकस्य विदेकस्य पदस्यार्थः। पर्वचतुर्थांशः प्रतिपन्नागत्रयं वा
तस्मात्प्रकृतत्वावच्छेदात्समुदायत्वं पर्वप्रतिपन्नागानां। ननु यागसाधनेष्वेकोपाधिसन्नावात्समुदाय
त्वेन विवक्षितेनैतदेवं यागसाधनवत्समुदायत्वादेकवचनांततेन तच्छब्देन परामर्शः। तच्छब्दपरामर्श

प्रागेव विधाने यागविधानाद्यागसाधनत्वे यागसाधनत्वात्समुदायमिति च कथमुपपत्तिः। अत एकैकावच्छेदं
तरेण समुदायत्वानुपपत्तेः। कालद्वयप्रतिपादकवाक्यद्वैक्ये कालद्वयसमुदायलक्षणमत इत्येतदपास्तं॥ अ
थ पर्वणो योत्तरा ये तु कर्तव्येष्टिर्जातिथिरिति पर्वचतुर्थांशयागसाधनत्वावगमात्प्रदाद्यो नियम्य त्वा
न पश्चम्यं चतुर्थांशा इति वाक्यान्तं चतुर्थांशोऽवर्जितः प्रतिपद्भागत्रयस्यैवैश्च यागसाधनत्वावगमात्पूर्वणो य
श्चतुर्थांश इति वाक्यमिति। प्रागेव कालावयवानां यागसाधनस्य लक्षणस्योपाधेः सिद्धत्वात्पर्वणो यश्च
तुर्थांश इति वाक्येनैषां समुदायोपादानेनानुपपन्नमिति न वक्तव्यापत्तिरुच्यते। तदयुक्तं। एकैकानेकेषु
कालभागेषु यागसाधनतया विधीयमानेषु वाक्यभेदापत्तेः। तत्परिहारार्थं समुदायरूपपर्यवसेकत्वापत्ति
र्विधेयानां कालभागानामपेक्षिते यागसाधनत्वमेव विधातुं। तत्र यदि परमिदानीं समुदायपत्तेः प्रागेव वाक्यां
तरैः कालभागानां यागसाधनत्वे सिद्धे किमिदानीं समुदायत्वापत्तिः क्रियते। किं च कालद्वयमिदानीं विधीय
माने किं समुच्चयेन विधीयते। किं विकल्पेन तावत्समुच्चयेन कालद्वयसंबंधः। तथा सत्कर्मयोः कालयोर्या

गानुष्ठानप्रसंगात्। नापि विकल्पेन विकल्पो हि विरुद्धार्थयोः शास्त्रयोः परस्परतो विधानसामर्थ्यमा
विर्भवति। नितरां नावादिना विरुद्धयापारचतुष्टयद्वयेन क्रियेत न संपद्यमानोऽपि गत्यंतराभावात्स्वी
त्वे वाश्रीयते। तत्रैकेनैव विधिना नानावत्क्रियोऽनुष्ठीयत इति किमेतत्। वाक्यभेदापेक्षे रूप्यापत्तेः। रा
वे कालद्वयाभ्युपगमेन सम एव तद्युक्तं। किं च शातरात्मकस्तु नोयोपि कालोत्रैवोपात्त इति। तस्मिन्ना
पि विवक्षमाणे पूर्वोक्तेषु पक्षेषु सुतरां वाक्यभेदद्वयोरोपात्सं न वेति। तस्मादतिमंदत्वाक्तिवा
दस्य वचनस्य प्रतिपद्भागत्रयविधानमुखेन चतुर्थांशावृद्धासकत्वे किं तर्हि नेन वचनेन क्रियते। न
किं विधिक्रियते। किं तु पर्वणो योत्तरा ये तु कर्तव्येष्टि पर्वचतुर्थांशो शासे पक्षाद्ये नियम्या इति प्रतिप
द्विप्रासायां प्रातर्यजध्वमिति प्रातःकालेशोभने पञ्चम्यं चतुर्थांश इति पूर्वोक्तप्रकारेण प्रतिचतुर्थां
श्य विकल्पो न निषिद्धे वैकल्पिकनिषेधेन चक्रितो यावान्कालरात्रिरविनिश्चीयते। नानाशास्त्रप्रामाः सं
सर्वः पिंडीकृत्यैकेन याज्ञिककारिकावाक्येन कथ्यते। स्मरणसौकर्यार्थं पर्वणो यश्चतुर्थांश इति। यथा

स्पोनवेदिमुद्दंतित्यादिनानाम्नास्य चाग्नेऽर्थः। पिंडीद्गत्वानूद्यते एतावेलिदत्त्वा पञ्चात्तुधानीति। यथाहिवाग्नि
ककारः स्फाटेरुतस्त्रिविधः कार्यंत द्वद्वनादिनिस्तत्र पञ्चात्तुधानीति शास्यामेवानुकीर्त्यत इति यथाप-
र्वणोऽमावास्यचतुर्थ्योऽस्त्राइसपिनानाम्नास्य पिंडीद्गतानुवादः। ननु नः कस्य विकालस्य विधायकमेतत्। पौना-
र्णाः प्रतिपच्चतुर्थ्योऽस्त्राइस्परन्। किं वा क्वामनीषिनिरितफक्कग्राट्टेन वाक्यांतरेरुक्त एवार्थः। तस्मात्त्वे
रणसोकार्यपर्योमेकत्रपिंडीद्गत्वानुद्यते। नन्वेदूर्वोर्ष्पोन्निन वचनेन न विधीयत इति ह्रस्वपिति। तस्मात्त्वनि
पराधनागत्रपसैव यागकालत्वमिति विधानात्त्रयष्टव्यं चतुर्थ्यांशाङ्स्यनेन निषेधादपि चतुर्पोन्नास्य
पाह्निकशास्यमनुज्ञानात्त्रपापन्नास्तेन मयागकालत्वे। प्रतिपच्चतुर्थ्याऽस्त्रास्य। पर्वैवरूपमनेन वचनेन। का०दे० १५२
विधायकेनेनवितव्यं। तर्हि श्रातर्विधानमस्तु। सर्वमन्यद्वाक्यांतरशास्त्रमनूद्यते। ननु प्रातःकालोपिश-
तजध्यमितिम्नास्यशास्त्र एवेने षड्दोषः। नहि पौरुषेयवाक्यानां वेदमूलत्वादि धूपराधेन विधाटत्वेविर-
न्यते। सर्वस्मृतिनामशास्त्रामाण्यप्रसंगात्। येषामपि वक्तृज्ञानानुमापकानि पौरुषेयवचनानि तेनपिक-

र्यविसौरुषेयवचनेषु विरुद्धवादविवादं कुर्वन्त्येव। न पुनः सर्वानुवादत्वमन्ये। येनैवमाहुः। पश्चोदनालक्ष-
ण एत्यनूद्य स धर्म इति विधीयत इति। ननु यदि वाक्यांतरशास्त्रोऽयं पर्वो विधातुं शक्यते। तर्हि पर्वचतुर्थ्योऽशा-
दिरपि कस्मान्न विधीयत इति। उच्यते। न पर्वचतुर्थ्यादि वाक्यांतरशास्त्रमिति नाभिधीयते। किं चैनेन कवि-
धानेवाक्येनेदनया वाक्यांतरशास्त्रत्वेन कथं विहत्तुवदित्तमपि शाक्यमान्न विधीयते। ननु यदि एक एव
विधातव्य इति पर्वचतुर्थ्यादि विहितत्वात्। अतः कालो विधीयते। तर्हि विपरीते कस्मान्न भवति। पर्वणो
यश्चतुर्थ्यांश इति चतुर्थ्यांशस्य यद्वक्ष्ये पवं धाटविधेयत्वात्। प्रातःकालस्तु तदमावाद्विधीयते। किं च पर्वच-
तुर्थ्यांशस्यास्याघाः प्रतिपदस्त्रयइस्येतद्विहितस्य यागकालः स इति तच्छब्देन परामर्शाइस्यपरः। तस्यान्। किं च
योनिवहेतुना वाक्येन इतयाह्निककालरात्रितयामषधीयते। तेनैव पर्वचतुर्थ्याद्यादिरेकोपि कालो न वि-
धीयते। तथा हि पर्वणो यश्चतुर्थ्यांश इति त्रय एते स्वर्ष्याः। किं तेषामरुणैकहायनीन्यायेन प्रथमं क्रियया
सह संबंधमनूद्य पश्चात्सार्ष्टिकः परस्परं वंधः। आहोस्वित्प्रथमं परस्परं संबंध इति यदापि प्रथमं क्रिय-

यासंबंधः। तथापि किं विशिष्टविधानस्यायेन क्रियया संबंधः। अशेषक्रियानुवादेन तेषां संबंध इति। यदि तावद्विशिष्टविधानं तथा सति कर्मांतरत्वापत्तेः। न दर्शपौर्णमासयोरेककालविधिः सिध्यति। अथ क्रियानुवादेन पर्वणश्चतुर्दश्याश्च संबंधो विधीयते। तदाप्यशेषक्रियानुवादेनानेकगुणविधानादिकं स्तावदस्यानेदस्तु न स्तः। तेषां परस्परसंबंधो विधीयते। वाक्यभेदः प्रथमं परस्परसंबंधं विधाय पश्चात्क्रियासंबंधविधानेपि स एव दोषः। अथवा वाक्यभेदपरिहारार्थं चतुर्दश्यादिविशेषेणमनादृत्य पर्वमात्रस्य यागसंबंधो विधीयते। तर्हि पर्वणि यदा कदाचिद्यागः प्राप्नोति। चतुर्दश्याग्रहणं च विधित्वेनानुवादत्वेन वानुपपद्यमानं व्याहन्येत॥ ननु पर्वणि यदा कदाचिज्ज्ञानः कदाचिच्चतुर्दश्यपि यजत इत्यनुवादः संभवति। नैतदेवं। पाक्षिकानुवाद स्यान्याय्यविदामसंमतत्वात्। अथ चतुर्दश्यायागयोः संबंधो विधीयते। यद्यपि कस्य विषयस्य च यस्यांशो यागार्थ इत्याकांक्षायां नन्वनिलषितोऽर्थः संभवति। नन्वंशविधानस्यांशानाविनानुपपत्तेरंशानेकस्मिंश्चिदंशे सर्वे बुद्धिस्थः सर्वरूपो विशेषः किमिति स्यन्यते। उच्यते। बुद्धिस्थोपि विध्यसंस्पृष्टो न सिध्यति। अथ यदि विधिनास्पृ

का०द०
१५३

श्यते। तर्हि तदेवानाकविधानमापद्यते। ननु विधिनास्पृश्यमानोऽप्यर्थोऽस्पृश्यते। न श्रुत्या। न तत्रानेकविधान दोषः। नैवं। नत्वनेनांशविशेषेण विनांशविध्यनुपपत्तेः। येनार्थादिममेवांशविशेषं स्पृशेत्। न हि साधारण्यानुपपत्तिरभिधानमात्रेण बुद्धिस्थविशेषपर्यवस्यति। तथा सति सर्वत्र गुणविधेरुक्तादृष्टप्रसंगात्। सोमेन यजेतेति। यागमात्रं विधाय विधेर्यापर्यवसितेर्या साधारणीदृशाकांक्षा सा विधानमंतरेणैव बुद्धिस्थद्रव्यविशेषे सोमपर्यवसानेति कथं विशेषविधानं स्यात्। यत्रापि चैककर्मण्यनेकगुणविधानाद्वाक्यभेदः प्रसज्येत्। तत्राप्येकगुणविधानमेवास्तु। इतरस्तु गुणविशेषः सामान्यानुपपत्त्या प्राप्य इति वक्तुं शक्यत्वात्। नन्वेवं तर्हि पर्वणि शोतुरीये तु कर्तव्येष्टिर्द्विजातिभिरिति वाक्येन कथं पर्वचतुर्दश्यो यागाय विधीयते। तत्रापि सर्वेषामंशानामविशिष्टत्वात्। उच्यते। पर्वणि शेतुयेरी इति शब्दांशरूपपदार्थद्वयं परस्परसंबंधावसिष्टमेकीभूतं यागाय विधीयत इति विधेयभेदाभावान्न वाक्यभेदः। ननु पर्वणः शोतुरीय इति पर्वशयोः परस्परसंबंधोऽपि विधिव्यापारमंतरेण न संभवति। संस्नं न सिध्यति। किंतु विध्यंतरमेवानयोः परस्पर

संबंधविधायकमस्ति। तद्यथा। पंचदश्याः पादइत्यनयोः संबंधो विधीयते। नन्वयं पंचदश्याः आद्यपि पाद
यागः प्राप्नोति। अथ पुरः पाद इति विरोध्यते। नहि वाक्यभेदः। नैव दोषः। संधौ यजेतेति संधिकालस्य यागा
र्थस्य विहितस्य योपपत्तौ संधिसमीपवर्त्तिनि काले तत्प्रयोगित्वे क्रियासमीपकालो लक्षितः। किं नाडिकाभिः
पंचदशस्तिथ्य इति तिथिर्वत्सरे स्थायां पंचदश्याः पादः सामीप्याविरोध्याकांक्षा परिहर्त्तुं विधीयमानसामीप्यावच्छे
देन संधिप्रत्यासन्नतर एव सिद्ध्यति। न दूरवर्त्ति। नन्वत्र वाक्येन केवलं पंचदश्याः पदयोः संबंधः प्रतीयते। किंतु
यागसंबंधोऽपरः प्रतीयते। सत्यमेव। किंतु पर्वणोंऽत्योत्तरीये तु कर्त्तव्येष्टिरिति वाक्येन विधीयमानेनान्यते। आ
गामिन्या इति लिंगोरनुवादसंभवात्। तस्मात्संधेर्विधीयते। तस्य पर्वोत्तरस्योत्तरीयत्वमविहितमपि संबंधि
ज्ञानस्याक्षिप्तमनूद्यत इति। एवमेवोक्तं। पर्वणो यश्चतुर्थोंऽश इत्यनेन यातः कालसंबंधमात्रं विधीयते। सर्व
मन्यदनूद्यते। तस्मात्किंचिदन्यनेकार्थविधानाभावान्न वाक्यभेदः। ननु पंचदश्याः पादस्य संबंधो वाक्यांतर
विहितो यागसंबंधविधानकपरे वाक्ये वाक्यभेदं न करोतीति। यद्यप्येतावता हि पर्वणोऽपि यश्चतुर्थांश इति

का॰ वे॰ १५४

वाक्येनापि पंचदश्याः पादस्य यागसंबंधो विधातुं शक्यत एव। सत्यं शक्यते। किंत्वसौ विशिष्टकालो यागार्थविधातः
व्यः। स च विशिष्टस्यांतरात्मकस्य कालस्य विधानेनापि वाक्योपपत्तौ न युक्तः। विशिष्टत्वस्य वाक्यांतरसंपादित
त्वेन विशिष्टविधाने वाक्यभेदे परिहृतेऽपि स्वरूपमात्रविधानापेक्षया किंचिद्विधिगौरवस्य परिहार्यत्वाद्वि
शिष्टापादकवाक्यांतरसापेक्षत्वात्। यत्र तु स्वरूपमात्रविधायनयोगं किंचिदुपात्तं नास्ति तत्र गत्यंतराभावाद्विशि
ष्टत्वमपि यागं विधीयत एव। यथा पर्वणोऽन्त्योत्तरीये तिथिरिति। ननु पदिकालनागयोर्विशिष्टत्वमेकेन वाक्येन क्रिय
यते। तस्य विशिष्टस्य यागसंबंधो परेण वाक्येन। तर्हि तेनैव प्रकारेण प्रतिपाद्यतां यागत्रयस्य यागसंबंधः कस्मा
न्नेष्यते। तथाहि। पंचदश्याः परः पादः प्रज्ञादेः प्रथमाश्चयः। अपि संधिसामीप्याच्चेपवत्तां संधिप्रत्यासन्नः प
राः प्रथमाः सिध्यंतीति। नैतदेवं। इह कालावयवद्वयं संबंधप्रतीयमानमास्ते। तत्रैकस्मिन्नेव संबंधे विधेयेऽ
न्यस्मिन्नूह्रातव्ये प्रथमं हित्वा पश्चाद्द्वितीयमेव्यः प्रज्ञादेः पादानां च संधौ बंधो विधीयत इति कोऽयं नयः। किंच पंचद
श्याः पादस्य च संबंधः। प्रतितं पंचदश्याः पादस्य च संबंधप्रागसिद्धः प्रज्ञादेः पादानां च संबंधोऽध्याय इत्यपि तु

स्य दोषोऽस्ति किं विधीयतां नाम। कामं पक्षादेः प्रागनारंभस्तथापि केन वाक्येनासौ योगो विधीयते। न तावत्तेनैव
वाक्येन भेदप्रसंगात्। नापि पर्वणो यश्चतुर्थोंऽश आद्याः प्रतिपदस्त्रय इत्यनेन। तस्य प्रातःकालसंबंधविधानेनै
व चरितार्थत्वमित्युक्तत्वात्। न चान्यद्वाक्यमस्ति येन प्रतिपदो नागत्रयस्य प्रातःसंबंधो विधीयत एव। तस्मात्प्र
तिपदनागत्रयविधानासंभवान्न यष्टव्यं चतुर्थेंऽश इत्येतदेव चतुर्थांशनिषेधकमवशिष्यते। न च प्रतिपच्चतु
र्थांशस्यापि विकल्पेन प्राप्तमनुज्ञातमित्युक्तं। तस्मात्पूर्वाह्णव्यवस्थया पराह्णादि पर्वसंधौ प्रतिपच्चतुर्थांशो न
निषिध्यते। पूर्वाह्णपर्वसंधौ तु निषिध्यत इति सिद्धं। तथा च त्रिकांडमंडनेनोक्तं। संधिर्यद्यपराह्णे स्याद्यागं प्रातः
परेऽहनि। कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति। तदेतत्त्रिकांडमंडनादिमतमन्येनानुमन्यते। तस्मात्पूर्वाह्णसं   का० दे०
ध्ययोरुभयोरप्युपवासे द्वितीयेऽहनि च यागेऽनुष्ठीयमाने पक्षादेः प्रतिपच्चतुर्थांशस्यासंभवात्। पक्षादयो नि   १५५
यष्टव्या न यष्टव्यं चतुर्थेंऽश इति शास्त्रद्वयस्याप्यनुपालितत्वान्मध्याह्नसंधावेकमपराह्णसंधावपरमिति व्यव
स्थायां प्रमाणाभावात्। न च लौगाक्षिस्मृतिवाक्यद्वयं प्रमाणं। तस्य पूर्वोत्तरदिनद्वययागव्यवस्थापरत्वेन वि

धिनिषेधस्य व्यवस्थायां तात्पर्याभावादसंभवाच्च। तथा हि। आदित्योदयमनंतरं पर्वसंधौ तद्दिने यागे क्रिय
माणे पक्षादित्वात्तस्य निषेधानुग्रहदर्शनात्। अपराह्णसंधावप्युपवर्त्यास्तमयात्पूर्वसंधौ द्वितीयेऽहनि
यागानुष्ठानेऽप्यनयोरनुग्रहदर्शनादेवं रात्रिसंधावप्यनयोरनुग्रहः। अथ प्रतिपच्चतुर्थांशे यागाभावा
त्पूर्वाह्णसंधौ पक्षादित्वस्यानुग्रहो नास्तीत्युच्यते। तर्ह्यपराह्णसंधावपि प्रतिपदाद्यभागे यागो नास्ती
ति। पक्षादित्वस्यानुग्रहमुच्यते। तथा शास्त्रांतरवशादाद्ये भागत्रये यागेऽनुष्ठिते पक्षादयोऽनियष्टव्या इ
त्यस्यार्थोऽपगत एव। तथा च पक्षादिदर्शपूर्णमासयोर्याग न प्राप्नोतीत्येकदेशमेवानुष्ठानं। यदपि न
यष्टव्यं चतुर्थेंऽश इति निषेधान्यथा प्रतिपच्चतुर्थांशे यागकल्पनं। तदप्यत्रार्थस्यज्ञानस्यादित्येतदधिक
रविरुद्धं। अत्र त्वार्षेयं वृणीत इत्यस्य वृणीत इत्यस्मिन्विद्यमाने चतुरो वृणीत इति निषेधकल्पविधिपरत्वं
न संभवतीत्युक्तं। तद्वदपि पक्षादयोऽनियष्टव्या इत्यस्य पक्षपदः प्रथमास्त्रय इत्यस्मिन्विद्यमाने यष्टव्यं
चतुर्थेंऽश इति निषेधाद्विध्यंतरकल्पनमेव न संभवतीति। तस्मान्न यष्टव्यं चतुर्थेंऽश इति नित्यानुवादोऽयं न च

चतुर्थ्यां गृह्णीत इति। अथ पर्युदासो यं पपन्नादयो नियष्टव्या प्रतिपदि यागकालउच्यते तेन यष्टव्यं चतुर्थ्यामित्यने
न चतुर्थ्यां वर्जितेन प्रतिपदि यष्टव्यमित्युच्यते। एतदेव च स्पष्टीकृतं स्मृत्यंतरे। पन्नादेः प्रथमात्यय इति। आ
द्याः प्रतिपदः त्वय इति च। एवं च सति पन्नादयो नियष्टव्या इत्यस्य न यष्टव्यं चतुर्थ्यां इत्यस्य प्रतिपन्नागत
यस्मृत्या सह एकश्रुतिमूलत्वं न विघ्यति। यत्तु पर्युदासपक्षे दूषणं मनिहितं। अपराह्णपर्व चेत् संयोपदृष्टि
कालके च तिथिह्रासपक्षे पूर्वेद्युः पर्व चतुर्थ्यां नागभावे पि पर्व वृतीयेंशे यष्टव्यं परेह्णः प्रतिपद्ग्राघनागत्रयेप्य
भावे पि चतुर्थ्यां नागे यष्टव्यमिति प्रयोगवचनस्य मर्यादापतितो विकल्पो न देवैरपि वारयितुं न शक्यते। प
र्युदासश्च न योनमुख्यार्थः। किंतु लक्षणयेति न दोषः। यदि पर्ववृतीयनागवत्यति प्रचतुर्थ्यां न पर्युदस्येत काल° १५६
स्यात्। तदैवमपि न वेत्। इष्टत्तु न यष्टव्यं चतुर्थ्यां इति पर्युदासस्य भावात्। पर्ववृतीयनाग एव यागः प्राप्नो
ति। न च पर्युदासलक्षणे सेकादृशी निर्णये दर्शितं। अनेन न्यायेन निषेधपक्षेपि पूर्वेद्युरेव यागः प्राप्नोति
अनुपपत्यादिपर्ववृतीयनागचतुर्थनागयोर्विकल्पेन यागे प्राप्ते न यष्टव्यं चतुर्थ्यां इति प्रतिपच्चतुर्थ्यो यो

गस्य विधानत्वात्। अन्यथा मुक्तप्रतिनिषिद्धेन माषाणां ग्रहणे प्राप्ते इष्टेष्ट्यायेन्नेमिति नानिदितं। प्रतिषिद्धं
वा विशेषेण विहितं श्रुतिरिति। कात्यायनेन च प्रतिषिद्धं प्रत्यपादिति तत्रापि वक्तुं शक्यते। प्रतिषिद्धानामपि
माषाणामस्तु ग्रहणमिति यस्तत्र परिहारो र्थप्राप्ते निषेधो बाधक एवास्य इष्टसमान इति यकिंचिदेतत्। प
र्वचतुर्थ्यां निषेधस्य श्रुतत्वमित्युक्तं तेन कात्यायनेन श्रुतिरेषा स्तनातनीत्सन्निधानात्। यत्तु नाष्यकारेण
कात्यायनादिसूक्तं श्रुतिलेप्यविरुद्धं। अन्ये त्वेवमाहुः न यष्टव्यं चतुर्थ्यां इति यद्वचनं तत्पूर्वाह्णसंधिविष
यमिति व्याख्येयं। न च पूर्वाह्णमध्याह्नसंधिशास्त्रादि पर्व चतुर्थ्यां यागस्य विधायकं न ततः प्रतिपच्चतु
र्थ्यां यागस्य प्राप्तिरस्ति। अतः प्राप्त्यभावेन प्रतिषेधानर्थक्यं प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति वाच्यं। ततश्च
प्रमावेपि पन्नादयो नियष्टव्या इत्यनेन प्राप्तसंभवात्। न च आद्याः प्रतिपदस्त्वय इत्यनेनास्योपसंहार इ
ति वाच्यः। अथ कालांतरोपलक्षकत्वेनाविरोधादुपसंहारपरत्वानुपपत्तिः। दिनद्वये पद्मयागकालचतु
र्थ्यालाभेस्त्वचतुर्थ्यां यागकालांतरमस्पृष्टगतत्वान च तस्यान्यत्वापकं शास्त्रमस्ति। अवस्थात्रोस्त्य। एवं च

स्त्वात्पूर्वेण सर्वकालविधायकानुपपत्तेः॥ उत्तरपरत्वे वाक्यभेदप्रसंगात्। केवलकालविधिपरत्वे अवस्थाणि
प्रमाणिका स्यात्। तस्मात्कालांतरोपलक्षकमेवेतदिति सिद्धमिति। तदयुक्तं। विनाकारणं लक्षणाप्रसंगात्॥
यागकालसंबंधस्य त्रिमुहूर्त्ता द्वितीया चेत्सा दृश्यास्त्रेणार्थसिद्धत्वात् न वाक्यभेदोऽप्यस्तीति। यत्किंचिदेत-
त्। तस्मात्प्रतिपच्चतुर्थांशे याग इति सिद्धं। ननु इमं तत्काले क्वापीति दुस्त्वात्। किं विज्ञनेव चतुर्दश्यां घटिका-
मात्रा आवर्त्तनं भवति। तत्र तिथिद्वैधे सत्यां षोडशनाडिकोऽपि पर्वचतुर्थांशो भवति। तत्र तत्रोपक्रमका-
लाहारम्भात् पर्वचतुर्थांशोऽस्ति। द्वितीयदिने प्रातः प्रतिपच्चतुर्थांशः तदा कृत्स्नयागः। अत्र केचिदाहुः।
अपराह्णपर्वसंधित्वात्परेद्युर्याग इति। तदयुक्तं। पर्वणोंऽशोऽत्र यस्तत्र कर्त्तव्येष्टिर्द्विजातिभिरिति। द्वितीयास-
हितं यस्मादूर्ध्वं पंचाग्निरायतनः॥ हारीत इति वचनात्। त्रिमुहूर्त्ता द्वितीया चेत्यादिवाक्यविरोधाच्च अपराह्ण-
संधिशास्त्रं तु त्रिमुहूर्त्तशास्त्रेण विरुद्धे विषये व्यवतिष्ठतां। न त्वपराह्णसंधिशास्त्रेण विरुद्धे विषये
पूर्वाह्णपर्वसंधौ त्रिमुहूर्त्तशास्त्रं किमिति न व्यवतिष्ठते। उच्यते। पूर्वाह्णपर्वसंधौ त्रिमुहूर्त्ता न द्वितीया अ- का० दे० १५१

स्त्यत्वाच्च त्रिमुहूर्त्तग्रहणमविवक्षितं स्यात्। त्रिमुहूर्त्ता द्वितीयार्थं न व्यवहिततरं निःप्रयोजनं पूर्वाह्णसं-
धिलक्षणप्रसंगाच्च। चतुर्दशीदिने यागनिषेधकवचनवाक्यविरोधाच्च। अपराह्णे पर्वसंधिविषयत्वेन तूक्तदो-
षाभावात्तद्विषयत्वेव युक्ता। किंच मुख्यत्वे संभवत्यन्यत्र हेतुनास्तीति तावान्विशेषः। तस्मात्स्वातंत्र्यविहितकाल-
संभवात्तत्रैव याग इति। यदा तु सार्द्धप्रहरद्वयं किंचिदधिकं चतुर्दशी पंचदश्यां मुहूर्त्तत्रयं प्रतिपत्। प्र-
तिपदि मुहूर्त्तत्रयं द्वितीया। तदा पूर्वस्यां यागः। यस्यां तिथावस्तमियात्सूर्यः त्रिमुहूर्त्ते यागघनत्पादि-
न्यस्तस्मै वोपक्रमेत्तिथिमिति वचनात्। ननु पंचदश्याः परः पादः पादादेः प्रथमास्त्रयः। कालः पार्वणया-
गस्य अन्यथा तु न विद्यते। इत्येतत्प्रतिपादितयागकालव्यतिरिक्ते काले पर्वचतुर्थांशो वचनांतराद्याग
इष्यते। एवमिहापि न विष्यति। यदा तु संपूर्णा चतुर्दशी पंचदशी प्रतिपदि सामयाद्वर्गेव समासे द्वितीये-
ऽनृतिचास्तिकः क्षयः। तदा पूर्वेद्युरेव यागः। पंचदशी यत्र संपूर्णा द्वितीया क्षयगामिनी। चतुर्दशीष्टिरमा-
वास्यां नूतेकन्यादिका क्रियेति वचनात्। यदा चतुर्दशी संपूर्णा पंचदश्यां न्यूनं मुहूर्त्तात्प्रतिपत्। प्रतिपदि

त्रिमुहूर्त्ता द्वितीया। तदा पूर्वेद्युरेव यागः। त्रिमुहूर्त्ता द्वितीया चेत् प्रतिपत्परा क्षीणा। अन्वाधानं चतुर्दश्यां परतः सो-
मदर्शनादिति वचनात्। तथा। आदिनेऽस्तमिते चन्द्रे पर्वणि उदियात्परा। प्रतिपद्यप्रतिपत्तिः स्यात्तच्चदृश्यरूपं
यजेतेति। यदा पंचदशरूपा मुहूर्त्तत्रयाधिका प्रतिपत्। प्रतिपद्दिवसाच्च वती द्वितीया। ततोऽधिका वा। तदा सर्वा-
नुष्ठानमिति। तत्तु मुहूर्त्तत्रयस्याधिकेषु मुहूर्त्तेषु विद्यमानत्वात्। सर्वस्यामेव यागः। उक्तं च। प्रतिपदि समु-
दिते चेद्दर्शनं तावद्धीतन्नूतदिने विरमति पर्वदिवसे चैतस्य यस्कालं तु पौर्णमास्या अन्यापि च पूर्णेन स्तगे
चैव उपस्थापनं धृतं। प्रतिपक्षस्य यदा पक्षे हीनो वाप्युदितः शशीति नत्वपदेतच्चरुरिष्टिममावास्यां नूतेकवा-
दिकी क्रियेत। तथा प्रतिपद्यतिपत्तिः स्यात्तच्चदृश्यरूपं यजेतेति तथा। अन्वाधानं चतुर्दश्यां परतः सोमदर्शना- का०डे०
त्। इत्येवमादिनिःपंचदशरूपा यागविधानेऽत्र तत्र सर्वचतुर्थांशेषात् विद्यमाने न कत्तु। पर्वणो यश्चातुर्थांशः १५८
स एव यागकालत्वेन विधानात्। पर्वद्वितीयांशे यागो युज्यते। अत एव स्तमयात्प्रत्द्वितीयातु प्रदर्श्यते। तत्र या-
गं न कुर्वीत विश्वेदेवाः पराङ्मुखाः इत्येतावन्मात्रं यद्यनुश्रूयते। तर्हि पर्वचतुर्थांश एव सर्वस्मिन्नहनि यागः स्या।

ति युक्तं स्यात्। इह तु त्रिमुहूर्त्ता द्वितीया चेत्सा दिनिमित्तविशेषं पंचदशरूपां यागविधानात्। पर्वचतुर्थांशानु-
रोधेन बाधो युक्तः। तस्माद्यथोक्तमेव काले याग इति सिद्धं। यदा तु याम्यदिनांत्यघटिकायां पर्वसंधिर्मुहू-
र्त्तत्रयात् ह्रासात्। यानः पर्वद्वितीयांशः परेद्युस्त्रिमुहूर्त्ता द्वितीया। तदा पर्वद्वितीयांशे यागः। तथा चाश्वला-
यनः। पर्वणो यो द्वितीयोऽशस्तु कर्त्तव्येष्टिर्द्विजातिभिरिति। द्वितीयासहिते यस्मा ह्यपरे त्वाश्वलायनाः। यदा
तु मुहूर्त्तत्रयादूर्ध्वं पूर्वेद्युः पर्वचतुर्थांशस्य प्रवेशः। परेद्युश्च मुहूर्त्तषट्कादूर्ध्वं प्रतिपच्चतुर्थांशस्यान्तस्तदा
परेद्युर्यागः। मुहूर्त्तषट्कात्प्राक्पूर्वाह्णे सर्वमुपक्रमात्। कालेऽत्र मुहूर्त्तेन तु घटिका त्रिमुहूर्त्ता द्वितीया
चेदिति शास्त्रविरोधात्। स्मृतौ प्रदीप्ततापत्र कालत्रा ह्यमुहूर्त्तोयनोक्तापराशरवाक्ये तु षण्मुहूर्त्तेषु
विद्यत इति पाठः। अत्र केचिदिदं दंते। तथाहि। चंद्रदर्शनदिने यागः सर्वथैव न कर्त्तव्यः। किं तु तत्पूर्वदिने या-
गः पूर्वतरदिने त्वाधानमिति। तस्य वाक्यस्यार्थः प्रतिभाति। स चायुक्तः। आपस्तंबेन्वाधानयागदिनयोर-
न्यतरत्र विकल्पेन चंद्रदर्शनं परिहरणीयमित्याह। पुनर्नियमेन यागदिने चंद्रदर्शनं परिहरणीयमि-

ति। यथाह। यदहर्न दृश्यते। तदहरमावास्यां श्वो न द्रष्टार इति चेति वाजसनेयेनाप्युक्तन योरन्यतरत्र चंद्र
दर्शनेनियच्छति। न पुनरुभयत्रापि। यथाहुः। तद्यत्केके दृष्ट्वोपवसंति। तस्माद्यदैवैनं न पुरस्तान्न पु
श्चात्पश्येत्। तर्ह्येवोपवसेदिति। कात्यायनोप्याह। चंद्रदर्शनेनामावास्यामुपवसेत्संदर्शने पौर्णमासी
मिति। चेत्। लौगाक्षिरप्याह। यदहस्त्वेव चंद्रमा न दृश्यते। ताममावास्यां कुर्वीत। दृश्यमानेप्येतागत
घानवतिइति। तथा च सोमदर्शनदिने यागविधायिकानिनिषेधादिकाश्रुतिर्दृश्यते। यदहः पश्चाच्चं
द्रमा अभ्युदियात्। तदहर्यजत इमं लोकानभ्युदेष्यतीति। एषा वै सुमना नामेष्टिर्यमायज्ञानं पश्चाच्चंद्र
मा अभ्युदेत्यस्मिन्नेवास्मै लोके र्द्धुकं भवतीति। यस्मिन्नह्नि पुरस्तात्परतश्च सोमो न दृश्यते। तदहर्यजे
तेति। तदेतेषां विरुद्धवाक्यानां व्यवस्था पर्वविचारे प्रतिपादितवृद्धाचार्यमतानुसारात्। अपराह्णादि
पर्वसंधौ सोमदर्शनदिनेपि यष्टव्यमन्यथा नेति किं चैवं श्रूयते। उत्तरामुपवसेदनिर्ज्ञायेति। तस्यार्थः।
किं पूर्वामुपवसेदुत्तरां वेति। यत्र निर्यातनिश्चितं ज्ञानं नास्ति। तत्रोत्तरामेवोपवसेदिति। एवं संदेहेपि

का° दे° १०५

चेदुत्तरमेव पर्वोपवसनियं। किं तु यद्यपर्वविचारोक्तया व्यवस्थयोत्तरमेव पर्व निश्चितं भवतीयत इति। त
दनुसारेणैव त्रिमुहूर्ता द्वितीया चेदिति वाक्यं व्याख्यातव्यं। न स्वातंत्र्येण। यदि तु स्वमहिमार्थः कथ्यते। तावद
ध्याहारक्लेशो न प्रथमतो विधिरसद्धितमाख्यातार्थपदे लब्धं। तस्मिन्नलब्धेपि पुनरनायासेन न किंचिदपि
त्यज्यते। तथा हि यदि चतुर्दश्यामन्वाधानापकर्षो विधीयते। तदैव योजना। चतुर्दश्यामन्वाधानं कर्तव्यं। प
रतः सोमदर्शनादिति। तत्रेदमुच्यते। अन्वाधानोत्कर्ष एकस्मान्न विधीयत इति। तथा हि। प्रातिपद्यपराह्णका
यद्यपि द्वितीया तथापि चतुर्दश्यां सोमदर्शनात्। परतोन्वाधानस्यापि निषिद्धत्वात्। तद्यथा। यदि चैनं न पुरस्ता
न्न पश्चान्न दृश्येत्तर्ह्येवोपवसेदिति चंद्रादर्शनेनामावास्यायामुपवसेदिति। यदहर्न दृश्यते। तदहरमावास्यां
मिति च। तस्माच्चतुर्दश्यां सोमदर्शने सोमदर्शनात्परित्यागेनान्वाधानोत्कर्षविधानमेव युक्तं। नन्वेवं
चतुर्दश्यां सोमदर्शनाच्चतुर्दश्या। ततः परत्र दिनेनान्वाधानं कर्तव्यमिति चतुर्दश्या ग्रहणं स्यान्न यत्र सं
बधावाक्ये न दृश्य तु दर्शनी इति विपरिणामकल्पना चतुर्दश्यां सोमदर्शनादिति। व्यवहितत्वात्। यस्य हि

वाक्यभेदोऽपि नास्ति। श्रुत्यर्थाभ्यां संबंधद्वयानुपगमात्। तथाहि। क्रत्वर्थस्यागमे कार्यविधानेन विरुध्य
त इति। उतान्वयनानाश्रितवाक्यभेदो न भवति यथाहुः कुमारिलाः। श्रौतत्वात्पारणानां लैङ्गत्वाद्दानामिति गौरवमि
ति। अत एवार्थिकत्वाद्द्वितीयसंबंधस्य शास्त्रपरिणामकल्पनादोषोऽपि न प्राप्नोति। यथा रात्रिसत्रार्थिकि
त्वाद्द्वितीयसंबंधाद्धत्वेनोपदिष्टेनापि प्रतिपद्यर्थावतिष्ठाकामइत्यधिकारिविशेषणं। न चैतावता वाक्य
भिन्नत्वं। न च विपरिणामदोषं जनयति। न तु व्यवहितकल्पनाद्वयोर्दोषागस्तेऽतरसंनिवेशोपगम्यते। अ
स्ति विहंगतस्तरं चतुर्दश्यामन्वाधानापकर्षविधानेनाभ्युच्यते। यदि व्यवहितकल्पनादिनयाद्दन्वाधाना
पकर्षविधानमाश्रीयते। तर्हि तत्रापि किं यतो दोषाः प्रसज्यंते। तदाकर्ण्यतां। तथाहि। तत्र पक्षे सोमदर्शना का०दे०
दिति। न चैतोऽसमन्तत्वादेवं विधानान्वयस्य सोमदर्शनादिति किं वा चतुर्दशीपरत्वदिन इति। किं वामावास्याया १६०
परतः प्रतिपत्किं वा परतः परस्या दिशि सोमदर्शनादिति। न तावच्चतुर्दश्यां सोमदर्शनादिति। न चैतोऽसमत
त्वादेवं विधानान्वयस्य सोमदर्शनस्य दोषत्वेनेष्टत्वात्तत्कथं तद्वस्ते तद्दिनान्वाधाने विधीयते। नापि चतुर्दशीतः

परत्र दिने सोमदर्शनादिति। अन्वाधानयोग्यचतुर्दशीतः परत्र दिने कदाचिदपि सोमदर्शनाभावात्। अ
पि प्रतिपदि सोमदर्शनादिति। तथा सति परात्परतः सोमदर्शनादित्युच्यते। न पुनः परतः सोमदर्शनादि
ति। अथ लक्षणया सर्वार्थः परत इत्यनेनोच्यते। तर्हि लक्षणैव दोषः। अथ प्रतिपच्चतुर्दशीतः परा न
वतीति परत इत्यनेन मुख्ययैव वृत्त्या प्रतिपदुच्यते। तथा च साद्वैतेरस्य। चाद्दितपराणि पद्यमुच्यते। तर्हि पंच
म्यां श्रोमदर्शनादपि चतुर्दश्यामन्वाधानं विधीयते। अथ प्रतिपद्यापराह्निकी सत्त्वसाहाय्यपातेन प्रतिपदि
त्यनेन संबंधं कृत्वा प्रतिसोमदर्शनाद्दीत्युच्यते। तथा च सति प्रतिपच्छब्दस्य द्वितीयाशब्देन सोमदर्शनेन च सं
बंधाद्वाक्यभेदो व्यवहितकल्पना च परतः शब्दोऽप्यनर्थकः प्राप्नोति। प्रतिपदि कदाचिदपि सोमदर्शनाभावा
द्दसंगनाव्यमानार्थत्वं प्राप्नोति। अथ तत्केकेहष्टा वोपवसंतीत्युपवासदिने सोमदर्शनं स्यात्। ज्ञातत्वेन गुण
त्वमेव न दोषत्वमिति। चतुर्दश्यां न्वाधानं कर्तव्यं। चतुर्दश्यां सोमनैमित्तिर्दर्शनादिति यदुच्यते तेन हि चतुर्द
श्याग्रहस्यान्वाधानं सोमदर्शनादिति यदि व्याख्येयेते। तत्कश्चित्रदनीतिवक्तव्यं। न तावच्चतुर्दश्यां परतः सो

सोमोनदृश्यते।येनतत्रान्वाधानंविधीयेत।नाप्यमावास्यायांपरतःसोमदर्शनादिति।तस्यात्रानुपात्तत्वादन्वा
धानयोग्यचतुर्दश्यनंतरायाममावास्यायांसोमदर्शनासंभवेच्चेनापिप्रतिपदिपरस्यांदिशि।सोमदर्शनादि
ति।तत्रपूर्वेवाकामेदेव्यवहितकल्पनयाप्रसंगात्।तत्रचनियमेनपरस्यामेवदिशि।सोमदर्शनेनभवतीतिप
रतइत्येतदपिअनुवादमात्रत्वेनाप्रवृत्तिविशेषकरंप्राप्नोति।अथपौर्णमासीप्रतिपत्संधौइत्यर्थपरतःपरस्यां
दिशि।सोमदर्शनादितिव्यवच्छिद्यते।तदुक्तंपौर्णमासीप्रतिपद्यपररात्रेयस्यांदिशि।सोमदर्शनस्यविद्यमानत्वा
त्।अथप्रतिपदिपरस्यांदिशिपूर्वरात्रेसोमदर्शनादितिवा।प्रतिपदिरेखामात्रस्यदर्शनात्।प्रथमदर्श
नादितिवा।शुक्लप्रतिपदिसोमदर्शनादितिवा।कृष्णप्रतिपन्निवृत्त्यर्थंव्याख्यायते।नैतदेवा।पूर्वरात्रादिग्र का०दे०
हणानामध्याहारप्रसंगात्।श्रुतेरवपादेस्तत्रकृष्णलक्षणाप्रसंगाच्च।सर्वोक्तानामपिदोषाणांतदवस्थत्वाच्च। १६२
उत्तरयोःपक्षयोःपरतः।शब्दानर्थक्यप्रसंगाच्च।शुक्लप्रतिपदिकदाचिदपिसोमदर्शनाभावेनासंभवार्थत्वप्रसं
गाच्च।अथशुक्लद्वितीयायांसोमदर्शनाभावेनासंभवार्थत्वप्रसंगाच्च।अथशुक्लद्वितीयायांसोमदर्शनादित्युच्यते

तत्र।द्वितीयाशब्देनशुक्लद्वितीयालक्षणाप्रसंगात्।प्रथमांतद्वितीयाशब्दस्यसप्तम्यंततयाविपरिणाम
प्रसंगात्।किंचैवंसत्यनपेक्षितेपिविषयेकदाचिदन्वाधानापकर्षोप्रसज्येत।तत्रस्पष्टार्थंपक्षेकिंचिदेकवारमव
धिंकृत्वातिथिक्षयोरुदाह्रियते।आदित्यवारेउदयास्तमयव्यापिन्याममावास्यायांसोमवारेउदयास्तमनव्
यापिन्यांप्रतिपदिमंगलवारेउदयास्तमयव्यापिन्यांद्वितीयायांसोमदर्शनाच्चचतुर्दश्यामन्वाधानापकर्षः
प्रसज्येत।द्वितीयायांसोमदर्शनत्वाविशेषात्।अथप्रतिपद्दीयाशुक्लद्वितीयातस्यांसोमदर्शनादित्युच्यते।।
तत्र।अनंतरोक्तदोषवर्जंपूर्वोक्तसर्वदोषाणांतदवस्थत्वात्।प्रतिपदिकदाचिदपिद्वितीयासंभवादसंभ
वमानार्थत्वमप्युक्तंस्यात्।अथप्रतिपत्संयुक्तायांद्वितीयायांसोमदर्शनादित्युच्यते।तत्रसर्वस्यापिद्वि
तीयायाःप्रतिपत्संयुक्तायांद्वितीयायांसोमदर्शनादित्युच्यते।तत्र।सर्वस्याअपिद्वितीयायाःप्रतिपत्संयु
क्तायाविशेषणविशेषप्रसंगात्।पूर्वोक्तानामपिदोषाणांतदवस्थत्वात्।अथद्वितीयेवप्रतिपद्युक्तायाशु
क्लद्वितीयेयायांसोमदर्शनादित्युच्यते।तत्र।अनंतरोक्तदोषवर्जंपूर्वोक्तदोषाणामत्राप्यपहारात्।किं

वा।आदित्यवारेषष्टिनाडिकायाममावास्यायांसत्यांप्रतिपदिघटिकाद्वयविद्धायांसोमवारंव्याप्यमंगलवारे
घटिकाद्वयमात्रायांप्रतिपदिसत्यांदिवैवप्रतिपत्संयुक्ताद्वितीयाजातेतितत्रसोमदर्शनाच्चतुर्दश्यामन्वा
धानमपकृष्यते।अथत्रिमुहूर्तायांद्वितीयायांसोमदर्शनादिकमुच्यते।तत्रानहिकदाचिदपित्रिमुहूर्तैवद्वि
तीयानभवति।तथापित्रिमुहूर्ताधिकन्यूनासानावाक्षमविंशतिमुहूर्तंन्यूनंद्वितीयानकदाचित्संभवति।अ
थयस्मिन्नहनित्रिमुहूर्तैवद्वितीयातत्रसोमदर्शनादिकमुच्यते।तत्रतृतीयायुक्ताद्वितीयायस्मिन्दिनेत
त्रसोमदर्शनादपिदिनेचतुर्दश्यामन्वाधानापकर्षःप्रसज्येत।अथप्रतिपद्विवर्तिन्यांत्रिमुहूर्तायांद्विती
यायांसोमदर्शनादिकमुच्यते।नहिषण्मुहूर्तायांवाप्रतिपदिद्वितीयामपिचतुर्दश्यामन्वाधानापकर्षोन का०दे०
विद्येत।अथन्यूनत्वकदासार्थेत्रिमुहूर्तग्रहणेनाधिकन्यूनदासार्थमित्युच्यते।तर्ह्येनावेनेकोदोषः।संख्याश १६२
ब्दानांन्यूनाधिकनिवर्तकत्वेनावानांन्यूनमात्रनिवर्तकमिति।ग्रहणमात्रन्यूनत्रिमुहूर्तायांसोमदर्शनावि
शेषेपिअन्वाधानानपकर्षःप्रसज्येत।तथापराह्णिकांद्वितीयायांसोमदर्शनादिकमुच्यते।नैतदेवं।न

हिकदाचिदपितिथिःकेवलपूर्वाह्णसंबंधिनीविद्यतइति।सर्वस्यापराह्णसंबंधित्वाद्विशेषणंव्या
वर्तनाभावेनपर्यविशेषणत्वप्रसंगात्।तथापराह्णमात्रेयावद्द्वितीयासैवापराह्णिकीतस्यांसोमदर्शना
दिकमुच्यते।नैवापराह्णमात्रवर्तिन्यांद्वितीयायांकदाचिदपिसोमदर्शनासंभवादर्थत्वंयुक्तंस्यात्।अ
पराह्णिकायांद्वितीयायांसंध्यादिवर्तिन्यामेवसोमस्यदृश्यमानत्वात्पराह्णिकीद्वितीयायस्मिन्दिने
विद्यतेतदीयसंध्याकालेसोमदर्शनादिकमुच्यते।तदीयसंध्यादितर्हिबहूनांपदानामध्याहारःप्र
सज्येत।पूर्वोक्तवाक्यांतरव्यवहितकल्पनादयोदोषाश्चापितदवस्थाएव।तस्मात्सोमदर्शनदिनेया
गेनिषेधश्रुतीनांबह्वृचाचार्यमतानुसारेणव्यवहितविकल्पःपूर्वविचारेप्रतिपादितस्तथैतदपिवचनं
नेतव्यंनस्वातंत्र्येण।तस्मान्नियमेनचतुर्दश्यामन्वाधानापकर्षविधायकमेतद्वियुक्तं।तदयुक्तं।यस्मि
न्नहनिपुरस्तात्स्यरतःसोमोनदृश्यतेतदर्यजेतइतिश्रुत्यायागस्यचंद्रादर्शनेविधानात्।तथाचस्मृति
यदहश्चनदृश्येतसंपूर्णश्चयदानवेत्।सएवकालोयागस्यएतेनेड्विष्यायजेति।उपवासोपितस्मा

ज्यं देवतं न पुरस्तान्न पश्चात्तृपेत्रस्येवोपवसेदिति वचनेन न चन्द्रादर्शनदिने विहितयोरेकत्रावस्थानाविप्र
नि चन्द्रदर्शने गुणविरोधे च तादर्थ्यादिति न्यायेनांगकाल एव परित्याज्यः। प्रधानविरोधेनांगमपि परि
त्याज्यं किं गुणमपि। अत एवोपवसेदित्यनुवृत्त।। आपस्तम्बः। यदहर्न दृश्येत तदहरमावास्यां पाश्चान
द्यष्टार इति चेत्। संपूर्णायाममावास्यायां तात्रापर्वसेः।। अन्यस्यां पूर्वदिन उपवासश्चन्द्रादर्शनदिने
याग इत्यर्थः। अन्यथा योगकालानुरोधेन प्रधानकालप्रसंगात्। ननु यदहः पश्चाच्चन्द्रमा अभ्युदेति। न दृ
र्यजत इति। चन्द्रदर्शनेऽपि यागं दर्शयतीत्युच्यते। इयं श्रुतिश्चन्द्रोदयाभिदिने यागमाह। न चन्द्रदर्शनदि
नेऽपि। चन्द्रोपालम्भे व याग इत्याह श्रुतिः। तद्देन मध्यर्तुषधि स्मः संभृत्याकृतिः सोऽधिज्ञनाज्ञनयती
ति। उदितं च ज्ञानान तस्मिन्नहनि प्रपश्यंति। कुहू द्वितीय एव। अतः षडतिथ्यावयष्टव्यमन्यथा श्रुतिविरो
धः। यदपि स एवमाकृतिः सोऽजातः। पश्चाद्दृश्यत इति श्रुत्यानिषायणेवा। अथवा प्रतिपद्याकृतिः सो
जातः। पश्चाद् द्वितीयदिने दृश्यत इत्यर्थः। अत एव स्मृतिकारा आमृषश्चन्द्रदर्शनदिने यागकारणादि

का०ङे०
१६२

त्यतश्चाकूः। अन्वाधाने चतुर्दश्यां परतः सोमदर्शनादिति। तथा यज्ञनीयेऽग्निः सोमश्चेद्ह्वारुणं पादिविद्वारूपते। त
त्त्वान्तमिति निर्कुत्तादन्द द्याहिजात प इति। तस्माच्चन्द्रदर्शनदिने सर्वथा यागो न कर्तव्यः। चन्द्रदर्शने यागनि
षेधेनैव प्रतिपच्चतुर्थांशे निष्टेतन्निषेधो गुरुत्वाव्यापनार्थः। एतेन त्रिमुहूर्त्ता द्वितीया चेति वाक्यादन्वाधा
नोत्कर्षविधायकमिति निरस्तं। किं च। अन्वाधानोत्कर्षविधाने चतुर्दश्यां सोमदर्शनाच्चतुर्थ्यांतः परत्र दिने
अन्वाधानमिति व्यवहितसंबंधद्वयं प्रसज्येत। न च वक्तृदोषप्रसंगाच्चायदि प्रतिपद्यापराह्निकी त्रिमुहू
र्त्ता द्वितीया तदा चतुर्दश्यामन्वाधानं कर्तव्यं। परतः प्रतिपदि त्रिमुहूर्त्तद्वितीयायां सोमदर्शनादित्यर्केऽसौ
क्रियमाणेऽन्वाधानोपकर्षविधानेऽपि दोषाभावात्। न च प्रतिपद्दृश्य-- द्वितीयाश्रृष्टस्य वा सोमद
र्शनादिसाननसंबंधः। येन वाक्यभेदः। परिणामव्यवहितकल्पनासुन--। परत इत्यनेनैव तल्लाभाभा
वात्। चतुर्थ्यं चतुर्दश्यामन्वाधाने परतः सोमदर्शनादित्यर्के चतुर्दश्यां परतस्तिथिग्रहणेऽपि सत्यममावास्या
याः प्रतिपदि चन्द्रदर्शनासंभवात् द्वितीयाग्रहणे। तस्या अपि चतुर्दश्याः परत्वात्। न द इति क्रमेणातिथ्यं वर

ग्रहणे प्रमाणेनावाच्यं न द्वितीयामात्रे चंद्रदर्शनं चतुर्दश्यामन्वाधाने हेतुस्त्रिमुहूर्तग्रहणविरोधात्
तस्माच्चतुर्दश्यामन्वाधानं परतस्त्रिमुहूर्तद्वितीयायां सोमदर्शनादित्यक्ते स्वीक्रियमाणे दोषानावा
स्तृतीयमानत्वयनिर्वाहादंगकालानुरोधेन प्रधानकालत्वाबाधाबाधान्वाधानापकर्षविधानमेवयु
क्तं। किंच चंद्रदर्शनदिने यागे चक्रियमाणे वक्रुवाक्यविरोधोपि प्रसज्येत। चारायणीयगृह्यपरिशिष्टा
त्। यावान्पूर्णस्य गृहीता यावन्नाक्लिमितोदयः। वत्स्यं च यागं च तावद्विदुरिति श्रुतिरिति। यावत्सौर्णमासी
चंद्रमसो हीनत्वं न भवति। तावद्वोपवस्तकार्यमित्यर्थः। यावच्चामावास्यायां चंद्रमसोस्तंगतस्य प्रतिपत्तु
नयो न भवति। तावद्यागकाल इत्यर्थः। पूर्णेशाखिन्योपवस्थ्य यागं च समसमके। पर्वण्यस्तंगते कर्यन्यागं
चंद्रेऽर्कसंमितं। पूर्वोक्तं एवार्थोऽनेन वाक्येन स्पष्टीक्रियते। पौर्णमास्यां पूर्णचंद्रमसि उपवस्थ्याख्या
व्रतं कार्यं तदनेन तदनंतरं चंद्रार्कयोः समसमके प्रतिपद्यागकार्य इत्यर्थः। उदितो यदि वा हि नो दृश्ये
न यदि चंद्रमाः प्रतिपत्सु न कार्यं स्याद्विश्वे देवाः पराङ्मुखाः। उदितो दर्शप्रतिपदि हीनः पौर्णमासी प्र॥ का०३० २६४

प्रतिपदि चंद्रमा दृश्यते। यागस्तत्र न दृश्येत विश्वे देवाः पराङ्मुखाः। अस्यापवादः। निशायां प्रथमे भागे दृश्य
ते पूर्णिमा तथा। तस्यास्तु पौ दिवा नास्ति तत्र यागः परेऽहनि। रात्रेस्तु प्रथमे भागे न पश्येत्पूर्णिमा तथा। हीनो दि
वा तत्र यत्रेष्टा यागमादिष्टौ तु। अथ केचिदाहुः। प्रतिपदि सोमदर्शने सतीष्टेरकारणाद्वैकल्पिकं द्रष्टव्यं
यदि हि स्यात्ः प्रतिपच्चतीयां न्नालभ्यमानेपि सोमदर्शने वदर्शयामः प्रतिषिध्यते। तदायजनीयेक्षि सोमस्पश्य
रूपं दिल्लि दृश्यते। तत्र व्याहृतिर्ऊता दंदं दृष्टाद्विजातय इति। कात्यायनवचनमसंगतार्थमेव स्यात्। त्रिमु
हूर्ता द्वितीया चेद्दिसनेन चतुर्दश्यामन्वाधानं विधाय पंचदश्यामर्धाद्विद्विते यागे इतने द्वितीयेऽह्नि प्रतिपदि
यजनीयेऽह्नि सोमश्चेद्दृश्यमानमसंगतं स्यात्। तस्याक्षोयजनीयत्वाभावात्तत्सर्वोक्तस्तदायजनीयायान्व
यात्। तत्राव्याहृतिर्ऊता दंदं दृष्टो द्विजाजयत इति यागानां व्याहृतिर्होमदंदं दक्षिणादानं विधीयमानमप
पिच्छाकस्मिकत्वादसंगतं सोमदर्शने न तु पाक्षिके यागप्रतिषेधः। अस्फपगम्यमानेपाञ्चचंद्रदर्शनेपिस
तियजेतियेन वचनेन व्याहृतिर्होमदक्षिणादानसहितो योगो विधीयते। तदेवमर्थवन्नान्यथा। तदयुक्तं॥

तथाहिकिमयंप्रायश्चित्तविधिर्निमित्तविधिर्वा।आद्येपिकिंयजनीयेह्निचंद्रदर्शनेप्रायश्चित्तंउतचंद्रदर्श
नदिनेयागेनतावत्प्रथमःकल्पः।योह्यज्ञानाच्चंद्रदर्शनदिनेयागमनुष्ठितितस्यपरंश्वाचंद्रदर्शनेदिनेप्रा
यश्चित्तंविहितंविहितानिषिद्धेक्रतिमेनेति।प्रायश्चित्तविधायकत्वेनास्योपपत्तेःश्रौतस्मार्तनिषेधपाक्षिकत्वाप
त्तेनसामर्थ्याभावात्।किंचप्रायश्चित्तंविहितानिषिद्धेतिक्रमेभवतितत्रयदियजनीयदिनेचंद्रदर्शनेप्रायश्चि
त्तमिदंनचैवंतर्हिनिषेधकल्पनाप्रसज्येत।यदितुचंद्रदर्शनदिनेयागइदंविधीयतेउतचंद्रदर्शनदिनेयाग
निमित्तंप्रायश्चित्तंनचैवं।तदातन्निषेधस्याश्रुतत्वात्तत्काविकल्पनेतितत्रैवेदंप्रायश्चित्तं।नापिद्वितीयः।निषेध
पाक्षिकत्वाभावप्रसंगात्।निमित्तविधित्वेनकिंयजनीयदिनेचंद्रदर्शनेनिनिमित्तमिदंविधीयते।उतचंद्रद का०हे०
र्शनदिनेयागेनिमित्तइतिनोभो।पूर्वोक्तदोषात्।द्वितीयपक्षेयजनीयदिनेचंद्रदर्शननिमित्तप्रतीतिरितिबा १६५
ध्येत।तस्माच्चंद्रदर्शनेदिनयागनिषेधोनपाक्षिकइति।अत्रकेचिदाहुः।सर्वदाप्रतिपद्येवयागोद्वितीयावि
द्धप्रतिपदियागोपिपर्वचतुर्थांशयागइति।यदाहकात्यायनः।पञ्चदशावेवऊर्ध्वंतसदापञ्चादिकर्मयत्।।

र्वोक्तएवकूर्वतिविद्वेष्यन्येमनीषिणइति।अन्येग्रहणमिहविकल्पस्तत्वनार्थः।अन्येतुर्वतीत्यर्थः।पण
वषडिस्येकेसमामनंति।बोधंडिन्येकइति।तदप्ययुक्तं।पूर्वोक्तापराह्णपर्वसंधिनिमित्तपूर्वदिनेयागवि
धायकपर्वचतुर्थांशयागविधायकद्वितीयाविद्धप्रतिपन्निषेधचंद्रदर्शनदिनयागनिबंधनान्निंदाव
चनबहुतरश्रौतस्मार्तवचनसंकोचप्रसंगात्।अनेकदोषदुष्टविकल्पप्रसंगाच्च।नचात्रविधिविनक्ति
रस्ति।आचारमात्रोपदेशात्।नचैतद्व-- विधिनक्तियुक्तबहुतरवाक्यार्थविकल्पापादनसामर्थ्यं।।
तस्मादेतद्वाक्यंमनीषिणइतिअकारप्रश्लेषणव्याख्येयं।तस्मादुक्तैवव्यवस्थायुक्ता।अत्रबोधायन
स्तत्रनिबंधकाराःकेचिदपराह्णगतेपिपर्वसंधौपूर्वसंधौपूर्वेद्युरुपोष्यतदहर्यागानुष्ठानंवदंति।तत्रा
प्यपराह्णएवपूर्वसंधिसमीपेयागमिच्छंति।तदनुपपन्नंप्रातर्यजधमितिमंत्रलिंगविरोधात्।नतुप्रा
तरिज्यमानेपिसंधौयजेतेतिविरुध्यते।नैषदोषः।संधिशास्त्रस्यसामीप्यपरत्वात्।सामीप्यस्यचापेक्षितत्वा
त्तातःकालोन्यापेक्षयासामीप्यइतिवक्तुंशक्यते।इतिसंधिशास्त्रस्यमविरोधः।अपराह्णस्तुनकथंचित्स्मात

रितिवक्तुं शक्यते इत्यपराह्णयागानुष्ठानं भवति। प्रातःकालविरोधीति न तत्र वक्तुं युज्यते। ननु यावत्संधि
रिति सामीप्यं भवति। तावत्संधिशास्त्रमाश्रयतीत्यपराह्णगते संधौ तत्समीप एव यागानुपः। इंतरा रात्रिगते
ऽपि पर्वसंधौ तत्रैवानुष्ठाने प्राप्ते। अथ पूर्वेद्युरग्निं हृत्वा त्वन्तरमहादेवतायजत इत्यहविर्विधानात्तत्रस्तुत्या
द्यादिधानानां वा संधिसमीपस्य कथं विदहरि साकं प्रपन्नैर्नरात्रौ यागानुष्ठानमिति। इंतापराह्णेऽपि सं
धौ तत्र यागेऽनुष्ठीयमाने प्रातर्विधिविरोधादपराह्णस्य साद्याद्विधानानां वा संधिसामीप्यस्य प्रातरप्युपपत्तेर्न
पराह्णे यागानुष्ठानं। अथ संधौ यजेतेति प्रत्यक्षः विधित्वात्प्रातर्यजध्वमिति मात्रं वर्णिकोऽस्पृष्टविधिर्दुर्बलः॥
अप्रातरमहादेवतायजत इति अपि वर्तमानापदेशित्वेन स्पष्टविधित्वाद्दुर्बलत्वमविशिष्टं। अथोच्यते विरो का०ऋ० १६६
धे सति बलाबलं चिंत्यते। रात्रिगतस्य संधेरहरपि समीपं भवति। संधिशास्त्रस्य सामीप्यपरस्याहःशास्त्रेण
विरोधः। तत एहेतोः प्रातःशास्त्रेणाप्यविरोधः। किंच। संधिशास्त्रस्य सामीप्यं मुख्योऽर्थः। किंतु लाक्षणिकइ
ति। तत्रास्पष्टत्वमविशिष्टं। न च प्रातर्विधेरप्रकरणाधीतत्वं दोषः। अप्रकरणाधीतत्वमपि स्मार्तदक्षिणवा

रादिकं प्रकरणाधीतवद्बोधात्वसाम्यापेक्षकात्त्वयोगशास्त्राद्बलीय इत्युक्तं। विशिष्टाविशेषोपाधिकरणे
नस्माद्योदितदेशकालद्रव्याधनयातत्सामीप्ये सं भवति तावदेव गृह्णाति। अन्यथा सामीप्यलोपेन प्रातः
कालेयष्टव्यं। ननु सायमस्ति देवा याज्यमिति। सायंकालेदेवयागनिषेधाद्दविशिष्टेपराह्णादिरभ्यनुज्ञातो
गम्यते। विशेषनिषेधस्य शेषाभ्यनुज्ञानपरत्वात्। यथा नामेन चक्षुषा नपश्यनीत्यंच्यक्ते दक्षिणेन पश्य
तीति गम्यते। नवेदेवा यद्यपि निषेधः स्यात्तथापि निषेधः। एकस्मिन्नेव वाक्ये प्रातःकालविधिः सायंकालनि
षेध इत्युभयपरत्वे वाक्यभेदप्रसंगादवश्यमेको विधिरितरो नित्यानुवाद इत्युपगंतव्यं। तत्र यदि सायंकाल
निषेधोऽभ्युपगम्यते। तदापारिशेष्यात्तत्परराह्णादिकालः सर्वोऽपि यागार्थः प्राप्तिकः प्राप्नोति। इति। प्रातःका
लस्य नित्यवत्स्यागसंबंधानुवादो नोपपद्यते। अथ यदि प्रातःकालविधिरभ्युपगम्यते। तदा तद्व्यतिरिक्तानां सा
र्वत्रिकालानां नित्यमेव निवृत्तत्वात्सायंकालनिवृत्तिरपि नित्यानुवादः। किंच। प्रातर्यजध्वमिति विधिरूपत्वात्
प्रतिषेधस्य वर्तमानात्मकत्वाद्विधिविकल्पनमेव सुशकं न सायमस्तीति तु वर्तमानापदेशत्वेन प्रवर्तमानाले

श्चतीतेऽपि नास्तीति नेदं निषेधविधानं निषेधस्य स्पष्टमानाभावात्। आगुरो हनतः प्रातः पूर्वाह्णयागप्रतीतेः
पादकब्जवचनविरोधप्रसंगात्। न तु यदा प्रातः पर्वचतुर्थांशोऽस्ति तदैव न वेत्ति। यदा तु तस्याभावः तदा न किं
प्रातः कोलावाबाध्यतां तु न पर्वचतुर्थांश इति कथं निर्णेतव्यता। अपराह्णे यागे क्रियमाणे पूर्वाह्णप्रातःका
लः न तत्र प्रक्रमकालाबाध्येरन्। प्रातस्तु क्रियमाणे पर्वचतुर्थांशमात्रबाध इति। बाधलाघवाय स एव युक्तः
तस्मादपराह्णगतेऽपि पर्वसंधौ परेऽह्न्येवेति याग इति सिद्धं। मध्याह्नसंधौ न दहरेव यागः। प्रातरुदाहृतलोगा
क्षि आदिवचनात्। अत्र केचिदाहुः। प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते। पुनः प्रणीयत्नश्लोष्टिं ततः
कुर्यान्नान्यथेति। गर्भविवेनेन पंचदश्यामिति समाप्तोऽपुनर्यागविधानात्। द्वितीये ह्यन्येव यागोपयुक्तः मध्या
ह्नसंधित्वात्तु अपराह्णगामिन्यां तिथावुत्तरदिने यागकालाभावे प्रतिपद्यप्रविष्टायामित्यनेनेन सह विकल्प
नाऽऽपपद्यते। द्विगामीन्या तु परतो यागकालस्य संनिवेमध्याह्नत्वात्तत्र प्रवर्तत एव। पश्चादयोनियष्ट
व्या इति नियमश्रवणतीति तदुक्तं। त्रिमुहूर्तादि द्वितीया चेदितादिवक्तृवाक्यविरोधात्। विकल्पस्याप्यन्याय्य

का०दे०
१६७

त्वात्। तस्माद्दिनद्वयव्यापर्यालोचनया प्रातःकाले समाप्तिवक्तुं सर्वेषां तत्राविरम्य प्रतिपदि प्रविष्टायां ब्राह्म
णभोजनमन्यपदार्थसमाप्तिश्च कर्त्तव्या। अत्र केचिद्विवदन्ते सांगस्य प्रधानस्य पूर्वाह्ण एव कर्त्तव्यत्वाद्ब्राह्म
णतर्पणस्य चांगत्वाद्विरम्य अपरेद्यांगप्रधानेवसानावनायां विधिना प्रवर्त्तितत्वात्तद्विरोधः। वार्त्तिककारे
श्चयावज्जीवाधिकरणे पौर्णमास्यतिरिक्ताहर्व्यवच्छेदपरा श्रुतिः। अप्यामावपि तत्र स्यान्नविदेवं प्रती
पवइत्येवत्श्लोकव्याख्याने उक्तं। आदित्वात्स्वतन्त्रकर्मणः पूर्वाह्णे चोदनावत्त्वात्रनेपौर्णमासीनव्याप्यतेन।
किंचिदुष्यतीति वक्ष्यरिष्टीसमाप्तिरिपि पूर्वाह्णे दृष्टिता। तस्मात्पौर्णमास्यासद्यस्कालपक्षांगीकारपूर्वपौर्ण
मासी उत्तरांचोपवसदिति। पूर्वोपवासपक्षे सद्यस्कालवानास्तीत्येतदर्थमिदं वचनं। यतो द्वितीयदिने प्रति
पदः पूर्वाह्णस्य च विद्यमानत्वात्पुनः कारणं युक्तमिति। तदयुक्तं। प्रतिपद्यप्रविष्टायामिति वाक्यस्य संकोचप्र
गात्। द्वियोगवचनाद्धि सांगप्रधानैककालस्य वचनवशेन हेयत्वात्तत्तद्दर्शनसंकोचो युक्तः। सद्धिमन्तितोय
जेति न श्रुतिविरोधाच्च। साद्दिसंधेरुनयतो यागप्रयोगो यथा न्वेति। तथायजेतेति प्रतिपादयति। तथाप

राकादिपर्वसंधौ त्वसर्वैरङ्गीकारत्वाधायतदह्नः संधेः त्वस्य कसमाप्तौ संधिगर्नत्वं द्वीयेन निनोत्तमः प्रद्यार्थः समा-
सिद्धा इत्वाचोद्या ग्रणनर्पणात्मकः केवलं संधिरूर्ध्वमुत्कृष्टव्यो । तावता प्रयोगेण संधिगर्नेनास्य स्पृति ।
न तु मध्ये विरामः कस्मात्संधिगर्नेभ्रास्त्ववशादिति चेन्मैवं । न तु तगर्नसंधिमुत्कृष्यमाणमपि सर्वमुत्कृष्य-
ते । प्रयोगनैरंतर्यार्थः । तत्र । प्रातःकालबाधप्रसंगात् । नैरंतर्यं हि प्रयोगवचनेनार्थादाक्षेप्यमाणं स्प-
ष्टं नो दिनेदिने प्रा कालादिपदार्थविरोधे दुर्बलं । तदेवं विरोधोद्धारणे प्रातःकाले समाप्तिं वर्ज्य सर्वं नि-
वर्त्यं विरम्य संधिपर्यंते प्रतीक्ष्य संधेरुपरि प्रतिपत्काले पदार्थ एव केवलं कर्तव्यः । तस्मान्मध्याह्ने संधे
परेद्युर्याग इति । पूर्वाह्णपर्वसंधावपि तद्दृष्ट्वैव यागः । वाराहणीय पृष्ठ परिशिष्टात् । विप्रकर्षे परे या- का॰ दे॰ २६८
गः संनिकर्षे परे न तथा । त्रोषेकेंशो समाख्यातो मुनिभिस्तत्त्वदर्शिभिः । इति । षट्काष्ठेऽपि यागः स्यान्न तथा द्वि-
दशेऽपि च । सूर्याचंद्रमसो पूर्वाह्णे संनिकर्षः । षट्काष्ठे पौर्णमास्यां हि दर्दशो च मास्यावा यां सूर्याचंद्रम-
सोः परस्परं च पूर्वाह्णपद्गासंनिकर्षः । तदा यागः कर्तव्य इति वाक्यार्थः । तथान्यागता तिथिमुत्कृष्य तिथि

त्रोषं वो यो त्रये ॥ इत्ये यज्ञमुपासीतन्विनस्मनिरूप्यते । प्रतिपद्यप्रविष्टायामित्युक्तपरिहारमत्र केचिदा-
हुः । ग्रीष्मकालेऽह्नामतिदीर्घत्वात् । किंचिदधिके षोडशघटिके आवर्तनेन भवति । तत्र तिथिह्रासे सति कृ-
दाचिच्चतुर्दशघटिकः पर्वचतुर्थांशस्तत्रावर्तनसमीपे पूर्वाह्णपर्वसंधिर्यदि न भवति तदा सूर्योदयस-
मीपे तत्रोपक्रमेकाले पर्वचतुर्थांशस्याप्रविष्टत्वात्तत्रोपक्रमः कर्तव्यः । किंतु द्वितीयदिने ति । तद्युक्तं
तत्रोपक्रमकाले विद्यमानत्वात्तत्रैव यागः । न परेद्युः । प्रातः प्रतिपच्चतुर्थांशेन पष्टथ्यं चतुर्थांश इति
निषेधात् । यत्रद्विप्रभानयागंगत्वत विज्ञात्कालविरोधो भवति । तत्रागुणविरोधस्यापेनांगकालप-
रित्यागस्यैव युक्तत्वात् । अतो न परेद्युर्यागः । यदा तस्मिन्नेव विषये परेद्युः प्रातः प्रतिपत्तृतीयांशास्तं
दापि तन यागः । त्रिमुहूर्ता द्वितीया चेदित्यादिशास्त्रात् । चंद्रदर्शनदिने यागनिषेधवचनविरो-
धाच्च । तस्मादस्मिन्विषये पूर्वदिन एव याग इति । तदपि वचनांतर । षोडशनोऽहस्तनाष्टमंध्यापंचदशोऽह-
नि । चतुर्दशी ज्ञ घन्येष्टिः पापा सप्तदशाऽहनीति । तेन सप्तदशेऽहनीष्टिनकुर्यान्

त्वादर्धतिथिः। नत्वाधानेन निषिध्येतेन यागः। तथा चेतिथिद्वैधविशेषेरनुष्ठानामवक्तुं शक्यत्वात्। अन्ते यजनी-
यादारभ्य समदशै उत्सर्गो वा सकथं कर्म्मनकार्यमित्यवगंतव्यं। अतेव बौधायनः। अत्रोपवसथस्थानानि
चतुर्दशी पौर्णमासी न तु त्रयोदशी समदशीति। तथा च वचनांतरं। पर्वोपवसथं कर्म्म यजनीयात्त्रयोदशी
न वैकस्मदशं वापि तत्प्रयत्नेन वर्जयेदिति। ननु चद्विनद्वयस्य ज्ञयवृद्ध्योरसंभवात्त्रयोदशी द्वनि। सप्त
दशीं वा कदाचित्पवसथं कर्म्मनकार्यमिति। कथं निषेध उच्यते। यद्यप्राप्तिः। तद्देतिप्राप्तिरिति न दिवीतिक
वत्तिस्यानुवाद इति। ननु षोडश्यामुपवसथे क्रियमाणे पञ्चांताऽर्धपवसथा इति वचनं विरुध्यते। पंच
दशादिनात्मकोऽपि पञ्चः। तत्र शाक्रनयजनीयदिनादारभ्य पंचदशानि। पञ्चेगते षोडशीयमितिरिष्य-
ते। अथ शाक्रनयजनीयदिनादारभ्य पंचदशानि। पञ्चेगते षोडशीयमितिरिच्यते। अथ शाक्रनयजनी
यदिनोपरितनदिनादारभ्य पञ्चः क्रियते। तर्हि शाक्रनयजनीययोः पञ्चादित्वे हीयते उच्यते। पंचदशानि
त्तिथिभिः पञ्चोनवति। ननु पंचदशानि दिनैरिति ज्योतिर्विदां स्मरणात्। न तस्याश्चतिथ्यपः करावि चतुर्दशा सु

कौ°दे°
२६५

१

दिने तु समाप्यते। पंचदशस्तु षोडशस्तु वा सर्वथा तावन्त्र्यं पंचदशो वा। तत्र पक्षादित्वाद्दीनं पनिपदुच्यते। प
क्षांतत्वादीनं पंचदशीतिथि। कस्मात्षोडशादिदिनगतायामपि तस्याभिवोपवसथः क्रियत इति। यद्वास्य व
चनस्य सर्वोऽयमावास्या यामुत्तरार्ह पौर्णमास्यां वेदितव्यं। पौर्णमास्यादिसद्यकालपक्षस्य विधीयमानत्वा
त्। प्रतिपद्येपवसथ्यं कर्म यागश्च तत्रायं समदशानिषेध उपपद्यते। उक्तं चान्यैः। जने पंचदशीयान्यास
मेयास्या तु षोडशी। जने वाप्यधिके वापि नेज्या समदशी क्वचित्। अत्र कालमात्रविशेषवचनैरेव बाध्यत्वा
त्। क्षयवृद्धिवचनमस्य विषयं। क्षयवृद्धिनजानीतेतिथीनां वे इमंडले। पातुधानः स विज्ञेयो यथा नस्मि-
क्रियते। इत्यस्य क्षयवृद्धिनजानं विधेरपमुपयोगः। उत्तरदिनक्षयवृद्ध्योरर्थयोः पूर्वदिवसप्रवेशामिति
तथा च स्मृत्यंतरे। तिथेः परस्याघटिकास्तु यस्तु न्यूनास्तथैवाप्यधिकास्तु तासां। अर्द्धे वियोज्य च तथा प्रयो
ज्यं ह्रासे च वृद्धौ प्रथमे दिने तदेति। परस्यास्तिथेः प्रतिपद्यायाघटिकाः पूर्वस्यास्तिथेर्न्यूना अधिका वा त
त्मानाद्धं पूर्वदिने ह्रासे ऽस्य वियोज्यं। वृद्धौ तु संयोज्यमिति। तदनेन पर्वसंधिज्ञानं कार्यमित्युक्तं भवति।

१

र्णमास्यां चापस्तंबोक्तो विशेषः। पौर्णमास्यां चान्वाधानपरिस्तरणोपवासः सद्यो वा सद्यस्कालं सर्वं क्रियते इति। अ-
स्यार्थः। सद्यस्कालायां पौर्णमास्यामन्वाधानादीनि सद्यः समानेऽह्नि क्रियन्ते। पूर्वेद्युर्वा तत्र सर्वं ब्राह्मणत-
र्पणं क्रियते। तदेकमिति। उक्तं च नाथार्थसंग्रहकारेण। अन्वाधिस्तरणोपवासौ पूर्वेद्युः क्रियेते खलु पौर्णमा-
स्यावर्तनात्। प्राप्य द्विपर्वसंधिः सद्यः स्तदा वा क्रियते। समस्तमिति आवर्तनात्। प्राक्संगवादूर्ध्वमिति वि-
शेषः। संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्भवेत्। पौर्णमासी विनिर्ज्ञेया सद्यस्कालविधौ विधिरिति कात्यायन-
स्मरणात्। एतच्च सद्यस्कालत्वैकल्पिकं। सद्यस्तदा वा क्रियते समस्तमिति वचनात्। तथा चापस्तंबः। खवि-
कारश्चतीयां वाजसनेयिनः समामनन्ति खर्विकामल्पिकामिति यावत्। अल्पं चेच्च दिनार्द्धव्यापित्वाभावात्। का० हे०
उक्तं च गर्गसार्थसंग्रहकारेण। मध्यंदिनात्प्रागहनीयस्मिन्प्राक्पर्वणः संधिरियं स्तृतीया। सा खर्विका वाजस- १७०
नेयिमतात्तस्यामुपोष्याथ परेद्युरिष्टिरिति। केचित्पौर्णमास्यादिसद्योऽन्येतदेतमेकस्तत्र। अपरे तु सद्यः-
कालायां सर्वं क्रियत इति वदन्ति। तत्रैव सर्वस्यां पौर्णमास्यामन्वाधानादीनि सद्यः पूर्वेद्युर्वा क्रियन्त इति।

---

२ अत्र द्वित्रपत्राणि गलितानीत्यनुमितिः

पर्वस्त्वस्यार्थः। द्वितीयस्तु सद्यस्कालाविच्छतिः। तस्यां सर्वं प्राणितर्पणान्तं क्रियते। नैकान्तादिकमिति। नेन घुस-
अपराह्णे तथोः सद्यस्कालपक्षे संधिमदह्नि निधानीयजेतेति श्रुतिविरोधिकं। वसिष्ठोपि। अथातः स्वाध्यायो-
पाकर्म। श्रावण्यां प्रौष्ठपद्यां वेति। प्रौष्ठपदी भाद्रपदस्य पौर्णमासी। गोभिलः। प्रौष्ठपदीं हस्तेनोपाक-
रणं। प्रौष्ठपदीं प्राप्येत्यर्थः। मनुरपि। श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत
मासान्विप्रोऽर्द्धपंचमान्। अपिशब्देन भाद्रपदश्रवणहस्तपंचमीनामुपादानं। तथा च बह्वृचगृह्यपरि-
शिष्टकारिकायां। अवृष्टौ षधयस्तस्मिन्मासेन संभवति चेत्। तदा भाद्रपदे मासि श्रवणे वा तदिष्यत
इति। उपाकर्म प्रवृत्तस्य सार्द्धांश्चतुरो मासान् शुक्लपक्षेषु निरंतरं स्वाध्यायमधीयीतेत्यर्थः। वसिष्ठः। अ-
र्द्धपंचमान्मासानधीत्योत्सृजेदिति। पंचार्द्धमासान्पक्षा। कात्यायनः। उपाकृत्योदगयनेन ततोऽधीयीत धर्म-
वित्। एतच्च गृहणाध्ययनं गृहस्थस्यापि। यदाह शौनकः। समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमित-
रेणाप्युपर्यात्मिके। इतरे ब्रह्मचारिणः। अत एव गृहस्थस्यापि गृहणाध्ययनेऽधिकारं ज्ञापयितुं ततः श्रकर-

णोऽध्ययनविधिः कालदृष्ट्या तु उपाकर्मोत्कर्षः कात्यायनेनोक्तः। उत्कर्षः कालदृष्टोऽस्य उपाकर्मादिकर्मणि। अ
निषेकादिदृष्टो नानूत्कर्षे स्तुगादिषु। उपाकर्म महादोषप्राप्ये तद्दिष्टं प्रपादित इति। तच्च दोषविषयं। तेषा
ङ्किकालदृष्ट्वापि सिंहार्कः एवोपाकर्म। यदाह गार्ग्यः। सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद् द्विजः। छंदोगैर्मि
लिताः कुर्युरुत्सर्गं सर्वछंदसां। शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकं। एतच्च ग्रहणाद्यदिष्टश्रावणपा
र्ते कार्यं। तथा च स्मृतिः। उपाकर्म प्रकुर्वीति। कर्माकर्म समर्थज्ञैर्विद्वद्भिः। ग्रहसंक्रान्त्ययुक्ते तु हस्तश्रवणपर्वसु। त
था। संक्रांतौ ग्रहणे चैव सूतके मृतके तथा। गणस्नानं न कुर्वीत नारदस्य वचो यथा। अथ चेद्दैवसंयुक्ते पर्वणि
स्यादुपक्रिया। उत्सर्गो कामयत्र स्याद्राष्ट्रे तस्मिन्द्विजातयः। तथा यदि स्यात् श्रावणं पर्व ग्रहसंक्रांतिदूषितं का०दे०
स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु। स्मृतिमहार्णवे। संक्रांतिर्ग्रहणं वापि यदि पर्वणि जायते। तन्मासे १७१
हस्तयुक्तायां पंचम्यां वा तदिष्यते। अत्र केचिदाहुः। हस्तयुक्तायां पंचम्यां चेति विकल्पः। हस्तयुक्तायामित्य
स्य विशेष्याकांक्षायामुपात्तपंचम्येवान्वयात्। यदि स्यात् श्रावणं पर्वेत्यादिवाक्यस्य पर्वणो ग्रहसंक्रांतिदोष

पंचमीमात्रे उपाकर्मविधायकस्यास्मिन्पक्षे संकोचप्रसंगात्। नन्वेवं पंचमीपदस्यावृत्तिः प्रसज्येत॥
सा च संकोचादुष्टा नैव। हस्तयुक्तायामित्यस्य विशेष्याकांक्षायामेव श्रुतेनापि निपक्षद्वयेप्यावृत्तिरु
क्तिस्तस्यैवाद्वारद्वयनिधानात्। तत्रापि हस्तयुतत्वांशं नवेकेवलेपि। तद्युक्तं। पंचम्यां वेति। पंचम्यास्तिथ्यं
तरविकल्पप्रतीतेः। तद्विशेषापेक्षया हस्तयुक्तायामित्यस्य तद्विषयता या एव युक्तत्वात्। एवं पंचपदस्ये
पि बुद्धिस्थस्याद्वारे सत्यस्मिन्पक्षे पंचमीपर्वयुपाश्रुतेऽत्। न च पक्षे हस्तयुतत्वांशावेविशिष्टपंचमीपर
विशेषः। ननु हस्तयुक्तपंचम्याः श्रेष्ठपक्षाविकल्पः कस्मान्न भवति। उच्यते। स्ववाक्योपात्तलाभे वाक्यांत
रीयानाश्रयणात्। एवं च विकल्पे स्थिते संकोचोपि बलादापतितः स्वीक्रियते। तस्मात्पंचम्या हस्तस्तिथ्यं
तरेण विकल्पः। तत्रापि हस्तयुक्तायाः संनवेकेवलेति। एतच्च वाजसनेयविषयं। तथा च स्मृतिमहार्णवे
वचनांतरं। संक्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिः॥
अत्र केचित्सर्ववाक्यसाधारण्येन वाजसनेयोपपदस्योपलक्षणतां मत्वा नाश्वलायनीयानामिति। पंचम्या

मुपाकर्म्मेच्छंति। तदयुक्तं। लक्षणप्रसंगात्। लक्षणं तस्योपसंहारस्योक्तत्वात्। यदि च सर्व्ववाक्यसाधा
रण्याद्वच लक्षणा। तर्हि तुरीयाद्यातृचतुर्द्धाकरोतीत्यस्य साधारण्याद्धमेयचतुर्द्धाकरोतीत्यत्र लक्षणाप्रसं
गात्। अत्र पंचमी तन्मासगतैव गृह्यते। नान्यमासगता। अप्रकृतत्वात्। तस्माद्वाजसनेयीविषयमेतदृति
ष्ठतु वाजसनेयिवाक्यं। तथापि न सर्व्वस्माद्वाक्याद्धदसंक्रांतिदोषेण तैत्तिरीयाणामुपाकर्म्म प्राप्नोतीति। त
था हि। अत्रोपाकर्म्मणि। स्मृतिषु नानाकाला विहिताः। तेषां तु तत्तच्छाखानुसारेण व्यवस्थितविकल्पाश्र
यणं युज्यते। न तैत्तिरीयगृह्ये पंचम्यामुपाकर्म्म श्रूयते। येषां तु गृह्ये पंचम्यामपि श्रूयते। तेषां व्यवस्था
तविकल्पो ग्राह्यः। यत्तु शाखाप्यन्यां तं च मासे तत्र वा। कालांतरमपि व्यवस्थाप्रमाविदं वचनमुपतिष्ठति। ए का०दे०
वं चापेक्षितविपर्ययविषयत्वान्न तु तैत्तिरीययागे। उपाकर्म्मण्यप्रामविधो। तस्माद्धदसंक्रांतौ दृष्टायां श्राव २७२
ण्यपौर्णमास्यां तैत्तिरीयकैः शेषपद्यामुपाकर्म्म कार्यमिति सिद्धं। अत्र केचिदाहुः। पर्वणि ग्रहणे
सति चतुर्दश्यां स्थित्यपि श्रवणेनोपाकर्म कार्यं। त्रयोदश्यादिनेष्वज्ञो दिनानां नवकं ध्रुवं। मासपक्षेषु समस्ते

षु समस्तेषु ग्रहणे वेदसूर्ययोः। इति वचनात् स्वकालांतरेणापि वेधः स्मृत्यंतरे दर्शितः। त्रयोदश्यादि द्वि
तीयांतो वेधश्चंद्रग्रहे स्मृतः। एकादश्यादिकः सौरे चतुर्थ्यां तः प्रकीर्तितः। खंडग्रहे तयोः प्रोक्तं तु न यत्र दिन
द्वयं। दिनद्वयं पूर्व्वोत्तरं ग्रस्ते खंडग्रहे तयोरिति वचनादिति। तदयुक्तं। नित्ये नैमित्तिके जप्ये होमे यज्ञ।।
क्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति वचनात्। इत्थं श्रवणपर्वणोरपि कानिया
त्वाणि। तथा च परिशिष्टे। धनिष्ठाप्रतिपद्युक्तं वा त्वष्ट्रऋक्षसमन्वितं। श्रावणं कर्म कुर्वीरन् ऋग्यजुःसा
मगाः सदा। श्रवणेन तु यत्कर्म उत्तराषाढसंयुते। संवत्सरकृतो ध्यायस्तत्क्षणादेव नश्यति। ध
निष्ठासंयुतं कुर्याच्छ्रावणं कर्म सफलं विधादुपाकरणसंज्ञितं। निगमः। मद्योगेन गुरुं हंति संक्रांतिरि
ष्यघातिनी। तपो हंत्यनूराधाय उपाकर्मणि वैश्वे। धनिष्ठामिश्रिते कार्यमुपाकरणसंज्ञितं। किं च म
कालिकापुराणे। चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ। वेदान् हृत्वा कुर्व्वतः पद्मयोनेस्तौ जह्नतुः श्रुती।
हृत्वा तावसुरौ देवः पातालवासिनौ। आहृत्य ताः श्रुतीस्तस्मै दद्यौ लोकगुरुः स्वयं। अनृत्य श्रुतिभि

ह्यापर्वण्योरदयिके पुनः। अतो न तत्र तु तस्मिन्नोपाकरणमिष्यते। आसुरं वर्ज्जयेत्कालं वेदाहरणकं कयाह
दत्वचेताः॥ तवेदुपाकृतिः पौर्णमास्यां मध्याह्न एव तु। ब्राह्मणान्भोजयेत्तत्र पितॄनुद्दिश्य देवताः॥ तद्विष्णोत्तरे
संग्रामे श्रावणस्यां तु पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान्श्रुतिस्मृतिविधानतः॥ ततो देवान्पितॄंश्चै
व तर्प्पयेत्परमांभसा। उपाकर्म्मादि चैवोक्तं ऋषीणां चैव तर्प्पणं। कुर्वीत ब्राह्मणः आद्यं वेदानुदिश्य यत्नशक्ति
तः॥ अत्र चोदयिके पर्वण्युपाकर्म तैत्तिरीयकैः कार्य। यत उक्तं। बह्वृचपरिशिष्टकारिकासु पर्वण्योदयि
के कुर्युः श्रावणं तैत्तिरीयकाः॥ बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते। इति। अन्योन्यत्र विद्ध एव। श्रावणी
दुर्गनवमी तथा दूर्वाष्टमी च या। पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति वचनात्। अत्र केचिदाहुः
नैतद्युज्यते। तथाहि। अत्र तैत्तिरीयका एव पर्वणीति न नियंतुं शक्यते। अन्येषामपि चरणानां पर्वण्युपा
कर्मविधानात्। न च पर्वण्योदयिके कर्म तैत्तिरीया एव कुर्वीत इति। वाक्यार्थो युज्यते। विशिष्टानुवादे वाक्य
भेदप्रसंगात्। विशेषाणामप्राप्तेरनुवादे च मध्यत्राक्यत्वात्। एतावन्निशिष्टकर्मणि तैत्तिरीयकाणां

का०टी०
१७३

फरणं विधानानुपपत्तेः। कर्तुर्हि कर्मविधीयते न कर्मणि कर्ता। किं च। उपाकर्मतत्कालश्च पौर्णमासीतयो
र्द्वयं यथायथैव विहितं। नात्र कारिकावयं तद्विधानं। अत्र तु पौर्णमासी कालस्यांगं उदयिनकालेन संबंधं तु
द्दिश्यते। तत्र यदि तैत्तिरीयकैरौदयिकस्यापरः संबंध उद्दिश्यते। सत्यां संबंधद्वयाभिधानात् भिद्यते वाक्यं
किंच। तैत्तिरीयकाः कर्तारो ऽप्यंगमेव। नावांगानां मिथः संबंधो ऽस्ति। न चारुणैकहायनीन्यायेन परस्पराना
नो गुणानां संबंध इति वाच्यं। तत्र हि। अरुणगुणैकहायनीद्रव्यविशिष्टः क्रियो गृह्यते। अनंतरं द्रव्यगुण
योः परस्परसाकांक्षत्वात्। सामानाधिकरण्येनान्वयो न वृत्तिः। अत्र पुनः कारिकायां नोपाकर्मविधानं न
च पर्वौदयिकत्वे तैत्तिरीकयोर्द्रव्यगुणत्वेनापि सामानाधिकरण्यं। अन्योन्यद्रव्यकांक्षा च। अतो द्विविरु
नयवद्विवक्षितार्थं तैत्तिरीयकपदमुपलक्षणं कृत्वानुवादः। शाखांतराधिकरणन्यायेन सर्वे शृह्ये
श्रुपाकर्मण्ठाने तैत्तिरीयाणामुक्तं पर्वौदयिकत्वमविरोधादन्यैरपि ग्राह्यं। तथा च परिशिष्टे ऽभिहितं। य
न्नाम्नातं स्वशाखायां पारक्यमविरोधि यत्। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्। श्रावणी दुर्ग

नवमीत्यादिवचनस्य कर्मविशेषानुपादानात् । हिरण्यगर्भस्य पवित्रारोपणविषयः । उपाकर्मागस्
तमात्स्य दयिकं च । श्रावणीकर्म चेति । तस्मात्तैत्तिरीयाणामेवोदयिकं पर्वण्युपाकर्मेत्युक्तमिति । नह्यु
क्तं । यत्र स्वनन्यगतिपदं तत्र पदवैयर्थ्यं नियावीशिष्टस्यादेर्नुत्वे । यथाष्टवर्षं ब्राह्मणमुपनीयते सा
द्विषु उनयपदस्य प्राप्तस्य नाम्नेपदविशात्रिनिमित्तत्वमिति न्यायतोदार्थत्वानान्यगतिकत्वानवत्वा
न्नेदः । उद्दिष्टविशेषणविवक्षायां हि सनत्रुविशिष्टोद्देशेऽयं विचितं चेत ऊवादेवेनयो नुविधातिष्
यते । तं प्रविशिष्टविध्याश्रयणेन परिहारो वक्तव्यः । ग्राह्यत्वात् । अपि च । इत्थं वीदा हतवचनैरोदयिक
कर्मण्युपाकर्मप्राप्तेरनुवादोपपत्तेः । कर्मण्यपि च कर्तृविधिरुपपन्नः । अत्राशे विषयत्वाद्विधेर्न
वसंबंधयविधानावाक्यभेदः । विशिष्टविध्याश्रयणात् । अंशेषकर्तृभेदेनपौनरुक्त्यपरिहारात् । अन्य
था सर्वस्य तत्स्छेदोपपत्तेः । एवमनस्कपगमे लक्षणानिःप्रयोजनानुवादोस्यातां । न उ यथा वैश्वदेवे
न यजेतेत्यत्र विशिष्टविधौ गौरवप्रसंगात् वैश्वदेव शब्दलक्षणयत्रित्यायेन प्रकृतयागेषु प्रव

BHAU D... का० ६१ १७४

र्तत इति स्वीकृतं तात्पर्यापि विशिष्टविधिगौरवात् । वा लक्षणापि स्वीक्रियत इति चेत् । न तत्रापि लक्षणा
पाभावात् । नहि विश्वेदेवतायागात् वैश्वदेवशब्दप्रवृत्तिः । किं तु विश्वेदेवकर्तृयोगात् । तथा च तै
त्तिरीये श्रूयते । यद्विश्वेदेवस्य वैश्वदेवत्वमिति । अर्थवादगतशब्दप्रवृत्तिनिमित्तं सर्वत्र स्वीकृतं ।
पदाय मं पुस्तहाज्यानामिन्नत्वमेवमादिषु । यत्तु लक्षणाभिधानं तदस्कपगमाद्पवादेन विशिष्ट
विधेयत्वापलक्षणीस्वीकारे अरश्वव्यवस्थप्रसंगात् । किं चात्र विशिष्टविधौ गौरवं कर्मांतराप्र
र्वंतरादिदेशकल्पना च । अनुवादश्च प्रयोजनः । अत्र विशिष्टविधौ गौरवमात्रं तदनावेउलक्षणा
निःप्रयोजनश्चानुवाद इति वैषम्यं । विशिष्टविधौ गुणानां पार्थिवसंबंधउपपद्यते कर्तुश्च कर्मानु
ष्ठानार्थकालविशेषाकांक्षा विद्यत एव । न वात्र शाखांतराधिकरणन्यायपर्वण्योदयिके कुर्युः श्रा
वण्यामित्यनेनान्येषामपि प्राप्तौ तैत्तिरीयकपदविषयवैयर्थ्यप्रसंगात् । न च तैत्तिरीयकगृह्ये प
र्वोदयिकत्वं विहितं । यदपि च कालिकापुराणे । गतारभ्यानसाधारण्यात्तैत्तिरीयकगृह्ये पर्वोदयिके च

विहितं। यद्यपि च कालिकापुराणे। गतास्वानसाधारणे तैत्तिरीयव्यतिरिक्तानामप्यौदयिके पर्वण्यु
पाकर्म। तदा बह्वृचानामपि तत्रैवोपाकर्म स्यात्। वाक्यांतरपर्यालोचनया तेषां कालांतराश्रयण
मिति तत्र समानं। किंचैवं बह्वृचपदमपि विवक्षितं न स्यादेतेन तैत्तिरीयपदाविवक्षया मुक्तं दूषणस्य
तत्रापि समानत्वात्। तस्मादेवं व्यवस्था। यदैकस्मिन्नेव दिने कर्मकालव्यापि पर्व तदा सर्वेषां तत्रोपा
कर्म। यदा तु दिनद्वये तु कर्मकालव्यापि न वा तदा तैत्तिरीयकाणामौदयिके पर्वण्युपाकर्म। अन्ये
षां त्वन्यत्रेति। ।अथोत्सर्जनकालः। तत्र याज्ञवल्क्यः। पौषमासस्य रोहिण्यामष्टकायामथापि
वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः। पौषमासस्य रोहिण्यां त्वष्टम्यां वा जलसंनिधौ। ग्रा का०डे०
माद्बहिर्वेदानामुत्सर्जनं कुर्यात्। येन प्रकारेणोपाकर्म प्रवृत्तिरध्ययने। प्रवृत्तं तत्प्रकारमिदानीं प २७५
रित्यजेत्। न तु सर्वात्मनेत्यर्थः। अत एवोत्सर्जनानंतरमाह। मनुः। पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्ज
नं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि। श्रावण्यां यद्युपाकर्मकरणं तदोत्सर्जनं पुष्यस्य

शुक्लप्रतिपदि पूर्वाह्णे यदा प्रौष्ठपद्यां तदा माघस्येत्यर्थः। अर्धपंचमान्मासानधीयीतेति तैनो। वापक्र
मात्। बौधायनः। श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेत्। आपस्तंबः। तैः पौ
र्णमास्यां रोहिण्यां वा विरमेत्। अत्र रोहिणी याज्ञवल्क्यवचनानुसारेण पौषमासस्य ग्राह्या। कात्याय
नः। उपाकृत्योदगयने ततोऽधीयीत धर्मवित्। उत्सर्गश्चैक छंदोगा खेतिष्यां प्रोष्ठपदेऽपि वा। छंदो
गानामुत्सर्गकालमाह गार्ग्यः। सिंहे रवौ तु पुष्यार्क्षे पूर्वाह्णे विनारबहिः। छंदोगा मिलिताः कुर्युरु
त्सर्गं छंदसां। परिशिष्टे मासे प्रोष्ठपादे हस्तबुधस्य पूर्वेन वेद्यदा। तदा च श्रावणे कुर्यादुत्सर्गं छंदसां
द्विजः। खादिरगृह्ये। पुष्ये चोत्सर्जनं कुर्यादुपाकर्मदिने तथा। एतच्च कर्मद्वयं प्रत्यब्दं कार्यं। यदाह
कात्यायनः। प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः। क्रीडमानैरपि सदा न तेषां सिद्धिकारकं॥ ॥
अथ संक्रांतिनिर्णयः। ।तत्र संक्रांतिभेदाः। देवीपुराणे। द्वादशैव समाख्याताः समाः संक्रांतिकं
ल्पनाः। संक्रांतिकल्पना संक्रांतिभेदाः। मेषादयो मीनांताः। समाख्याताः। ते संक्रांतिसामान्यतश्चेन

विहितानां प्रतिषिद्धानां च कर्मणां समाः साधारणा इत्यर्थः। ब्रह्मवैवर्ते। दादश्रोवनवंस्तेषां द्विजनामा

नि मे शृणु। एकं विष्णुपदं नाम षडशीतिमुखं तथा। विषुवं च द्वितीयं च अयने दक्षिणोत्तरे। कुम्भालिगो

हरिषु विष्णुपदं वदन्ति स्त्रीचापमीनमिथुने षडशीतिचक्रं। अर्कस्यानमयनेत्राश्रिधान्नियाम्मा

कृते विषुवती तुलाजौ लिखितोः स्यात्। आलिर्वृश्चिकः। गोर्वृषभः। हरिः सिंहः। स्त्री कन्या चापि धनुः। त्राशिधा

म्नि कर्कटके याम्यां दक्षिणे सौम्ये उत्तरे झषे मकरे। अजो मेषः। तौलि तुला। वशिष्ठोपि। अयने द्वे

विषुवे द्वे चतस्रः षडशीतयः। चतस्रो विष्णुपाद्याश्च संक्रान्त्यो द्वादश स्मृताः। झषकर्कटसंक्रान्ती द्वे तू

दगुदग्दक्षिणायने। विषुवती तुलामेषौ। तयोर्मध्ये ततोऽपरे। वृषवृश्चिककुम्भेषु सिंहे चैव यदा रविः। का०दे० ७६

तद्विष्णुपदं नाम विषुवादधिकं फलं। कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षडशीतिमुखाः प्रो

क्ताः षडशीतिगुणाः फलैः। तयोर्मकरकर्कटयोर्मध्ये विषुवतीकथितमोरमध्ये ततोऽपरा इति पा

ठः। गोलाराशिचक्रं। धनुर्मिथुनकन्यासु मीने च षडशीतयः। ज्योतिःशास्त्रे। वृषवृश्चिकसिंहेषु कुम्भ

नेविष्णुपदाः स्मृताः। तथा। विषुवत्तुलापि मेषो मत्स्यस्त्रीमिथुनधनुषि षडशीतिः। वृषकर्कटयोरय

नं राशिषु शेषेषु विष्णुपदी। नक्षत्रविशेषयोगेनैकैकस्य सप्तसंज्ञा कथिता। देवीपुराणे। सप्तधालो

त्रवोध्याः एकैकेव यथा शृणु। येन प्रकारेणैकैकमेषादिसंक्रान्तिः सप्तधा सप्तप्रकारा शृणु। मंदा मं

दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी। राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप। सूर्ये घोरा विधौ ध्वाङ्क्षी

भौमवारे महोदरी। बुधे मंदाकिनी नाम मंदा सुरगुराविति। मिश्रिता शुक्रवारे स्यात् राक्षसी च शनैश्च

रे। एतासां संक्रान्तयः सप्त फलमासां तथोच्यते। मंदा तु क्षेत्र विज्ञेया सूनुर्मन्दाकिनी तथा। द्विशेध्वांक्षि

विजानीयादुर्थे घोरा प्रकीर्तिता। चौरे महोदरी ज्ञेया क्रूरे रक्षेश्च राक्षसी। मिश्रिता चैव निर्दिष्टा मिश्रि

तानां संक्रमे। ध्रुवाणि स्थिराणि। त्रीण्युत्तराणि रोहिणी मृदूनि। अनुराधा चित्रा रेवती मृगशी

र्षाणि लघूनि। अभिजिद्धस्ताश्विनीपुष्याणि उग्राणि। पूर्वात्रयं भरणी मघा — चराणि। पुनर्व

सुश्रवणधनिष्ठास्वातिशततिषा। क्रूराणि तीक्ष्णानि तानि मूलज्येष्ठार्द्राश्लेषा मिश्रकृत्तिकावि

द्वेषो वा। त्रिचतुःपंचसप्ताष्टौ नवद्वादश एव च क्रमेण घटिकाः स्मृताः॥ तत्तुण्णं हारमिथाकौ। यथा संक्रा-
तु सर्वासु संक्रांतिषु सप्त कालो द्रष्टव्याः॥ पारमार्थिकं चापि सौरादि लग्नेषु द्युतमसंक्रांतिकाले
धर्मानुष्ठानेन यद्यल्लभ्यते। तदेव फलमेतास्वपि घटिकासु जन्मतः स्मर्य॥ तस्मिन्नुण्यतस्तु
एतत्तया। मंदाकिन्यां ज्ञेनेनात्ता मंदाकिन्यस्तु राजनि। ध्वाङ्क्षी वेश्यासु विज्ञेया घोरा शूद्रेषु नप्रस-
महोदरी तु चौराणां श्रौं फिकानां जयावहा। चंडालपुक्कसानां च ये चान्ये क्रूरकर्मणः॥ सर्वेषां का-
रुकाणां तु मिश्रिताहत्तिवर्द्धनी॥ मंदाकिन्यस्तु राजनीतिः क्षत्रियस्य प्रशस्तान वतिस्पर्धीः श्रौं-
फिकानां जयावहे सत्त्रराद्वसिविद्रष्टव्या। एवं च प्रयायस्य जयावह सततस्पोन्नृपायामन्तु ह्मसाध-
नानिकर्माणि कुर्युः। यस्याया अजयावहा। स तस्याः दोषनिवृत्त्यर्थं श्रातिकानिकुर्यात्। अन्यमपि
श्रातिकानुष्ठानार्थं विशेषमाह। नृपी ग्रीष्म्यां तस्यां शिमध्या कृत्वद्विजोत्तमाः। अपराह्णे तु घायेत्
रात्रौ श्रूद्रायाश्रातमयेरवे॥ पितृश्राद्धातमये चैव अर्धरात्रे तु राक्षसा। अर्धरात्रे व्यतिपाते पीताते नन्द- का०हे० २७७

नर्त्तकाः। उषःकाले तु संक्रांते इंति गोस्वामिनो जनान्। इति चतुर्जितानुसर्वान्नृ संध्याकाले विशेषतः। संक्रां-
ति ज्ञायते यत्र तास्करन्मृस्तुतेशनो॥ विद्यान्मासि नये तेन दुर्भिक्षा वृष्टिमारजा। स्पाऽधिकस्य किंतु भेदकृ-
नौ कालवैरवो। संक्रांतिस्त्तेतिलेन गोप्रसुमस्पचतुष्पदे। निविष्टस्य गरो विद्यां चवेवणि जीवालवे
वृद्धार्थादेः क्रमादिष्टमनिष्टमध्यमफलप्रदा। तनसंक्रांति र्याहृद्वेनेष्ट नान्नवेत्तात्। नमासि ताट्ट्य-
पाऽभ्युनाप्तु नफलं नृणां। नागरखंडे। रवेः संक्रमणं राशौ संक्रांतिरिति कथ्यते। स्नानदानतपः श्रा-
द्धादोमादिषु महाफलो। रवेः राश्योः संक्रमणं या संक्रांतिः सायडांनरसंक्रांतिः सो महाफलेति कथ्यत
इति। श्रातातपः। रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः। स सप्तजन्मानि रोगी स्यान्निर्धनश्चापि
जायते। कचिन्नु तराद्रमेघात्र पठ्यते। स सप्तजन्मांतरं रोगी दुःखभागी यदा नचेत्तान। संक्रांतो यानि दि-
ज्ञानि दत्तकन्यानि हातुनिता। निनित्वं दद्वात्सर्वार्घपुनर्जन्मनिजन्मनि। अयनो द्वौ सदा देयमृष्ट-
मन्त्रग्रहे सु यतः। पद्म श्री तिमु रवे चेव विमोक्षे च द्वसूर्ययोः स्कांदे नागरखंडे। पाणेनेतनयमोक्षा

न्वगाः संक्रान्तिः सर्वकाः ॥ नैतेषु दिवसे विष्णुपदस्याक्षयसंज्ञिता ॥ अश्वेदयापि यद्दत्तं कपात्रे समी-
पिमानवे ॥ अकालेपि च तत्सर्वं संलभन्त्यक्षयं तावदेवेति दिति देवीपुराणे । विषुवेषु च यत्क्रमं दत्तं भवति-
चाक्षयं । एवं विष्णुपदे चैव षडशीतिमुखेषु च । नरवाज । षडशीत्यां च यद्दत्तं दानं वै विषुपदेयो । दृश्य-
ते सागरस्यान्तात् नस्यान्तो नैव दृश्यते । वशिष्ठः ॥ अयनेषु च यद्दत्तं षडशीतिमुखेषु च । चन्द्रसूर्योपरागे च
दत्तं भवति चाक्षयं । अयने कोटिपुण्यं च लक्षं विष्णुपदी फलं । षडशीत्यां सहस्रं तु षडशीत्यां स्मृतं बुधैः
॥ शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये । विषुवच्छतसाहस्रं व्यतीपाते त्वनंतकं । इत्थं च वशिष्ठः ॥ अय-
ने विषुवे चैव त्रिरात्रोपोषितो नरः ॥ स्नात्वा चार्चयते नानु सर्वकामफलं भवेत् । आपस्तंबः ॥ अय- का०वि०
ने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः । अहोरात्रोपोषितः स्नातः सर्वपापैः प्रमुच्यते । एतच्च पुत्रवद्गृहस्थ- १७८
व्यतिरिक्तविषयं । आदित्यदिने संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ॥ उपवासो न कर्तव्यो गृहिणा पुत्रिणा त-
था । इति पुत्रिणो गृहस्थस्य रात्रोपवासनिषेधात् । ब्रह्मपुराणे तुला मेषागते सूर्ये विषुवे दिव-

सेसति । ब्राह्मणो मोघदेयानि सस्यान्यनिमतानि च । तथा । मेषं जिगमिषौ सूर्ये त्रिरात्रं घृतकंबलं
अपास्य देहाद्देवत्वाद्दृष्टा कार्यप्रयत्नतः ॥ कालिपुराणे । जनकं तु लिङ्गानीलपद्मरागं च मौक्तिकं
एतानि पंच रत्नानि न्यसेद्देवस्य मूर्द्धनि । रत्नानां वा यथा वेतु कर्षकं षड्विमेव च । सुवर्णं योजयित्वा तु
प्रदद्याद्घृतकंबलं । दद्याद्वोपस्करं नृपो ब्राह्मणाय तिनिःस्वरं । संतोष्य दक्षपि चातुकल्पये द्विनिवारि-
तं । कलिङ्गं द्वीरकं दत्त्वा पित्तादृक्षिणया सह उत्तकल्पयद्भोजनमिति त्रोप ॥ उपोष्य सर्वमेवैतत्कुर्या-
द्भक्तिपुरस्सरं । पंचगव्यं तिलैर्युक्तं पीत्वा वे पारये स्वयं । तिलैः स्नानं प्रकुर्वीत ते रेवाई त्तेन बधः ॥
देवतानां पितृणां च उनाम्ना तर्पणं तथा । पारये तारणं कुर्यात् । तिलस्नानपारणयोर्नतिक्रमो वि-
वक्षितः ॥ उनाम्ना मपितादृष्टैव तथा । होमं तैश्च प्रकुर्वीत सर्वदैवो नरायणे । नान्वे देवाय विप्रेभ्यो नि-
हकेन समवदेत् । यत्नाद्देवकरोत्येवं विन्नं ज्ञानोनिवेदय ॥ उत्तरायणमासाद्य नरः कपाशे योग्य-
ते । ब्रह्मपुराणे । शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः । महाजयाति द्यास्या दैसप्तमीगास्त्ररीय

स्नानं दानं तपो होमः पितृदेवादिपूजनं। सर्वं कोटिगुणं प्रोक्तं तपनेन महीजसा। यस्तु स्नानं दानं च कृष्टे तेन स्नापयेत् विरोस्यैकमेव फलं प्राप्य ततः सूर्यपुरं व्रजेत्। पयसा स्नापयेद्यस्तु नास्कर नन्दिनं नरः। विमुक्तः सर्वपापेभ्यो याति सूर्यस्य लोकतां। कर्पूरेण विमानेन किंकिणीजालमालिना। तेजसा रविसंकाशः कांत्या देवसमो नवेत्। स्थित्वा तत्र चिरं कालं राजा भवति किं जनः। मेषे पाकथिता पुण्यसप्तमी त्रिपुरांतकः। पानुपो ष्पनरो नक्तमामच लान्नेगलानवेद्। ततो याति परं ब्रह्म पत्र गवान् रोचते। संक्रांतिविशेषेण द्रव्यविशेषमाह। विश्वामित्रः। मेषसंक्रमणे भानोर्मेषादानं महाफलं। वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च। वस्त्रान्नदानपानानि मिथुने विहितानि च। घृतधेनुप्रदानं च कर्कटे परिशाष्यते। सच्छत्रं वर्णयत्नं दानं सिंहे पि विहितं सदा। कन्यायां च प्रवेशे च वस्त्राणां सुरभीणां तथैव तु ला प्रवेशे धान्यानां बीजानां चैव चोत्तमं। कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च। अत्र कोटीदक्षिवकं।। धनुःप्रवेश वस्त्राणां यानानां च महाफलं। मकरप्रवेशे दारूणां दानमग्नेस्तथैव च। कुंभप्रवेशे शह

का॰ हे॰ १७९

नेत्रगवेमं बुतृणस्यचामीन प्रवेशेऽम्लानां माल्यानां मपि चोत्तमं। दानान्येतानि मया द्विजेंद्राः प्रोक्तानु कालेतु नरः प्रदत्वा। प्राप्नोति कामान्मनसा स्वदृष्टानितु तस्मात्त्रासेति हि कालदानं। स्कांदे धेनुं तिलमयीं राजन्दद्यात् यश्चोत्तरायणे। सर्वान्कामानवाप्नोति विंदते परमं सुखं। विष्णुधर्मोत्तरे। उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं। तिलपूर्वमनड्वाहं दत्वा रोगैः प्रमुच्यते। शिवरहस्ये। उत्तरामकरसंक्रांतौ संकरे गोरसवेष्टते। तिलानुत्पाद्य यामास रक्षये सर्वदेहिनां। तस्मात्तस्यां तिलैः स्नानं कार्यं चोद्वर्तनं तु तैः। देवतानां तु पितृणां तु सोदकैस्तर्पणं तिलैः। तिलादेयाश्च विप्रेभ्यः सर्वदेवोत्तरायणे। तिलांश्च नद्येत्तु ल्पानादात व्याश्वतपा तिलाः तस्यां तिथौ निलोकृत्वा येऽर्चयति द्विजोत्तमाः। त्रिदिवेते विरागोसहस्रस्य दायिनः। तिलतैलेन दीपाश्च देयाः शिवगृहेषु नाः। सतिलैस्तंडुलैर्देवं पूजायद्विधिवद्विजः। घृतानि षिकं वा कुर्यान्महापुण्यफलेप्सया। घृतदूर्णीनं ना डेन सा विशेण चंद्रनिद्राः। प्रस्वेना मेन वं नो — रद्याघृतकंबलं। सर्पिषा रुपकं रम्य त्रूवोप्येयो निवृत्तये। इयं च संक्रांतिरिति सूक्ष्मक

ला।तथा च देवीपुराणे।एतत्स्थूलविभागेन त्रिंशिका मम कीर्त्तिता।परमार्थेन संख्यां कथयामि नृपोत्त-
म।स्वस्थेन र सुखासीने यावत्स्पन्दति लोचनं।तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्त्तितः।तत्परस्य शतभा-
गस्तु त्रुटिरित्यभिधीयते।त्रुटिः सहस्रभागार्द्धं तत्कालं रविसंक्रमे।तत्काले तु द्रवीभूतं त्रैलोक्यं सराच-
रं।अत्र तस्यापि सन्दिग्धमुवाच सुरसत्तम।स्नानाध्ययनजप्यादि विसृष्टं वह्निहोमतः।वासो धरास्तु-
लम्बेत अन्यथा तत्कथं च नाम तस्यास्यातिसूक्ष्मायां कर्मानुष्ठानं शक्यते।इति से निहितकालो-
ग्राह्याः।स च क्रियानुग्राह्य इत्यपेक्षायामिमाह वशिष्ठः।संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः।
तद्योगाच्चाप्यधश्चोर्द्ध्वं त्रिंशन्नाड्यः पवित्रिताः।अधश्च त्रिंशन्नाड्य ऊर्द्ध्वं च त्रिंशन्नाड्यः पुण्यकालः।एव- का०हे०
त्रिंशन्नाड्यः पूर्वं पञ्चदश पश्चात्पञ्चदशेति ज्ञेयाः।एवं हि सति वक्ष्यमाणदेवीपुराणवचनेन सह- १५०
संवादो भवति।जाबालिः।संक्रान्ते पुण्यकालस्तु षोडशोभयतः कला।अत्र कला नाड्यो वक्ष्यवाक्या-
नुरोधात्।मरीचिः।नाड्यः षोडश पूर्वेण संक्रान्तेरपरेण यः।राडो दर्शमात्रेण पुण्यकाल प्रकीर्त्तितः।

शातातपः।अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश।कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः।
अत्र केचिद्विकुः।उभयतः षोडश घटिकापुण्यत्ववचनं।न हि विष्णुपदीविषयं पुण्यः कालो विष्णुपद्या
ःप्राक् पश्चादपि षोडशेति।स्कन्दपुराणवचनात्तु तदयुक्तं।अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु
यत्।षोडशीतिमुखे चैव विमुक्ते चेन्दुसूर्ययोरिति।वचनेनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत्।षड-
शीतिमुखे च विमोक्षे चेन्दुसूर्ययोरिति वचनाद्धि षोडशीत्यां च दानं विधाय परमस्मृतान्तरा-
नानुपपत्ते।कालशेषापेक्षायां शातातपेनोक्तं।अर्वाक् षोडश विज्ञेया इति वचनं विष्णुपद्यां षड-
शीतिविषयं।यत उक्तं वशिष्ठेन।षोडशीत्या व्यतीताया षष्टिरुक्तास्तु नाडिकाः।पुण्याख्या विष्णुप-
द्याश्च प्राक् पश्चादपि षोडश।अत्र च षोडशीत्यामपि प्राक् पश्चादपि षोडशेति गम्यत इति।एत-
दपि पूर्वमेव निराकृतं।देवीपुराणे।अतीतानागता भोगा नाड्यः पञ्चदश स्मृताः।संक्रान्तौ नि-
मित्ते विहितस्य स्नानदानादिनिषिद्धस्य चाध्ययनादेः पालने भोगः।भुजपालनाभ्यवहारयोरि

तिस्मरणात्। सा निष्पंदं तु न वेत्ति च यद्रश्मिसंक्रमं रवेः। म्यबज्ञारो न वेत्ति लोके चेत्सूर्योपलक्षितः। कालवि
कलते सर्वं ब्रह्माण्डं सचराचरं। कलनात्सूक्ष्मस्थानयोः। कालेसंक्रांतिव्यासे विकल्प्यते। विगतं सूक्ष्मनक्षत्र-
स्पर्शः। पुण्यपापविभागेन फलदेवीत्र यच्छति। दिवी संक्रांतिकालस्वरूपाद्यर्थः। एतद्देवसंक्रांत्युपक्रम
निर्दिष्टं। समयेन तु तुर्मासपक्षाहोरात्रादिक्रमेण तु। स्थूलसूक्ष्मविभागेन देवी सर्वगता विभोः। संक्रांत्याख्या
य समासे च पक्षं। देवी कालगता वक्ष्य यथा सूक्ष्मा प्रकीर्तिता। साधकः सर्वकामानां महापापविनाशि
नी। एकधा पि च्छिन्ते तस्मिन् फलं कोटिगुणं न वेत्ति। धर्मादिविवर्द्धते स्नातुराज्यपुत्रसुखादयः। अधर्माद्या
धिक्षेपो कोटि विषुवा च न संनिधौ। सन्निधाव पि च वेनेनायते पुष्येवं संनिधौ फलविशेषाद्दर्शितः। तथा का०३०
अयनेषु विकल्पो यत्स्वं मे निगद्यते। स्युः प्राग्याविंशतिकलानुक्रान्तः पुण्यं तूत्तरायणे। निरंशो नास्क १८१
रेद्दृष्टे दिनांते दक्षिणायने। अयनेषु विकल्पस्यायमर्थः। या अयने दिवा संक्रांतौ पूर्वापरविभाग
नसौम्यायनतः प्राग्व्यवहारानाड्यः याम्यरात्रिसंक्रांतौ रोप्रहरद्वयात्तु विंशतिनाड्योऽधिकाः संबध्नी

याः। तेनार्द्धरात्रात्प्राक्पश्चाद्वा संक्रमे सममेव यद्दिनद्वयं पुण्यमिति। पञ्चधा याम्यायने पूर्वापरविभागेन पंच
दश नाड्यः। स्वैवेतास्मिन् रात्रौ वाभिनिर्जयोः। तथा चोनयतः पञ्च विंशतिनाड्यः पुण्या इत्युक्तं भवति। अथवा
पूर्वापरे वेपंचदश नाड्यः उत्तरायणे दक्षिणायने चाधिकाः पुण्या इत्यर्थः। अन्ये त्वेवं व्याचक्षते। विंशतितमी कला
संक्रांतिक्षणात्पूर्वं यावद्भवति। तावत्पुण्यं। अन्ये त्वेवं व्याचक्षते। यावद्दिनव्ययः सा कल्पविधिपरिणा
मे पुवर्त्तते। यावत्यो विंशतिकलाः पुण्यतमाः कालस्यायनेनुक्रांतस्ता वद्धिंशतिगुणं पुण्यमुत्तरायणे इ
ति। अन्ये त्वेवं व्याचक्षते। याविषुवादिस्तो विंशतिघटिकाः पुण्यकालस्यायनेनुक्रांतास्तावद्धिकं न
तु पुण्यं उत्तरायणे इति विकल्पो विशेषः। निरंशो अंशकष्टत्वे संक्रांतिकालो नास्करः। अंशरादिगोनव
ति। दिनांते दक्षिणायने उदगयने देवानां दिवसः। तद्रतत्स्वदक्षिणायनमिति स्वरूपानुवादः। अन्नसेवेव
ते। विषुवे पञ्चमुहूर्त्तस्यात्पकृष्णीतिमुखे त्र यं। तथा विष्णुपादत्रीणि पुण्यानि कथयो विदुरिति। मरीच्या
दिवाके पुण्य दल्पकालश्च तिपादनात्पुण्यातिशयमतिपादनार्थमिति द्रष्टव्यं। अत एव शातातपः स्पष्टा

संनिहितानाम्यस्तास्ताःपुण्यतमागताः।ज्योतिःशास्त्रेमध्येविषुवतिदानंविष्णुपादेदक्षिणायनेचादौ।ष
डशीतिमुखेतीतेतथोदगयनेचभूरिफलं।अत्रमध्यशब्देनसंक्रांतिभसासन्नपूर्वापरकालग्रहणं।
संक्रांतिमध्यकालस्यातिसूक्ष्मत्वात्।बौधायनः।नविष्वस्ययनेविष्णौवर्त्तमानेतथाविषौ।षडशीतिमु
खेऽतीतेचोत्तरायणेलोगाहि।याम्यायनेविष्णुपदेतथादौदानायनंतेविषुवेतुमध्येवदंत्यतीतेषड
शीतिवक्त्रेमहर्षयःस्वल्पयनेचसौम्ये।देवीपुराणे।षडशीतिमुखेऽतीतेअतीतेचोत्तरायणे।वशिष्ठः॥
मध्येषुवेपुण्यंप्राकुविष्णुदक्षिणायने।षडशीतिमुखेतीतेद्वतेचविषुवद्द्वये।कविसाठः।अतीतेवि
षुवद्द्वयेइति।नविष्वस्ययनेपुण्यमतीतेचोत्तरायणे।अत्रचशाठ्याद्युत्तरायणेपश्चादपिचत्वारिंश
द्घटिकाःपुण्याइतिदर्शितामध्येदानंविषुवतिदक्षिणेवेस्मवेपुरः।षडशीतिमुखाऽतीतिअतीते
चोत्तरायणेइसेषनिर्णयोदानेसंक्रांतिनावयेषुच।अतितानागतेदेवनेदग्दक्षिणायने।उपरागेउ
तत्कालमतीतेचोत्तरायणे।अनागतेतुपुण्यत्वंसार्थमतीतेचोत्तरायणमितिसुक्तं।उदक्दक्षि का०हे० १८२

णायनेयोरनागतपूर्वःपुण्यमित्युक्तं।तत्कियतिकालइत्यपेक्षायांआह।त्रिंशत्कर्कटकेनाड्योमकारेविं
शतिस्मृताः।वर्त्तमानेतुलामेषेनाड्यस्तूभयतोदश।स्कंदपुराणे।सुगांतिष्ठतुषड्विंशषडशीति
मुखेतथा।कलौरेत्रिंशदेवाथामकरेत्रिंशदुत्तराः।वशिष्ठः।षडशीत्यांव्यतीतायामष्टिरुक्तास
नाडिका।पुण्याख्याविष्णुपद्यांचप्राक्पश्चादपिषोडश।अष्टौःषोडश।कविष्णुपष्टिरुक्तास्तुनाडि
काइतिपाठः।तत्रषडशीतिमुखानांसंक्रांतिनांचतस्रणांएकैकस्यपंचदशपंचदशपंचदशेतिमि
लितानांपुण्याख्याःपष्टिनाड्योनवंति।एतदाकपर्यालोचनयाकेविदंति।अतीतानागतेनागे
नाड्यःपंचदशस्मृताः।इतिदेवीपुराणवचनं।षडशीतिविषयमिति।तदयुक्तं।देवीपुराणवचन
मतीतानागतनेगेप्रतिपादितं।इदंत्वतीतेपुण्यविशेषप्रतिपादनार्थमितिउपसंहारानुपप
त्तेः।तथाज्योतिःशास्त्रेप्युक्तं।षडशीतिमुखेऽतीतेतथोदगयनेभूरिफलमिति।अपिचदेवीपुराणे
संक्रांतिमात्रधर्मप्रकरणमेकं।अपरंचविशेषसंक्रांतिसधर्मप्रकरणं।तत्रसामान्यधर्मप्रकरण

इदं पठ्यते। अतीतानागतो भोनाड्यः पंचदश घटिकास्तु पुण्यप्रतिपादनार्थमेव द्विविधेति नोपसंहारः। मद्विवेक
स्याः षष्टिनाड्यः पुण्या इत्यर्थः स्यात्। तदेतन्मूलभूतश्रुत्यंतरकल्पनाप्रसंगः। मदात्तु प्रत्येकं पंचदशघ
टिकास्तु पुण्यविशेषप्रतिपादनार्थमेतद्वाक्यं। तदा न मूलश्रुत्यंतरकल्पनं। अतीतानागतो भोगो नाड्यः
पंचदश स्मृताः। इति वचनेनातीतास्वपि पंचदशघटिकासु पुण्यप्रतिपादनात्। षडशीतिमुखेतीतत-
योदशायनेन चतूरिकलमिति वचनेनातीते विशेषप्रतिपादनात्मूलभूतस्तुत्यैवोपपत्तेः षडशीतिमु
खेतीते नाड्यः पंचदश स्मृता इति। स्कंदपुराणवचनात्। तस्मात्पूर्वैव व्याख्या ज्यायसी। बौधायनः। पुण्य
विषुवति प्रोक्तं दश पूर्वा दश पराः। पुण्यकालोऽर्कसंक्रांतौ स्नानदानजपादिषु। बृहस्पतिः। नविष्यस का०२० २८३
यने पुण्याः स्त्रिंशदेव तु दक्षिणे। अतीत उत्तरे नाड्य इति शाकु। पुराविदः। गौतमः। अर्वाक् षोडश ना
ड्यस्तु परतः षोडशैव तु। तथैव दक्षिणे पूर्वमतीते चोत्तरायणे। सर्वसंक्रांतिषु पूर्वषोडश नाड्यः परत
श्च षोडश नाड्यः पुण्यास्तावेव संपूर्णो षोडश द्वयलक्षणे। दक्षिणायने पूर्वं पुण्यं नामो। अतीते चोत्त

रायणे। चकारात्पूर्वमपीत्यर्थः। क्वचित्तु तावेव दक्षिणे पूर्वमिति पाठः। स सुगम एव। यद्विषुवाक्येषु पूर्वाप
रविभागेन संक्रांतिविशेषे पुण्यकालप्रतिपादनं। तदपि पुण्यातिशयप्रतिपादनार्थं नियमार्थमित्यव
गंतव्यं। मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ। इत्यादेर्नियमपरत्वे। पुण्यास्या विष्णुपद्यां च
शाकश्चादपि षोडशेति। तद्योगाचाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इति। गोभिलः। रात्रौ संक्रमणे भा
नोर्दिवा कुर्यात्तु तत्क्रियां। पूर्वस्मात्परतो वापि घस्रासन्नेऽस्तकाले। केचिदेतद्वाक्यमर्धरात्रजातविषुवद्वि
ष्णुपदीविषयतया व्याचक्षते। तयोरेवार्धजातयोर्व्यवस्थाया दिनद्वयस्य पुण्यत्वादिति। तदयुक्तं। अर्ध
रात्रिकसंक्रांतौ दिनद्वयपुण्यत्वस्यानन्यमानत्वात्। तस्मात्पूर्वाक्परकालताविसर्वसंक्रांतिविषय
मेतत्। घस्रासन्नेऽस्तकालमिति वचनात्। गार्ग्यः। कालात्पूर्वेऽर्धरात्रे तु यदा संक्रमणं भवेत्। तदहः पु
ण्यमित्यूचिरे गार्ग्यगालवगौतमाः। देवीपुराणे। अर्धरात्रे असंपूर्णे दिवा पुण्यमनागतं। संपूर्णेऽर्धरात्रे
चोदयेऽस्तमितेऽपि च। भानावूर्ध्वं भास्करे पुण्यमपूर्णे पूर्ववासरे। संपूर्णे च नयोर्द्वयमतिरेके परेऽहनि॥

त्र आगतमनागतं। संक्रांतिकालेन पुंसकेनोक्तः। अथायमेसंक्रांतिकाल इति यावत्। उदयः प्रातःसंध्या॥
अस्तमयः सायंसंध्या। मानार्द्धप्रहरद्वयं। भास्करो दिवसः। भास्करोपलक्षितत्वात्। संकरोतीत्युच्यते। अ
संपूर्णे शार्वरीदले। दलमर्द्धं। असंपूर्णे अर्द्धरात्र इत्यर्थः। संध्याकाले अर्द्धरात्रौ च संक्रमणे दिवसगते प्र
हरद्वये प्रमाणं इत्यर्थः। संपूर्णे अर्द्धरात्रे उभयोः पूर्वोत्तरदिवसयोः प्रहरद्वयोर्दयमित्यर्थः। अतिरेके। अर्द्ध
रात्रात्परतः संक्रमणे परेद्युर्दिनप्रहरद्वयोदयमित्यर्थः। अस्तमये पूर्वदिनप्रहरद्वयं कार्यं। उदये उत्तर
दिनप्रहरद्वयं। प्रत्यासत्तेः। क्वचिद्व्यतीते शार्वरीदल इति पठ्यते। अन्ये त्वेवं पठंति। असंपूर्णे अर्द्धरात्रे उ
दयस्तमये पि च। मानार्द्धं भास्करे पुण्यं संपूर्णे शार्वरीदल इति। अत्रासंपूर्णे अर्द्धरात्रे इत्यनेनैव असं
पूर्णे शार्वरीदल इत्युक्तं। अथापि यत्पुनरुच्यते। तत्पुनः संबंधार्थं। यथा दिवा पुण्यं तथा असंपूर्णम
पि शार्वरीदले पुण्यमित्यर्थः। अत्र केचिदाहुः। अर्द्धरात्रिसंक्रमणे उभयोरह्नोरेव संक्रांतिनिमित्तस्
स्नानादेर्नैमित्तिकस्य सद्भावस्त्वनुष्ठानात् समुच्चयः। न तु स्यात्तद्विकल्पो दिनद्वये तस्यादृष्टदुष्टदोषत्वात्।

का० ३० २७४

तस्माद्व्यवस्थया पूर्वस्मिन्नहनि परेह्नि वा स्नानादि पुण्यं विकल्पो वेदितव्यः। अत्र व्यवस्थाकारणमेतद्वा
क्यं। षडशीतिरतीते तु दृष्टे तु विषुवद्द्वये। न विष्वत्ययने पुण्यमतीते चोत्तरायणे। न तावदेतद्वाक्यमु
दयास्तमयस्पृष्टनार्द्धरात्रसंक्रांतिविशेषविषयं। तत्र प्रहरद्वयपुण्यस्योक्तत्वात्। नापि दिवससंक्रांति
विषयं। संक्रांतेः पुण्यकालस्तु षोडशोभयतः कलाः। इति वचनविरोधात्। यदि च दिवससंक्रांतौ ष
डशीतिमुखे तीते इत्यन्वयः। तदा षडशीतिमुखे तीत इत्येव दैवं वक्तव्यं। किं षोडशोभयतः कला
इत्यनेन। अस्मिन्सति षोडशकलातिरिक्तस्यापि कालपुण्यताप्रसक्तिरिति चेत्। न रात्रिसंक्रांति
स्तु प्रहरद्वयस्य पुण्यत्वादर्थादस्यापि विशेषापेक्षायां। तस्यैवोचितत्वात्। तस्याः षोडशनाडीतुल्य
त्वादिति तस्मादर्द्धरात्रे षडशीतिमुखेऽतीते सति मुख्यायामतीतायां परदिने पुण्यं विषुवद्द्वले च दृष्टे स
ति परदिने पुण्यमित्येवं दक्षिणायने। अर्द्धरात्रे न विष्वति पूर्वदिने पुण्यं। उत्तरायणे अर्द्धरात्रे परदि
ने पुण्यमिति व्यवस्था। एवं पूर्णे अर्द्धरात्रे यान्ययनादीनि तानि षडशीतिमुखेऽतीत इति वाक्येन पूर्व।

दिनार्द्धे। उत्तरदिनार्द्धे चव्यवस्थापितानि विष्णुपदीतु व्यवस्थावचनाभावात्। व्यवस्थां प्रतिसाकांक्षासती
अनंतरवाक्येव्यवस्थाप्यते। आद्यौ पुण्यं विजानीयाद्यस्मिन्नातिथिर्नवेति। अर्द्धरात्रे व्यतीते तु विज्ञेय
मपरेहनि। आद्यावहनि पुण्यं विजानीयाद्यदि अर्द्धरात्रे अनिक्रान्ता पूर्वदिनतिथ्या एकैव तिथिर्नवतीयदि
संक्रांतिकाले तिथिरन्यास्यात्तदावहनि पुण्यमित्यर्थाल्लब्धं॥ किंतु परेदिन एवेति अर्द्धरात्रे व्यतीते पुन
निन्नायां वा तिथौ संक्रमणे परेऽहन्येव पुण्यं ज्ञेयमिति तदुक्तं। षडशीतिमुखविषुवे चोत्तरायणे
पूर्वमपि पुण्यकालस्य प्रतिपादितत्वात्। न च विष्णुपद्यपि व्यवस्थां प्रति साकांक्षा। तस्या अपि षाकृपु
ण्यत्वप्रतिपादकवचनस्योदाहृतत्वात्। न च देवीपुराणीयेनैव साकांक्षत्वपरिहार इति नियमे प्रमाणमस्ति
न च तानि वचनानि दिवासंक्रांतिविषयाणि। षडशीतिमुखेनीत इति देवीपुराणवचने। अर्द्धरात्रिसंक्रां
तिविषयमिति व्यवस्थायां प्रमाणमस्ति। तस्माद्यद्यौ पुण्यं विजानीयादिति सर्वसंक्रांतिसाधारणं अतश्च
पारिशेष्यते। दिवासंक्रांतिविषमेतत्। न तद्विषये संक्रान्तेः पुण्यकालस्तु षोडशैव यतः काल इति वचन

कां०हे०
१८५

विरोधपुण्यविशेषप्रतिपादनार्थत्वात्। न च दिवासंक्रांतिविषयत्वे षोडशैव यतः कालाद्यस्यैवेयर्थ्या
ग्घटिकाविशेषज्ञानार्थत्वात्। न च रात्रिसंक्रांतिषु प्रहरद्वयस्य पुण्यत्वादर्थान्तरात्रापि विशेषापेक्षायां
तस्यैव वरणं। अर्थतोनेपित्राष्टतः प्रतिपादनस्य युक्तत्वात्। न च तस्मादपिलात्षोडशाद्वयप्रहरद्व
यमेर्निराशात्। एतेन यत्केश्चिदुक्तं। आद्यौ पुण्यं विजानीयादिति वाक्यमर्द्धरात्रजातेविषुवद्विषयं। तस्मि
ध्येसंशाहनीयत्वाव्यवस्थामपेक्षते। विष्णुपदीतु षाकृपुण्या निषा नानिराकांक्षेति न तद्विषयमिति। तद
पि निराकृतं। अनेनात्रुः। आद्यौ पुण्यं विजानीयादित्यर्द्धरात्रनवक संक्रांतिसर्वविषयं भवति। षडशी
तिमुखेऽतीत इत्यपि नवत्तु। बाधकनावात्। इति तदुक्तं। यदा त्वनागो संक्रांतिरर्द्धरात्रे भवति। पूर्व
दिनतिथौ किंचत्तदा तद्वचनद्वयविरोधप्रसंगात्। एकेन वचनेन व्यवस्थास्ति द्वैनवचनद्वया व्यवस्थेति
। तस्माद्यद्यौ पुण्यं विजानीयात् इति वचनमर्द्धरात्रनवत्सर्वसंक्रांतिविषयं। षडशीमुखेतीत इतितु
दिवासंक्रांतिविषयमित्यन्ये। तदप्ययुक्तं। अर्द्धरात्रजातयोर्मकरकर्कटयोर्दिनद्वयपुण्यत्वानावस

वक्ष्यमाणत्वात्तदनावेव्यवस्थानापेक्षणात्तद्विषयमेतद्वाक्यं। किंतु मकरकर्कटसंक्रांतिव्यतिरिक्तार्द्धरात्रन
वर्त्तिसंक्रांतिविषयमिति सिद्धं। वशिष्ठः। अर्कस्य संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितं। रात्रौ संक्रमणे पुण्य
दिनार्द्धं स्नानदानयोः। अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया। ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं।
पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः। प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ। अर्द्धरात्रात्पूर्वपरतश्च संक्रम
णे पूर्वोत्तरदिनप्रहरद्वयपुण्यत्ववचनं विषुवन्मात्रविषयं। न तु विष्णुपदीषडशीतिविषयं। विष्णुपद्योर्ध
नुर्मीनमिथुनकन्यासु वै यदा। पूर्वोत्तरगते रात्रौ ज्ञानोः संक्रमणं भवेत्। पूर्वाह्णे पंचनाड्यस्तु पुण्याः प्रोक्ता म
नीषिभिः। अपराह्णे तु पंचैव श्रौते स्मार्त्ते च कर्मणीति नियमवचनविरोधात्। नाप्ययनविषयं। तत्र समयस्य क्रा॰दे॰
दिनस्य पुण्यत्वात् तथा च यज्ञपार्श्वः। आसन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः। रात्रौ संक्रमणे भानोर्विषु १८६
वत्ययने दिने। यत्र तु विषुवत्स्ययने दिन इति पाठः। तत्रायमर्थो दिने रात्रौ वा संक्रमणे विषुवदयनयोर्दि
नार्द्धं पुण्यमिति। अस्मिन्पाठे त्वयनविषयतापि स्वीक्रियते। यत्तु केषांचिद्व्याख्याने दक्षिणोत्तरयोर्दिनद्वये

च संक्रामसति दिन एव पुण्यकाल इति तत्किंचिदुपेक्षणीयं। अपरे तु निगमवाक्यं पुण्यानित्रायश्रुतिपा
दनार्थमिति मन्यमानाः सर्वसंक्रांतेर्द्धरात्रात्प्रागूर्द्ध्वं वा जातायां तु दिनार्द्धं पुण्यमिच्छंति। स्कंदपुराणे। धनु
र्मीनावतीक्रम्य कन्यां च मिथुनं तथा। पूर्वापरविभागेन रात्रौ संक्रमते तथा। दिनांते पंचनाड्यस्तु तदा पु
ण्यतमाः स्मृताः। उदये हि च तथा पंच दैवे पित्र्ये च कर्मणि। उदये पुण्यतमा इति वचनात्। परं दिनं पुण्य
मिति गम्यते। पूर्णे चेदर्द्धरात्रे त्विति वचनं केचिदेवं व्याचक्षते। अर्द्धरात्रे पूर्णे यदि संक्रांतिर्भवति तदा दिन
द्वयं पुण्यं प्राहुः। पूर्वदिनस्यावर्त्तनादुपरिदिनेनोत्तरमावर्त्तनात्पूर्वसंपूर्णेत्वर्द्धरात्रे त्विति। देवीपुरा
णवचनानुरोधात्तु। पूर्णे रात्रे जाते मकरकर्कटौ मुक्त्वा विषुवायनयोर्दिनद्वयं पुण्यं न भवति किंतु रात्रिः पु
ण्या। अतस्तत्रैव तयोर्निर्णय इत्यर्थः। यत्तत्रोक्तं किंचित्। मुक्त्वा मकरकर्कटाविति वचने। न मकरकर्कट
योर्दिनद्वयस्य पुण्यं पर्युदस्यते। न तु रात्रौ पुण्यत्वमुच्यते। एकस्य पदस्यार्थद्वयासंभवात्। न दिनव
ति। देवदत्तं मुक्त्वा भोजनार्थं विप्रा आकारयितव्या इत्युक्ते देवदत्तस्तु तत्रैव भोजयितव्य इत्यपरो बोध इति

तदयुक्तं।मुक्तामकरकर्कटयोर्दिनद्वयमपुण्यमित्यत्रनतात्पर्यं किंचा रात्रिःपुण्येत्यत्र।अन्यथातनयोःपुण्य-
कालप्रतिपादनेनव्यर्थत्वंस्यात्।सर्वसंक्रान्तीनांपुण्यकालप्रतिपादनस्यप्रवृत्तत्वात्।एवंदृष्टान्तेपिदिवदत्तं
मुक्तेमस्यदेवदत्तोनाकारयितव्यइत्यत्रनतात्पर्यं।किंचाऽसौतत्रैवभोजयितव्यइत्यत्र।अन्यथातस्यनि-
मंत्रितस्यापिभोजनदानप्रतिपादनेनव्यर्थत्वंस्यात्।सर्वसंक्रान्तीनांपुण्यकालप्रतिपादस्यप्रवृत्तत्वात्।नि-
मंत्रितानांसर्वेषांभोजनदानप्रतिपादनस्यप्रवृत्तत्वादेकस्यपदार्थस्यद्वयोस्तात्पर्यनावाच्यकश्चिद्दोषः।
यक्तोयोघासमेवपर्युदस्यते।नचदिनद्वयस्यपुण्यत्वप्रसंगात्दिनार्द्धस्यैवपुण्यत्वोक्तेः।तेनदिनद्वादशनदि-
नार्द्धलङ्घयितव्यमित्यनेनापिदोषइति।तदप्ययुक्तं।मुख्यार्थसंभवेलाक्षणिकार्थपरिग्रहस्यादोषत्वात्॥ का॰द्वे॰ २८७
नहिघस्रासन्नेसंक्रमेसत्येकस्मिन्नेवदिनेपुण्यं।तस्मिन्नेवव्यवहितेतुदिनद्वयंसममितिसंभवति।तनाय-
नद्वयेरात्रौपुण्यमिति।तदप्ययुक्तं।मुक्ताकर्कटाविप्यस्यमकरकर्कटयोरात्रौपुण्यमित्येवंपरत्वेप्रमाणाभा-
वात्।मकरकर्कटव्यतिरेकेणदिनद्वयंपुण्यमित्यनेनतयोर्दिनद्वयपुण्यत्वाभावमात्रंसिध्यति।नरात्रौ

पुण्यत्वं।ततश्चवचनान्तरपर्यालोचनया।मकरेउत्तरंदिनंपुण्यं।दिनान्तमितिकर्कटेचपूर्वदिनमिति।ए-
केकदिनपुण्यत्वप्रतिपादकवचनवत्केवलमकरकर्कटसंक्रान्तिपुण्यत्वप्रतिपादकवचनान्तराभावाच्च
तेननायनद्वयेऽर्द्धरात्रिसंक्रान्तावेकस्मिन्दिनेपुण्यं।नत्वयनद्वयएवरात्रौपुण्यमिति।तथाचबौधायन
अस्तंगतेयदासूर्येरुषयादितिवाकरः।प्रदोषेवार्द्धरात्रेचतदापुण्यंदिनान्तरमिति।अत्रकेचिदाहुः॥
अस्मिन्वचनेप्रदोषेचेत्यनेनयदिप्रदोषजातायांमकरसंक्रान्तिःपरदिनेयोगःप्रतिपाद्यते।तदाऽऽस-
सन्नसंक्रमपुण्यदिनार्द्धमित्यादिनार्द्धमित्यादिनापञ्चपार्श्ववशिष्ठवचनेनअनुमीनावतिक्रमेस्या-
दिनास्कंदपुराणवचनेन।असंपूर्णेऽर्द्धरात्रेउदयेस्तमयेचेत्यादिना।देवीपुराणवाक्येननचविरो-
धःप्रसज्यते।अस्तंगतेयदासूर्येइत्यादिवचनेनअस्तंगतइत्यनेनैवप्रदोषार्द्धरात्रयोर्लब्धत्वात्
इत्थंकथयदणमनर्थकमित्यपरोदोषः।तस्मात्तद्वचनमेवव्यारम्भेयं।प्रदोषेचेत्येवंवाशब्दोयथार्थे
वाच्यमानेविकल्पयोरितिनिघंटुस्मरणात्तदयंदृष्टान्तदार्ष्टिकयोरर्थः।यथाप्रदोषेपूर्वदिनंपु-
ति ना

ण्यं द्वितीयो यं वा शश्वस्तयोर्थोल्लब्धयानामनेकार्थत्वात्। अन्ये त्वस्तंगतस्यास्य वैयर्थ्यं नियामाभावाद्व्याचक्ष-
ते। अस्तंगते प्रदोषे च यथा पूर्वदिने पुण्यम्। एवमर्धरात्रे परतश्च मकरसंक्रमे परं दिनं पुण्यमिति। अपरे तु
वचनानार्जवपरिहारार्थं प्रदोषे मकरसंक्रान्तौ दिनद्वयेऽपि विकल्पेन पुण्यमिच्छन्ति। अन्ये त्वाहुः। प्रदो-
षे मकरसंक्रान्तौ परदिने पुण्यत्वाभिधानाद्धनुर्मीनावतिक्रम्येति वचनं। प्रदोषे मकरसंक्रान्तौ परदि-
ने पुण्यत्वाभिधानाद्धनुर्मीनावतिक्रम्येति वचनं। प्रदोषव्यतिरिक्तार्धरात्रपूर्वकालविषयमिति परे
त्वासंक्रान्त्यनन्तरे त्वर्धरात्रपूर्वसमस्तकालपरत्वेऽपि रूपापत्तेः। अन्ये त्वाहुः। अर्धरात्रस्त्वस्तमानीत इति पू-
रणीयं। संपूर्णमुभयोर्द्वयमतिरेको परेऽहनीति वचनात्। तदप्युक्तं। अस्य संक्रान्त्यनन्तरविषयत्वात्॥ का० हे० १८८
प्राहुर्दिनद्वयं पुण्यमुक्तौ मकरकर्कटाविति वचनात्। स्मृत्यन्तरे। कार्मुकं तु परित्यज्य झषे संक्रमते रविः।
प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि। तेनार्धरात्रे यो जातयोर्मकरकर्कटयोर्दिनद्वये पुण्यम्। किंतु म-
करसंक्रान्तौ परदिने कर्कटे च पूर्वमिति। किं चिन्संपूर्णे चार्धरात्रे इति वाक्यमर्धरात्रे जातविष्णुपदीविषय-

त्वेन व्याचक्षते। तन्मते हि विषुवदयनवत्सर्वस्था दिनद्वये पुण्यं। अत एव मकरकर्कटयोः पूर्वपरने-
गसंक्रान्त्युपलक्षणत्वमिति न दुष्करं नयमप्युक्तं। विष्णुपदी विषुवव्यतिरिक्तसंक्रान्ताविति पूर्व-
स्थापादिनद्वयपुण्यत्वस्य प्रतिपादितत्वात्कारणं विना संकोचप्रसंगात्। मकरकर्कटपरयोर्विनि-
कारणमुपलक्षणत्वप्रसंगाच्च दर्शितमार्गेण वचनस्यार्जवे संभवोपपत्तेः। अन्ये त्वेवं व्याचक्षते
अर्धरात्रे संपूर्णे यदि संक्रान्तिर्न भवति तदा दिनद्वयमध्यापनाध्ययनयोग्यं प्राङ्मुक्त्वा वर्जयित्वा
पूर्णेऽर्धरात्रे जातो मकरकर्कटौ न यो दिनद्वयं पुण्यं न भवति। किं त्वपुण्यं। अध्यापनाध्ययनायोग्यमि-
त्यर्थः। मकरकर्कटयोर्दिनद्वयमनध्याय इति तात्पर्यमिति। तथा च स्मृतिः। अह्नि चेद्रात्रियुतस्यादन्त्यौ
वेदासरद्वयोः संक्रान्तिपक्षिणी ह्येयादानाध्ययनकर्मसु। अयनेवाक्येन मकरकर्कटयोर्दिनद्वयस्या-
पुण्यमुक्तं। तदध्ययनकर्मविषयं द्रष्टव्यं। दानेऽध्यापनं वेदितव्यं। तथा च अध्यापकानामध्येतॄणां च
समाधारः। तर्हि मकरकर्कटयोर्दिनद्वयं नाध्यापयेदिति नाधीयीत च। तदप्युक्तं। प्रकरणसमावेशासंभवे

तदुत्कर्षस्यानुचितत्वात्। निर्णयं दिवा रात्रौ वा संक्रान्तौ वा पुण्यप्रतिपादकानि दर्शितानि। अधुना रात्रिपुण्यप्रतिपादकानि दृश्यन्ते। न विष्णुपुराणे। सुमंतुवाक्यं। रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः॥ नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु। ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च। श्रवणे चेतिहासस्य रात्रौ स्नानं प्रशस्यते। विष्णुः। विवाहव्रतसंक्रान्तिप्रतिष्ठाऋतुजन्मसु। तथोपरागपातादौ स्नाने दाने निशा शुभा। ऋतुर्गर्भाधाने। पातो व्यतीपातः। गोभिलः। राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च। अत्र केचिदाहुः। एतानि वाक्यान्यर्केतरसंक्रान्तिविषयाणि। अतएव गोभिलेनोक्तं। रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियामिति। आसन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः। रात्रौ संक्रमणे भानोर्विषुवत्ययने दिनमिति। रात्रिवाक्येषु अहर्विशेषनामरहितसंक्रान्तिश्रूयते। तेनार्केतरसंक्रान्तिविषयमतदिति। तदयुक्तं। पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशीति विशिष्टवचनविरोधात्। यच्चात्रि जितामित्रादिगमने रात्रेः स

का०दे०
२८४

र्वकर्मानिर्गतत्वात्कथंचिद्दिवा स्नानासंभवे रात्रावपि प्रत्यवायपरिहारार्थं संक्रान्तिनिमित्तकावश्यस्नानदानाद्यनुष्ठेयमित्येवंपराणि रात्रिवाक्यानि। रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियामिति। दिवायदेन रात्रिव्याहारात्। रात्रिसंक्रमणे। ~~निशीथे संक्रमणे भानो~~ नो दिनार्द्धपुण्यत्वाभिधानाच्चेति एषां मते। परमस्तु स्नानमसंक्रान्तिकालान्तर्भावेन स्नानदानादिकं रात्रावपि कर्तुं शक्यते। न त्वतिशयफलमनेन तन्तु संक्रान्तिषु रात्रिकालः कर्मानिर्गमेवान्यथाहि रात्रौ संक्रमणे संनिहिते नापि परित्यागेन व्यवस्थादिनद्वयस्नानादिविधानमनुपपन्नं। अहर्द्वयपुण्यत्ववचनात्। एतत्तु तोगमिति चेन्नापि रात्रिकाम्यकादेवं तथा स्कन्दे। धर्म्माभिवृद्धिस्तथायूराज्यपुत्रसुखादयः। अधर्माद्व्याधिशोकादि विषुवायनसंनिधाविति। न च रमसूक्ष्मेण संक्रान्तिकालेन सह कस्यचित्पदार्थस्य संनिधानं संपादयितुं समर्थः। तदंतर्भावेन तु क्रियमाणे कर्मणि सिद्धस्तस्य संनिधिः। अतः स्नानदानादेः प्रयोगस्यान्तर्भूतसंक्रान्तिकालस्यैकस्य रात्रावनुष्ठानमिति। तदिदमप्ययुक्तं। संक्रान्तिनिबंधस्योभयतः षोडशनाडिकापुण्य

त्वस्य रात्रिसंक्रान्तावप्यनपायात्। रात्रौ संक्रमणे जाते दिवा कार्यं तु तत्क्रिया। पूर्वस्मात्परतो वापि घटिका
सत्रेष्वेतत्फलमिति। वचनस्य रात्रिसंक्रान्तौ घस्रास्तन्नि दिनपुण्यप्रतिपादकस्य रात्रिव्यवच्छेदकत्वा-
भावात्। दिनार्द्धपुण्यप्रतिपादकस्य रात्रिनिवर्तकत्वाभावाच्च। संक्रान्तेः पुण्यकालस्तु षोडशोभयतः
कलाः। अतीतानागते भोगे नाड्यः पंच दश स्मृताः। या याः संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृ-
ता इति। एवमेवादीनां वाक्यानां संकोचप्रसंगात्। रात्रौ स्नानदानादिप्रतिपादकानां च विष्णुपुराण-
दिवाक्यानां विना कारणेन संकोचप्रसंगाच्च। तस्माद्रात्रिसंक्रान्तौ रात्रौ दिवा च पुण्यं। प्रत्यासत्तिवि-
शेषात्तु फलविशेष इति सिद्धं। अपरे त्वेवमाचक्षुः। अयने विषुवे चैव दिनद्वयं पंचनाड्यः। धनुर्मीनाव- का०दे० १५०
तिक्रम्य कन्यां च मिथुनं तथा। पूर्वापरविभागेन रात्रौ संक्रमणं यदा। दिनांते पंचनाड्यस्तु तदा पुण्य-
तमाः स्मृताः। उदये चैव तथा पंच दैवे पित्र्ये च कर्मणीति। स्कंदपुराणवचनात्। विष्णुपद्यां षडशीत्यां विषु-
वे सर्वस्मिन्नपि श्रौते स्मार्ते कर्मणि रात्रौ। प्रत्यासत्तेस्तु पुण्यविशेषाद्दिनद्वये पंचघटिकास्तु पुण्यमा-

नमिति। विष्णुपद्यां धनुर्मीनवृषकुंभकन्यासु वै यदा। सूर्येऽस्तगते रात्रौ योगो संक्रमणं भवेत्। पूर्वाह्ने पंचना-
ड्यः पुण्याः प्रोक्ता मनीषिभिः। अपराह्णेषु पंचैव श्रौतस्मार्तेषु कर्मणि। इति निगमवचनात्। अयनशब्दो निषे-
धे पि पूर्वापरनाड्याग्रहणमविशिष्टं। संक्रान्तिकालस्यातिसूक्ष्मत्वात्। विषुवादिसूक्ष्मतममाह गाल-
वः। स्थिरलग्ने विष्णुपदं षडशीतिमुखं। दिनं तुलाजे द्वलाजे। विषुवत्तु पदं दक्षिणायनं सौम्यकं सूर्ये पूर्वश्लो-
केषाख्यातमेव। अयनांशकतुल्येन कालेन च स्फुटं भवेत्। मृगकर्कटिके सूर्ये याम्योदगयने सति। त-
दा संक्रान्तिकाले रुक्ता विषुवदादयः। अयमर्थः। राशिं प्रति त्रिंशद्भागा भवंति। सूर्ये च प्रतिदिनमेक-
मंशं भुंक्ते। तत्र यावद्भिरंशैरयनच्युतिर्भवति। तावता सूर्यस्य भोग्यकालेन या विनी विष्णुपदादिका-
लोच्युतिर्भवति। इति। ततश्च षडशीत्यामिरंशैरयनच्युतिर्भवति। तत्रत्या विन्याः संक्रान्तेर्दृष्टान्निर्दिष्टनैरर्वा-
क् पुण्यकालो भवति। तस्मिन् संक्रान्तिनिमित्तं दानादि कर्तव्यमिति। एवं न्यूनातिरिक्तेपि बोद्धव्या। त-
च लोगाक्षिः। यात्रानिषेधा अपि सूक्ष्मकालेपरं स्थिरीकर्तुमशक्यं भवति। आचार्योच्यते तत्र सतयोदृष्टव

वेति नित्यं परिपूर्णकामाः॥ यद्वांतरसंक्रमणसमयस्यापि पुण्यतामाह जैमिनिः॥ नक्षत्रराश्योर्वि-
संक्रमे स्फुरर्वाक्परत्रापि रसेंदुनाड्यः॥ पुण्यास्तथैंद्रोऽग्निधरापलैर्युगे एकैकनाडीस्तु निमित्तमुक्ताः
नाड्यश्चतस्रः सपलाः कुजस्य बुधस्य तिस्रो मनवः पलानि। स्याद्भृश्चितस्रः पलसप्तयुक्ता गुरोश्च युक्ते
सपलाश्चतस्रः॥ द्विर्नागनाड्यः पलसप्तयुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः॥ अयं तमध्येजपदा-
नहोमं कुर्वन्नवाप्नोति निरोघधाम॥ नक्षत्रराश्योर्वा सूर्यस्य संक्रमे सति पूर्वतः॥ परतोपि रसेंदुनाड्य
षोडश घटिकास्तु पुण्यकालः॥ इंद्रोऽग्निधरापलैर्युक्तत्रयोदशाभिः पलैर्युक्ता एकैव घटिका॥ कुजस्य
मंगलस्य तु एकपलयुक्ताश्चतस्रो घटिकाः॥ बुधस्य चतुर्दशपलयुक्तास्तिस्रः॥ गुरोर्बृहस्पतेः सप्तविं-
शत्पलयुक्ताश्चतस्रः॥ शुक्रस्य एकपलयुक्ताश्चतस्रो घटिकाः॥ शनैश्चरस्य पलसप्तकयुक्ताः द्विनागनाड्य
नागा अष्टौ द्विरावृत्ता नाड्यः॥ ॥इति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकल-
विद्याविशारदश्रीहेमाद्रिविरचिते चतुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये संक्रांतिकालनिर्णयः।

का० हे०
२८ ५९२
२५९२

॥ अथ श्राद्धकालनिर्णयः॥ ॥तत्र नित्यश्राद्धे कालनिर्णयस्तावत् क्रियते॥ अमावास्यानिर्ण-
यः॥ तथा अमावास्यास्वरूपं चंद्रादिपर्वनिर्णये दर्शितं॥ तत्र संपूर्णायाममावास्यायामपराह्णे
श्राद्धं विधेयं॥ अपराह्णः पितृणामिति श्रुतेः॥ तथा च शातातपः॥ दर्शश्राद्धं यत्प्रोक्तं पार्वणं तत्प्र-
कीर्तितं॥ अपराह्णे पितृणां तु तत्र स्नानं प्रशस्यते॥ यमः॥ पक्षांते निर्वपेत्पित्र्यमपराह्णे तु पैतृ-
कं॥ यदा तु दिनद्वयसंबंधिनी तदापि यस्मिन् दिने अपराह्णव्यापिनी तत्रैव श्राद्धं विधेयं॥ तथा च छं-
दोगपरिशिष्टे॥ कात्यायनः॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयांशे ना-
तिसंध्यासमीपतः॥ पिंडान्वाहार्यकं श्राद्धं पिंडपितृयज्ञानंतरं क्रियमाणं क्षीणे राजनि — — मावा-
स्यायामित्यर्थः॥ वासरस्य तृतीयेंऽशे नातिसंध्यासमीपतः॥ पिंडान्वाहार्यकं श्राद्धं पिंडपितृयज्ञानंतरं क्रि-
यमाणं क्षीणे राजनि चंद्रेऽमावास्यायामित्यर्थः॥ वासरस्य तृतीयेंऽशे त्रिधा विभक्तस्य दिवसस्य तृतीयभा-
भागे अपराह्ण इत्यर्थः॥ ७॥ यदा चादिनद्वयेऽप्यपराह्णव्यापिनी न भवति तदापि पूर्वदिनसंबंधिनी

सिनीवाल्येव ग्राह्या। तथा च स एवाह्न यदा चतुर्दशी यामं तुरीयमनुपूरयेत्॥ अमावास्या क्षीयमाणे
तदैव श्राद्धमिष्यते। चतुर्दशी यामं क्षीयमाणे अपस्मिन् दिवसे सर्वापराह्णव्यापिनी भवतीत्यर्थः॥
तथा च यज्ञपार्श्वेपि। अर्द्धे चतुर्दश्यां चतुर्यामे अमावास्या च दृश्यते। श्वोभूते श्राद्धं तत्र भूते कव्या
दिकक्रिया। तथा च गोभिलः। यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी परमः सन्निकर्षः सा
अमावास्या। यदहस्त्वेव चन्द्रमा न दृश्यते॥ तामेवामावास्यां कुर्वीत। दृश्यमानेप्येके अमासमा भवतीति॥
व्यासोपि। दृष्टचन्द्रा सिनीवाली। नष्टचन्द्रा कुहूः स्मृता। सिनीवाली सदा पित्र्ये कुहूर्दैवतकर्मणि। अ
तश्चतुर्दश्यामपि पिंडान्वाहार्यकोपि निर्वापः कर्तव्य इति स्थितं॥ केचिदाहुः। नैतदस्ति चतुर्दश्यां तन्नि
र्वाप इति। पिंडपितृयज्ञानंतरं हि तद्विहितं। पिंडपितृयज्ञश्चामावास्यायामपराह्णे विहितः। अमावास्याया
मपरामपराह्णे पिंडपितृयज्ञेन चरंतीति कल्पसूत्रकारवचनात्॥ यत्तु मतं। उपवसथ्यदिनोपलक्षणा
र्थो अमावास्या शब्द इति। तन्न लक्षणायां प्रमाणाभावात्॥ विधावल्पायत्वाद्ग्राह्या यातश्रुतिः॥ तस्मात्स

का॰ द्वि॰
१९२

६०

वैश्यः पितृभ्यः क्रियते। उत्तरमहादेवान्यजंते पितृभ्य एव तद्यज्ञं निःक्रय्य यजमाना प्रतनुत इति। तथान्वाधा
नप्रभृत्यापराह्णे पिंडपितृयज्ञेन चरंतीति कल्पसूत्रकारवचनं॥ तदेतत् यस्मिन्नोपवसथ्ये दिने अपराह्णे
अमावास्यास्ति। तद्विषयमिति। ज्ञानपूर्वे दिनमात्रपरं स तु लक्षणायां प्रमाणं न वितुमर्हति। अन्ये त्वा
हुः॥ तल्लक्षयोपलक्षितदिनांतर्गतायाममावास्यायामपि पिंडान्वाहार्यकं न कर्तव्यं। तस्य पिंडपितृयज्ञानंतरं वि
हितत्वात् पिंडपितृयज्ञश्च चन्द्रदर्शनवत्याममावास्यायां विहितः॥ तथा च श्रुतिः॥ यदैवैनं पुरस्तान्न प
श्यादुदेतोवेत्यो ददातीति सूत्रकारवचनं॥ यदहश्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुरुत इति॥ तत्रात्र
दर्शनात् तदेकस्मिन् दिने द्वयं॥ अन्यदा पिंडपितृयज्ञो यजनीयदिने प्रत्यक्षकृष्णात इति॥ तन्नातदाप्युत्कर्षन्या
येन न्वाहार्यकस्याप्युत्कर्षात्॥ यत्तु लौगाक्षिवचनं॥ सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि॥ स्त्रीभिः
शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः॥ इति वचनविरोधात्॥ यथोक्तं। चतुर्दश्यां तेन निर्वाप इति॥ तदयुक्तं। य
तश्छंदोगपरिशिष्टे पिंडपितृयज्ञं प्रकृत्याह कात्यायनः॥ यथैवोक्तं। दृश्यमानेपि तच्चतुर्दश्यापेक्ष्या अमावास्या

प्रतीक्षेत तदंते वापि निर्वपेत्॥ इति यत्तु दृश्यमाने पि चंद्रे निर्वाप इष्येत॥ यदहश्चंद्रमसं न पश्यंति तदहः पिंडपि-
तृयज्ञं कुरुत। इत्यादिश्रुतिविरोधः॥ स्यादित्यादिशांकायां अदर्शने श्रुतेः। क्षयोपलक्षणमचार। स एव यत्तूक्तं
यदहस्त्वेव दर्शनं नेति चंद्रमाः। तत्क्षयायेयादृशे यं क्षीणो राजनि चेत्यपीति। यच्चान्यस्त्वेव पाहने। चंद्रादर्शोपलक्षित-
दिनांतर्गतायाममावास्यायामपि न पिंडपितृयज्ञपिंडान्वाहार्यके इति। तदपि यत्रोक्तं दृश्यमानेपीत्यादिना
कात्यायनवचनेन निराकृतमेव। दृश्यमानेप्येकादश्येन न गोभिलीयवचनेन हारीते नापि निराकृतं। यस्यां सं-
स्थागतः सोमो मृणालमिव दृश्यते॥ अपराह्णे च यस्तस्यां पिंडानां करणं ध्रुवं इति॥ अत्र पिंडानाम[illegible]ति निर्देशः
पिंडपितृयज्ञं नातिवर्तेत मीहते पुनः। कात्यायनः। यदा चतुर्दशीयामं तुरीयमनुपूरयेत्। अमावास्याक्षीय- का.हि.
माणा तदैव श्राद्धमिष्यत इति। किंचायजनीयदिनात्पूर्वदिने हि पिंडपितृयज्ञश्राद्धे विहिते। तस्मात्पितृभ्यः पू-
र्वेद्युः क्रियत इति। यदा च प्रतिपद्दिने त्वपराह्णे अपरामध्याह्ने मावास्या समाप्यते। यदा तदहरेव याग इति १९३
पूर्वस्यां चंद्रोदयवत्यां पिंडपितृयज्ञादि सिनीवाल्यां द्विजैः कार्यो साग्निकैः पितृकर्मणि। इत्यस्य पिंडान्वा-

२

हार्यकव्यतिरिक्तविषयत्वे प्रमाणाभावाच्चेति॥ इंदुक्षयस्तु कदा भवतीत्यपेक्षायां स एव आह। अष्टमेंशे
चतुर्दश्यां क्षीणो भवति चंद्रमाः। अमावास्याष्टमेंशे तु पुनः किल भवेदणुरिति। इह खलु ग्रहचारविदो
रात्रिंश्यष्टांशोर्ध्वदशाभिर्दशांशैश्चंद्रमसः सूर्येण संनिकर्षो जायते। किलशब्दोत्र ज्योतिषिकैः संनि-
कर्षे वा एके कातिथिर्भवतीति निरूपयंति। अतश्चतुर्दशी अमावास्या वा द्वादशांशे वा भवति॥ तत्र चतुर्द-
श्यष्टमांशांते चंद्रः क्षीयते। अमावास्याष्टमांशे वा पुनर्भवेच्चाणुः नस्त्वान्न शब्दोत्र ज्योतिषिकैः किलैः तदा-
ख्यायत इति। एतदर्थमाह॥ अत्र पैशातपथश्रुतिः॥ स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव
पंचदशकला ध्रुवैवास्य षोडशी कला सा रात्रिभिरेवापूर्यते। पंच क्षीयते सोमो मावास्यां रात्रिमेतया षो-
डश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य। ततः प्रातर्जायते तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिंद्या-
दपि कृकलासस्यैतस्या एव देवताया अपचित्या इति। अत्रायमाशयः। षोडशकलस्यास्य चंद्ररूपस्य प्रजाप-
तेः। कृष्णपक्षप्रतिपदमारभ्य चतुर्दश्यंतासु तिथिषु क्रमादेकैककलाक्षये पि चतुर्दशकलाः क्षीणा भवंति।

चतुर्दशीतृतीयांशे तु पंचदश्यपि कला क्षीयते। अतोऽमावास्यायां ध्रुवया अवशिष्टया षोडश्या कलया न लोकमागत्य।
सर्वप्राणिजातं प्रविशति। अमावास्यातृतीयांशे तु तयैव षोडश्या कलया दिवमारुह्य पुनः प्रादुर्भवति। इति अमावा
स्याविशेषे चंद्रक्षयस्य कालमाह॥ कात्यायनः॥ आग्रहायण्यमावास्या तथा ज्येष्ठस्य या भवेत्। विशेषमाभ्यां ब्रु
वते चंद्रचारविदो जनाः॥ अत्राद्यप्रहरं एवावतिष्ठेच्चतुर्भागोनकलयावशेषः। तदंत एव क्षयमेति चंद्रः एवं ज्योतिश्चक्र
विदो वदंति॥ अस्यार्थः॥ वृषस्थे चंद्रे ज्येष्ठामावास्या॥ वृश्चिकस्थे चाग्रहायण्यमावास्या इत्यतश्चंद्रस्य परमोच्च
नीचस्थाने तद्वशाच्चंद्रस्य गतिविलक्षण्ये यदस्याममावास्यास्वष्टमे प्रहरे स्वस्य रूपं तद्यैनयोरमावास्ययोः
प्रथम एव भवति। किंतु चंद्रादर्शन एव पिंडपितृयज्ञादिकं मन्यंते न तस्य क्षयेऽपि। तान्निराकर्तुं कदाचिद्द्वितीयाया
मपि चंद्रादर्शनं दर्शयति। यस्मिन्नब्दे द्वादशैकस्मिंश्चयव्यः। तस्मिंस्तृतीयापरतो न दृश्यते। एवंवारं चंद्रमासा विदि
त्वा क्षीणे तस्मिन्नपराह्णे च दद्यात्॥ अस्यार्थः॥ यद्यो मासः स यस्मिन्नब्दे द्वादशाधिको भवति तस्मिन्नब्दे मलमा
सानंतरं तृतीयया अपरस्यां द्वितीयायां तिथौ चंद्रो न दृश्यते। न चैतावता चंद्रादर्शनविहितः पिंडपितृयज्ञस्तत्र क्रिय

का॰ हि॰
१९४

३

ते। अतश्चंद्रवारं विदित्वा तस्मिन्नक्षीणेऽपि चतुर्दशीमिश्रायाममावास्यायामपराह्णे पिंडपितृयज्ञादिकं कु
र्यादिति॥ एवं च यापि शातपथी श्रुतिः॥ तद्वा एतन्मासि मास्येव पितृभ्यो ददति य एवैष न पुरस्तान्न पश्चा
द्ददृशे येभ्यो ददाति। एष वै सोमो राजा देवानामन्नं यच्चंद्रमाः। स एतां रात्रिं क्षीयते तस्मिन्नक्षीणे ददा
ति। तथैभ्यो समदं करोति॥ अथ यदक्षीणे ददाति। यानि तु सिनीवालीनिषेधकानि तानि निरसक
श्राद्धविषयाणि॥ अन्ये त्वाहुः॥ तानि वचनान्यपराह्णप्रविष्टचतुर्दशीविद्धसिनीवालीविषयाणी
ति। अनेनाभिप्रायेणाह वृद्धमनुः॥ यस्यामस्तं रविर्याति पितरस्तामुपासते॥ तिथिं तेभ्यो यतो दत्तोद
तोऽस्यपराह्णः स्वयं भवेत्। अनेनाभिप्रायेणाह वृद्धमनुः। यस्यामस्तं रविर्यातीति। अन्यदा तूक्तक्रमेव
ग्राह्येत्युक्तं भवति। तदाह हारीतः॥ अपराह्णः पितृणां तु यापराह्णानुयायिनी। सा ग्राह्या पितृकार्येषु॥
अनेनापराह्णव्यापिनी चेत्सिनीवाली स्यात्। तदा सा ग्राह्या पितृकार्येषु न पूर्वास्तानुयायिनी॥ यदा
तूभयदिनेऽप्यपराह्णव्यापिनी संबंधस्तदापि संशयरूपं निर्णयमाह स एव॥ संमिश्रिता या चतुर्द

स्या अमावास्या भवेत्कश्चित्। खर्विकां तां विदुः केचिदुपेंदुमिति चापरे। यस्मिन्दिने चतुर्दश्यां सत्याममा
ऽस्यमावास्या भवति। सा खर्विकेत्युच्यते॥ खर्वत्वं ह्रस्वास्वत्वाविशेषात्॥ अनेन चतुर्दश्या अनुपयुक्त
त्वादर्शिता। अतः केचित्सा श्राद्धेत्येवं विदुः। अपरे तु पेंदु अनुष्ठानाय अयुक्तो ऽक्षरूपमित्येवं विदुरित्यर्थः।
एवं संदेहे निर्णयमाह॥ वर्द्धमानाममावास्यां लक्षयेदपरेहनि। यामांस्त्रीनधिकान्वापि पितृयज्ञस्तदा
भवेत्। अमावास्या वृद्धौ पर्वविनान्यपेत्यर्थः॥ अथ यदि पक्षे तु वर्द्धितापि सिनीवाल्युपेयेति पैठीनसिरपि
आदित्यस्योदये यदा अमावास्या विवर्द्धते। अपराह्णे च विज्ञेयं पितॄणां दत्तमक्षयं। या चतुर्दशीग्रस्ता ति
अपराह्णव्यापिनी अमावास्या वर्द्धते। तस्यां पितॄणां दत्तमक्षयमित्यर्थः॥ तथा हारीतः॥ त्रिमुहूर्त्ता च कर्त्तव्या
पूर्वा खर्वापि बह्वृचैः। कुहूरध्वर्युभिः कार्या यथेष्टं सामगीतिभिः। पर्वणां रोहिती येतु कार्या इति द्विजा
तिभिः। द्वितीया सहितं यस्मादूर्ध्वं यंतीत्याश्वलायनाः॥ बौधायनः॥ सिनीवालीमुपोष्यैव यष्टव्यं च परेहनी १९५
ति। पितृयज्ञं तदा कुर्युः स्वकाले तैत्तिरीयकाः। अत्र हारीतवचने॥ पूर्वाह्णे चेदमावास्या अपराह्णे च चेष्ठ

कौ॰ टि॰

४२

दा प्रतिपद्यपि कर्त्तव्यं श्राद्धं श्राद्धविदो विदुरिति॥ अत्र च हरिहरेणोक्तं॥ अनिर्ज्ञातस्थलमिदं वचनं प
रस्परव्याहतपदोपविद्धं चेति। तथाहि। पूर्वाह्णे चेदित्येतत्तावत्प्रतिपद्दिनविषयो पूर्वाह्णशब्देन च
दिवसस्य तृतीयो भागो वा पूर्वार्द्धं वा। एवं सति सर्वथा कस्मिंश्चिदपराह्णे वेदितं न युज्यते। यस्मात्प्रति
पद्दिने पूर्वाह्णमात्रावस्थिता याश्चतुर्दशीदिने पराह्णसंबंधस्यावश्यकत्वात्। षट्घटिकाधिकस्य ति
थिह्रासस्याभावात्। अथ यदि प्रतिपद्दिनापराह्णस्य एवं भवेदित्युच्यते। तर्हि पूर्वाह्णे चेदित्यनर्थकं स्या
दिति। नैवं व्याख्येयं। तिथिद्वैधे प्रतिपद्युक्तायामेवामावास्यायामेव श्राद्धविधानात्। तथा पितृयज्ञानंत
×स्या४ रं मनुना निहितं। पिंडपितृयज्ञस्येति अस्त्यापराह्णे विहितो नान्यथा कर्त्तुराकांक्षा। तस्य च चिरकालत्वा
त्। तेन च सकलापराह्णव्याप्ता वमावास्या श्राद्धस्य कालः इति। इत्यत उक्तं॥ पूर्वाह्णइति नापराह्णे ऽत्र स्व
रूपार्थः। एतेनापराह्णव्यापिन्यां सिनीवाल्याममावास्यायां श्राद्धविधानं। तथा चाह लौगाक्षिस्मृतौ सौ
रपुराणे च। सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि। स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैः

द्विजैः॥ व्यासोपि॥ दृष्टचन्द्रा सिनीवाली कार्या विप्रैस्तु साग्निकैः॥ नष्टचन्द्राः कुहूः कार्या श्रूद्रैर्विप्रैरनग्निकैः॥ बो
धायनोपि॥ सिनीवाली कुहूश्चैव यस्मात्कस्माच्छ्राद्धकर्म्मणि॥ साग्निकैस्तु सिनीवाली कुहूः कार्या त्वनग्निकैः
कुहूरिति कुतपकालव्यापिनी॥ तथा च हारीतः॥ भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा॥ पित्र्ये कर्म्मणि विद्व
द्भिर्ग्राह्या कुतपकालिकी॥ कुतपलक्षणं तु मत्स्यपुराणे॥ अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा॥ तत्राष्ट
मो मुहूर्त्तो यः स कालः कुतपः स्मृतः॥ एवं सति दिनद्वयसंबंधिन्याममावास्यायां सत्यां या कुतपकालव्या
पिनी सैवानग्निकैर्ग्राह्येत्यर्थं भवति॥ अत एव बोधायनः॥ मध्याह्नात्परतो यत्र चतुर्द्दश्यनुवर्त्तते॥ सिनीवाली
तु विज्ञेया पित्र्ये कार्ये तु निःफला॥ बृहस्पतिरपि॥ मध्याह्नव्याप्यमावास्या परस्तात्संप्रवर्त्तते॥ भूतविद्धा तु सा का॰ हि॰ १९६
ज्ञेया न सा पञ्चदशी भवेत्॥ कार्ष्णाजिनिरपि॥ भूतविद्धाममावास्यां मोहादज्ञानतोपि वा॥ श्राद्धकर्म्मणि ये कुर्यु
स्तेषामायुः प्रहीयते॥ यदा तु दिनद्वये कुतपकालव्यापिनी न भवति तदा भूतविद्धैव ग्राह्या॥ तथा च बोधायनः॥
घटिकैकाप्यमावास्या प्रतिपत्सु न चेत्तदा॥ भूतविद्धापि कर्त्तव्या दैवे पित्र्ये च कर्म्मणि॥ प्रतिपत्सु घटिकैकापि कर्म्म

कालसंबंधिनी न स्यादित्यर्थः॥ जाबालिः॥ प्रतिपत्स्वथ मावास्या पूर्व्वाह्णव्यापिनी यदि॥ भूतविद्धैव सा कार्या पित्र्ये क
र्म्मणि सर्व्वदा॥ पूर्व्वे दिने पूर्व्वाह्ण एव प्रवृत्ता पर दिने पूर्व्वाह्ण एव समाप्यते॥ तदा सिनीवाल्येव कर्त्तव्येत्यर्थः॥ यदा तु दि
नद्वयेपि कुतपकालव्यापिनी अमावास्या तदा वृद्धौ साम्ये च परा ग्राह्या॥ क्षये पूर्व्वा॥ तथा च प्रचेताः॥ सिनीवाली कुहू
श्चैव यस्मात्कस्माच्छ्राद्धकर्म्मणि॥ साग्निकैस्तु सिनीवाली कुहूः कार्या त्वनग्निकैरिति॥ कुहूरिति कुतपकालव्यापि
नी॥ तथा च हारीतः॥ भूतविद्धाप्यमावास्या प्रतिपन्मिश्रिता यदि॥ पित्र्ये कर्म्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी॥ कु
तपलक्षणं तु मत्स्यपुराणे उक्तं पूर्वमेव॥ अह्नो मुहूर्त्ता इति॥ एवं च सति दिनद्वयसंबंधिन्याममावास्यायां सत्यां या
कुतपकालव्यापिनी सैव साग्निकैर्ग्राह्येत्यर्थं भवति॥ अत एव बोधायनः॥ घटिकैकाप्यमावास्या परस्तात्सं
प्रवर्त्तते॥ भूतविद्धा तु सा ज्ञेया न सा पंचदशी भवेत्॥ कार्ष्णाजिनिः॥ भूतविद्धाममावास्यां मोहादज्ञानतोपि वा
श्राद्धकर्म्मणि ये कुर्युस्तेषामायुः प्रहीयते इति॥ यदा तु दिनद्वयेपि कुतपकालव्यापिनी न भवति॥
तदा भूतविद्धैव ग्राह्या॥ तथा च बोधायनः॥ घटिकैकाप्यमावास्या प्रतिपत्सु न चेत्तदा॥ भूतविद्धापि कर्त्त

दैवे पित्र्ये च कर्म्मणि। प्रतिपत्सु कर्मकालव्यापिनी घटिकैकापि यदि न स्यादित्यर्थः॥ जाबालिरपि॥ प्रतिपत्स्वप्य
मावास्या पूर्वाह्णव्यापिनी यदि। कृतविद्धैव सा कार्या पित्र्ये कर्म्मणि सर्वदा॥ यदा तु दिनद्वयेपि कुतपकालव्या
पिनी अमावास्या तदा वृद्धौ साम्ये च परा ग्राह्या। क्षये पूर्वा॥ सिनीवाली कुहूश्चैव ग्रस्तुके श्राद्धकर्म्मणि स्यु
तांते चेत्तु मध्याह्ने श्राद्धादि स्यात्कथं तदा॥ तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता। साम्येपि च कुहूरि
त्याहुर्वेदवेदांगवेदिनः॥ कात्यायनोपि॥ क्षीयमाणाममावास्यां प्रथमेह्नि लक्षयेत्। वर्द्धमानाममावास्यां द्वि
तीयेह्नि लक्षयेत्॥ यत्तु वृद्धवशिष्ठवचनं॥ अरुणोदयवेलायाममावास्या यदा भवेत्। स कालः पर
मो ज्ञेयः पितॄणां दत्तमक्षयमिति। तत्सिद्धतर्पणविषये॥ यदपि निगमवचनं॥ मुहूर्त्तमप्यमावास्या प्रतिप
द्यपि चेद्भवेत्। तदानीमुत्तमं ज्ञेयं पर्वशेषस्तु पर्ववदिति। तत्तु स्नानपुरुषादिविषयं॥ अत एव पद्मपुराणे॥ अ
मावा प्रतिपद्युक्ता सर्वपापहरा तिथिः॥ चेत्सूर्य्यग्रहैस्तुल्या स्नानदानजपादिषु। अन्यत्र तु तद्दानमुत्तममि
ति निगमवचनपाठः॥ यदपि प्रचेतसोक्तं॥ घटिकैकाप्यमावास्या भवेद्यदि चतुर्दशी। तदाव्यर्थमतं दैवे पि

का॰ हि॰
१९७

त्र्ये कर्म्मणि चोदितेति॥ उच्यते॥ यदा पूर्वदिन एव पराह्णव्यापिनी। तदा तावत्पूर्वैवेति निरूपितं॥ सि
नीवाली तदापि पित्र्ये दैवेति सततं कुहूरिति। जाबालिस्मृतेश्च॥ कृतविद्धापि दृष्टकृत्ये ग्राह्येते॥ तत्र तु
ल्यादिषु कृतविद्धापि पूज्येति॥ परिसंख्यानमनुपपन्नं। नापि दिनद्वये पराह्णव्यापित्वाभावविषयमि
दं। उक्तादेव हेतोः। न च पूर्वोत्तरदिनयोरपराह्णव्यापित्वे अमावास्या कृतविद्धापि पूज्येति व्यवस्था
घटते। तत्र हि तिथिसाम्यवृद्धौ परा ग्राह्या। तिथिक्षये च पूर्वैवेति। उक्तादिपरसंख्यानमनर्थकं। त
स्मादेव कार्यपरमेतत्॥ तथा च स्कंदपुराणे दर्शितं॥ षष्ट्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी। स
प्तमी परविद्धा च नोपोष्यं तिथिपंचकं॥ तथा प्रचेताः॥ नागविद्धाप्यमावास्या न ग्राह्या मुनिपुंगवैरि
ति तिनोपवासादिदेवकार्यं कृतविद्धाया अमावास्याया अपूज्यत्वोपदेशात्। तुल्यादियोगे कृतवि
द्धा पूज्येति हारीतः॥ स्मरति प्रतिपन्मिश्रा नावे देवकार्ये पूज्यते। तुल्यामकरयोगे तु कृतविद्धापि पूज्य
ति दर्शयति। ननु देवकार्यविषयत्वे बाधेन एव निवेशः इति। पितृकार्यविषयता किं नाश्रीयते। उच्यते।

बाधगौरवभिया तावदेकस्मिन्नेव कार्ये निवेशः। न च विधिगमेकारये भावः। यतः कात्यायनः॥ नागवि
द्धा तु या षष्ठी दर्शाम्येकादशी तथा। भूतविद्धाप्यमावास्या वर्जनीया विचक्षणैरिति॥ उत्तामकरमी
नेषु कन्यायां मिथुने तथा। भूतविद्धाप्यमावास्या इज्या न भवति यत्नतः॥ तेन तत्साहचर्यादेतदपि दे
वकार्यविषयविषयमिति॥ तस्य व्रतोपवासादिदेवकार्यविषयत्वे सामान्यतिथिप्रस्तावे दर्शितं॥
इत्यमावास्यानिर्णयः॥ ॥अथाष्टका॥ अष्टकाशब्देन मार्गशीर्षादिमासचतुष्टयापरपक्षाष्टम्यः
हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टम्यामष्टका इति शौनकस्मरणात्॥ केषांचिन्मते त्रितस्र
एवाष्टकास्तिस्रश्चान्वष्टकाः॥ तथा च विष्णुः॥ अमावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः। अष्टकानाम
नुपश्चान्नवती त्यन्वष्टकाः। अष्टकानामुपरितना नवम्यः॥ कूर्म्मपुराणे॥ अमावास्याष्टकास्तिस्रः
पौषमासादिषु त्रिषु। तिस्रश्चान्वष्टकाः पुण्या माघी पंचदशी तथा॥ विष्णुधर्म्मोत्तरे॥ आग्रहायण्या
तिस्रोऽतो कृष्णास्तिस्रोष्टकास्ताः पंति॥ अथ हर्षोक्ताष्टका चतुष्टयव्यतिरिक्ताः पितृणां परपदापरपक्षेष्टका

का॰ हि॰
१९८

तस्याश्चेतिहासपूर्वकमुत्पत्तिः प्रशंसा चोच्यते॥ पद्मपुराणे॥ अग्निष्वात्ता इति ख्याता यज्वा
नो यत्र संस्थिताः॥ अथोदानाम ते षां तु मानसी कन्यका ददौ तमथा मा वसुनामपितरं वीक्ष्य
सांगना। अत्रैव वरार्थिनी संगं कुसुमायुधपीडितात्। योगाद्भ्रष्टा तु तेनाथ व्यभिचारेण भा
मिनी। नराञ्चस्पृशते पूर्वं पपाताथ भुवस्तले। अथोचाधोमुखी दीना लज्जिता तपसः क्षयात्।
सापितृन्प्रार्थयामास पुनरात्मसमृद्धये। विलप्यमाना पितृभिरिदमुक्ता तपस्विनी। इदमूचु
र्महाभागाः प्रसादस्तु भवा गिरा। अष्टाविंशे भवित्रीत्वं द्वापरे मत्स्ययोनिजा। नाम्ना सत्यवती।
ख्याता व्यासस्य जननी श्रुता। व्यतिक्रमात्पितृणां त्वं कष्टं कुलमवाप्स्यसि। तस्माद्राज्ञो वसो
कन्या त्वमवश्यं भविष्यसि। पोष्टपघष्टका न्नयः पितृलोके भविष्यसि॥ आयुरारोग्यदा नित्यं स
र्वकामफलप्रदा॥ ब्रह्मवैवर्त्तवायुपुराणयोः॥ अथ कालं प्रवक्ष्यामि श्राद्धकर्म्मणि पूजितं॥
काम्यनैमित्तिकाजस्रं श्राद्धकालविपाश्चिनिः। पुत्रदा धनमृत्स्फर्ष्टकास्तिस्र एव वा॥ कृत्स्न

पद्मेधनिष्ठादिश्रवणांतेंगीउदाहृताः। प्राजापत्याद्वितीयास्यात्तृतीयावैश्वदेविकी। आद्यापूपैःसदाकार्या
मांसैरन्याभवेत्सदा। शाकैरन्यात्तृतीयास्यादेवंद्रव्यगतोविधिः। अन्वष्टकापितृणांचैनित्यमेवविधीयते
।यावाप्यन्याचतुर्थीस्यात्तांचकुर्याद्विशेषतः। तासुश्राद्धंबुधाःकुर्युःसर्वस्वेनापिनित्यशः। परत्रेहचसर्वे
षुनित्यमेवसुखीभवेत्। पूजकानांसदोत्कर्षोनास्तिकानामधोगतिः। पितरःपर्वकालेषुतिथिकालेषुदेवता
ः। सर्वेपुरुषमायांतिनिपानमिवधेनवः। यस्यैतेप्रतिगच्छंत्युरष्टकाभिरहर्जिताः। मोघस्तस्यभवेल्लोकोलक्ष्मी
श्चास्यविनश्यति। दैवींवास्कंददायिनोयांतिनियागच्छंत्यदायिनः। अत्रचतुर्थीफाल्गुनकृष्णाष्टमीहि
मंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः। इतिशौनकस्मरणात्। पौषमासकृष्णाष्टमीमा
रभ्यतिस्रोष्टकाइत्येतन्मतपरिग्रहेचचतुर्थीभाद्रपदापरपक्षाष्टमीसंनिहिताःप्रदर्शिताः। पद्मपुराणेति का.हि.
हासानुसारात्। चतस्रष्वष्टकासुक्रमेणाधिदेवतानिरूपणेपितृतीयैकद्रव्यनिरूपणात्। भाद्रपदा १९५
परपक्षाष्टम्यामग्रयणात्। ऐंद्र्यांतुप्रथमायांयोशाकैःसंतर्पयेत्पितॄन्। प्राजापत्याद्वितीयास्यान्मांसैःशुद्धै

८

स्तर्पयेत्। वैश्वदेव्यांतृतीयायामपूपैश्चयथाक्रमं। वर्षासुमघेशाकैश्चश्चतुर्थ्यामेवसर्वदेतिच। अत्र
शाकसूपमांसापूपादितस्यसर्वस्यापिभोज्यस्यतत्तद्द्रव्यप्रधानकत्वप्रतिपादनपरा। नतुद्रव्यांतरा
निवृत्तिपरा। यतोविधिरेकविध्यंतराबाधेनैवतावत्प्रवृत्तिंन्याय्यांमन्यते। किमुततत्कृतरविध्यंतराबाधे
नादृष्टाविरोधेचदृष्टंहि। शाकप्रधानस्यभोज्यस्यतर्पकत्वंनतुकेवलस्यशाकस्येति। आहवसिष्ठः। श्राव
ण्याश्चाष्टकासुपितृभ्योदद्यात्। अष्टकान्वष्टकासुअपिचावश्यकमेवश्राद्धं। यदाहपितामहः। अ
मावास्याव्यतीपातापौर्णमास्यष्टकासुच। विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यतइति। वायुपुराणे।
तिर्यग्गत्वंत्वदायिनःस्यादष्टकाश्राद्धमकुर्वाणस्यतिर्यग्योनिप्राप्तिरूपानिष्टाभिधानात्। विष्णुनाचअमा
वास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः। माघीप्रौष्ठपद्यूर्ध्वंकृष्णत्रयोदशीव्रीहियवपाकौचेत्यनुक्रम्योक्तं।
एतांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिः। विष्णुधर्मोत्तरेप्युक्तं। श्राद्धकालममावास्यानित्यंपार्थि
वसत्तम। पौर्णमासीतथामाघीश्रावणीचनरोत्तम। प्रोष्ठपद्यामतीतायांतथाकृष्णत्रयोदशी। अ

महालयएषतिथौ तौ कृष्णाष्टमीस्त्रीष्टकास्तथा। शाकेश्वप्रथमाकार्यामासेश्वतदनंतरं। तृतीयाचतथाश्चैवनि
त्यमेवविजानता। एतानि श्राद्धकालानि नित्यान्याह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यत इति देव
स्मृतौ। मानवः श्राद्धकल्पोयं मनुना समुदाहृतः। बहुपिंडाष्टकास्तु स्यात् एकपिंडान्वष्टके। अत्र बहुपिंड
एकपिंडशब्दौ पार्वणैकोद्दिष्टविधिनिषेधपरौ॥ ब्रह्मपुराणे॥ अष्टकासु प्रकर्तव्यं श्राद्धं हेमंतिकासु वै। अ
न्वष्टकासु क्रमशो मातृश्वैतद्विष्यत इति। अत्रिस्मृतिः॥ अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा। अत्र मनुः।
पृथक्‌श्राद्धमन्यत्र पतिना सहेति। शंखस्मृति। अन्वष्टका तथा मातुः श्राद्धं चैव मृताहनि। एकोद्दिष्टं तथा मुक्त्वा
स्त्रीषु नान्यत्पृथग्भवेत्। इति विष्णुधर्मोत्तरे। मातृश्राद्धेष्टकविरुक्तः। अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव
तु। अष्टकाविधिनाकृत्वा क्रमेण तासु पंचकं। मात्रे राजन् पितामह्यै श्राद्धं कार्यं यथाविधि। तथैव प्रपितामह्यै
वैश्वदेवः पुरःसरं। पिंडनिर्वपणं कार्यं तस्यैव पितृवत्तथा। नृकेषु स्त्रीषु विप्रेषु तत्र कर्म निबोध मे। प्रादेशमात्रा
जें स्वडरं गुरुमायता। तावदेवसमुत्सेधाः षट्कर्षूस्तत्र कारयेत्। प्रत्येकं कर्षुमूलेतु परिस्तीर्य कुशाशनः। अग्नी

९

षोमयमानां च यागं कृत्वा यथापुरा। कर्षुत्रितयमूलेतु पुरुषाणां तु कारयेत्। पिंडनिर्वपणं प्राग्वदेकैकस्मिन्यथा
विधि। कर्षूणां त्रितयं तच्च क्षीरान्नाद्यैः प्रपूरयेत्। कर्षूत्रितयमूले च स्त्रीणां निर्वपणं भवेत्। दध्ना मांसेन पयसा
कर्षूणां चैव पूरणं। अन्नोदकविमिश्रेण कार्यं मनुजसत्तम। जप्ततीन्यो भवेतदन्नम्यमितितत्यजेत्॥ इत्यष्टका
निरूपणं॥ ॥ अत्र वृद्धिर्नाम पुत्रजन्मादिनिमित्तोपलक्षितः कालः॥ तथा च वृद्धवशिष्ठः॥ पुत्रजन्मविवाहादौ वृ
द्धिश्राद्धमुदाहृतं॥ जाबालिः॥ यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः॥ पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं मुदा
समाचरेत्। विष्णुपुराणेपि॥ जातस्य जातकर्मादि क्रियाकांडमशेषतः। पुत्रस्य कुर्वीत पिता श्राद्धं चाभ्युदयात्म
कं। कात्यायनोप्याह॥ स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु॥ पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमादिति
अत्र संस्काराः॥ गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणनिःक्रमणान्नप्राशनचूडोपनयनव्र
तचर्याध्ययनसमावर्तनविवाहयज्ञादि॥ तत्रैते पूर्वविवाहांते पुत्रसंस्कारेषु पिता स्वपितृभ्यो दद्यात्। शेषसं
स्कार्येण्वेष्वेतद्विस्तरेण क्रमेवाधिकारनिरूपणं श्राद्धकल्पे॥ विष्णुपुराणे॥ कन्यापुत्रविवाहेषु प्रवेशेनववे

ष्मनः॥ नामकर्म्मणि बालानां चूडाकर्मादिके तथा॥ सीमंतोन्नयने चैव पुत्रादिमुखदर्शने॥ नांदीमुखं पितृगणं
पूजयेत्प्रयतो गृही॥ पुत्रस्याद्यमुखदर्शने पुत्रजन्मनीत्यर्थः॥ ब्रह्मपुराणे॥ कर्मण्यथाभ्युदयिके मंगल्ये
चातिशोभने॥ जन्मन्यथोपनयने विवाहे पुत्रकस्य च॥ पितॄन्नांदीमुखान्नाम तर्पयेद्विधिपूर्वकं॥ वसिष्ठः
पूर्वेद्युर्मातृकं श्राद्धं कर्माहे पैतृकं तथा॥ उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु॥ अस्यानुकल्पमाह॥ वृद्ध
शातातपः॥ प्राग्दिने चाप्यशक्तश्चेदेकस्मिन्पूर्ववासरे॥ श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं च तांत्रिकं॥ एकस्मिन्न
पि दिने क्रियमाणानां कालभेदेनानुष्ठानमाह॥ शातातपः॥ पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने मातृकं तथा॥ ततो मा
तामहानां च वृद्धौ श्राद्धत्रयं स्मृतं॥ एवंविधस्य कालभेदस्यासंभवे त्वाह॥ वृद्धमनुः॥ अलाभे भिन्नकालानां नां
दीश्राद्धत्रयं बुधः॥ पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकं॥ बौधायनसूत्रे॥ वेदकर्म्मणि प्रयोज्यान्पूर्वेद्युरेव यु का॰ हि॰
ग्मान्ब्राह्मणान्भोजयेदिति॥ नांदीमुखा एवैते उक्ता भवंति॥ नैकाहेन पित्र्यं दैवं कुर्वंति॥ यस्यैकाह्ने दैवं पित्र्यं च २॰६
कुर्वंति प्रजा अस्य प्रमायुका भवंति॥ तस्मात्पूर्वेद्युः पितृभ्यः क्रियते॥ तत्पितृभ्यः पूर्वेद्युरेव करोति॥ पितृभ्य ए

१०

व एतद्यज्ञं निष्क्रीय यजमानः प्रतनुत इति ब्राह्मणं॥ अत्र वक्ष्यमाणसकलश्राद्धकालोद्देशस्थानीयं याज्ञ
वल्क्यवाक्यं वृद्धिश्राद्धस्याशेषनांदीमुखश्राद्धकालोपलक्षणत्वात्॥ कर्मांगश्राद्धकाला अपि संगृहीताः॥ ताना
ह पारस्करः॥ निषेककाले सोमे च सीमंतोन्नयने तथा॥ ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतं॥ निषेककालः षोडश
रात्रात्मको भार्याया ऋतुकालः॥ तत्र पुण्यनक्षत्रान्वितदिने गर्भाधानाख्यकर्मांगश्राद्धं कार्यं॥ सोमग्रहणमाधाना
ग्निहोत्रकर्मणामुपलक्षणार्थं॥ ॥इति वृद्धिश्राद्धकालनिर्णयः॥ ॥छ॥ ॥अथ कृष्णपक्षनिर्णयः॥ तत्र वाजसनेयसू
त्रे कात्यायनः॥ अपरपक्षे श्राद्धं कुर्वीतोर्ध्वं वा चतुर्थ्या यदहः संपद्येतेति॥ अपरपक्षः प्रतिपत्प्रभृत्यमावास्यांतः कृष्णप
क्षः ऊर्ध्वं वा चतुर्थ्याः यस्मिन्नहनि श्राद्धसाधनसंपत्तिस्तस्मिन्नहनि श्राद्धं कुर्वीतेति॥ गौतमेपि॥ अमावास्यायां पितृभ्यो द
द्यात्पंचमीप्रभृति वापरपक्षस्य यथाश्राद्धं वा सर्वस्मिन्वा द्रव्यदेशब्राह्मणसंभवे कालनियमः शक्तितः इति॥ द्रव्यादिसाम
र्थ्ये कालव्यवस्थेत्यर्थः॥ अत्र च नित्यश्राद्धं॥ तथा च कात्यायनः॥ शाकेनापि नापरपक्षमतिक्रामेदिति॥ यत्तु मार्कंडेयपु
राणादिषु प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदेत्यादिभिर्वचनैरपरपक्षांतर्गतासु सर्वास्वपि तिथिषु प्रत्येकं फलसं

चैव उक्तो नैतेनापरपक्षश्राद्धस्य नित्यता हीयते। दर्शपौर्णमासादिवन्नित्यत्वकाम्यत्वयोरुपपत्तेर्यदपि चैतदेकस्मिन्नेवा
ह्नि क्रियते॥ तदप्यमावास्याश्राद्धात्पृथगेव कार्यं। अमावास्याष्टकावृद्धिः कृष्णपक्ष इत्यत्र याज्ञवल्क्यवचने। अमावा
स्यायाः कृष्णपक्षस्य च पृथगुपन्यासात्॥ अतोत्र यत्कैश्चिदुक्तं॥ अमावास्यादिश्राद्धेन सदापरपाक्षिकं श्राद्धं विकल्प
त इति तदपास्तं। यत्तु निगमस्मरणं॥ अपरपक्षे यदहः संपद्येतामावास्यायां विशेषेणेति। तत्पृथक्त्वे नयपक्षाविरोधी
निर्विकल्पे प्रमाणमिति। स्मृतिचंद्रिकाकारः। केचित्तु विकल्पमेवमन्यंते॥ आपस्तंबः॥ मासि मासि कार्यमपरपक्ष
पराह्णः श्रेयांस्तथापरपक्षस्य जघन्यान्यहानीति। जघन्यानि दशम्यादीनि। नितत्सर्वेषां नवम्यादीनामन्यंतमाप्र
शस्ताभिधानार्थं किंतु पूर्वेभ्यः परेषां श्रेष्ठतमप्रतिपादनार्थं। तदेतच्चतुर्दशीवर्जमाह॥ मनुः॥ कृष्णपक्षे दशम्यादौ
वर्जयित्वा चतुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतरा इति॥ अत्र चतुर्दशी नात्यंतवर्जनीया किंतु शस्त्रादि
हतव्यतिरिक्तदैवत्यश्राद्ध एवेत्याह॥ याज्ञवल्क्यः॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं॥ शस्त्रेण तु हता ये वै ते
भ्यस्तत्र प्रदीयत इति। शस्त्रग्रहणमन्येषामपि केषांचिन्मरणकालानामुपलक्षणार्थमिति वक्ष्यते॥ अथ नाऽपरा

का॰ हि॰ २०२

परपक्षः॥ अत्र यद्यपरपक्षे श्राद्धं कुर्वीतेत्याकेनापि नापरपक्षमतिक्रामेदित्यादिनिर्देशादपरपक्षग्राहकैः सामा
न्यवचनैर्नाऽपरपक्षोपि गृहीत एव॥ तथापि तस्य पुष्टफलत्वप्रतिपादनार्थं। तदतिक्रमे प्रत्यवायातिशयप्र
तिपादनार्थं वा स्मृतिपुराणयोर्विशेषतस्तस्याभिधानं कृतं। तद्यथा विष्णुधर्मोत्तरे॥ उत्तरादयनाद्राजन्श्रेष्ठं स्या
द्दक्षिणायनं याम्यायनाच्चतुर्मासं तत्रापि तु केशवे। प्रौष्ठपद्योऽपरः पक्षस्तत्रापि च विशेषतः। पंचम्यूर्ध्वं ततो
यति। मघायुक्ता तु तत्रापि शस्ता राजन्त्रयोदशीति। उत्तरायणाद्दक्षिणायनं श्राद्धकरणे श्रेष्ठं। सर्वस्माद्दक्षिणाय
नादपि तन्मध्यवर्त्तिसुप्तनिद्रादिनाद्याः पौर्णमास्याप्रभृति मासचतुष्टयं श्रेष्ठं। तस्मादपि सर्वस्मात्प्रौष्ठपदापर
पक्षः। तत्रापि पंचम्या ऊर्ध्वं दशादिवसास्तत्रापि दशम्या ऊर्ध्वं पंच। तत्रापि मघायुक्ता त्रयोदशीति। ब्रह्मपुराणे॥
अश्वयुक्कृष्णपक्षेपि श्राद्धं कार्यं दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा॥ स्यामाकैस्तु विशेषेण प्र
द्धैस्तु पिष्टपिंडैः॥ अत्र विष्णुधर्मोत्तरे। प्रौष्ठपदमाससंबंधिनि कृष्णपक्षे श्राद्धनित्यत्वमुक्तं॥ ब्रह्मपुराणे॥ आ
श्वयुग्माससंबंधिनीति॥ सोयमनयोर्विसंवादः परिह्रियते। तथाहि। इह खलु शुक्लपक्षप्रतिपदुपक्रम्य मा

सनामप्रवर्त्तकं। पौर्णमासीमध्यावयवीकृत्यामावास्यांतंचांद्रदाक्षिणात्याः परिकल्पयंति॥ अवरायस्तु शु
क्लपक्षप्रतिपदुपक्रम्यसनामप्रवर्त्तकपौर्णमास्यांतं। एवंसतिदाक्षिणात्यव्यवहारेणप्रोष्ठपदयुक्तायांपौर्ण
मास्यांप्रोष्ठपदेमासस्याद्यपक्षः समाप्तो। तदुत्तरः पक्षः प्रोष्ठपदोभवति॥ इतरव्यवहारेणतस्यामेवपौर्णमास्यां
प्रोष्ठपदसमाप्तौतदुत्तरः पक्षः। आश्वयुग्मासमध्येभवति। एकएवपक्षोव्यवहारद्वयेनव्यपदेशद्वयंलभते॥ आदि
त्यपुराणे॥ प्रावृष्यतीतेयमः प्रेतान्पितॄंश्चाथयमालयात्। विसर्जयतिमानुष्येकृत्वास्थानंस्वकंपुरं। क्षुधार्त्ताः की
र्त्तयंतश्चदुःकृतंयच्चस्वयंकृतं। कांक्षंतिपुत्रपौत्रेभ्यः पायसंमधुसंयुतं। तस्मात्तांस्तत्रविधिनातर्पयेत्पायसे
न तु। मध्वाज्यतिलमिश्रेणतथाशीतेनवांभसा। ग्रासमात्रंपरंगेहेअन्नंयः प्राप्नुयान्नरः। भिक्षामात्रेणयः प्राणा
न्संधारयतिवास्वयं। यावत्संधारयेद्देहंमत्यहंसात्मविक्रयात्। श्राद्धंतेनापिकर्त्तव्यंतैस्तैर्द्रव्यैस्तुसंचितैः। अत्र
नागरखंडेपिदृष्टमितिब्रह्मवचनं। आषाढ्याः पंचमेपक्षेकन्यासंस्थेदिवाकरे। योवैश्राद्धंनरः कुर्यादेकस्मिन्नपि
वासरे। तस्यसंवत्सरंयावत्तृप्ताःस्युःपितरोध्रुवं। शाट्यायनिराह॥ नभस्यापरपक्षेतिथिषोडशकस्तुयः। कन्यागता

का॰टि॰ २।३

१२

न्वितश्चैषस्याच्चकालःश्राद्धकर्मणि॥ ब्रह्मपुराणमार्कंडेयपुराणयोः॥ दिव्यान्भौमांतरिक्षाणिस्थावराणिच
राणिच। पिंडमिच्छंतिपितरः कन्याराशिगतेरवौ। कन्यागतेसवितरियान्यहानितुषोडश। क्रतुभिस्तानितु
ल्यानिदेवोनारायणोब्रवीत्। राजसूयाश्वमेधाभ्यांयइच्छेद्दुर्लभंफलं। अप्येतुशाकमूलान्नैः पितॄन्कन्या
गतेर्चयेत्। यद्यपिकन्यागतोमासस्त्रयंभवति। तथाप्यपरपक्षस्यैवपैतृत्वाद्वचनांतरसंवादाच्चतत्रैवश्राद्धमि
त्यनुसंधेयं। आदित्यपुराणेपि। कन्यागतेसवितरियान्यहानितुषोडश। क्रतुभिस्तानितुल्यानिपितॄणांदत्त
मक्षयमिति। अत्रयद्यपिबहुषुवचनेषुपक्षस्यैवश्राद्धकालत्वमुक्तं। पक्षश्चपंचदशतिथिषोडशैकस्त्वक
क्तो। अमावास्योत्तरांप्रतिपदमपिवासंगृह्यतुदर्शोदर्शमासीवातस्यांहिनांदीमुखानांश्राद्धंवक्ष्यते। अपरप
रपक्षमध्येयस्मिन्कस्मिंश्चिदप्यहनिकन्यासंक्रमेसति। प्रतिपद्यदिषोडशान्यहान्यपदेयानीत्येवंवेदितव्यं
नतुसंक्रमणात्सर्वाणिदेयानीत्येवं। अतएवाहवृद्धमनुः। मध्येवायदिवाप्यंतेयत्रकन्यांरविर्व्रजेत्। सपक्षःस
कलःपूर्णःश्राद्धंतत्रविधीयतइति॥ अत्रकन्यागतत्वस्योक्तिः। प्रशस्ततरत्वप्रतिपदेनार्थान्नतुकन्यागतत्वेत
×दिनात्मकोभवति। तत्रैकदिनस्यनिर्मोक्षादित्यनेनान्तप्रायेणतिथिषोडश।३५

रादित्येतत्परित्यागार्थं॥ तथाच आदित्यपुराणे॥ पक्षांतरेपि कन्यास्थे वृश्चिकस्थे रवौ श्राद्धं प्रशस्यते॥ कन्यागते पंचमे
तु विशेषेणैव कारयेत्॥ इति आदित्यपुराणीयं तद्देवोक्तं॥ आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः।
श्राद्धं तत्र तु कुर्वीत कन्यां गच्छतु वा न वेति। कार्ष्णाजिनिः। पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा
प्राप्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलान्। एवं नामपदापरपक्षे श्राद्धे कृते विशिष्टफलप्राप्तिरुक्ता। तस्मि
न्नकृते चानिष्टप्राप्तिमाह॥ कार्ष्णाजिनिः॥ प्रेताः चैनं तु हिंसंति पंचमं यो व्यतिक्रमेत्॥ तस्मान्नातिक्रमे
द्विद्वान्पंचमे पैतृकं विधिं॥ नागरखंडे॥ आषाढ्याः पंचमे पक्षे यः श्राद्धं न करिष्यति। शाकेनापि दरि
द्रोपि सोंऽत्यजत्वमुपैष्यति। आसनं शयनं भोज्यं स्पर्शं संभाषणं तथा। तेन सार्द्धं करिष्यंति ये ते पापतमा नर
ाः। भविष्यंति न संदेहः सत्तत्त्वैर्विवर्जिताः। न सुखं धनधान्यं च तेषां जातु कदाचनेति। ब्रह्मपुराणे॥ सूर्ये कन्याग का॰हि॰
ते कुर्याच्छ्राद्धं यो न गृहाश्रमी। धनं पुत्राः कुतस्तस्य पितृनिःश्वासपीडया। न संति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं २॰४
न कुरुते तत्र तस्य रक्तं पिबंति ते॥ कृ॥ अथ केनचित्प्रकारांतरेण श्राद्धमंतरेणोक्तस्य पक्षस्यातिक्रमे तस्मिन्नि

१३

मित्तस्य श्राद्धस्य तदुत्तरे दिने अवधिविशेषावच्छिन्नेषु कर्तव्यतोच्यते। यमस्मृतौ हंसे वर्षासु कन्यस्थे शाकेनापि
गृहे वसन्। पंचम्योरंतरं दद्यादुभयोरपि पक्षयोः। हंसः सूर्यः। उभयपक्षपंचम्योरंतरः इति। नामपदकृष्णपंचम्याः
परस्तादश्विनशुक्लपंचम्याः पूर्वमंतरालकाल इत्यर्थः। अनेनाश्विनशुक्लपंचमीः पर्यंतं श्राद्धमभ्यनुज्ञातं भव
ति॥ ब्रह्मपुराणे॥ यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावच्छ्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा। तथा
कन्यागते सवितरि पितरो यांति वै सुतान्। शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनं। ततो वृश्चिकसंप्राप्तौ निरा
शाः पितरो गताः। पुनः स्वभुवनं यांति शापं दत्वा सुदारुणं। नागरखंडे॥ न ददाति नरः श्राद्धं पितृणां चेद्रसे स्थिते। क्षु
त्पिपासापरीतांगाः पितरस्तस्य दूषिताः। प्रेतपक्षं प्रतीक्षंते गुरुवांछासमन्विताः। कर्षुकाजलदं यद्वद्दिवान
क्तमंते स्थिताः। प्रेतपक्षे व्यतिक्रांते यावत्कन्यागतो रविः। तावच्छ्राद्धं प्रवांछंति दत्तं स्वपितरः सुतैः। ततस्तुलागते
प्येके सूर्ये वांछंति पार्थिव। श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः। तस्मिन्नपि व्यतिक्रांते काले वृश्चिक
गे रवौ। निराशाः पितरो दीनास्ततो यांति निजालयं। मासद्वयं प्रतीक्षंते गृहद्वारं समाश्रिताः। वायुभूताः पिपासार्ताः

सुचक्षुमाः पितरो नृणां।यावत्कन्यागतः सूर्यः।तुलास्थश्च महीपते।सुमंतुराह।कन्याराशौ महाराज यावत्तिष्ठेद्दिवाक
रः।तावत्कालांश्राद्धदेयं वृश्चिकं यावदागतः।यथेंदौ पांचिता राजन् रव्या तत्पंचदशी स्तुता।तस्यां दद्यान्नैवेदत्तेणांवैम
हालये।नात्र पदापरपक्षः।यत्तु जातूकर्ण्येनोक्तं।आकांक्षंतिस्म पितरः पंचमं पक्षमाश्रिताः।तस्मात्तत्रैव दातव्यं द
त्तमन्यत्र निःफलमिति।तत्फलातिशयहानिपरं।न सर्वथा फलहानिप्रतिपादकं।एतच्चापरपक्षकं श्राद्धं मलमासेन
कर्तव्यमिति।मलमासस्य प्रयोगः।किंवा भिन्नानां श्राद्धानामेते प्रयोगा इति।उच्यते पक्षमपीति।तत्र केचिदाहुः
।एकस्यैव श्राद्धस्यायं त्वस्यायं प्रयोगः।यदाह शाट्यायनिः।नभस्यस्यापरे पक्षे तिथिषोडशकस्तु यः।कन्यागतान्वित
श्चस्यात्स कालः श्राद्धकर्मणि।अत्र संख्यापुरुषेषु समुच्चय इति न्यायात्तिथीनां श्राद्धसमुच्चयोऽवगम्यते।न चानाहत्य
श्राद्धं तदुपपद्यत इति।तदेव श्राद्धमावर्तते।तेन सोमयागो विहितो गसंपत्त्यर्थमावृत्त्या नयगता।एवमिहापीति।अपरपक्षे
श्राद्धं कुर्वीतोर्ध्वं वा चतुर्थ्या यदहः संपद्यत इति वाजसनेयसूत्रकात्यायनवचनात्पक्षस्यांगत्वमवगम्यते।पक्षश्च पंचद
शातिथ्यात्मक एवेति समुच्चय एव।तथा च गौतमोऽपि।अमावास्यां पितृभ्यो दद्यात्पंचमीप्रभृति वापरपक्षस्य यथा

श्राद्धं सर्वस्मिन्वा द्रव्यदेशब्राह्मणसंभवे कालनियमः शक्तित इति।अत्र चापरपक्षपंचमीप्रभृति पक्षा अ
मावास्यानां विकल्पः प्रतीयते।तेनामावास्यातदेकस्मिन्नेव श्राद्धे समयः कृष्णपक्षो व्यंगमेव ततश्च त
सिद्ध्यर्थमावृत्तिरेव युक्ता।अथ युक्तं शुक्लपक्षे श्राद्धं कार्यं दिने दिने।त्रिभागहीनपक्षं वा त्रिभागं चार्द्ध
मेव चेति।पद्मपुराणवचने।द्वितीयावसानादत्यंतसंयोगावगमादेकमेव श्राद्धमावर्तनीयमिति प्रतीय
ते।न च्चैवं सति यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां वाच्युतो भवतीत्यत्राप्येकस्मिन्नेव यागे काल
समुच्चयः स्यात्।ततश्च षड्यागप्रसिद्धिस्तत्र विरोध्याद्धन्येत।उच्यते।तत्रापि समुच्चय एव चेदाहृश्च स्यात्।
नचाग्नेययागद्वयं षड्यागप्रसिद्धिस्वारस्यनिरोधेन।निर्वाचिकनिबंधृभिरेव केश्चिदुक्तं।तेनैक एवा
यं प्रयोग इति।अन्ये त्वाहुः।भिन्नानां श्राद्धानामेते प्रयोगाः श्राद्धभेदात्।अंते वा यदि वा मध्ये यत्र कन्यां र
विर्व्रजेत्।पक्षः स पंचमः पूज्यः श्राद्धषोडशकं प्रतीति।अत्र च संख्यया कर्मभेदः प्रतीयते।न चेयमेकाद
शप्रजो याजान्यजतीतिवदभ्यासाश्रयात्।तत्र प्रकृतो संख्यांतरश्रवणाद्देवमाश्रितानन्यत्राप्युदाहृतवा

कैरेकत्वावगमादन्यायात्रयाणां विध्यति। न वेदे वं यदि तान्युत्पत्तिवाक्यानि। इदं चोत्पन्ने कर्म्मणि गुणविधायकं
भवेत्। न चैतदस्ति॥ अनेकगुणश्रवणेनोत्पत्तिवाक्यावगमात्। अत एव प्रतिपन्नस्तान्यायहितीयाद्विपदप्र
देति। इत्यादिनिर्वचनैरपरपक्षांतर्गतासु सर्वास्वपि तिथिषु प्रत्येकं फलसंबंध उक्तः। तेनाभिन्नानां श्राद्धानामे
तत्प्रयोगा इति वयं ब्रूमः। उदाहृतानन्यथासिद्धविविधवाक्यदर्शनात्पक्षद्वयमप्युक्तमिति। तेन प्रयोगाद्यप
क्षे समाप्तिदिन एव दक्षिणादेया प्रयोगांगत्वाद्दक्षिणायाः। प्रयोगभेदे तु प्रतिदिनमेवेति॥ छ॥ अथ त्रयोदशीश्रा
द्धनिर्णयः॥ ॥मनुस्मृतौ। यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीं। तदप्यक्षयमेव स्याद्वर्षासु च मघासु च। यमस्मृ
तौ। गाथाश्चापि हि निर्गीताः कीर्तयंति पुराविदः। अपि नः स कुले भूयात् यो नो दद्यात्त्रयोदशीं। पायसं मधुसर्पिर्भ्यां
प्राक्छाये कुंजरस्य तु। आजेन सर्वलोहेन वर्षासु च मघासु च। अत्रापि हि गाथा भवति॥ इत्युक्तं स्कांदे विष्णुः॥ अ
पि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः। प्रावृट्काले सिते पक्षे त्रयोदश्यां समाहितः। मधुप्लुतेन यः श्राद्धं पाय — का॰ हि॰
सेन समाचरेत्। कार्त्तिकं सकलं वापि प्राक्छाये कुंजरस्य च। पैठीनसिराह॥ छागेन सर्वलोहेन वर्षासु च मघासु च॥ — २०६

८५

पुत्रो वा यदि वा पौत्रो यो नो दद्यात्त्रयोदशीं। जायेत किमसौ कश्चिद्धार्मिको वंशवर्द्धनः। महाभारते॥ अपि नः स
कुले भूयात् यो नो दद्यात्त्रयोदशीं। मघासु सर्पिषा युक्तं पायसं दक्षिणामुख इति। शंखलिखितयमाश्चाहुः॥
पितापितामहश्चैव तथैव प्रपितामहः। जातं पुत्रं प्रशंसंति पिप्पलेशाकुनाश्च वा मधुमांसेन षड्गेन पयसा पाय
सेन वा। एणदास्यति नः श्राद्धं वर्षासु च मघासु च। याज्ञवल्क्योऽपि। यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते। त
था वर्षा त्रयोदश्यां मघासु च विशेषतः। प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं। प्राप्य श्राद्धं प्रकर्त्तव्यं
मधुना पायसेन वा। प्रशस्ततरा चैषा तिथिर्नोऽपरपक्षे केभ्योपि तिथ्यंतरेभ्यः। तथा च ब्रह्मपुराणे। यो
संवत्सरे देहं प्रत्यहं स्वात्मविक्रयात्। श्राद्धं तेनापि कर्त्तव्यं तैस्तैर्द्रव्यैः सुसंचितैः। त्रयोदश्यां विशेषेण वर्षा
सु च मघासु च। तस्मात्परतरः कालः श्राद्धे ह्यन्यो न विद्यते। यदत्र सा ह्यात्पितराग इत्थं त्वनंतमक्षयं॥ मार्कंडे
यपुराणे॥ उत्तरादयनात् राजन् श्रेष्ठं स्याद्दक्षिणायनं। चातुर्मास्यं तत्रापि प्रसुप्ते केशवे धिकं। प्रौष्ठपद्यापरः
पक्षः तत्रापि च विशेषतः। पंचदश्यं च तत्रापि दशाद्यं तत्रोप्यति। मघायुक्ता च तत्रापि शस्ता राजन् त्रयोद॥

शी। अत्र पंचदश्यैं पंचमीमारभ्य दशाहर्वे दशमीमारभ्येत्यर्थः। आवश्यकं चैतच्छ्राद्धं। उक्तं च विष्णुधर्मोत्तरे। श्रा
द्धकालममावास्यां नित्यं च द्विजसत्तम। पौर्णमासीं तथा माघीं श्रावणीं च नृपोत्तम। एतान्येव श्राद्धकालानि नित्या
न्याह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते इति। विष्णुः। अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाः। मा
घी प्रोष्ठपद्यूर्ध्वं कृष्णत्रयोदशी स्वपनस्याः एतांश्च श्राद्धकालान् नित्यानेव। अनुश्लोकमुक्तं चात्। अथात्र नि
षेधवचनानि। बृहस्पतिः। कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नरः। पंचत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितं।
षट्त्रिंशन्मते। गृही त्रयोदशी श्राद्धं न कुर्यात्पुत्रवानिति। उपवासं च संक्रांतौ ग्रहणे चेन्दुसूर्ययोः। वामनपुराणे।
त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान् गृही। नेष्यते चोपवासश्च केश्चिदप्यपनद्वये। आपस्तंबः। त्रयोदश्यां । का॰ दि॰
बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवतीति। कात्यायनश्चाह। युवानः तत्र म्रियंत इति युवमारि २०७
णः। तथा च स्कंदे नागरखंडे। यो वांछति नरो मुक्तिं पितृतृप्तिं सहात्मनः। असंतानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयो
दशी। संतानयुक्तोऽयं कुर्यात्तस्य वंशात् क्षयो भवेत्। आवश्येन तु या चात्र योदश्यां कुरुते श्राद्धं तस्मात् दशाक्षयो भवे

१८

त्। एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने। वशिष्ठ उवाच। आसीत्पूर्वं तरे कल्पे पूर्वं पार्थिवसत्तमः। सिताश्वो नाम पां
चालदेशीयः पितृभक्तिमान्। मधुना कालशाकेन खड्गमांसेन केवलं। स हि श्राद्धं त्रयोदश्यां कुरुते पायसेन च।
कदाचिद्ब्राह्मणान् नृपः सदृष्टः कौतुकान्वितः। अत्रेषु विद्यमानेषु विचित्रेषु कुतो नृपः। असाद्य खड्गमांसेन
कालशाकं च यच्छसि। अप्रत्याख्येयमत्यर्थं श्राद्धे दत्तं द्विजैः। इति तत्पृच्छ्यते स्मास्ति येन कारणं वद।
एतच्छ्रुत्वा वचस्तेषां ब्राह्मणानां नृपोऽब्रवीत्। अवाच्यमपि वक्ष्यामि शृणुध्वं सुसमाहिताः। अहमासं पु
राहिंस्रो लुब्धकः पितृभक्तिमान्। भ्रमन् कदाचित् ज्ञातो दमग्निवेशाश्रमं निशि। स शिष्यानादिशच्चैवं हृ
दस्थेन मया श्रुतः। अग्निवेश उवाच। कृष्णपक्षे यदा चंद्रो हंसश्चैव करे स्थितः। त्रयोदश्यां तु सा छाया विज्ञेया कुंजरा
ख्यया। श्राद्धेष्वतिप्रशस्ता सा पितॄणां तृप्तिकारिणी। तस्मात् श्राद्धं संप्राप्ताः संत्रियंतामतः सुताः। पैत्र्यमद्यत्वं म
यात्तं सः सर्वः करोहस्रः। सिताश्व उवाच। इति तस्य मुनेर्वाक्यमाकर्ण्याहमविंतये। अहं चापि करिष्यामि प्रातः
श्राद्धक्रियामिति। ततः प्रभाते श्राद्धीयं द्रव्यार्थं पर्यटन्वने। खड्गमांसं कालशाकं मधु च प्राप्तवान् हं। यथोपपन्ने

स्तोऽर्थ्यै स्त्रयोदश्यां समाहितः। निजान्पितॄन्समुद्दिश्य स्वजातीयान्नतो जपं। श्राद्धेन तादृशेनापि पितरो द्वादशाब्दि
कं। तृप्तिमाप्नुरहं चापि नृपो जातिस्मरो नवो। अतो मयात्र त्रयोदश्यामेतैरेव हि साधनैः। करोमि श्रद्धया श्राद्धं तस्य
भावमनुस्मरन्। तस्य तद्वचनं श्रुत्वा तेवान्ये च जना नृप विना तस्मात्त्रयोदश्यां श्राद्धं चक्रुर्मुदान्विताः। प्राप्नुः स्वपर
मां सिद्धिं स्पर्द्धमानाः सुरोत्तमैः। इर्ष्यालवस्ततस्तोनु वसुरुद्रादयः सुराः। अशापंस्त्रयोदश्यां श्राद्धकर्तॄन्क्रुधान्विताः
अद्य प्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति। कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः। इति शापेन देवानां निर्दिष्टेऽयं म
हातिथिः। ततः प्रभृति नैवास्यां क्रियते श्राद्धमुत्तमं। यः प्रमादात्तु कुरुते तस्य स्याद्वंशसंक्षयः। एतत्तु त्रयोदशीश्राद्धं
वंशोच्छेदस्य कारणं। अतः श्राद्धं विना देयं तद्दिने मधुपायसं। खड्गमांसं कालशाकं मांसं वाध्रीणसस्य च। वाध्रीणसो
वृद्धच्छागः। तस्याभावेपि दातव्यं क्षीरोदनमनुत्तमं। तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप। तस्याभावेपि दातव्यं का॰ हि॰ २॰८
जलं तिलविमिश्रितं। अत्र केचिदाहुः। त्रयोदशीश्राद्धनिषेधवाक्यानामप्रामाण्यमेव। यत्किंचिन्मधुना मि
श्रमित्यादिमनुवचनविरोधात्। मनुस्मृतिर्हि स्वाध्यायवत्प्रसिद्धतरत्वाद्बहुभिः संप्रदायेन पठ्यमानत्वाच्च

नयत्र पाठसेनच स्मृत्यन्तराच्चेति। इतरेभ्यो नाममात्रेणाप्यसिद्धेभ्यः केनचिदप्यपठ्यमानेभ्योऽनवस्थितपा
ठेभ्यः संभावितभ्रान्त्यादिमूलेभ्यः स्वविरोधे प्रत्यवश्रुतिं तद्बलीयसीति॥ अत एव बृहस्पतिः। वेदार्थप्र
तिबद्धत्वात्प्रामाण्यं तु मनोः स्मृतं। मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते इति। मनुरप्याह। यः कश्चित्कस्यचि
द्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः। इति उच्यते यत्तावदुक्तं। मनुस्मृतेः॥
श्रुतितुल्यत्वेन विरुद्धस्मृत्यन्तरेभ्यो बलीयस्त्वमिति। तत्किल नाममात्रे बृहस्पतिमतं तु। मन्वर्थविपरीता
नां बुद्धादिस्मृतीनां बुद्धादिस्मृतीनामप्रामाण्यमाह। ननु शिष्टैर्वार्त्तिककृता कात्यायनादिस्मृती
नां वेदार्थप्रतिबद्धत्वादित्यस्य प्रामाण्यहेतोस्तास्वपि विद्यमानत्वात्। अतो मनुशब्देनात्र सर्ववेदार्थस्म
र्तारः कात्यायनादयोप्युपलक्ष्यन्ते॥ अथवा मनु ज्ञाने इति धातुपाठात् वेदार्थज्ञानवान्मुनिर्मनुः। तस्मा
न्मनुस्मृतिविरोधेपि कात्यायनादिस्मृतीनां नाप्रामाण्यं वक्तुमर्हति॥ अन्ये त्वाहुः। कस्यचिदपि श्राद्धस्य
निषेधानुपपत्तेर्निषेधवाक्यानां नाप्रामाण्यमिति। तथाहि। न तावन्नित्यस्य श्राद्धस्य निषेधोऽयं। अत आह

मनुः। दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा। पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥ दक्षोप्याह। अस्नात्वा चा-
प्यहुत्वा च अदत्वा यः समश्नाति। देवादीनामृणी भूत्वा स रजः स व्रजत्यधः॥ इति। पठितपरितोषे तु नरकं व्रजत्य-
धः इति॥ चतुर्थपादः पठितः॥ मार्कण्डेयपुराणे॥ तस्मात्पुत्रेण तुष्टेन देवर्षि[struck]पितृदेवताः। भूतानि चानुदि-
वसं पोष्याणि स्वतनुर्यथा॥ तथा। अहरहः स्वधां कुर्यादोदपात्रात्तथैतं पितृयज्ञं समाप्नोतीति। एवमेतैर्व-
चनैर्नित्यस्य श्राद्धस्य अहरहर्विधानादकरणे चाधोगमनाभिधानाच्चायोदर्श्यां तदनुष्ठानेन प्रतिषेधः प्र-
तिषेद्धुमर्हति। नापि नैमित्तिकस्य निषेधः। न तावन्मृताहादिनैमित्तिकस्य। यतः आह॥ याज्ञवल्क्यः॥ मृताहनि तु क- का॰
र्तव्यं प्रतिमासं तु वत्सरं। प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनीति॥ कात्यायनोप्याह॥ ततः संवत्सरं प्रेतायान्नं दद्या- २०९
द्यस्मिन्नहनि प्रेतः स्यादिति। सिद्धान्नेनैकोद्दिष्टं कुर्यादित्यर्थः। श्राद्धानां चैव सर्वेषां श्रेष्ठं सांवत्सरं स्मृतं। त-
त्त्यजेनैव कुर्यादकुर्वन्नरकं व्रजेत्। एवमन्यान्यपि च स्मृतिषु पुराणेषु च मृताहादिविहितस्य मृताहादिव्य-
पेक्षितत्वात्। तदनुष्ठानेन प्रतिषेधः प्रतिषेद्धुमर्हति। नापि वृद्ध्यादिनैमित्तिकस्य। अरुद्ध्वा मातृयागं वैदिकं यः १८

समाचरेत्। तस्य क्रोधविष्टाः समासैर्हिंसामिच्छन्ति मातरः। वृद्धिश्राद्धं प्रकर्तव्यं जातकर्मादिषु चैत। तत्रामुष्मा-
न्द्विजानां कुर्मोऽहं सर्वाश्च रमाश्च वृद्धिः इति। पुत्रजन्मनि कर्तव्यं जातकर्म समन्त्रकमित्यादिनिर्वाक्यैः। पुत्र-
जन्मादिकालेषु जातकर्मवदावश्यकत्वेन विहितत्वात्तदनुष्ठानेन प्रतिषेधः प्रतिषेद्धुमर्हति। नापि त्रयो-
दशीनिमित्तस्य पार्वणस्यैव। यतो निषिद्धे त्रयोदश्यां श्राद्धं पुत्रवान्यः सुतायुषि। एकस्यैव न कुर्यात्स पार्वणं तु स-
माचरेदिति। तस्यावश्यकत्वेन विधानात्। एकस्यैव वर्गस्य न कुर्यात्पार्वणं तु समाचरेदिति। तस्मा आ-
वश्यकत्वेन विधानात्। एकस्यैव वर्गस्य न कुर्यात्पार्वणं तु समाचरेदिति। पितृवर्गस्य मातामहवर्गस्य चैवं वर्गद्वय-
स्य तु कुर्यादित्यर्थः। न चैकवर्गोपदीयमानस्य श्राद्धनिषेधः। तथाविधस्य तन्नैमित्तिकस्य प्राशस्त्याभावात्। पित-
रो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं इति। श्रेष्ठ्यवचनेन वर्गद्वयस्यैव श्राद्धविधिदर्शनात्। नापि काम्यस्य तथा-
पि त्रयोदशीसंबंधेनैव विशेषविहितत्वात्। तदेवं विषयासंभवात्प्रतिषेधवाक्यानामप्रामाण्यमिति। उच्यते। नि-
त्यस्य नैमित्तिकस्य च कदाचित्प्रतिषेधो भवति। यथा सूतकादौ विशेषविहितस्यापि त्रयोदशीनिमित्तिकस्य वि-

षवचनेन तन्मात्रविशेषकेण प्रतिषेधः संभवति। यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र ग्रहणप्रतिषेधः। त्रयोद
शीश्राद्धस्य च नित्यत्वाद्यथा कथंचिदप्यनुष्ठाने प्राप्ते सत्यपि शेषस्य स्मृतौ। व्यामोहादेकवर्गीयश्राद्धस्यानुष्ठा
ने प्रसक्ते प्रतिषेधसंभवात्। तस्माद्विपर्यासंभवात्प्रतिषेधवाक्यानामप्रमाण्यमिति मंदं॥ छ॥ तस्मादत्रव्य
वस्था वक्तव्या॥ तत्रेतावदवधरः॥ मघात्रयोदशीश्राद्धविधिवाक्यानि वर्गद्वयस्योद्देशेनानुष्ठीयमानं श्राद्धमा
श्रयंते। निषेधस्त्वेकवर्गोद्देशेनानुष्ठीयमानो। अतएव कार्ष्णाजिनिः॥ श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत्।
नष्टशास्त्रेषु यस्य प्रजा हिंसंति तस्य ते॥ इति॥ एकस्य वर्गस्य पित्रादिमात्रस्य नोपक्रमेत्। किंतु मातामहादिस
हितस्य कुर्यात्। षण्णां पुरुषाणां श्राद्धकरणे नात्र त्रयोदशीप्रतिषेधदोषस्त्वर्थः॥ अन्ये त्वाहुः॥ संति प्रमीतानां
पितॄणां वेगतानां वर्गाः पितृव्यवर्गो मातृवर्गो मातुलवर्ग इत्येवमादयः॥ अथवा पितृपत्नीयानां सपिंडानां वर्गो
मातृपत्नीयानां सपिंडानां च वर्ग इत्येवं वर्गद्वयं। एतेषां वर्गाणां मध्ये कस्यचिदेकस्यैव वर्गस्य सर्वेषां वर्गाणां श्रा
द्धे अधिकारे पुरुषेण दिनांतरे कस्यचिद्वर्गस्य श्राद्धं कृतं करिष्यते वा कस्या[illegible] किंच कारणमा

का॰ २३

संधाय मघात्रयोदश्यां न कर्तव्यं। किंतु सर्वेषां वर्गाणां कर्तव्यं। यतो मघात्रयोदश्याः पितृतृप्तिकारणत्वा
न्नो तिथीनां मध्ये श्रेष्ठतमत्वात् सर्वेषां पितॄणां मधुमिश्रपायसादिद्रव्येण दीयमानस्य श्राद्धस्यापेक्षितत्वात्॥
ये त्वेवं न दीयते॥ त एव कुपिताः श्राद्धकर्तुः प्रजानाशयंति। वर्गद्वयविषयत्वेन संकोचस्तु निःप्रमा
णकः। तदेवं निषेधवाक्यानामेकस्यैव निःप्रमाणकः। तदेवं निषेधवाक्यानामेकस्यैव वर्गस्य क्रियमाण
श्राद्धविषय इति सिद्धं॥ अन्ये त्वाहुः॥ पुत्रवता गृहिणा क्रियमाणं त्रयोदशीश्राद्धविषयमिति। यथाह ज्यो
तिर्बृहस्पतिः॥ कृष्णपक्षे त्रयोदश्यां श्राद्धं यः कुरुते नरः। पंचत्वं तस्य कुर्यात् ज्येष्ठपुत्रस्य निश्चितं। पद्मि
रान्मते। गृही त्रयोदशीश्राद्धं न कुर्यात्पुत्रवान् पितृउपवासं च संक्रांतौ ग्रहणे चेंदुसूर्ययोः॥ स्मरति च त्रयोदश्यां
तु वै श्राद्धं न कुर्यात्पुत्रवान् गृही। निष्पत्ते चोपवासश्च केचिदयनद्वये॥ आपस्तंबः॥ त्रयोदश्यां बहुपुत्रो बहु
मित्रो दर्शनीयापत्यो युवमारिणस्तु भवेति॥ इति कात्यायनश्चाह॥ युवानस्तत्र म्रियंते इति॥ गोविंदराजस्तु॥
पुत्रमरणरूपेण दोषेण न त्रयोदशीश्राद्धनिवृत्तिं मन्यते। स ह्येवमाह॥ नैयोगिकत्वादस्य फलस्य काम्यमा

नमेवैतन्नयाति।नन्वेवमेवतदुक्तं।काम्यमानंफलंज्ञानेनानिष्टोऽस्माद्भविष्यतीति।तस्मात्क्रियमाणेपिश्राद्धे
नपुत्रमरणरूपमकाम्यमानंकर्मफलंभवतीति।गृहीणपुत्रवताऽपिवर्जनीयंत्रयोदशीश्राद्धमिति।त
दुक्तं।त्रयोदश्यांतुवैश्राद्धंनकुर्यात्पुत्रवान्गृहीत्यादिनिषेधवाक्यापेक्षितानर्थरूपफलविशेषप्राप
णं।पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्रस्यनिश्चितमित्यादिवाक्यैः।क्रियतेपुनः।कस्यचित्पुत्रमरणेघोरनिवा
रूपंत्रयोदशीश्राद्धंविधीयते।निषिध्यमानक्रियाफलंचानर्थरूपयान्नकश्चिदिच्छति।नसकृदुच्चरितंवाक्यंकं
चित्पुरुषंप्रतिष्ठापलेनकिंचित्प्रत्यनर्थत्वेनपुत्रमरणंबोधयितुंशक्तंवाक्यभेदप्रसंगात्।पंडितपरितोषका
रस्त्वयंगोविंदाणमतंप्रतिविशेषः।नतावदत्रस्वर्गकामोयजेतेतिवत्।कामपदंश्रूयते।नचाग्निचरन्यजेते
तिवत्।फलसंबंधबोधकवचनमस्ति।नचविश्वजिन्नत्रिसत्रवदध्याहारेविपरिणामोसंभवती।अन्यथाप्युपप का॰हि॰ २११
त्तेः।अपायंपिंडदानेनज्येष्ठपुत्रोविनश्यतीत्यादिश्रुतीनांवर्तमानोपदेशन्यायेनपर्यवेश्राद्धनिषेधश्रुतानां
निंदार्थवादतयोपपत्तेस्तात्रकतोत्रफलपददर्शनादिहैवकाम्यता।।तदाह।।नहीदंकामशब्देनविनाप्युक्तंफ

लश्रुतिः।वर्तमानोपदिष्टंचकरणत्वेनगम्यतइति।तस्मात्कल्पपदेत्रयोदश्यांयःश्राद्धंकुरुतेन
रः।पंचत्वंतस्यजानीयानीयात्ज्येष्ठपुत्रस्यनिश्चितमित्यादिश्रुतीनांअर्थवादेनोपपत्तिः।य
थावर्षिषिनदेयंरजातमितिश्रुतेः।पुरास्यसंवत्सराद्गृहेरोदनंभवति।योवर्हिषिरजतंददाति
।किंचैवंवादनान्येवत्रयोदशीश्राद्धंपुत्रवान्यःसुतायुषाएकस्यैवनकुर्यात्सपार्वणंतुसमाचरे
दिति।कथंसमधानीयं।तस्मादविचारितमनोहरगोविंदराजव्याख्यानेनात्रादरः।यत्तुकैश्चि
दुक्तंमघात्रयोदश्यांश्राद्धाचरणस्यधर्मरूपत्वात्तदनुष्ठानेपुत्रमरणरूपानिष्टंभवतीति।नयुक्त
मिति।तथाहशाःसंतः।पितरोऽनिष्टंफलंप्रयच्छंतीत्यपिनयुक्तमिति।तत्रवक्तव्यं।यतःशास्त्रबोधितो
र्थोनयुक्तिमात्रेणनिवर्तयितुंशक्यते।शास्त्रैकगम्यस्यार्थस्ययुक्त्यविषयत्वात्।।यत्तुमहाभारतेदानध
र्मेषु।।ज्ञातीनांतुभवेच्छ्रेष्ठः।।कुर्वन्श्राद्धंत्रयोदशीं।।नावश्यंतुविधानेस्यप्रमीयतेनरागरइति।पुत्रमरण
रूपस्यदोषस्यापस्तंबाद्युक्तस्यनिराकरणंकृतं।।तदपिनात्यंतेकृतं।।नावश्यमित्यभिधानेदोषस्यपाक्षि

कञ्चायमिति धानात्॥ यच्च वक्ष्यं नम्रियं तएवेति। स्मृतिचंद्रिकाकारस्य व्याख्यानेनातदयुक्तं। उदाहृतवाक्यवि
रोधात्। तस्मात्पुत्रवता गृहिणा त्रयोदशीश्राद्धं न कर्त्तव्यमिति। तदयुक्तं। पुत्रवतोपि गृहिणोनेकवर्गश्राद्धा
नुष्ठाने दोषाभावस्य पूर्वेवास्यानुगतत्वात्। हरिहरस्त्वत्रैवं दूषणमुक्तवान्॥ अयुक्तमेतत्॥ अपदार्थवाक्या
पत्तेः। पुत्री गृही श्राद्धं न कुर्यादित्येते पदार्थाः। पायसव्यतिरिक्तद्रव्येण श्राद्धं न कर्त्तव्यमिति। वाक्यार्थ इति च स्व
यं चैतदर्शी व्यवस्थामाह। नाऽपदापरपक्षपक्षांतर्गतमघान्वितत्रयोदश्यां नित्यं महाफलं च श्राद्धं। तदग्यमे
वं च पितृणां पौराणिकानुगाथासु पुत्रप्रार्थनामहिते प्रबंधेन श्रूयते॥ अत्र त्रयोदशीश्राद्धसंबंधानि नि
षेधवाक्यानि सामान्यशास्त्ररूपत्वात् नाऽपदापरपक्षत्रयोदशीपरित्यज्य शेषास्वेकादश्यासु त्रयोदशीमुक्त
तार्थपर्यवसानमिति। ननु विशेषतो नाऽपदापरपक्षत्रयोदश्यामेव श्राद्धनिषेधस्यानागृह्णीयादेतिहासमस्य कानि
ऽपमेव दर्शितत्वादनतिश्रायनियोग। तदेवं निषेधवाक्यमेकस्यैव वर्गस्य क्रियमाणश्राद्धविषयमिति सिद्धं॥ २१२
तथा च वचनांतरं। नैव त्रयोदशीश्राद्धं पुत्रवान्यः सुतास्पुषोएकस्यैव न कुर्याच्च पार्वणं तु समाचरेत्॥ अत्र

केचिदाहुः। किमयं निषेधः। बर्हिषि रजतं न देयमितिवत्। उक्तानुवादः न गिरा गिरेति ब्रूयादितिवत्। पूर्वे
स्मिन्कल्पे अनागिप्रतिषेधः। न खलु पार्वणं कुर्यादुक्तेः कथमेकवर्गप्राप्तिरस्ति। पार्वणेन अमावास्या
यां क्रियमाणत्वात्पार्वणं। तत्र च त्रैपौरुषिकत्वविधिः॥ तदाह याज्ञवल्क्यः॥ द्वौ दैवे प्राक्त्रयः पित्र्ये उद
गेकैकमेव वा। मातामहानामप्येवं तंत्रं वा वैश्वदेविकमिति। अवश्यकर्तव्यतया श्राद्धस्य श्रुतेरेकवर्गस्या
पि यथा कथंचित्प्राप्तिरिति चेत्। न सर्वेषां वर्गद्वयप्राप्तेः। तदाह धौम्यः॥ पितरो यत्र पूज्यंते तत्र मातामहा
ध्रुवं। अविशेषेण कर्त्तव्यमन्यथा नरकं व्रजेत्। इति। किं चैवं वादिनां निषेधो विधिश्चेत्यनयमप्यवर्गनिषे
धे सति। तावत्पार्वणानुवादो न युज्यते। बहुवर्गस्यैव हि श्राद्धस्यापि प्राप्तेः पार्वणं कुर्यादिति विधिरप्य
पगंतव्यः। न चैकसंज्ञे वेष्टितायामपगमो युज्यते। तस्मादेकं कृत्वो ज्येष्ठेन गिरा गिरेति ब्रूयादिति। तद
नुवाद एवास्त्विति चेत्। नानार्थकानुवादानुपपत्तेः। गत्यंतराभावे हि पिंडपितृयज्ञेन होतारं वृणी
त इति। नित्यानुवादोऽनुपगतः। हरत्युन सत्यांगतौ न वितुमर्हति॥ तथापि पार्वणं कुर्यादित्युक्तेः

त्रयोदशीकालस्यातिप्रशस्तत्वात्‌ सपिंडीकरणे विप्रान्‌ भोजयेत्पार्वणेन यथेति स्मृतिः। पार्वणेनेति करिष्य
ताकं श्राद्धं प्राप्नोति। तदर्थोयं निषेधः। यद्युक्तमनियतकालत्वात्सपिंडीकरणस्य प्राप्तिः। तदसत्‌। यदि हि
नियतदिवसमेव त्रयोदश्यां प्राप्नुयादेतद्भागमेव निषेधो गत्यंतराभावाद्बाधेत। नाय तस्य नियमेन वा
प्राप्नोति। तदा निषेधः प्रयुज्यते। तस्मादेकवर्गसपिंडीकरणप्रतिषेध एवायं। तस्य वर्गस्य न श्राद्धं त्रयो
दश्यामुपक्रमेदिति। नष्टशास्त्रात्रायपस्त्वापयस्य प्रजां हिंसंति तस्यैते इति। तर्हि कथं बोद्धव्यं। सपिं
डस्तर्हि शेरसंभवात्‌। कालस्यापि पिशिष्टवदुत्संभवात्‌। तत्कालेस्व एवमातामहादय इत्यभिप्रेत्याह
नष्टशास्त्रे तृष्टिमाकांक्षेति। तत्र तत्परिहारेण नान्यदिवसे पितुराकं। कारणं श्राद्धमिति। त्रयोदश्या
मेव क्रियते इत्यभिप्रेत्याह। नष्टशास्त्रे यस्य प्रजां हिंसंति तस्यैते इति। अत एवाह। एकस्यैव न कुर्यात्‌
सपार्वणं तु समाचरेत्‌। एकस्यैव वर्गस्य यच्छ्राद्धं तत्र कुर्यात्‌। न चैकस्य श्राद्धं सपिंडनमंतरेण क्वचिद्वि
हितमस्ति। तस्मात्तस्यैवायं विशेषतः प्रतिषेधः। पुत्रमरणनिंदार्थवादोपि तस्यैव करणे संभवतीति

का॰हि॰
२१

२२

ज्ञेयं। ननु पार्वणश्राद्धकरणे यत्तु कात्यायनवचने। युवानस्तत्र म्रियंत इति। तस्यार्थः। अत्र यच्छ्राद्धफलत्वा
त्रयोदशीश्राद्धस्य युवानोपि तत्र मर्तुमिच्छंति। न तु म्रियंत इति। तथा चापस्तंबः। त्रयोदश्यां बहुपुत्रो ब
हुमित्रः संदर्शनीयापत्यो। पुत्रमरणश्च भवतीति। अत्र पुत्रमारण इत्यर्थः। अन्यथा बहुपुत्रादि
ति। श्रुतिविरुध्यते। यथोक्तं। श्राद्धं कुर्वन्नुदिने द्वेषु नरण्यादिषु। किंच याज्ञवल्क्यो। न त्रयोदशी श्रा
द्धफलमुक्तमुक्तं। नतु ज्येष्ठपुत्रमरणं। वृद्धमनुश्चाह। छादश्यां मृत्रिसंपन्नस्त्रयोदश्यां बहुप्रजाः। आ
युष्मतीं प्रजां चैव धनमप्यंत्र विंदति। तथा मया त्रयोदशीश्राद्धविधाने हेतुः। शंखलिखितौ। प्रजां पुष्टिंय
शः स्वर्गं मारोग्यं लभंतिमेव च। अन्नं श्राद्धतर्पणा प्रीताः प्रयांति च पितामहाः। ज्ञातीनां च भवेच्छ्रेष्ठः कुर्वन्‌
श्राद्धं त्रयोदशी। नावश्यं च युवानोस्य प्रमीयंते नरा गृह इति। तदेतदयुक्तं। तथाहि। यत्तत्र तावदुक्तं
नैकवर्गश्राद्धं सपिंडनमंतरेण क्वचिद्विहितमस्तीति। तदयुक्तं। क्षयाहश्राद्धस्याप्येकवर्गीय
स्य विधानात्‌। अत आह। सिंहस्रहकारः। याज्ञवल्क्येन। कालस्तत्र अमावास्यादिनोदितः। अवि

आदर्शेपि पित्र्यस्य तथा मातामहस्य च युगपच्च सविशेषो वचनाद्दृष्टप्रमाणकान्। कालभेदेन ते त्रःस्या
द्देशभेदेन नैव हि। तस्मात्तत्र विनानुयोगपद्यं प्रतीयते। अमावास्यादिकालेषु कालैकत्वात्सहक्रिया॥
मृताहनि तु तद्भावान्न युज्येत सक्रिया। अस्यार्थः। अमावास्याष्टकावृद्धिरित्यादिना याज्ञवल्क्यव
चनेन पितृश्राद्धसामान्येनामावास्यादिकाल उक्तः। स च युगपदनुष्ठीयमानयोः पितृमातामहश्राद्धयो
रंगभेदेनावगंतव्यः। मातामहानामप्येवमिति। तस्मिन्नेव प्रकरणोद्देश्यदैविकतंत्रत्वाभिधानस्य युगपदनु
ष्ठानमेवोपपद्यमानमौचित्यात्। अत एव कालएवानुष्ठीयमानत्वेनावगतयोः पैतृकपितामहश्राद्धयोः समान
तंत्रता युज्यते। मृताहे तु प्रतिपुरुषमायुःप्रमाणभेदात्। पितृमातामहक्षयाहभेदेन मातामहश्राद्धस्य का॰ हि॰
पितृक्षयाहेन कालः शंति। तन्निबंधना समानतंत्रता न युज्यते। न त्वनेनैव न्यायेन पितृपितामहभेदात्। पि २१४
तृक्षयाहेन कालत्वेयाहे पितामहादीनां श्राद्धं न कर्तव्यं स्यात्। नैवं कुर्वीत दर्शवत् श्राद्धमित्यतिदेशव
चना पितामहप्रपितामहप्रपितामहयोरपि पितृक्षयाहे देवतात्वात्। न च वाच्यं दर्शवदित्यतिदेशवचनादे

वापितरो यत्र पूज्यंते तत्र मातामहा ध्रुवं। इति वचनाच्च मातामहादीनामपि देवतात्वमिति। अतः आहव्या
सः। दर्शवत्स्यात्त्रयोदश्यां सपिंडीकरणे कृते। आह पारस्करः। पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषं। सर्वे
त्रनेकगोत्राणामेकैकस्य मृताहनीति। देवत्वं गतस्य सपिंडीकरणेन पितृत्वं प्राप्तस्य पितुः क्षयाहनि। और
सस्य पुत्रस्य त्रिपौरुषं द्विदैवत्यं श्राद्धं कर्तव्यं। अनेकगोत्राणां दौहित्राणां अनपत्यानामहःक्षयाहादिश्रा
द्धमेकोद्दिष्टमेवेत्यर्थः। तेन दर्शवदित्यतिदेशप्राप्तं षट्दैवत्यं त्रिपौरुषमिति पुनरभिधानात्। पितृक्षयाहे मात
महादीनां परिसंख्या भवति। न तु यत् त्रिपुरुषादौरसस्येति। त्रिपुरुषोद्देशेन औरस्य नियमात्तत्त्वस्य चोद्देश
स्य विशेषणत्वे विवक्षितत्वात्। न मातामहादिपरिसंख्यामेवं। क्षयाहनि त्रिदैवत्यश्राद्धप्राप्त्यभावात्। दर्श
वत्स्यात्त्रयोदश्यामिति वचनात् सपिंडीकरणोत्तरकालं मृताहेपि सामान्येन त्रिदैवत्यप्राप्तिरिति चे
त्। एवं तर्हि अनेन मातामहादीनां परिसंख्या न विध्यति। किं च। औरस्य त्रिपौरुषमित्यत्र त्रिग्रहणस्या
विवक्षितत्वे वाक्यमेवानर्थकं स्यात्। न हि मृताहे पौरुषमपौरुषं च श्राद्धमस्ति। येन पौरुषमौरस्य॥

अघोरूषमित्यन्येषामेवं व्यवस्थानार्थवाक्याभावात्। एकवर्गीयसकलविहितश्राद्धनिषेध एवायं न च चि
त्येति चेत्। न व्यामोहादेकवर्गीयश्राद्धप्राप्तेरपि प्रातरन्निहितत्वात्। तत्रापि निषिद्धप्रतिपत्तेर्दुर्निवारत्वा
त्। अस्तु तर्हि तत्रापि निषेधप्रतिपत्तिरिति चेत्। न विधिवैयर्थ्यप्रसंगात्। विधिप्राप्तप्रतिषेधे शास्त्रातर
बाधसापेक्षत्वात्। व्यामोहप्राप्तप्रतिषेधे च तन्निरपेक्षत्वात्। वैयर्थ्यपरिहारार्थं विधिप्राप्तस्यैव निषेधो
ऽस्त्विति चेत्। शास्त्रबाधं विना निषेधः संभवेत्तद्बाधस्यानुपपत्तेः। तेन यथागमप्राप्तत्वाद्विधिस्तद्वन्
निषेधेन प्रवर्तते। एवं व्यामोहप्राप्तत्वान्नैपातिनं किंचिदनुपपन्नं। पितरो यत्र पूज्यन्ते गता। धौम्यवचने
नैवात्र त्रयोदश्यामप्येकवर्गश्राद्धनिषेधसिद्धिविशेषनिषेधो दोषविशेषप्रदर्शनार्थः। स च दोषविशे
षः श्राद्धस्यैकवर्गीयमिति। कार्ष्णाजिनिवचनेन दर्शितः। यत्र पुत्रमरणमित्यकारप्रश्लेषेण व्याख्याने
कृते तदयुक्तं। उदाहृते नागरखंडे इतिहाससकात्यायनादिवचनविरोधात्। यत्तु म्रियेतेत्यस्य स्वा
र्थेन व्याख्यानं तदपि लक्षणाप्रसंगादयुक्तं। यत्तु त्रयोदश्यां बहुपुत्रत्वादिफलश्रवणं तदनेक

का॰

२६५

२४

वर्गश्राद्धविषयं। अयमर्थः। निषेधे सति पार्वणानुवादानुपपत्तेर्निषेधो विधिश्चेति द्वयमभ्युपगंतव्यं। अनेनैव त
न्निषेधेन बहुवर्गस्य वृद्धिश्राद्धस्य प्राप्तेस्तद्बाधनार्थं पार्वणं तु समाचरेदिति विधिरभ्युपगंतव्यः। अन्यथा
न वन्यक्षेपस्यैव वैयर्थ्यं स्यात्। स्यादेतत्। एवं सति क्षयाहश्राद्धमपि व्यावर्तेत। तस्यापि तु रूपत्वाभावा
त्। अथोच्यते। परेद्युरूपत्वाभावेऽपि पार्वणविधिना क्रियमाणत्वात्पार्वणं। तर्हि वृद्धिश्राद्धमपि न व्यावर्ते
त। तस्यापि पार्वणविधिनानुष्ठीयमानत्वात्। उच्यते। त्रयोदश्यां क्रियमाणस्य मुख्यपार्वणविधिना अ
क्रियमाणस्य मुख्यपार्वणत्वाभावात्। पार्वणसदृशं पार्वणमभ्युपगंतव्यं। क्षयाहश्राद्धसदृशं वृद्धि
श्राद्धं तु न तथेति। तदेव व्यावर्तते। न क्षयाहश्राद्धमिति केचित्। तदयुक्तं। षट्पुरुषस्य श्राद्धस्यापि
सदृशस्यातान्नक्षयाहादिश्राद्धव्यावृत्तेरपि युक्तत्वात्। तेनैव सिद्धं। एकवर्गश्राद्धं सर्वमपि न कर्तव्यं
वर्गं बहुवर्गमपि श्राद्धं वृद्धिश्राद्धं न कर्तव्यमित्यपरे। तदप्ययुक्तं। निषेधो हि व्यामोहप्राप्तश्राद्धविषय इ
त्युक्तं। तेन तत्पर्यालोचयाता सपिंडनक्षयाहश्राद्धादि न व्यावर्तेत। नापि पार्वणं तु समाचरेदित्यस्माद्

क्तवर्गवद्धिश्राद्धस्यहत्यादिश्राद्धानांचव्यावृत्तिः।त्रयोदश्यामावश्यकविहितश्राद्धविशेषविधि
त्वोपपत्तेः।तथाहिश्राद्धकालममावास्यानित्यममावास्यास्मितिस्मोहकाःइति।विष्णुधर्म्मोत्तरेविष्णु
स्मृतिवचनान्यामुदाहृतत्रियोदश्यामावश्यकंश्राद्धंविहितं।तच्चपार्वणमेवेत्यानेनोच्यते।एवंचास्मि
न्नुपपद्यमानेवाक्येनश्राद्धंतरनिवृत्तिपरत्वेप्रमाणमस्ति।तेनैतत्सिद्धं।व्यामोहप्राप्तैकवर्ज्जंश्राद्धनिषे
धोयमेकस्यैवनक्रयोदिति।पार्वणंसमाचरेदितितुत्रयोदशीविहितावश्यकश्राद्धविशेषविधिरिति।न
तुतावदतिदेशादेवपर्वतासिद्धेति।किंविधिनोच्यते।पितृव्यादीनामेकोद्दिष्टप्राप्तंतद्वचनार्थमयंपार्व
णोविधिः।तत्रकात्यायनः।सपिंडीकरणादूर्द्ध्वंपित्रोरेवहिपार्वणं।पितृव्यभ्रातृमातृणामेकोद्दिष्टंसदैव का॰नि॰
त्विति।एतत्पितृव्यादिसमभिव्याहारान्मातृसपत्नीपरंवेदितव्यं।अपुत्राणांसांवत्सरिकश्राद्धमाहापस्तम्बः। २२६
अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषाश्चये।तेषामपिसदेयंस्यादेकोद्दिष्टंनपार्वणं॥मित्रबंधुसपिंडेभ्यःस्त्री
कुमारीभ्यएवच।दद्यादेमासिकंश्राद्धंसांवत्सरमथान्यथा।अग्रेतः।सपिंडीकरणादूर्द्धमेकोद्दिष्टंविधीयते॥

२५

अपुत्राणांचसर्वेषामपत्नीनांतथैवच।अपत्नीनांमृतविवाहानां।अत्रिः।भ्रातृभगिन्यैपुत्रायस्वरेमातुला
यच।पितृव्यगुरवेश्राद्धमेकोद्दिष्टंनपार्वणं।एवमेभिर्वाक्यैःपितृव्यादीनामेकोद्दिष्टंप्राप्तमिति।तद्बाधना
र्थंपार्वणमितीति।तेनपितृभ्रातृमातृणामपुत्राणांतथैवच।मातामहस्यापुत्रस्यश्राद्धादिपितृवज्ज
वेत्।जातूकर्ण्यवचनं।त्रयोदशीविषयंपितृवदिति।पार्वणविधिनेत्यर्थः।यत्तुपितृवज्जवेदित्यवश्य
कर्त्तव्यताद्योतनार्थमितिव्याख्यानं।तदयुक्तं।पितृवज्जवेदित्यस्यावश्यकमात्रविषयत्वेनसंकोचका
रणाभावात्।पितृव्यादिश्राद्धैकोद्दिष्टविधीनांतुत्रयोदशीव्यतिरिक्तविषयत्वेनसंकोचोजातूकर्ण्य
वचनस्यचत्रयोदशीविषयत्वेनसंकोचश्चपार्वणंसमाचरेदित्यस्यान्यथासिद्धत्वादयुक्तमपितु।ते
तेननिषेधवाक्यमुक्तैकवर्गश्राद्धविषयाणीतिसिद्धं।अन्येतु।अयनद्वितयेश्राद्धंविषुवद्वितयेतथा।
युगादिषुचसर्वासुपिंडनिर्वपणाद्दृते।इति--तद्वचनात्मकपदापरपक्षत्रयोदश्यामयुगादित्यात्पिं
डनिर्वपणंविनाश्राद्धंकर्त्तव्यमिति।निषेधवाक्यानांपिंडदानसहितश्राद्धविषयत्वात्कःकोस्यश्रावि

षयद्येनवाप्रतिषेधवचनानिव्यवस्थापनीयानियतः।कामसंबंधएवश्राद्धेदोषःस्मर्यते।तथाहि।त्रयोदशी
श्राद्धकर्तुर्ज्ञातिश्रैष्ठ्यबहुपुत्रपुत्रादिफलंकीर्तयन्त्योव्यासापस्तंबाद्यायुवमरणोदोषोपितत्रोक्तइतिदिक्।
॥छ॥ ॥अथापरपक्षएवचतुर्दशीश्राद्धनिर्णयः॥ ॥तत्रयाज्ञवल्क्यः॥प्रतिपत्प्रभृतिष्वेकांवर्ज्जयित्वाच
तुर्दशीं।शस्त्रेणतुहतायेवैतेषांतत्रप्रदीयते।इति॥ब्रह्मांडमार्कंडेयपुराणयोः॥युवानःपितरोयस्यमृता
ःशस्त्रेणवाहताः।तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता॥ब्रह्मवैवर्त्तवायुपुराणयोः।युवानस्यगृहे
यस्यमृतास्तेषांगदापयेत्।शस्त्रेणचहतायेवैतेषांदद्याच्चतुर्दशीं।वृद्धमनुः।चतुर्दशींवर्ज्जयित्वाश्राद्धं
श्राद्धविशारदाः।प्रीयंतेपितरस्तत्रयेचशस्त्रहतारणे।काम्योपक्रमेचमनुः।ज्ञातिश्रैष्ठ्यंत्रयोदश्यांच
तुर्दश्यांयुवप्रजाः।प्रियंतेपितरश्चास्ययेचशस्त्रहतारणे॥इतिशास्त्रग्रहणमुपलक्षणं॥अतएव
ब्रह्मपुराणे।प्राणेनाशकशस्त्राग्निविषोद्बंधनिनांतथा।चतुर्दश्यांतुकर्त्तव्यंतृप्त्यर्थमितिनिश्चयःइति
नागरखंडेपि।अपमृत्युर्भवेद्येषांशस्त्रमृत्युरथापिवा।उपसर्गमृतानांतुविषमृत्युमुपेयुषां।वह्निना

का॰टि॰
२१७

२६५

चप्रदग्धानांजलमृत्युमुपेयुषां।सर्पव्याघ्रहतानांचशृंगीरुद्बंधनैरपि।श्राद्धंतेषांप्रकर्तव्यंचतुर्दश्यां
नराधिप।तेषांतस्मिन्कृतेतृप्तिस्तातस्तत्प्रजाभवेत्।अपमृत्युरकालमृत्युः।अप्राप्तरजसामेव
मृत्युरित्यर्थः।स्वयमृतग्रहाक्रयस्पर्शानांतन्मरणंतदुपसर्गान्मरणं।तत्प्रजासर्वास्मिन्नपरपक्षे
श्राद्धकरणाज्जावतीतृप्तिस्तावतीत्यर्थः।मरीचिरपि।शस्त्रविषश्वापदादितिर्यक्ब्राह्मणघातिनांचतु
र्दश्यांक्रियाकार्याअन्येषांतुविगर्हिता।विषादिनिर्घातोयेषांतेतथोक्ताः।अनेनशस्त्रादिहतानामे
वचतुर्दशीकालमात्रंनियम्यते।नतुचतुर्दश्यामेवशस्त्रादिहतानां।किंतुतेषामन्यस्मिन्नपिकाले
भवत्येवश्राद्धमितिप्रचेताः।आपारुह्यारोहणलोहादिविद्युज्ज्वालाविषादिभिः।नखिदंष्ट्रिविपन्नानांतेषांश
स्ताचतुर्दशीति।आदिशब्दनगिरिशिखरादिविषमस्थलारोहणगुडलड्डुकाद्यत्तिघातोद्बंधनोपलपातो
दयः।प्राकृतसंस्कृतमरणेपापाःसंसरंतेतायह्नकविरुद्धापेशाकटायनवचनं।जलाग्निस्थंविपन्नानां
संन्यासेवागृहेपथि।श्राद्धंकुर्वीततेषांवैवर्ज्जयित्वाचतुर्दशीमिति।तत्प्रायश्चित्ताद्यर्थंविहितजला

ग्न्यादिमरणप्रयुक्तप्राणिविषयं। ये हि पापमृता जंतवस्तेषामेव चतुर्दश्यां श्राद्धं कर्तव्यं। वृद्धारोहणे त्या
दोषश्चेतावचनेन पापमृत्युप्रायपाठात्। अत एव प्रमीते पत्यौ विहिताग्निप्रवेशविधिनानुमरणं कृतायोषि
तामपि न चतुर्दशी श्राद्धं -- एवं विहिते जलनादिनिमृतानां मनुष्यस्य पुराणवचनप्रामाण्यात्संग्रा
मप्रायोपवेशनमृतानां च कृष्णचतुर्दशी श्राद्धमिति सिद्धं ॥ छ ॥ कृतसपिंडीकरणस्याप्येकोद्दिष्टमेव क
र्तव्यं। यदाह गार्ग्यः। चतुर्दश्यां च यच्छ्राद्धं सपिंडीकरणात्परं। एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः। इति
मनुः। एकपिंडीकृतानां तु पृथक्त्वं नोपपद्यते। सपिंडीकरणादूर्ध्वं मृते कृष्णचतुर्दशी। इति भविष्यत्पुराणे
।समत्वमागतस्यापि पितुः शस्त्रहतस्य तु। एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये। प्रेतत्वपरित्यागेन पितृ
त्वप्राप्तेः पितामहादिभिः साई सपिंडीकरणे प्रेतत्वपरित्यागेन पितृत्वप्राप्तेः। पितामहादिभिः साई सपिंडीकर
णे प्रेतत्वपरित्यागेन पितृत्वप्राप्त्या साम्यमागतस्यापीत्यर्थः। शस्त्रहतस्य पितुर्महालये चतुर्दश्यामेकोद्दिष्ट
श्राद्धे कृते पार्वणं कृते पि दिनांतरे पार्वणश्राद्धं कर्तव्यं। एकोद्दिष्टश्राद्धेन पितामहादितृप्त्यसिद्धेः। नचैवं मृताहेप्ये।

का॰हि॰ २१८

३१

कोद्दिष्टे कृते पि दिने पार्वणश्राद्धमपि पितामहादितृप्तिसिद्ध्यर्थं कर्तव्यं स्यात्। मैवं। पितृमृताहे पितामहादे
स्तर्पणीयत्वास्मरणात् तदर्थं श्राद्धस्याननुष्ठेयत्वात्। महालये तु। कांक्षंति पुत्रपौत्रेभ्यः पायसं मधु
संयुतं। तस्माच्छास्त्रविधिना तर्पयेत्पायसेन तु। मध्वाज्यतिलमिश्रेणेति पितामहादेरपि तर्पणीयत्वस्म
रणात्। तदर्थं दिनांतरे श्राद्धं कार्यमेव। यस्य तु पिता मातापि शस्त्रादिहतः। तस्य महालये पि पितामह
श्राद्धमपि चतुर्दश्यामेकोद्दिष्टरूपं कार्यं। तथा च स्मृत्यंतरे। एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति।
एकस्मिन्पितरि पितामहे प्रपितामहे वा शस्त्रादिना हते पित्रादित्रयमध्ये द्वयोर्वा शस्त्रादिना हतयो
श्चतुर्दश्यामेकोद्दिष्टविधिना प्रत्येकं श्राद्धं कार्यमित्यर्थः। द्वयोरेकोद्दिष्टविधानेन प्रत्येकं श्राद्धे
कृते पि पितामहादितृप्तिसिद्ध्यर्थं दिनांतरे श्राद्धं कर्तव्यं। पित्रादिषु त्रिष्वपि शस्त्रादिहतेषु पृथगेको
द्दिष्टानि कार्याण्येव। अथ कश्चिदाह। एकस्मिन्द्वयोर्वेत्यभिधानात् त्रिषु पितृपितामहप्रपिता
महेषु नैकोद्दिष्टविधिरिति गम्यते। तेन त्रिषु शस्त्रादिहतेषु चतुर्दश्यां पार्वणविधिरेव युक्तं चेतत्। न

पिंडीकृतानां त्रयाणामपि चतुर्दश्यां विहितरूपकालसंभवे सत्स्वशस्त्रहताप्राप्तिकृतैककालासंभवनिबं
धनस्यैकोद्दिष्टविधेरनवतारात्। अनेनैवाभिप्रायेण परार्केणाप्युक्तं। तत्रैवैकस्य शस्त्रहतत्वेन एकोद्दिष्टवि
धानं। किंतु पार्वणमेवेति। तस्यार्थः। अन्ये त्वाहुः। अयुक्तमेतत्। एकस्मिन् द्वयोर्वैकपक्षलक्षणत्वात्। एको
द्दिष्टविधेश्च शस्त्रादिहतत्वनिमित्तत्वात्। नकालासंभवनिबंधनत्वं। कालसंभवस्याकृतत्वादेकोद्दिष्टविधेस्त
न्निबंधनत्वे कस्यनामात्रमतत्वोपपत्तेः। अत एव देवाभिहितं। स्वामिनात्रिष्वपि शस्त्रादिहतेषु पृथगेकोद्दि
ष्टत्रयमेव कार्यं। न तु पार्वणं। आहत्यवचनाभावादिति। तदप्युक्तं। उपलक्षणत्वपक्षे लक्षणप्रसंगात्। अ
त्र शस्त्रादिहतानां चतुर्दश्यामेवैकोद्दिष्टमिति वाक्यार्थावगमान्मृताहादौ पार्वणमेव कर्तव्यं। अपि तु चतु का॰ हि॰ २१७
र्दश्यामेव शस्त्रादिभिर्मृतास्तेषां मृताहे किं पार्वणमेकोद्दिष्टं चेति संशयेऽभिधीयते। चतुर्दशीनिमित्त
स्य मृताहादिनिमित्तस्य च श्राद्धस्य श्राद्धीयकाले समवाये प्रकरणीकृन्यायेन भेदेऽपि युगपदनेकनिमित्तो
पनिपाते एकेनैव निमित्तेन कृतपादिकाशाविरोधेऽहितीयस्यावकाशो देशकालकर्तृदेवतैक्ये विशेषाग्रहणे

२८

तंत्रेणानैमित्तिकानुष्ठाने सति स्वकुलवृद्धपरंपराचारानुसारान्मृताहेऽपि यैरेकोद्दिष्टपक्षपरिग्रहः कृतस्तेषां मृताह
निमित्तकमपि चतुर्दश्यामेकोद्दिष्टमेव। यैस्तु पार्वणपक्षपरिग्रहः कृतः। स तैः सदितहोमवत् यावज्जीवं परिगृ
हीत एवेति। चतुर्दश्यामेवेति। नैतेशासोपरित्याज्यः। यस्तु चतुर्दश्यां पार्वणत्वनिषेधः श्राद्धस्य चतुर्दशी
निमित्तकत्वाय चतुर्दश्यामिति विशेषणाध्याहृतवाक्यभेदो स्यातां। मेवं। प्रकृतत्वादिना विषयत्वाभस्योपन्य
स्तदोषानास्पदत्वात्। अन्यथा वधतादिनियमतो — वीर्येण संबाध्यता। यत्त्वनागरखंडे। चतुर्दश्यां क्रिय
माणस्य पार्वणस्यैव फलमनुपात्तदाप चतुर्दशीनिमित्तकस्येति। अथ स किं चतुर्दशीनिमित्तमेकोद्दि
ष्टं मृताहनिमित्तमेकोद्दिष्टं च पार्वणमिति श्राद्धद्वयं कुर्यात्। एकमेव वा। अत्र गवेषयो ज्ञस्यमाणवि
रोधेन तंत्रानुष्ठानासंभवात्संशयः। तत्र समानेऽहनि नैकः श्राद्धद्वयं कुर्यादित्यस्य सद्भावेऽपि धस्यभिन्न
नानिमित्तश्राद्धनोचरस्याभावात्। श्राद्धद्वयं कुर्यात्। भिन्नदेवतैक्यात्प्रधानद्वयासिद्धौ नभेदेन श्राद्धद्वा
नुष्ठानमिति। नन्वेकान्नमपि चतुर्दशी श्राद्धमस्ति। कामभ्यवणप्रवृत्तिर्वाच्छनराणां काम्यप्रवृ

नोरुक्तसाचतुर्दशीनिमित्तकश्राद्धे नुष्ठीयमाने सति एकोद्दिष्टधर्म्मा एव प्राकृवेंति। नैवं देवं। यदि त्वय
सामनुग्रहो त्रप्रविशेषो नावगम्यते। यस्तु चास्यां तिथौ निमित्तभेदो नैमित्तिकभेदो श्राद्धद्वयमिति। महा
लयपक्षे च कथंचिच्चतुर्दश्यां श्राद्धासंभवे तत्पक्षमध्ये कस्मिंश्चिदपि श्राद्धं कर्त्तव्यं। प्रशस्ततरमुख्यका
लासंभवे पि तत्पक्षकर्त्तव्यस्य श्राद्धस्यावश्यकत्वात्। दिनांतरे च शस्त्रहतानामपि पार्वणमेव। चतुर्दश्यामे
कोद्दिष्टविधानात्॥ ब्रा॥ चतुर्दश्यां शस्त्रहतानामेकोद्दिष्टमेकोद्दिष्टमेव कर्त्तव्यमित्यत्र कारणमुक्तं नाग
रखंडे॥ आनर्त्त उ०॥ कस्माच्छस्त्रहतानां च प्रोक्तं श्राद्धं चतुर्दशी। एकोद्दिष्टं कृतस्मात्र कारणं प्रब्रवीहि मे। भर्तृ
यज्ञ उ०॥ वृत्रकस्य पुरा राजन् हिरण्याक्षो महासुरः। बभूव बलवान् शूरः सर्वदेवभयंकरः। ब्रह्मा प्रतोषितस्ते
न विधाय विविधं तपः। कृष्णपक्षे चतुर्दश्यां नभस्ये मासि संस्थिते॥ ब्रह्मोवाच॥ परितुष्टोस्मि ते वत्स प्रार्थय
स्व यथेप्सितं। अदेयमपि दास्यामि दुर्लभं यत्सुरासुरैः॥ हिरण्याक्ष उवाच॥ हताः प्रेताः पिशाचाश्च राक्ष
सा दैत्यदानवाः॥ बुभुक्षिताः प्रधावंति मां नित्यं पद्मसंभव। पितृपक्षे कृते श्राद्धे कन्यासंस्थे दिवाकरे। एतस्मि

DR BHAU DAJI

२२५

न्नहनि प्राप्यस्तृप्तिः स्यादुपसंभव॥ तदेषामत्र दिवसे ह्यक्षणायं कुरु प्रभो॥ ब्रह्मोवाच॥ यः कश्चिन्मा
नवः श्राद्धं स्वपितृभ्यः प्रदास्यति। पितृपक्षे चतुर्दश्यां नभस्ये मासि संस्थिते। प्रेतानां राक्षसानां च भूतानां
तृप्तिर्भविष्यति। मम वाक्यादसंदिग्धं ये चान्ये कीर्त्तितास्त्वया। उप्रेत्य नामृता ये च संग्रामेषु मृताश्च ये। एको
द्दिष्टं सुतैर्दत्तं तेषां तृप्तिर्भविष्यति। एवमुक्त्वा ततो ब्रह्मा गतश्चादर्शनं नृप। हिरण्याक्षोपि संहृष्टः स्वमे
व भवनं ययौ। यच्च शस्त्रहतानां च तस्मिन्नहनि यद्दीयते। एकोद्दिष्टं नरैः श्राद्धं तत्रेदं स्यामि कारणं। संख्ये
शस्त्रहता ये च निर्विकल्पेन चेतसा। युध्यमानाः न ते मर्त्या जायंते मनुजाः पुनः। पराङ्मुखा ये हन्यंते पलाय
नपरायणाः। ते भवंति नराः प्रेता एतदाह पितामहः। संमुखा अपि ये देन्यंहन्यमाना वदंति चापश्चात्तापं च
वा कुर्युः प्रहारैर्जर्जरीकृताः। तेपि प्रेताः भवंती मनुः स्वायंभुवोऽब्रवीत्। कदाचिच्चित्तचलनं शूराणामपि
जायते। तेषामपि दिने तत्र देयं प्रेतत्वशंकया। अपमृतानां च सर्वेषामेव देहिनां। प्रेतत्वं जायते यस्मात्तस्मा
त्तेषां तु तद्दिनं। श्राद्धार्हं पार्थिवं श्रेष्ठं विशेषेणापि कीर्त्तितं। एकोद्दिष्टं प्रकर्त्तव्यं तस्मात्तत्र दिने हरेः। सपिंडीकरण

हर्ष्टे तन्नैव द्यामि। कारणं येदिघेतन्नमापन्नः कदाचित्तत्पिता भवेत्। तस्यार्थे तस्य कर्तव्यं श्राद्धं तत्रदिनेन्तु पापिता
महायास्तात्पाक्ति श्राद्धं नार्हति क्वचित्। अयने संक्रांतौ नो दद्यात् क्रियते राक्षसैस्तु तत्। ब्राह्मणवचनात् राज
न्मकृतप्रतौ श्च दानेवैः तैनैकोद्दिष्टमेवात्र कर्तव्यं न तु पार्वणमिति। पिटपक्षे चतुर्दश्यां कन्यासंस्थे दिवाकरे
एतस्मात्कारणात् श्राद्धं पार्वणं नैव कारयेत्। एतस्मिन्नहनि शस्त्रहतस्य श्राद्धं भवेद्यतः॥ ॥इति शस्त्रहतचतुर्दशी
॥ ॥अथायनादयः श्राद्धकालाः॥ तत्र विष्णुपुराणे॥ उपप्लवे चंद्रमसो रवेश्च त्रिष्टकास्वयनद्वये च। पानी
यमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः। श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत् पितरो वदंति। अ
त्र पानीयमपीति वचनादावश्यकता श्राद्धस्योच्यत इति मन्यते। यत्तु। आदित्यसंक्रमं विष्णुवद्वयो व्यती का॰हि॰
पातो जन्मर्क्षे चंद्रसूर्यग्रहस्तथा। एतास्तु श्राद्धकालान्वै काम्यानाह प्रजापतिरिति। विष्णुवचनेन ग्रहणा २२१
देः काम्यकालत्वमुक्तं तन्न निश्चवनिराकरणक्षमं। वाक्यद्वयबलेनाग्निहोत्रादिवत् नित्यत्वकाम्यत्वयोर
विरोधात्। आह शंखः॥ हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने। विषुवत्ययने चैव सर्वमानंत्यमुच्यते। अत्राय

३

नद्वयविषुवत्सूर्यसंक्रमइत्यस्मिन्याज्ञवल्क्यवचनेन अनयोर्विषुवतोश्च संक्रांतिपादनेव संग्रहसिद्धावपिय
त्पृथगभिधानं। तत्संक्रांत्यंतरेभ्यो विषुवं विषुवादयनमिति। यथापूर्वं प्राशस्त्यातिशयप्रतिपादनार्थमि
ति मंतव्यं। तथा च विष्णुधर्मोत्तरे। श्राद्धे संक्रमणे भानोः प्रशस्तं पृथिवीपते। विषुवद्वितये तत्र अयनो द्वि
शेषतः। विषुवतोरयनयोश्च लक्षणं नागरखंडे। यदास्यान्मेषगो भानुस्तुलां वाथ यदा व्रजेत्। तदास्या
द्विषुवाख्यस्तु कालः श्राद्धस्य कारकः। मकरे कर्कटे चैव यदा भानुर्व्रजेन्नृप। तदायनाभिधानस्तु विषुवाच
विशिष्यते। अस्मिन्काले पिंडनिर्वपणं नैव कर्तव्यं। यदाह पुलस्त्यः। अयनद्वितये श्राद्धं विषुवद्वितये
तथा। युगादिषु च सर्वासु पिंडनिर्वपणादृते। ब्रह्मपुराणे। सर्वास्वपि संक्रांतिषु पिंडनिर्वपणं विना। श्राद्धमु
क्तं। अयनद्वितये श्राद्धं विषुवद्वितये तथा। संक्रांतिषु च कर्तव्यं पिंडनिर्वपणादृते इति। एतेषु कालेषु पिं
डनिर्वपणं विना श्राद्धं कर्तव्यं। एतत्कालनिमित्तक एव श्राद्धे पिंडनिर्वपणप्रतिषेधोऽयं न मृताहादिनिमित्त
कप्रसंगादयनादिषु पतितेषु यस्मादयनद्वितये श्राद्धमित्यनेनायनादिषु नित्यान्वितं श्राद्धमवगम्यते। त

न्निमित्तकमेवं तैर्नित्याचितं नान्यत्। नित्यानित्यान्वयश्चान्वयाष्टकायां भवति। अत्र हि विधीयमानस्या
श्राद्धस्य पिंडनिर्वपणं दत्तमिति विशेषणं प्रसंगात्। तत्कालपतितम्मृताहादिश्राद्धमाश्रयितुमर्हति। यद्येवं वि
धेश्राद्धमेतेषु कालेषु विधीयते। तथा हि भावार्थाधिधिरित्येष गुणो भवति। शातातपस्मृतौ। लिंगपुराणे
च। सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु तच्छ्राद्धं पंके गौरिव सीदति। सीदतीति वचनं श्राद्धस्या
वश्यकीतां दर्शयति। कूर्मपुराणे च। अस्य श्राद्धस्य नैमित्तिकत्वेनावश्यकत्वात्प्रतिपाद्य काम्यत्वं प्रतिपा
दितं। अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु। तिस्रश्चान्वष्टकाः पुण्या माघी पंचदशी तथा। त्र
योदशी मघायुक्ता वर्षासु च विशेषतः। नित्यपाकश्राद्धकाला नित्यप्रोक्ता दिने दिने। नैमित्तिकं तु कर्त्त कालि॰
व्यं ग्रहणे चंद्रसूर्ययोः। बांधवानां च मरणे नारकी स्यादतोन्यथा। काम्यानि चैव श्राद्धानि शस्यंते ग्र २२२
हणादिषु। अयने विषुवे चैव व्यतीपातेप्यनंतकं। संक्रांतावक्षयं श्राद्धं तथा जन्मदिनेष्वपि। नक्षत्रेषु च स
र्वेषु कार्यं काम्यं विशेषतः इति॥ मार्कंडेयपुराणे। विशिष्टब्राह्मणप्राप्तौ सूर्येंदुग्रहणेऽयने। विषुवे र वि

३१

सं क्रांतौ व्यतीपाते षु पुत्रक जन्मकालेषु। श्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने। जन्मर्क्षग्रहपीडासु श्रा
द्धं कुर्वीत वेच्छया। अत्र सूर्यग्रहणादिकालेषु तथा इच्छया श्राद्धं प्रतिरुच्यते श्राद्धं कुर्यात्। अयमर्थो
षु श्राद्धेषु कालेषु च इच्छया स्वर्गादिफलकामनया श्राद्धं कुर्यादिति लभ्यते स्यार्थः। न पुनर्यदीच्छति क
र्तुं तर्हि कुर्यादिति। इत्ययनादयः श्राद्धकालाः। अथ द्रव्यब्राह्मणसंपत्स्वरूपलक्षितः कालः। तत्र हारी
तः। तीर्थद्रव्योपपत्तौ च न कालमवधारयेत्। पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं विधीयते। तीर्थं गयादि
द्रव्यं मुन्यन्नादि। श्रोत्रियाद्यादि विशेषेण विशिष्टं ब्राह्मणं प्राप्य न कालांतरं प्रतीक्षेत। किं तु तस्मिन्नेव
काले श्राद्धं कुर्यादिति। अपि सद्य इति वचनादावश्यकत्वं प्रतीयते। यत्तु मार्कंडेयपुराणे॥ विशिष्ट
ब्राह्मणप्राप्तौ सूर्येंदुग्रहणायने। श्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने। जन्मर्क्षग्रहपीडासु श्रा
द्धं कुर्वीत चेच्छयेति। यत्र --- दं यत्र विशिष्टेन विरुध्यते। तथा व्याख्यातमेवायनादिश्राद्धकालनि
रूपणे। ब्रह्मपुराणे। यदा च श्राद्धिपेन्येति पणवेदाविदग्निचित्। तेनैकेनापि कर्तव्यं श्राद्धं विषुववत्

तं॥ श्राद्धीयद्रव्यसंप्राप्तिर्यदा स्यात्साधुरा मता। पार्वणेन विधानेन श्राद्धं कार्यं द्विजोत्तमैः॥ विष्णुपुराणे॥
द्रव्यब्राह्मणसंपत्सु उपलब्धिते काले काम्यमपि श्राद्धमुक्तं॥ तथाहि। तत्र काम्यानुष्ठानेच्छेत्यस्यानंत
रं भवति वचनं। श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजः। श्राद्धं कुर्वीत विज्ञाय व्यतीपातेयने तथा॥ इति
ब्राह्मणसंपत्सुपलब्धितकालनिरूपणं॥ ॐ॥ अथ गजछाया स्कंदपुराणादौ॥ ॥यदेंदुः पितृदैवत्ये
हंसश्चैव करे स्थितः। तिथिर्वैश्रवणी या च गजच्छायेति सा स्मृता॥ इति॥ इंदुश्चंद्रमाः पैपितृदैवत्येन
दत्रे मघायां हंसः सूर्यः करे हस्ते स्थितः। तिथिर्वैश्रवणी यात्रयोदशी॥ ॥नरसिंहपुराणे॥ हंसे हंस
स्थिते याऽतु माघासु कृष्णत्रयोदशी॥ तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु॥ ब्रह्मपुराणे॥ योगो
मघात्रयोदश्यां कुंजरछायसंज्ञकः। यावन्मघायां संस्थे च शशिन्यार्ककरस्थित इति॥ अयमर्थः
सूर्ये हस्तास्थिते चंद्राधिष्ठिता पित्र्ये मघाभित्रयोदश्यां योगो गजछायासंज्ञकः। स च भाद्रपदापरपक्षे
संभवति। विभाषा सेनासुराछाया इति। छायाशब्दस्य नपुंसकत्वं। हंसे हंसस्थिते याऽतु अमावा

स्याकरान्विता। सा ज्ञेया कुंजरच्छाया इति बौधायनोऽब्रवीत्॥ हंसः सूर्यः। हंसदेवत्यान्नक्षत्रमपि हंसः। क
रान्विता चेद्युक्तहस्तान्विता। सैंहिकेयो यदा पूर्वं ग्रसते पर्वसंधिषु। गजछाया तु सा प्रोक्ता तस्यां श्रा
द्धं प्रकल्पयेत्॥ इति॥ सिंहिकेयो राहुः पर्वसंधिषु अमावास्याप्रतिपदोः संधिषु॥ ॐ॥ अथ प्रकीर्णकालः
॥मत्स्यपुराणे॥ अतः परं प्रवक्ष्यामि विष्णुना यदुदीरितं। श्राद्धं साधारणं नाम भुक्तिमुक्तिफलप्रदं। अयने
विषुवे युग्मे मासान्ते वार्कसंक्रमे। अमावास्याष्टकायां च कृष्णपक्षे विशेषतः। आर्द्रामघारोहिणीषु द्र
व्यब्राह्मणसंगमे। गजछायाव्यतीपाते विष्टिवैधृतवासरे। वैशाख्यामुपरागेषु तथोत्सवमहालये।
ब्रह्मपुराणे। श्राद्धं देयमनुशंतीह मासि मास्युडुपक्षये। पौर्णमासे पितृश्राद्धं कर्तव्यं रुद्रगाचरे। नित्यश्रा
द्धं विधेयं च मनुष्यैरिह गीयते। वृद्धिश्राद्धं च कर्तव्यं जातकर्मादिके बुधैः। कन्यागते सवितरि दिनानि दश
पंच च। पार्वणेनेह विधिना श्राद्धं तत्र विधीयते॥ आह जातूकर्ण्यः। ग्रहोपरागे सुते च जाते पित्र्ये मघायाम
यनद्वये च। नित्यं च शंखे च तथैव पद्मे दत्तं भवेन्निष्कसहस्रतुल्यं। अत्र नित्यं दत्तमित्यत्र ये मन्यमाना ग्रहोप

रागादिषुश्राद्धादेर्नित्यतांब्रुवते।अथवानित्यमहरहर्यावज्जीवंपित्र्यमघायामिति।नाऽपदापरपक्षस्थितमघा
स्वित्यर्थः।शंखपद्मयोर्लक्षणमपिसएवाह।शंखेप्राकुरमावास्यांक्षीणसोमांद्विजोत्तमाः।अष्टकासुनवस्या
यैतत्रदत्तंतथाक्षयमिति।शंखस्त्वाह।यदाविष्टिर्व्यतीपातोभानुवारस्तथैवच।पद्मकंनामतत्प्रोक्तंमघा
नांतुचतुर्गुणमिति।विष्णुधर्मोत्तरे।आश्विनस्यापरंपक्षंप्रथमंकार्त्तिकस्यतु।यस्यस्तुश्राद्धंसदाकु
र्यात्सोऽश्वमेधफलंलभेत्।निद्रांत्यजतिसर्वात्मातस्मिन्कालेजनार्दनः।तत्रश्राद्धमथानंतंनात्रकार्यावि
चारणा।तथा।अक्षय्यंचतथाश्राद्धंविज्ञेयंराहुदर्शने।व्रीहिपाकेनकर्त्तव्यंयवपाकेनपार्थिव।नतवेद्योम
हाराजविनाश्राद्धंकथंचन।शातातपः।नवोदकेनवान्नेनगृहप्रच्छादनेतथा।पितरःस्पृहयंत्यन्नंवर्षासुचमघा का॰हि॰
सुच।तस्माद्दद्यात्सदोद्युक्तोविद्वत्सुब्राह्मणेषु।आहपितामहः।अमावास्याव्यतीपातापौर्णमास्यष्ट २२४
कासुच।विद्वाञ्छ्राद्धमकुर्वाणोनरकंप्रतिपद्यतइति॥॥इतिप्रकीर्णकल्पः॥अथकाम्याःश्राद्धकालाः।तत्रनवाम्नि
ययआह।कात्यायनः।अथकाम्यानिभवंति।स्त्रियोप्रतिरूपाःप्रतिपदिद्वितीयायांस्त्रीजन्म।अश्वास्तृतीया

33

यां।चतुर्थ्यांक्षुद्रपशवः।पुत्राःपंचम्यां।परिवारकाएकादश्यां।धनधान्यकुप्यंज्ञातिश्रैष्ठ्यं।हिरण्यादित्रयोदश्यां।पु
वानस्तत्रम्रियंते।शस्त्रैहतस्यचतुर्दश्यां।अमास्यायांसर्वमित्यमावास्यायांसर्वमिति।आपस्तंबः।सर्वेष्वेवा
परपक्षाहःसुक्रियमाणेपितॄन्प्रीणयंति।कर्त्तुःकालानियमात्फलविशेषः।प्रथमेऽहनिक्रियमाणेस्त्रीप्रा
यमपत्यंजायते।द्वितीयेस्तेनाः।तृतीयेब्रह्मवर्चस्विनः।चतुर्थेक्षुद्रपशुमान्।पंचमेपुमांसोबह्वपत्योनचापत्यः
प्रमीयते।षष्ठेश्राद्धशीलश्च।सप्तमेकृषिरष्टमेपुष्टिर्नवमेएकखुरादशमेव्यवहारऋद्धिरेकादशेकृष्णाय
सं।त्रपुसीसंद्वादशेपुमान्।त्रयोदशेबहुपुत्रोदर्शनीयापत्योयुवमारिणस्तुभवंति।चतुर्दशेआयुधऋद्धिः
पंचदशेपुष्टिःसततश्राद्धंकुर्वन्नाप्नोतीति।अधिकारेविष्णुरह।सुरूपाःस्त्रियःप्रतिपदि।कन्यावरानद्विती
यां।सर्वान्कामांस्तृतीयायां।चतुर्थ्यांश्रियं।पंचम्यांद्युतिविजयः।षष्ठ्यां।कृषिःसप्तम्यां।वाणिज्यमष्टम्यां।पशून्न
वम्यां।वाजिनोदशम्यां।पुत्रान्ब्रह्मवर्चस्विनस्त्वेकादश्यां।कनकरजतेद्वादश्यां।सौभाग्यंत्रयोदश्यां।सर्वान्
कामान्पंचदश्यां।शस्त्रहतानांश्राद्धकर्मणिचतुर्दशीशस्ता।श्राद्धंकुर्यादित्यधिकारे॥हारीतः॥पंचमी

पुत्रकामः। षष्ठीं धनकामः। सप्तमीं पशुकामः। अष्टमीं शस्त्रहतानामारोग्यकामो नवमीं। सेनाहता
आ त्रिजेतुकामो दशमीं। अन्नाद्यकाम एकादशीं। ऋद्धिकामो द्वादशीं। स्त्रीकामः त्रयोदशीं। पशुकामः
चतुर्दशीं द्युतिकामः। स्वस्तिकामो मावास्यायां सर्वकामः। पैठीनसिः। पंचम्यां पुत्रकामो यजेत्। ष
ष्ठ्यां पशुकामः। सप्तम्यां वृद्धिकामः। अष्टम्यामन्नाद्यकामो। नवम्यां ब्रह्मवर्चसकामो। दश
म्यां सर्वकाम। एकादशीं धनकामो। द्वादश्यां क्षेत्रकामः। त्रयोदशीं स्त्रीवरिष्ठो। चतुर्दश्यां श
स्त्रेण हतानां। सर्वकामो मावास्यायां॥ मनुः॥ कुर्वन्प्रतिपदि श्राद्धं सुरूपान् लभते सुतान्। कन्यकां
तु द्वितीयायां तृतीयायां तु दंतिनः। पशून्क्षुद्रांश्चतुर्थ्यां पंचम्यां शोभनान्सुतान्। षष्ठ्यां द्यूतं कृषिं
चापि सप्तम्यां लभते नरः। अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा। स्यान्नवम्यामेकखुरं दशम्यां द्वि
खुरं बहु। एकादश्यां तथा रूप्यं ब्रह्मवर्चस्विनः सुतान्। द्वादश्यां जातरूपं च रजतं कुप्यमेव च। ज्ञातिश्रै
ष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु सुप्रजाः। प्रीयंते पितरश्चास्य ये शस्त्रेण हता रणे। इत्यादीन्यपि निर्दिष्टान्वि

३४

पुलात्मनसः प्रियान्। श्राद्धदः पंचदश्यां तु सर्वान्कामान्समश्नुते। बदिनस्तावकान्॥ ब्रह्मपुराणम
मार्कंडेययोः॥ कन्यागते सवितरि दिनानि दश पंच च। पार्वणेनेह विधिना श्राद्धं तत्र विधीयते। प्रतिपद्
न लाभाय द्वितीया द्विपदप्रदा। वरार्थिनी तृतीया तु चतुर्थी शत्रुनाशिनी। श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पू
ज्यो भवेन्नरः। गणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमां। स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामतां
वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः। द्वादश्यां च प्रजालाभं प्राप्नोति पितृपूजकः। प्रजां मेधां
पशुं वृद्धिं स्वातंत्र्यं पुष्टिमुत्तमां। दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीं। अवाप्नोति न संदेहः श्रा
द्धं श्राद्धपरो नरः। युवानः पितरो यस्य मृताः शस्त्रेण वा हताः। तेन कार्यं चतुर्दश्यां तेषां तृप्तिमजी
जनः। श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः। सर्वान्कामानवाप्नोति स्वर्गं चानंत्यमश्नुते॥ विष्णुध
र्मोत्तरे॥ स्त्रियः सुरूपाश्च गृहे कन्याजन्म तथा धनं। सर्वान्कामान्पशूंश्चैव श्रियं द्यूतं जयं कृषिं वा
णिज्यं पशवश्चैव वाजिनश्च तथा सुतान्। सुवर्णरूप्ये सौभाग्यं प्राप्नोति श्राद्धदः क्रमात्। प्रतिपत्

न्यतिस्येतस्यावनाजंस्याक्षयोदयं॥चतुर्दश्यांतुयेनराःशस्त्रघातिताः॥श्राद्धंसदापंचदश्यांकुर्वन्कामान्
समग्रान्लभतेमनुष्यः॥तस्मात्प्रयत्नेननरैःकार्यंश्राद्धंसदापंचदश्यांपुत्राद्यैः॥विष्णुधर्मे॥कन्यागतेसवि
तरिहस्तर्क्षमीत्रया।साचयःपदरापुण्या॥वस्यानंदवर्द्धनी॥स्नानेदानेजपेहोमःपितृदेवाभिपूजने॥स
र्वंप्रीतिकरंस्याद्धिकृतंतस्यांत्रिलोचने॥विशेषतःकृतंश्राद्धंहोमश्चविधिवन्मुने॥तस्माच्छ्राद्धंप्रयत्नेनत
स्यांकुर्याद्विधिवद्द्विजः॥एकभक्तंतुपंचम्यांषष्ठ्यांनक्तंविदुर्बुधाः॥उपवासस्तुसप्तम्यामष्टम्यांपूजये
त्स्वयंपूजयित्वाशिवंतस्यांपितृश्राद्धंप्रकल्पयेत्॥कृत्वातुविधिवच्छ्राद्धंभुंजीतपितृसेवितं॥यस्तस्यां
कुरुतेश्राद्धंपूजयित्वात्रिलोचनं॥तस्यावर्षाणिदशास्तःपितरोदशपंचच॥इतिकाम्यतिथिनिर्णयः
॥छ॥ ॥अथनक्षत्राणि॥तत्रमनुः॥युक्षुकुर्वन्दिनर्क्षेषुसर्वान्कामान्समश्नुते॥अयुक्षुचापितृनर्च
न्प्रजांप्राप्नोतिपुष्कलां॥युक्षुसमेषु॥अयुक्षुविषमेषु॥युक्षुकुर्वन्दिनर्क्षेषुसर्वान्कामानवाप्नुयात्
गजच्छायांपितृनर्चन्प्रजाःप्राप्नोतिपुष्कलाः॥याज्ञवल्क्यः॥स्वर्गंह्यपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा॥

का॰हि॰
२२६

३५

सुतान्श्रैष्ठ्यंचसौभाग्यंसमृद्धिंमुख्यतांसुतान्॥प्रवृत्तचक्रतांचैववाणिज्यप्रभुतांतथा॥अरोगित्वं
यशोवीतशोकतांपरमांगतिं॥धनंविद्यांभिषक्सिद्धिंकुप्यंगामप्यजाविकं॥अश्वानायुश्चविधिवद्यः
श्राद्धंसंप्रयच्छति॥कृत्तिकादिभरण्यंतंसकामादाक्नयादिमान्॥आस्तिकःश्रद्दधानश्चव्यपेतमदमत्स
रं॥प्रवृत्तचक्रअप्रतिहताज्ञाशालित्वं॥विष्णुः॥स्वर्गंकृत्तिकासु॥~~आस्तिकःश्रद्धया~~अपत्यंरोहिणीषु॥
ब्रह्मवर्चसंसौम्ये॥रौद्रेसिद्धिः॥रौद्रंभुवं॥पुनर्वसौपुष्टिं॥पुष्येश्रियं॥सार्पेसर्वान्कामान्पैत्र्ये॥सौभाग्यंभा
ग्ये॥धनमार्यम्णे॥ज्ञातिश्रैष्ठ्यंहस्ते॥रूपवतःसुतांस्त्वाष्ट्रे॥वाणिज्यसिद्धिंस्वातौ॥कनकंविशाखासु॥मित्राणिमै
त्रे॥राज्यंशाक्रे॥कृषिंमूले॥समुद्रयात्रासिद्धिः॥आप्येसर्वान्कामान्वैश्वदेवे॥श्रैष्ठ्यमभिजिति॥सर्वान्कामा
न्श्रवणे॥बलंवासवे॥आरोग्यंवारुणे॥कुप्यद्रव्यमाजे॥गोरमाहिर्बुध्न्ये॥गाःपौष्णे॥तुरगानाश्विने॥जीवितंयाम्ये
सौम्यंमृगशिरसि॥रौद्रमार्द्रा॥सार्प्यमश्लेषा॥पित्र्यंमघा॥भाग्यंपूर्वाफाल्गुन्यः॥आर्यमणंउत्तराफाल्गुन्यः॥त्वाष्ट्रं
चित्रा॥मैत्रमनुराधा॥शाक्रंज्येष्ठा॥आप्यंपूर्वाषाढा॥वैश्वदेवंउत्तराषाढा॥वासवंधनिष्ठा॥वारुणंशतभिषक्

आजैकपदा । आहिर्बुध्न्य उत्तरा भद्रपदा पौष्णं रेवती ॥ आश्विनमश्विनी । याम्यं भरणी ॥ विष्णुधर्मोत्तरे ॥ स्व
र्गं चापत्यानि तथा ब्रह्मवर्चसमेव च । रौद्रेण कर्मणां सिद्धिं ध्रुवे पुष्टिं तथाश्रिये । सर्वान्कामांश्च सौम्ये नाग्न्येय
म्भे ज्ञातिप्रधानतां । रूपयुक्तांश्च तनयान्वाणिज्यं धनसंपदं । कनकं सुहृदो राज्यं सफलां च तथा कृषिं । समुद्भा
नस्नानं च सर्वान्कामांस्तथैव च । श्रैष्ठ्यं कामांस्तथा सर्वान्बलमारोग्यमेव च । कुप्यं द्रव्यं गृहं गावः तुरगांश्चैव जी
वितां । कृत्तिकादि भरण्यं तं क्रमादेतानाप्नुयान्नरः । एकैकस्मिन्क्रमात्कुर्वन् श्राद्धमाप्नोत्यसंशयं ॥ मार्कंडे
यपुराणे ॥ कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः । अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत् । रौद्रे शौर्य
मार्द्रासु चाप्नोति क्षेत्रादि च पुनर्वसौ । पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरान्सुतान् । मघासु स्वजनश्रेष्ठ्यं सौभा
ग्यं फाल्गुनीषु च । प्रदानशीलो भवति सापत्यश्चोत्तरासु वै । प्रयाति श्रेष्ठतां सत्सु हस्ते श्राद्धप्रदो नरः । रूपयुक्तांश्च
चित्रासु तथापत्यान्यवाप्नुयात् । वाणिज्यलाभं स्वातौ च विशाखा पुत्रकामदा । कुर्वतां चानुराधासु दद्याच्चक्रप्रव का॰ दि॰ २२१
र्तनं । आधिपत्यं च ज्येष्ठासु मूले चारोग्यमुत्तमं । आषाढासु यशः प्राप्तिः उत्तरासु विशोकता । श्रवणे तु

शुभान्लोकान्धनिष्ठासु धनं महत् । वेदवित्त्वं चाभिजिति भिषक्सिद्धिं च वारुणे । अजाविकं प्रौष्ठपदे विंदेद्भा
र्यां तथोत्तरे । रेवतीषु तथा कुप्यमश्विनीषु तुरंगमान् । श्राद्धं कुर्वंस्तथाप्नोति भरण्यामायुरुत्तमं । तस्मात्का
म्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित् ॥ ब्रह्मवैवर्ते ॥ यमस्तु यानि श्राद्धानि प्रोवाच शशबिंदवे । तानि वक्ष्य
शृणु काम्यानि नक्षत्रेषु पृथक्पृथक् । श्राद्धं करोति सततं तेन नरः । अग्निदारासु धीमान्यो जायते स गतज्वरः ।
अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां भवेत् । क्रूराणां कर्मणां सिद्धिमार्द्रायां श्राद्धमाचरेत् । क्षेत्र
भागी भवेत्पुत्री श्राद्धं कुर्वन्पुनर्वसौ । पुष्टिकामः पुनस्तिष्ये श्राद्धं कुर्वीत मानवः । आश्लेषासु पितॄनर्च
न्वीरान्पुत्रानवाप्नुयात् । श्रेष्ठो भवति ज्ञातीनां मघाश्राद्धं समाचरन् । फाल्गुनीषु पितॄनर्चन्सौभाग्यं
लभते नरः । प्रदानशीलः सापत्य उत्तरासु करोति यः । स सत्सु मुख्यो भवति हस्ते यस्तर्पयेत्पितॄन् । चि
त्रायां चैव यः कुर्यात्पश्येद्रूपवतः सुतान् । स्वातिषु चैव यः कुर्याद्वाणिज्याल्लाभमाप्नुयात् । पुत्रा
र्थी तु विशाखासु श्राद्धमाहितमानसः । अनुराधासु कुर्वाणो ध्रुवं चक्रं प्रवर्तयेत् । आधिपत्यं स

मैत्रे श्रैष्ठ्यं ज्येष्ठासु सततं तु यः। मूलवर्णो मनुष्यलोकेषु प्राप्नुयात्परमां गतिं। राज्यलाभं धनिष्ठासु प्राप्नुयाद्वि
पुलं धनं। श्राद्धं त्वभिजिति कुर्वन्वेदान्सांगानवाप्नुयात्। नक्षत्रे वारुणे कुर्वन्भैषज्ये सिद्धिमाप्नुया
त्। पूर्वप्रोष्ठपदे भक्तो विंदेच्छाजाविकं बहु। उत्तरास्वनतिक्रम्य विंदेद्गावः सहस्रशः। बहुकुप्यकृतं द्रव्यं
विंदेत्कुर्वंस्तु रेवतीं। अश्वानाश्वयुजे कुर्वन्भरण्यामायुरुत्तमं। इमं श्राद्धविधिं कुर्वन्नृशंसविंदुमेद
मिमां। कृत्स्नां स लभते सोऽकृष्टोऽलसश्च वर्षशतानि। कूर्म्मपुराणे॥ स्वर्गं च लभते कृत्वा कृत्तिकासु द्वि
जोत्तमः। अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्चसं। रौद्राणां कर्मणां सिद्धिमार्द्रायां शौर्यमेव च। पुनर्व
सौ क्षेत्रसिद्धिं पुष्ये पोषमवाप्नुयात्। सर्वान्कामांस्तथाऽऽसार्पे पित्र्ये सौभाग्यमेव च। अर्यम्णे च धनं
विंद्यात्फाल्गुन्यां पापनाशनं। ज्ञातिश्रैष्ठ्यं तथा हस्ते चित्रायां च बहून्सुतान्। वाणिज्यसिद्धिं स्वातौ तु विशा
खासु सुवर्णकं। मैत्रे बहूनि मित्राणि राज्यं शाक्रे तथैव च। मूले कृषिं लभेज्ज्ञानं सिद्धिमाप्ये समुद्रतः। स
र्वान्कामान्वैश्वदेवे श्रैष्ठ्यं तु श्रवणे पुनः। धनिष्ठायां तथा कामान्वारुणे च परं बलं। अजैकपादे कुप्यं

का॰ह॰
२२८

३१

च

स्याद्दाहिर्बुध्न्ये गृहं शुभं। रेवत्यां बहवो गावो अश्विन्यां तुरगास्तथा। याम्ये तु जीवितं यस्य यः श्राद्धं संप्रय
च्छति। अत्रान्यान्यपि ब्रह्मपुराणादिवचनानि वचनांतरेलक्षण्येपि सर्वेषां पूर्वोक्तानतिरिक्तानीति न लिख्यं
ते। ब्रह्मांडपुराणे मघासु कुर्वन्श्राद्धानि सर्वान्कामानवाप्नुयात्। प्रत्यक्षमर्चितास्तेन भवंति पितरः
सदा॥ ॥छ॥ इति काम्यानि नक्षत्रश्राद्धानि॥छ॥ ॥अथ वाराः। अत्र विष्णुः। सततमादित्येह्नि श्राद्धं कुर्वन्ना
रोग्यमाप्नोति। सौभाग्यं चांद्रे। समरविजयं कौजे। सर्वान्कामान्बौधे। विद्यामभीष्टां जैवे। जीवितं शाने
श्चरे। कौजे ह्निमंगलदिने। जीव बृहस्पतिदिने। विष्णुधर्म्मोत्तरे॥ अतः काम्यानि वक्ष्यामि श्राद्धानि तव पा
र्थिव। आरोग्यमर्क सौभाग्यं समरे विजयं तथा। सर्वान्कामांस्तथा विद्यां धनं जीवितमेव च। आदित्यादि
दिने ह्येवं श्राद्धं कुर्वन्सदा नरः। क्रमेणैतदवाप्नोति नात्र कार्या विचारणा। कूर्म्मपुराणे॥ आदित्यवारे त्वा
रोग्यं चांद्रे सौभाग्यमेव च। कुजे सर्वत्र विजयं सर्वान्कामान्बुधस्य तु। विद्यामभीष्टां तु गुरौ धनं वै भार्गवे
पुनः। शनैश्चरे लभेदायुरारोग्यं च सुदुर्लभं॥ भविष्यत्पुराणे॥ ब्रह्मोवाच॥ ये त्वादित्यदिने प्राहे श्राद्धं कु

वैतिमानवः।सप्तजन्मानि ते जाताः सर्वे भवे त्वविरोधिनः।पंचतारं भवेच्चात्र नक्षत्रं गोवृषध्वजः।वारस्तु देवदेव
स्य वासरः पुत्रदः स्मृतः।उपवासो भवेदत्र श्राद्धं कार्यं तथा भवेत्।प्राशने चापि पिंडस्य मध्यमस्य प्रकी
र्तितो।सोपवासस्ततो वै भक्त्या पूजयेच्चैव गोपतिं।धूपमाल्योपहारैस्तु दिव्यगंधसमन्वितैः।एवं पूज्य विव
स्वंतं तस्यैवापरतो निशि।भूमौ स्वपिति वै वीर जपंस्त्वेतां महामते।प्रातरुत्थाय यः स्नानं कृत्वा दत्वार्घमु
त्तमं।रक्तचंदनसंमिश्रैः करवीरैर्गणाधिप।प्रयुज्य प्रदक्षिणं भूतेशमनंतु त्रिलोचनं।।वीरं च पूजयित्वा च ततः
श्राद्धं प्रकल्पयेत्।पंचभिर्ब्राह्मणैर्देव दिव्यैर्भौमैश्च सुव्रत।मगसंज्ञैस्तात्र देवं ब्राह्मणैः परिकल्पयेत्।पित्र्
यांस्तु ब्राह्मणान् भौमान् प्रकल्प्यांधकसादनः।ज्ञयो देवं ततः श्राद्धं पार्वणं भास्करप्रियं।श्राद्धे च पय सः
माशेत्तु त्र्यस्यात् पिंडं तु मध्यमं।पुरतो देवदेवस्य स्थित्वा मंत्रेण सुव्रतः।स एष पिंडो देवेशयो भोक्तव्यः सर्व
दा।आश्नामि पुरतस्तस्य येन मे संततिर्भवेत्।अतो यं पुत्रदो वारो देवस्य परिकीर्तितः।एवमत्र सदा यस्तु
भास्करं पूजयेन्नरः।उपवासपरः श्राद्धे सपुत्रो लभते ध्रुवं धनधान्यं हिरण्यं च आरोग्यं सुखमुत्तमं।स्व

का०हि०
२२९

३८

यलोकं स यं प्राप्तः ततो राजा भवेन्नृषु।प्रत्रपा द्विजसंकाशाः।कांत्या जंबुकसंनिभः।वीर्येण गोपतेस्तुल्यो
गांभीर्ये कलशोद्भवः।अविरोधिनस्तु।अश्विनी रोहिण्य श्लेषा मघा हस्ताख्यानि चत्वारि वै नक्षत्राणि पं
च ताराणि।।श्रेष्ठो गोवृषः।।स ध्वजो यस्य।।स गोवृषध्वजः।।वृषव्याघ्रपुंगवः ऊंजराद्यो नाम्नि इंपवा
चिनासुराः पदे नरतर्पणादिवत् दर्शनात्।देवदेवः सूर्यः।उपवासोत्र शनैश्चरदिने श्राद्धमादिवी
त्यवारे एतच्च प्रातरुत्थायेत्यादिना स्पष्टेन व्यक्तीभविष्यति।मध्यमपिंडप्राशनमंत्र यजमानस्यै
व पत्नीयतो श्राद्धांतरेषु पत्न्यादि विहितत्वात् तत्कर्तृकमेव।अत्र तु दंपत्योः पुत्रकामयोः सहा
धिकाराधिकारोपाभिधानाच्च द्वयोरपि पिंडप्राशनमिति युक्तं दृश्यते।पुत्रकामकर्मांतरे द्वयो
रपि हविःशेषप्राशनं।।तद्यथा।।शतपथे।।क्षीरोदनं पाचयित्वा सर्पिष्मंतमश्नीयातामित्यादि।तथा।तत्रैव होमानंतरं कु
क्षौ दृष्टवप्राश्नाति।प्राश्यैतरस्याः प्रयच्छतीति।गोपतिः सूर्यः।सुवर्णादिप्रतिमादि भविष्यपुराणोक्तप्रकारेण वा
पूजनीयः।खखोल्का महाश्वेतात्मका षडक्षरः सूर्यमंत्रः।ॐ खखोल्काय नमः।इत्येव प्रसिद्धं।अर्घ्यदानमंत्रस्तु:

सूर्याग्निमुखोन्नं वास्थंदिलेकुर्यात्गृहजयित्वेति। पुनः हृजनोपदानात्सूर्योत्तरावगमाघहस्तेरादयः। पंचदे
वताभ्रेणवादिभिश्चतुर्थ्यैतैः स्वनामभिः पीठहज्याः। दिव्यगोभोजकाख्याब्राह्मणविशेषश्चेनोत्तरापथेप्रसि
द्धाः। तदन्यैश्शेमाः। अत्रैवेश्वेदेविकथ्यास्थानमगानुपश्यपि अस्थाने ब्राह्मणांतराण्युपवेशयेत्। एवमेत्रसदेति
वशिष्टफलत्सात्तार्थमावृत्तिकथनं। त्रयोऽर्काद्वहस्पदिजश्चंद्रमाः। कांतिस्तेजः। जंबुकोवरुणः। जंबुकोचैववरुणइ
ति। श्रुतेः। वरुणश्चादित्यविशेषः। वरुणोमाघमासेतपतीतिदर्शनात्। गोपतिः पशुपतिः शंभुरित्यर्थः। कलशोजाव
अगस्त्यः सचगंगानीरतरसमुद्रपानादतिगंगानीरतयाविवक्षितः। पद्मपुराणे। शुक्रांगारकपुत्रायाचतुर्थीजायतेसदा
श्रद्धयाश्राद्धकृद्भिःश्रेनप्रेतोजायतेमृतः। स्कंदपुराणे। अमायांयदिसोमःस्यात्सशम्यांचेद्दिवाकरः। चतुर्दश्यांचतु
र्थ्यांवावारश्चेन्मंगलोभवेत्। तदाश्राद्धंप्रकर्तव्यंपितॄणांतृप्तिमिच्छता। षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच।
नंदंतिपितरःसर्वेविमानवरमास्थिताः। तावंतमेवकालंतुश्राद्धकर्तुस्तथाफलं। इतिकाम्यावाराः॥ ॥अथका
म्याःप्रकीर्णकालाः॥ ॥तत्रविष्णुपुराणे। मासिमास्यसितेपक्षेपंचदश्यांनरेश्वर। तथाष्टकासुकुर्वीतकाम्या

३९

न्कालान्शृणुष्वमे। श्राद्धार्हमागतंद्रव्यंविशिष्टमथवाद्विजं। श्राद्धंकुर्वीतविज्ञायव्यतीपातेऽयनद्वये। विषुवेचापिसं
प्राप्तेग्रहणेशशिसूर्ययोः। समस्तेष्वेवभूपालराशिष्वर्केचगच्छति। जन्मर्क्षेग्रहपीडासुदुष्टस्वप्नावलोकने। इच्छाश्रा
द्धानिकुर्वीतनवसस्यागमेतथा॥ मार्कंडेयपुराणे॥ कार्यंश्राद्धममावास्यांमासिमास्युडुपक्षये। विशिष्टब्राह्मणप्रा
प्तौसूर्येंदुग्रहणायने। विषुवेरविसंक्रांतौव्यतीपातेचपुत्रक। श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने। जन्मर्क्षेग्र
हपीडासुश्राद्धंकुर्वीतचेच्छया। विष्णुरप्याह॥ संक्रांतिविषुवेचैवविशेषेणायनद्वये। व्यतीपातेचजन्मर्क्षेचंद्रसूर्यग्रहे
तथा। इत्येतान्श्राद्धकालांश्चकाम्यानाहप्रजापतिः। श्राद्धमेतेषुयद्दत्तंतदानंत्यायकल्पते॥ ब्रह्मवैवर्ते॥ अमा
वास्याप्रयत्नेनश्राद्धंकुर्याच्छुचिःसदा। सर्वान्कामानवाप्नोतिस्वर्गंचांतेसमश्नुते। घृतंदद्यादमावास्यांसोमस्य
प्यायनेमहत्। एवमप्यायितःसोमस्त्रीन्लोकान्धारयिष्यति। सिद्धचारणगंधर्वैरप्सरोभिःसहस्रशः। उपक्री
डद्भिर्विमानस्थैःपितृनक्षोदठव्रताः। स्तुवंतिदेवगंधर्वाःसिद्धसंघाश्चतेसदा। पितृनक्रस्त्वमावास्यांसर्वान्कामा
नवाप्नुयात्। पितृन्देवान्प्रजनन्नक्षायतोस्यामद्वयंफलं। तथा। पुष्टिंप्रजांस्मृतिंमेधांपुत्रानैश्वर्यमेवच॥

कुर्वाणः पूर्णिमास्यां तु सर्वं संपूर्णमश्नुते ॥ ब्रह्मपुराणे ॥ नांदीमुखानां प्रत्यब्दं कन्याराशिस्थिते रवौ । पूर्णमास्यां तु
कर्तव्यं । वराहवचने । यथा । भाद्रपदमासांतर्गते पक्ष एव न दिने कन्याराशौ रविसंक्रमणे जाते मासमध्यवर्तिन्यां
मास्यां नांदीमुखानां पितॄणां श्राद्धं कर्तव्यं । तच्चावश्यकं । प्रत्यब्दमिति वचनात् । नांदीमुखशब्देन चात्र त्रयः पिताम
हात्परे विवक्षिताः । यस्मादस्मिन्नेव पुराणवचनस्यानंतरमेवोक्तं । ये स्युः पितामहादूर्ध्वं ते स्युर्नांदीमुखास्त्विति ॥
प्रसन्नमुखसंज्ञास्तु मंगलाद्यायतः स्मृताः इति । अत्र पितामहशब्देन प्रपितामहो लक्षणीयः । उक्तं च ब्रह्मपुराणे ॥ पिता
पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः । तेभ्यः पूर्वे त्रयो ये तु नांदीमुखाः स्मृता
इति । अस्य नांदीमुखवचनस्य तत्पूर्णमासीनिमित्तकश्राद्धविधिनैकवाक्यतापन्नत्वात् श्राद्धांतरे नांदीमुखशब्देन । का॰दि॰
प्रपितामहात्परे त्रयो न ग्राह्याः । अपि तेषु नांदीमुखसंज्ञा किमर्था । अथ यथा वसवः पितरो ज्ञेया इत्यादौ वस्वादिश २३१
ब्दा वस्वाद्यात्मदृष्टिविधानार्था उच्यते । तेन्नायतो यत्र प्रसन्नमुखसंज्ञा इत्यादिना नंदनमुखयोगान्नांदीमुख
शब्दनिष्पत्तिरपि प्रेतेति दर्शितं । अतो नानेदं दृष्टुपदेशार्थं ॥ अथो कौडयायनीयो मासहोमे । मासहोमेग्निहोत्र

४०

त्रमिति । परशब्दः परत्र प्रयुज्यमानस्य ह्यग्नावेगमयमिकाग्निहोत्रधर्मातिदेशार्थः । तथात्र नांदीमुखशब्दोपि पु
त्रजन्मादिकालविहितप्रसिद्धनांदीमुखधर्मातिदेशार्थः । उक्तोपि परत्वात् । न ह्ययं परशब्दः परसादृश्यविवक्ष
या प्रयुक्तः । किंतु नंदनमुखत्वयोगादिति । अतोस्य प्रशंसैव प्रयोजनं मन्यामहे । हारीतः । अष्टकामाघस्य द
दया स्त्रीणां पात्रोपपत्तयः । पितॄणामतिरेकोयं मासिकार्थो ध्रुवः स्मृतः । ब्रह्मवैवर्तवायुपुराणयोः ॥ अथ का
लात् प्रवक्ष्यामि श्राद्धकर्मणि पूजितान् । काम्यनैमित्तिकाजस्रं श्राद्धकर्मविधायिभिः । पुत्राराधनमूलेभ्
स्य रिष्टकास्तिस्त एव च ॥ ॥ इति काम्याः प्रकीर्णकालाः ॥ छ ॥ ॥ अथ सामान्यतः श्राद्धतिथिनिर्णयः ॥ तत्र य
स्यां तिथौ श्राद्धं विहितं सा चेद्दिनद्वयसंबंधिनी यदा यस्मिन्दिने अपराह्णव्यापिनी तत्रैव श्राद्धमनुष्ठेयं ।
तथा च निगमः ॥ पूर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदाः । अपराह्णिकास्तथा ज्ञेयाः पित्र्ये तु शुभावहाः ।
पूर्वाह्णे दैवकार्याणि मनुष्याणां तु मध्यमे । पितॄणामपराह्णे तु कार्याण्येतानि यत्नतः । तदा तु दिनद्वयेप्यपरा
ह्णव्यापिनी तदा पूर्वैव ग्राह्या ॥ तथा चाह मनुः ॥ यस्यामस्तं रविर्याति पितरस्तामुपासते । तिथिस्तेभ्योपि ते

दत्ता अपराह्णे स्वयं तु वा यस्याः अपराह्णसंबंधे सति अस्तमयानुवृत्तिः सा पितृकार्ये प्रशस्ता। न त्वस्तमय
मात्रे संबंधे इत्यर्थः॥ तथा च हारीतः॥ अपराह्णः पितॄणां तु या पराह्णानुयायिनी। सा ग्राह्या पितृकार्येषु न पूर्वा स्वानुया
यिनी॥ यदा तूभयदिनद्वयेऽप्यपराह्णव्यापिनी न लभ्यते। तदा पूर्वैव। तथा च वृद्धयाज्ञवल्क्यः॥ देवकार्ये तिथि
र्ज्ञेया यस्यामभ्युदितो रविः॥ पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः। शिवरहस्यसौरपुराणयोः॥ प्रातः प्रातरु
पोष्या सा तिथिर्दैवे फलेप्सुभिः। तन्मूले पितृतृप्त्यर्थं पैत्रे चोक्तं महर्षिभिः॥ नारदीयपुराणेऽपि॥ तिथेः प्राते
मुहूर्तैकं ह्युपोष्यं कवयो विदुः। पित्र्यं मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः। पित्र्यस्तमयवेलायां स्पृश
न्न पूर्वा निगद्यते। सा तत्रोदयिकी ग्राह्या दैवे स्फुदयकी तिथिः॥ गोभिलोऽपि॥ सायाह्नव्यापिनी या तु पार्वणे का॰नि॰ २३२
सा उदाहृता। सापि मुहूर्तत्रयान्विता वास्तमयसंबंधिनी ग्राह्या। तथा च बौधायनः॥ उदिते दैवतं भानौ पित्र्यं
चास्तमिते रवौ। द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः। मनुः॥ यस्यामस्तं रवि याति पितरस्तामुपासते। सापि
तृभ्यो यतो दत्ता अपराह्णे स्वयं तु वेति। अपराह्णव्यापिन्येवास्तमयसंबंधिनी ग्राह्या। न त — — न्येति वचनात्त्र

५

तायते। अतो वाचनिककालत्वाभावाद्ग्राह्यमेव न कर्तव्यं। अनतिकारात्। सत्यं। किं तु वस्तुतस्त्रिमुहूर्तगाया
अपि तिथ्यादि शुभं वेत्। यावान् ह्रासो वृद्धिः परेहनि। तदानुग्राह्याः सपूर्वे घस्रदोषोऽपि स्वकर्मणि॥ इति
वचनात्। अधिककालकल्पना अपराह्णेऽपि संभवात्। एतद्दिनद्वये साम्यवृद्धौ तु परैव ग्राह्या॥ तथा च व्या
घ्रः॥ खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी। एतद्वाक्य
विषयविवेकस्तु तिथिविषयश्राद्धे तु। शुक्लपक्षे पूर्वाह्णव्यापिनी तिथिर्ग्राह्या। कृष्णपक्षे अपराह्णव्या
पिनी तिथिर्ग्राह्या। शुक्ले तु पाकृष्णे युगादौ कवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके
इत्यादिवचनेभ्यः पूर्वापराह्णिकौ कालौ। आवर्तनात्पूर्वाह्णोऽपराह्णस्त्वपरः इति दर्शितो। अह्नः पूर्वा
परौ भागौ निर्णयः। शेषं पूर्ववत्। यदा तु भिन्नेऽपि तुल्यकालैकदेशं व्याप्नुतस्तदा वृद्धौ ह्रासे साम्ये पुनः परैव ग्रा
ह्या। न पुनः वृद्धौ चैवोत्तरा ह्रासे साम्ये तु पूर्वा तु कर्तव्येत्यादिवचनस्यमतादतिथिविषयत्वात्॥ प्रथमातिक्र
मकारणसद्भावाद्यो यस्य विहितः कालः कर्मणस्तदुपक्रमे विद्यमानो नवेदं गं नाङ्गितोपक्रमेणैवेति वच

नात्। एकोद्दिष्टादिष्टं श्राद्धं तु पुनर्मध्याह्नव्यापिनी ग्राह्या। तथा च वृद्धगौतमः॥ मध्याह्नव्यापिनी या स्यात्सैकोद्दि
ष्टा तिथिर्भवेत्। बौधायनोपि मध्याह्नव्यापिनी या तु तिथिः। पूर्वा परापि वा तस्यां पितृभ्यो दातव्यं। ह्रासवृद्धी
न कारणं॥ तथा हारीतः॥ आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमः। पार्वणं चापराह्णे तु तिथिवृद्धिनिमित्तकं। दैवि
कश्राद्धे तु पूर्वाह्णव्यापिनी तिथिर्ग्राह्या॥ कर्मणो यस्य यः कालः इति वचनात्। तस्य च पूर्वाह्णे विधानात्॥ तथा च म
नुः। पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं। दैविकश्राद्धलक्षणं पार
स्करोक्तं। ग्रहादेवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते। तन्नित्यश्राद्धवत्कुर्यात्। द्वादश्यादिषु यत्नतः इति निर्णयः॥ का॰नि॰
शेषं पूर्ववत्॥ यदापि तिथिर्वृद्धिवशादुभे अपि समग्रकर्मकालं व्याप्नुतः। क्षयवशाद्वा कर्मकालं न स्पृशतस्त
दा तत्रैव प्रायो ह्रिमुहूर्त्ता त्रिरह्नो वा सा तिथिर्हव्यकव्ययोः। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। उपवासव्रतादी २३३
नां घटिकैकापि दृश्यते। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृकी इति वचनात्। न च स्मादेव वचनाद्यदापि पूर्वाह्णं प्राप्नो
ति। उदयात्पूर्वयाद्विमुहूर्त्तव्यापिनी पूर्वाह्णं व्याप्नोति। तदा पक्षांतरेवकस्मान्न गृह्यते। कर्मणो यस्येत्यादौ सामान्यशा

४२

स्त्रत्वादित्युच्यते। सत्यं। यत्रोभयदिनेपि कर्मकालव्यापिनी तिथिः। कर्मकालं न स्पृशति वा। तत्र का तिथिर्ग्राह्येति संदेहे
वचनाकांक्षायां सामान्यशास्त्राद्विशेषः॥ शास्त्रस्य शीघ्रं तत्तत्तु पेक्षा तिथिर्गृह्यते। अत्र तु नैकस्मिन्नेव दिने वि
हितकर्मकाले विहितकर्मतिथिसत्त्वे का तिथिर्ग्राह्येति संदेहाभावान्निर्णयवचनानवकाशः॥ इति सामान्यश्राद्ध
कालनिर्णयः॥ छ॥ अथ प्रेतश्राद्धानां कालाः॥ तत्र तावन्नवसंज्ञकानां श्राद्धानां तत्र चांतर्दशाहं क्रियमाणानां न
वश्राद्धसंज्ञां निर्देशाय आश्वलायनो दशाहपर्यंतं नवश्राद्धकालं मन्यते। नवश्राद्धं दशाहानि नवमिश्रं तु षड्ऋतानि
ति। एषां तु सहसंख्यादेशकालविनागमेकादशादिकस्य च नवश्राद्धसंज्ञकत्वमाह॥ नागरखंडे॥ नवयज्ञेन्नणं सं
चयनस्थापितानि विश्रुणु सं घृतो। यत्र स्थाने भवेन्मृत्युस्तत्र पिंडकस्य येत्। एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारि
तः। ततः संचयनस्थाने तृतीयं श्राद्धमुच्यते। पंचमे सप्तमे तद्वद्दष्टमे नवमे तथा। दशमे कादशे चैव नवश्राद्धानि ता
नि वै। तारण्या मसंप्राप्ते प्रेतस्त्वर्गमवाप्नुयात्। ब्रह्मपुराणे तु तायोद्दनिकर्षंवं प्रेतदाहान्नवेद्धिनाः। सूतकांते गृ
हे श्राद्धं मे कोद्दिष्टं प्रवक्ष्यते। आश्वलायनः। चतुर्थे पंचमे चैव नवमैकादशे तथा। यदत्र दीयते जंतोस्तान्नवश्राद्धमु

यतो व्यासः। प्रथमे सप्तमे चैव नवमैकादशेऽहनि। यदन्नं दीयते जंतोस्तन्नवश्राद्धमुच्यते॥ आह हारीतः।
आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशे तथा। कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। आद्यं नवापरं नाम
सः। सप्तः शौचेऽप्यशुद्धत्वे प्रेतस्यैकादशेऽहनि। सएव दिवसस्तस्य श्राद्धशय्यासनादिषु॥ कूर्म्मपुराणे।
प्रेताय च गृहद्वारि चतुर्थे भोजयेद्द्विजान्। द्वितीयेऽहनि कर्त्तव्यं क्षुरकर्म्म सबांधवैः। चतुर्थे बांधवैः सर्वैरस्थ्नां सं-
चयनं भवेत्। पूर्वोच्छिष्टान्प्रभुंजीत युग्मांस्तु श्रद्धया शुचीन्। पंचमे नवमे चैव तथैवैकादशेऽहनि। युग्मांस्तु भो-
जयेद्विप्रान्नवश्राद्धं तु तद्विदुः। ब्रह्मपुराणे। चतुर्थे ब्राह्मणानां च पंचमेऽहनि भूभृतां। नवमे वैश्यजातीनां शू-
द्राणां दशमात्परे। अत्रिः। प्रेतार्थं संस्कृतं कांते तु ब्राह्मणान्भोजयेद्यतः। नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि॥ का॰ह॰
एवं च सत्येकादशादिकान्नवश्राद्धाद्दादशे चांते विधीयमाने ब्राह्मणभोजनकर्म्मांतरमिति गम्यते॥ बृहस्पतिः॥ २३४
चतुर्थेऽहनि विप्रेभ्यो देयमन्नं हि बांधवैः। गावः स्वर्णं विशेच्च प्रेतमुद्दिश्य शक्तितः। चतुर्थेऽहनि संचयादहनीत्यर्थः॥
यदिष्टं जीवतश्चासीत्तद्द्रव्यस्य यत्नतः। तस्य प्रेतस्य जीवतो यत्किंचिदन्नाष्टमासीत्तद्दद्यादित्यर्थः॥ ॥इति नवश्राद्ध

५

कालाः॥ छ॥ अथ षोडशश्राद्धानीत्येवं प्रसिद्धानां प्रेतश्राद्धानां कालाः॥ तत्र ब्रह्मपुराणे॥ नृणां तु त्यक्तदेहा-
नां पूर्वं श्राद्धानि षोडश। चतुर्थे पंचमे चैव नवमैकादशे तथा। ततो द्वादशभिर्मासैः श्राद्धं द्वादशसंख्य-
या। कर्त्तव्या शक्तितस्तेषां तत्र विप्रांश्च तर्प्पयेत्। जातूकर्ण्यः। द्वादश प्रतिमावास्यानि आद्यं षाण्मासि-
के तथा। सपिंडीकरणं चैव इत्येतच्छ्राद्धषोडश। षाण्मासिके इत्यनेन विहितयोः श्राद्धयोर्निरूपणार्थ-
माह। एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः। न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तथा। एके-
नाह्ना त्रिभिर्वापि यदा षण्मासा न्यूनाः स्युः। संवत्सरश्च तदा षाण्मासादिके श्राद्धे कार्ये इत्यर्थः॥ भविष्यपुराणे
॥ अस्थिसंचयने श्राद्धं त्रिपक्षे मासिकानि च। रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोडश। रिक्तयोस्तिथ्योरि-
त्येकेनाह्ना न्यूनेऽपि षष्ठे द्वादशे च मासि स्यादिति न्यायात्। तत्पूर्वाणि मासिकादीन्यपकृष्य तदा सपिंडीकरणं कर्णं कर्त्त-
व्यं॥ वृद्धवशिष्ठोप्याह॥ श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिंडनं। तद्दत्ते तु कृते प्रेतः पितृत्वेन प्रपद्यते। अपकर्षप-
क्ष एवतत्। अपकर्षस्तु क्रमविधानादेव सिद्धः। अत एव शाट्यायनिः। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा। अप-

ष्णपक्षकर्वीत कुर्वन्नोदङ्मुखो द्विजः। यत्तु लौगाक्षिवचनं यस्य संवत्सरादर्वाक्सपिंडीकरणं भवेत्। मासिकं चो
दकुंभं च देयं तस्यापि वत्सरं। यत्तु तद्दंतापकर्षन्यायेन कृतेऽपि मासिकेषु वस्तु पुनः कुर्यादिति। कल्पसूत्रकारवच
नोक्तं। पुनरनुष्ठानविषयत्वेन व्याख्येयं। अपकृष्येत्यनुवृत्तावाहोशनाः। वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि स्व
रेत्। अश्राद्धी नरके घोरे पितृस्थः सह पच्यते। अनुपस्थितायां वृद्धौ यः प्रेतश्राद्धान्यपकर्षेदित्यर्थः। वृद्धिश्राद्धमंत
रापकर्षोयं समर्थविषयः। असमर्थविषये तु। वृद्धिश्राद्धं प्रत्युपस्थाने विनाप्यपकर्षमपकृष्यमाणस्य च कालविक
ल्पानाह गोभिलः। ऊर्ध्वं संवत्सरे षण्मासे त्रिपक्षे वा यदहर्वा वृद्धिरापद्यतेति। अत्र केचित्पूर्वसंवत्सरे यदहर्वा वृद्धि
रापद्यतेत्येतयोः पक्षयोरनग्निकैकविषयत्वं। षण्मासे त्रिपक्षे रेत्येतयोस्तु साग्निकैकविषयमिति। व्यवस्थामन्यते।
तन्नावयंति चात्र पैठीनसिवचनं। त्रिपक्षेऽग्निमतः कालो वृद्धौ चाप्यर्द्धकर्मसु। सपिंडीकरणं कुर्यात्पूर्णे संवत्सरे पि
वा। इत्यग्निमत्सपिंडीकरणकालप्रकरणे वक्ष्यमाणनिबंधनान्युपन्यस्यति। अत्रेदं वक्तव्यं। यद्यग्निमद्विशेष
णवता त्रिपक्षादिपक्षाः संति। संतु ते तस्य संवत्सरांते कर्त्तुं समर्थस्यापि मुख्यकल्पाः। अनग्निकस्य च सामर्थ्येपु

ष्णाः प्रकृतगोभिलवचनोक्तसंवत्सरपक्षेणैकवाक्यतां गताः संतः संत्वनुकल्पास्तु विंशतिमते। सपिंडीकरणं चाद्ये
संपूर्णेऽब्दे यदि वा। द्वादशाहे तु केषांचिन्मतं चैकादशे तथा॥ ॥छ॥ इत्यनग्निसपिंडीकरणकालः॥ ॥अथा
साग्निकसपिंडीकरणकालाः॥ तत्राह लघुहारीतः॥ अनग्निको यदा वीर भवेत्कुर्यात्तदा गृही। प्रेतेऽब्दे दग्निमां
स्तु स्यात्त्रिपक्षे वै सपिंडनं। अत्र गृही श्राद्धकर्त्ता यद्याहवनीयरहितः प्रेतश्चाहवनीयवान्भवेत्। तदा स कर्त्ता
तस्य प्रेतस्य मृताहदिवसादारभ्य पक्षत्रये पूर्णे सपिंडीकरणं कुर्यात्। तथा यजमानोऽग्निमान्नायजप्रे
तश्चानग्निमान्भवेत्। द्वादशाहे भवेत्कार्यं सपिंडीकरणं सुतैः। अत्र मृताहादारभ्य द्वादशे दिने इति वेदितव्यं॥
आह कात्यायनः॥ एकादशाहं निर्वर्त्यपूर्वर्त्यपूर्वं दर्शाद्यथाविधि। प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडतां।
अस्याभिप्रायः। अग्निमता ह्यमावास्यायां पिंडपितृयज्ञः पिंडान्वाहार्यकं कर्त्तव्यं। तथा प्रमीतमातापितृकस्य
सपत्नीकपित्रादिदेवत्यं नवकृत्तसपिंडीकरणयोस्तयोर्दर्शश्राद्धादौ देवतात्वमुपपद्यते। तस्य सपिंडीकरणो
त्तरकालिकत्वस्मरणात्॥ अतः पिंडपितृयज्ञश्राद्धयोर्लोपो मा भूदिति। मत्वाग्निमान्विप्र एकादशाहे कर्त्तव्यं॥

प्रेतकार्ये निवृत्ते स्यदर्शात्प्रागेव यस्मिन्कस्मिन्नप्यहनि मातापित्रोः सपिंडीकरणं कुर्यादिति॥ अत एवाह प्रजापतिः॥
नासपिंडाग्निमान्पुत्रः पितृयज्ञं समाचरेत्। न पार्वणं नाभ्युदयं कुर्वन्नश्नुते फलमिति॥ विप्रग्रहणमुपलक्षणं॥
क्षत्रियादिष्वपि न्यायस्य तुल्यत्वात्। पक्षांतरमाह हारीतः। या तु पूर्वममावास्या मृताहाद्दशमी भवेत्। सपिं
डीकरणं तस्यां कुर्यादेवं सुताग्निमान्। मृताहाद्दारभ्य यद्दशममहर्भवति तस्मात्परा याममावास्या यां तस्यामित्य
र्थः। अत एवाह जाबालिः॥ सपिंडीकरणं कुर्यात्पूर्वेद्युर्दर्शेऽग्निमान्सुतः। परतो दशरात्रस्य पूर्वेद्युस्तु तथापरः॥
मृताहाद्दारभ्य दशरात्रे तस्मात्परतो यः प्रथमो दर्शो भवेत्। तस्मिन्नहनि अग्निमान्सुतः पित्रोः सपिंडीक
रणं कुर्यादित्यर्थः। दशरात्रग्रहणमाशौचकालोपलक्षणार्थं। तदेवं सति साग्निकस्य त्रयः सपिंडीकरण का॰ हि॰ २३६
कालाउक्ता भवंति। द्वादशाहः॥ द्वादशात्परकालीना या अमावास्यायाः पूर्वं किमप्येकमहः। दशाहात्परम
मावा चेति॥ ॥इति साग्निकसपिंडीकरणकालाः॥ इति त्रिवर्णिनां॥ ॥अथ शूद्रस्य सपिंडीकरणकालाः॥
तत्र सपिंकरणं कर्तव्यमित्यनुवृत्तौ॥ विष्णुः॥ मंत्रवर्ज्जं हि शूद्राणां द्वादशाह इत्यर्थः। तथा च पैठीनसिः॥ षण्मा

सिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते। मासिकानि स्वकीये तु दिवसे द्वादशेऽपि च। तथा। सपिंडीकरणादर्वाक्
कुर्यात् श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ ब्रह्मपुराणे॥ द्वादशेऽहनि मासे च त्रि
पक्षे च ततः परं। मासि मासि तु कर्तव्यं यावत्संवत्सरं द्विजाः। ततः परतरं कार्यं सपिंडीकरणं क्रमात्। कृते
सपिंडीकरणे पार्वणं प्रोच्यते पुनः। ततः प्रभृति निर्मुक्तः प्रेतत्वात्पितृतां गतः। व्याघ्रपादः॥ एकादशे चतु
र्थे च मासि मासि च वत्सरं। प्रतिसंवत्सरं चैवमेकोद्दिष्टं मृताहनि। अग्निमत्प्रेतश्राद्धे विशेषमाह॥ कात्याय
नः॥ श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि। ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा। त्रिपक्षकाद्यूर्ध्वा
नि ध्रुवाणि। अत एव जातूकर्ण्यः॥ ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत्। अधस्तु कार्यं दाहादि
दितागेहे द्विजन्मनः। हारीतस्य। अथ विषये मासिनां कालविकल्पानाह। मासि मासि मुख्यं श्राद्धं अपयांश
क्तप्रति। द्वादशाहे पवान्ते ज्या एकादे द्वादशेऽपि चेति। अत्रोपरितनप्रकरणे च द्वावुपस्थितायां सपिंडीकर
णापकर्षणं वक्ष्यते। तन्निबंधने तु मासिकानामपकर्षं पुनरावृत्तिं च तत्रैव वक्ष्यामः॥ अत्र च मासिकानि मासे

पक्रम एव कर्तव्यानि॥ तथाहि॥ मासस्संबंधि मासिकं॥ माससंबंधस्य मासांतर्गतदिनसंबंधिनाप्युपपद्यते॥
एवं च प्रथमातिक्रमे कारणाभावान्मासोपक्रम एव कर्तव्यता निश्चीयते। एवं च प्रथममासिकोनमासिकद्वि
तीयमासित्रैपक्षिकतृतीयचतुर्थपंचमषण्मासिकसप्तमाष्टमनवमदशमैकादशमासिकोनाब्दिकाब्दि
कानि षोडशश्राद्धानि क्रमेण स्यादिति॥ कल्पस्तु विहितक्रमोप्युपपद्यते॥ अन्यथासन्नस्यात्॥ षाण्मासि
कस्योनषाण्मासिकस्योत्तरकालत्वात्॥ एवमन्यत्रापि॥ यत्तु ततो द्वादशभिर्मासैः श्राद्धानि दशसंख्याप्रति
वचनान्मासांते मासिकं कार्यमित्युक्तं। तद्विचारासहत्वादुपेक्षणीयं। तस्मादाचारानुगुण्याच्च मासोपक्रम
एव मासिकानीति सिद्धं॥ ॥इति षोडशश्राद्धानीत्येवं प्रसिद्धानां कालः॥ ॥छ॥ ॥अथ सपिंडीकरणकालः॥ का०नि०
तत्र यथाकालं द्वादशसु मासिकेष्वनुष्ठितेषु पूर्णे संवत्सरे तद्दिने मोत्सर्गिकोनग्निकसपिंडीकरणस्य २३१
कालः॥ तथा च मार्कंडेयपुराणे॥ मासिकानि निश्राद्धान्यकानि दिते॥ अथ संवत्सरे पूर्णे यथावत्क्रिय
ते नरैः॥ सपिंडीकरणं सम्यक्तत्रापि विधिरुच्यते। अस्य च कालस्यानग्निककर्तृकानाग्निदैवत्यसपिंडीक

रणं गर्वे नैमित्तिकं च कालांतरमुक्तं॥ भविष्यपुराणे॥ सपिंडत्वं विधातव्यं पितुर्मातुश्च धर्मतः॥ पूर्णे संवत्स
रे कुर्याद्वृद्धिर्वा यदहर्भवेत्॥ वृद्धिश्चोत्सर्गमौंजीविवाहादिरूपो ऽभ्युदयः। उपलक्षणं चैतत्। नांदीश्राद्धनिमित्त
त्वतस्यैतस्य श्राद्धाध्यायाध्ययनाद्युपसंप्राप्तावित्यशानावचनेन कर्तुर्नांदीमुखमिति। शाट्यायनिवचनेन च स्प
ष्टीभविष्यतीति सैषा यस्मिन्दिने वृद्धिरापद्यते। ततः प्रागेवापकृष्य सपिंडीकरणं कृत्वा तदंगत्वेन नांदीमुखसं
ज्ञितं श्राद्धं कुर्यादित्यर्थः। अनेन प्रवृत्ताधिकारस्यापरिसमापितप्रेतश्राद्धस्य चोत्सर्गमौंजीविवाहाधानादौ तदंग
त्वेन नांदीश्राद्धेनाधिकारोपि दर्शितः॥ आह लघुहारीतः। भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा। सहपिं
डक्रियां कृत्वा कुर्यादभ्युदयं ततः॥ नागरखंडे॥ ततः सपिंडीकरणं वत्सरादर्वाक्ततः॥ स्मृतौ॥ वृद्धिरागामिनी चेत्स्या
त्तदर्वागपि कारयेत्। आधानांगत्वतानांदीश्राद्धात्प्रागपि वत्सरात्॥ कर्षमनिषेत्याहोशनाः॥ पिंडः सपिंडी
करणं वा पिके मृत वत्सरे। आनीधानाद्युपसंप्राप्तावेतस्मागपि वत्सरात्। तत्र चापकृष्यमाणे सपिंडीकरणे तदंतम
पकर्षेणापेहनिकार्यमिति। अमावास्याश्राद्धकारिश्रुद्धविषयमेतदितिवृद्धाः। वचनबलादाशौचमध्य एव श्राद्धं

णीकरणं॥ ॥इति शूद्रस्य सपिंडीकरणकालः॥ ॥अथ सांवत्सरिककालनिर्णयः॥ तत्र तावत् क्षयाहनिर्ण
यः॥ ब्रह्मपुराणे॥ प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतेऽहनि॥ पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव
हि॥ मात्रादीनां श्राद्धं कार्यमित्यनेनार्थात्पुत्रादीनां कर्तृत्वमुक्तं॥ एतच्चाधिकारमात्रोपलक्षणार्थं भ्रातुरि
त्यत्रापुत्रस्येत्यनुषंजनीयं॥ ज्येष्ठस्येत्यनेन कनिष्ठस्य भ्रातुर्नावश्यकं सांवत्सरिकमिति दर्शितं॥ तथा चानपुत्र
स्य पितादयस्तथानुजस्य तथाग्रजः॥ इति॥ नियताधिकारनिराकरणं स्नेहादिना च नियतेनाधिकारेण पुत्रस्या
कनिष्ठस्यापि सांवत्सरिकं कर्तव्यमेव॥ तथा चोक्तं॥ अपि स्नेहेन कुर्यात्तं सपिंडीकरणं विना॥ इति॥ प्रभासखंडेऽपि॥ मृ
ताहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात्॥ मातुश्चैव वरारोहे वत्सरांते मृताहनि॥ नाहं तस्य महादेवि पूजां गृह्णामि
नो हरिः॥ भविष्यत्पुराणे॥ सर्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं मतं॥ क्रियते यत् खगश्रेष्ठ मृतेऽहनि बुधैः सदा॥ मृतेऽहनि पितु
र्यस्तु न कुर्याच्छ्राद्धमादरात्॥ मातुश्च खगशार्दूल वत्सरांते मृतेऽहनि॥ नाहं तस्य खगश्रेष्ठ पूजां गृह्णामि नो हरः॥ न ब्र
ह्मा न च वै रुद्रो न चान्ये देवतागणाः॥ तस्माद्यत्नेन कर्तव्यं वर्षे वर्षे मृतेऽहनि॥ नरेण खगशार्दूल भोजकेन विशेषतः॥

भोजको यस्तु वै श्राद्धं न करोति खगेश्वर॥ मातापित्रोः सततं वर्षे वर्षे मृतेऽहनि॥ स याति नरकं घोरं तामिस्रं नाम ना
नामतः॥ ततो भवति दुष्टात्मा नगरे शूकरः खग॥ अत्र मृताहशब्देन मरणदिवर्तिनी तिथिर्विवक्षिता॥ संवत्सरांते
मुख्यमृताहस्यासंभवात्॥ न हि तान्येवाहानि परिवर्तंते॥ न ह्यत्र प्रतिस्विकं नामास्ति किंचिद्वा॥ अतो यत्र क्वच
नापि सांवत्सरिकं प्राप्नुयात्॥ संवत्सरांतिकमहर्गणेनेति चेत्॥ न मृताहग्रहणानर्थक्यापत्तेः॥ अतो मरण
दिवर्तिनी तिथिर्विवक्षिता॥ अहर्ग्रहणं रात्रेरप्युपलक्षणार्थं॥ तेन रात्रिमृतस्यापि सा तिथिर्लभ्यते॥ एवं च संव
त्सरांते मृताहसंबंधिन्यां तिथौ सांवत्सरिकं कर्तव्यमिति लभ्यते॥ अत्र चायं तिथिं समनुप्राप्य उदयं याति
भास्करः॥ सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु॥ इति देवलादिवचनानुसाराद्यथा कर्मकाले ह्यवि
द्यमानाया अपि तिथेः संपूर्णत्वकल्पनया ग्रहणं॥ तथा मृताहवर्तिन्यास्तिथेर्मरणसंबंधितया ग्रहणं॥ किं
तु मरणकालिक्या एव॥ अतः सांवत्सरिके मृताहशब्देनोक्ता मरणकालिक्येव तिथिर्वेदितव्या॥ तथा च नार
दीयपुराणे॥ वसिष्ठः॥ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता॥ पित्र्ये स्तमयवेलायां स्पृष्टा पूर्णा निग

घते। तात्कालिकी। यस्मिन्काले उपवासादिव्रतपारणं वा तात्कालिक्या व तयोस्तिथिः। न पुनरेतत्काल
वर्तिनी प्रातरादिषु त्रिमुहूर्तादिकैर्मानापि। पित्र्ये सांवत्सरीकादावस्तमयवेलायामहरं तस्थापि मरण
कालिकी तिथिः। संग्रहणेनिगद्यते॥ एतदुक्तं भवति। मरणकालिक्यां तिथौ सांवत्सरीके कर्तव्ये त्रागेयदिसा
स्तमयावेलायामपि दिनांते स्ति। तदसाकल्पपापराह्णयोरस्तीति भवा तदुपलक्षितएव दिवसे कृतपा
दिषु श्राद्धं कर्तव्यमिति। अथवा मृताहरदाहेनोपलक्षणत्वयविशिष्टमहोरात्रमभिप्रेतं। तदाह व्या
सः। मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियते हनि। प्रत्यब्दं तु तथा भूतं क्षयाहं तस्य तं विदुरिति॥
अथ मृतमस्यूपलक्षणत्वयामिश्रायं। अत्र च सांवत्सरीकादिपितृकार्ये चांद्रस्यैव मासस्य स्य ग्रहणमाह। व्यासः। वि का०दि०
वाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च मासश्चांद्रमसः स्मृतः। लघुहारीतः। च २३९
क्रवत्परिवर्तेत सूर्यः कालवशाद्यतः। अतः सांवत्सरं श्राद्धं कर्तव्यं मासि चिह्नितं। मासचिह्नितो मासचिह्नं
तु कर्तव्यं पौषमाघाद्यमेव हि। यतस्तत्र विधानेन मासः स परिकीर्तितः। पौषादिसंज्ञा चांद्रस्यैव। तथाहि पुष्पेण यु

५८

क्तं यत्र पस्यां पौर्णमास्यां पौषी सा यस्मिन्मासे स पौषमासः। तथाह पाणिनिः। नक्षत्रेण युक्तः कालः। सास्मिन्पौर्ण
मासीति संज्ञामिति। न च सौरसावनयोरेवंविधास्ति संज्ञा। एवंविधपौर्णमासी योगनियमो वा। अतः सांवत्स
रिकादौ चांद्रमासो ग्राह्यः। यत्तु नर्ववचनं यस्मिन्राशौ गते सूर्ये विपत्तिं याति मानवः। तस्मिन्नेव कर्तव्यं पितृकार्यं
मृताहनीति। तदेतदधिमासमृतविषयं। अधिमासे विपत्तिश्चेत्सौरमानेन समाश्रयेत्। स एव दिवसस्तस्य श्राद्धपिं
डोदकादिषु॥ अथ क्षयाहाद्वैधनिर्णयः॥ तत्र क्षयाहश्राद्धतिथिर्द्वैधे कर्मकालव्यापिनी ग्राह्या। यदाह व्यासः।
कर्मणो यस्य यः कालः इति स्कंदपुराणे॥ यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिः। तच्च सांवत्सरिकं द्वि
विधं पार्वणमेकोद्दिष्टं चेति। तत्र पार्वणस्यापराह्णः कालः। एकोद्दिष्टस्य मध्याह्नः। तथा च वृद्धगौतमः॥ म
ध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत्। अपराह्णव्यापिनी या तु पार्वणे सा तिथिर्भवेत्। अत्र केचिदाहु
ः। यदा तिथिरुभयोरपि तिथ्योरपराह्णसंबंधस्तदानीं पार्वणेति कर्तव्यता के सांवत्सरिके पूर्वैव तिथिर्ग्राह्या
तत्र यद्यपि परस्मिन्दिने कर्मकालव्याप्तिसंभवस्तथापि प्रथमातिक्रमे कारणाभावात्पूर्वस्मिन्नपि दिने

कर्म्मकालव्याप्तिसंभवः। तथापि पित्र्यमातिक्रमे कारणाभावात्पूर्वस्मिन्नेवाह्नि श्राद्धमाहुः॥ सुमंतुः॥
द्व्यहव्यापिनी चेत्स्यात् मृताहस्य तु या तिथिः। पूर्वस्यां निर्वपेत्पिंडमित्यांगिरसभाषितं॥ वृद्धयाज्ञवल्क्यः॥ दे
वकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः। पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः॥ शिवरहस्यसौरपुरा
णयोः॥ प्रातः प्रातस्तु या स्यात्तिथिर्दैवफले स्मृतिः। मूलं हि पितृहस्यर्थे पैत्रं चोक्तं महर्षिभिः॥ स्मृतिसमारंभः॥
नारदीयपुराणेपि॥ पितृप्रीतं सुरा रव्युदितोपोष्यं कवयो विदुः। पैत्रं मूलं तिथिः प्रोक्तं शास्त्रज्ञैः कालकांक्षि
दैः॥ निगमः॥ पूर्वाह्णिकास्तु तिथयो देवकार्ये फलप्रदाः। अपराह्णिकास्तथा ज्ञेयाः पित्र्ये तु सुरदावलाः
॥ अत्र॥ अपराह्णं सूक्ष्मकालप्रकरणे वक्ष्यमाणं पपराह्णो यन्यतमो वदितव्यः। तथा च शिवरहस्ये अस्मिन्वे
वत्रे नारदीयपुराणेषु। दर्शे च पौर्णमासे च पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यत इति। तदे
वं तिथिसाम्ये पूर्वा ग्राह्येति सिद्धं। वैषम्ये त्वाह बौधायनः। सा तिथिस्तामियात्पूर्वे। क्षयाहमेव विषयीकृत्य स ए
वाह। अपराह्णद्वयव्यापी प्रथमा तस्य यदा तिथिः। क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरा। एतद्व्याख्याने ति

कौ.दि.
२४

थिसाम्येपि परतिथेर्ग्रहणमुक्तं। खर्वदर्पस्तथाहि। साक्षिविधं तिथिलक्षणमिति। तदेतत्सामान्यशास्त्रं क्षयाहव्य
तिरिक्ततिथिविषयं। आसन्नदिनद्वयसमग्रापराह्णव्यापित्वे तिथिवृद्धौ परैव ग्राह्येति। तदमुक्तं। यदा हि तिथिवृद्धि
वशाद्द्वे अपि समग्रापराह्णं व्याप्नुतः। तदा साम्ये च वृद्धावपि द्व्यहव्यापिनी चेत्स्यात् इत्याद्यनेकवचनवशात्प्रथमं वा
नियम्येत कारणादतिक्रमः। स्यादनेनैव न्यायेन पूर्वतिथिग्रहणस्योक्तत्वात्। तथाहि। दिनद्वये अपराह्णैकदे
शव्यापित्वे साम्ये पूर्वेति वक्ष्यते। तथा दिनद्वयसमग्रापराह्णव्यापित्वे वृद्धावपि पूर्वैव। तत्र साम्ये तिथिः पूर्वैव प्रा
प्ता। यद्यपि द्व्यहव्यापिनी चेत्स्यादिति वचनानि क्षयाहतिथिसाम्यव्यतिरिक्तविषयत्वेनाप्युपपद्यंते। खर्वशास्त्रं च
मृततिथिसाम्यव्यतिरिक्तसाम्यविषयत्वेन। तथापि बहुशास्त्रानुरोधात् खर्वशास्त्रमपि बाध्यत इति चेत्। न च
वृद्धावपि तुल्यत्वात्। अपराह्णद्वयव्यापी प्रथमा तस्य यदा तिथिरिति वचनस्य तु स्यापराह्णैकदेशद्वयव्यापितिथि
विषयत्वादन्यथा तिथिक्षयसमस्तापराह्णव्यापित्वात्। क्षये पूर्वा तु कर्तव्येत्यभिधानानुपपत्तेः। वाक्यभेदप्रसंगाच्च
नवाक्यद्वयकल्पनायुक्ता। यद्यपि पौरुषेयत्वाद्वाक्यभेदो दोषायेति मन्यसे। तथाप्येकवचनन्यायविरुद्धकल्पना।

निःप्रमाणिकत्वाच्च।यदा अमावास्या दिनद्वये अपराह्णसंबंधिनी तदा द्वयोः पूर्वोद्दिष्टो सिनीवाली तत्रा।सिनीवाली कु
हूश्चैव प्रोक्ता तु पैत्रे पित्र्यकर्मणि।स्यातां ते चेत्तु मध्याह्ने श्राद्धादि स्यात्कथंचन।तिथिद्वये सिनीवाली तिथिवृद्धौ।
कुहूर्मता।साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिः।इति वचनात्।श्राद्धांतरेष्वेवं।पार्वणविकारत्वात्तस्य तथा
चोक्तं व्यासेन।द्वितीयादिषु युग्मानां प्रत्यूत्ता नियमादिषु।एकोद्दिष्टविवृद्ध्यादौ वृद्धिह्रासादिचोदनादिति।तद
युक्तं।उदाहृतबहुवाक्यविरोधात्।तेन यथा पितृव्रतादिनद्वये समग्रापराह्णव्यापिनी ग्राह्या।तथा च हारीतः।
अपराह्णः पितृणां या पराह्णानुयायिनी।सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनी।यदा तु द्वितीयेह्नि कृत्स्नमप
राह्णं व्याप्नोति पूर्वा चैकदेशव्यापिनी द्वितीयैवारंभोपयोगित्वादपि ग्राह्या।यो यस्य विहितः कालः कर्मणस्तदुपक्र का॰हि॰
मो विद्यमानो भवेदंगनोज्ञितो पक्रमेश्विति।लघुविष्णुवचनात्।अन्यत्राप्यारंभयोगिन्याएव तिथेर्ग्रहणमु २४१
क्तं।भूतविद्धाथमावास्या प्रतिपन्मिश्रितापि वा।पित्र्यकर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी।मत्स्यपुराणे
ह्नि कुतप एवारंभो विहितः।मध्याह्ने सर्वदा यास्यान्मंदीभवति भास्करः।तस्मादनंतफलदस्तत्रारंभो विशिष्य

५०

ते इति।न च भूतविद्धामावास्येत्यमावास्यायामेवायं विशेषः।तस्मादेवान्यत्रेति वाच्यं।व्याप्ततो मध्याह्न
व्यापिनी या तु तिथिः पूर्वा परापि चेति तिथिमात्रावगतेः।यदा तु भे अपि तुल्यमपराह्णैकदेशं व्याप्नुतः
तदा तिथिवृद्धौ परैव ग्राह्या।क्षये साम्येपि पूर्वैव।तदप्युक्तं।अपराह्णद्वयव्यापिन्यतस्य यदा तिथिः क्ष
ये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरा।दर्शं च पौर्णमासमित्युदाहृतवचनाच्च।साम्येपि पूर्वैव।द्व्य
ह्नव्यापिनी स्यादिति वचनात्।खर्वदर्पास्कंदवाक्येषु त्वयाह्नविषयं बहुवाक्यानुरोधात्।तद्व्यतिरिक्तविषयं ज्ञे
यं।अत एवोदाहृतवाक्ये खर्वग्रहणं न कृतं।यदा पूर्वा सायाह्नव्यापिनी चापराह्णं स्पृशति।तदा पूर्वैव
ग्राह्या।तदप्युक्तं।मनुना।व्यह्नव्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः।पूर्वा विद्धैव कर्तव्या त्रिमुहूर्ता भवेद्य
दि।तथा च बौधायनः।उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ।द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययो
रिति।अस्यार्थः।भानावुदिते मुहूर्तकालं त्र्यह्नो मुहूर्तद्वयं दैवतं देवदेवत्यं तस्मिंश्चास्तमिते ततात
त्पूर्वकालीनमह्नो मुहूर्तत्रयं पित्र्यं पितृदेवत्यं अतस्तावत्कालव्यापिनी सा तिथिर्भवति सेव क्रमात्।ह

व्यकव्ययोर्गोस्येति तदेवमस्तमयात्पूर्वं त्रिमुहूर्त्तोगौस्येति स्थिते यत्तु भविष्यत्पुराणोक्तं। व्रतोपवासस्नानादौ
घटिकैकापि या भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृक इति। विपरीता अस्तमयसंबंधिनी यच्च व्या
सोक्तं। अर्कोस्तमयवेलायां कलामात्रापि या भवेत्। सैव प्रत्याब्दिके ग्राह्या नेतरा पुत्रहानिदेति। यच्च वसि
ष्ठोक्तं। पित्र्ये अस्तमयवेलायां स्पृष्टा पूर्णा निगद्यत इति। तदेतत्पूर्वदिनापराह्णत्रिमुहूर्त्तव्यापिन्याः किंतु
नन्यायेन प्रशंसार्थं। ननु घटिकादिमात्रकालीनयोः परिग्रहणार्थं। तथाविधायाः पर्याप्तत्वात्। उत्तरदिनेक
र्मपर्याप्तापराह्णव्यापित्वाभावाच्च। अत एव हारीतः। अपराह्णः पितॄणां तु या पराह्णानुयायिनी। सा ग्राह्या पितृ
कार्ये तु पूर्वा नास्तानुयायिनी। भविष्यत्पुराणेऽपि। व्रतोपवासनियमे घटिकैका यदा भवेत्। सा तिथिः सक
ला ज्ञेया पित्र्यर्थे चापराह्णिकी। अस्तादिशब्दे अत्र पराह्णपर एव तथा च वृद्धमनुः। यस्यामस्तं रविर्याति पि का॰हि॰
तरस्तामुपासते। सा पितृभ्यो यतो दत्तो ह्यपराह्णः स्वयंभुवा॥ मनुरपि। न च त्रास्तमययोगिन्या ग्रह २४२
णं युक्तं। अस्तमयसमये श्राद्धनिषेधात्। अपराह्णेपि श्राद्धनिमित्ततिथ्यभावे यदि श्राद्धं क्रियते तदा

५२

तामुपासत इत्यनुपपन्नं। अपराह्णस्य दत्तत्वेनैवमन्निगदार्थानुपपत्तेः स्यात्। तामुपासत इत्यविध्यसंगतेः
अस्तमयशब्देन नापि केवलेन गैर्तिष्ठतीति तत्समीपलक्षणयापराह्णो लक्ष्यते। कुतावपि दृश्यते। ऋ
ग्भिः प्रातर्दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः। सामवेदेनास्तमिते महीयते वेदैरशून्यस्त्रिभिरेति सू
र्य इत्यत्र अस्तमिते इत्येतावन्मात्रे विवक्षिते तदा अपराह्णे वेदसंबंधाभावात्। तदेव शून्यरूपसंहारो ताव
त्स्यात्। तस्मादस्तमेति। अस्तसमीपे अपराह्णे इत्यर्थो ग्रहीतव्यः। एवं स्मृतौ यत्र यत्रास्तमयसं
बंधिन्यां तिथौ श्राद्धं विधीयते। तत्र तत्र तस्यामपराह्णव्यापिन्यां तिथौ श्राद्धं विधीयते। तत्र तत्र तस्या
मपराह्णव्यापिन्यां तिथौ श्राद्धं विहितमिति मंतव्यं। अन्यथा उक्तपरोहिणापराह्णवाक्ये विरोधः स्यात्।
अर्कोस्तमयवेलायां कलामात्रापि या तिथिः। सैव प्रत्याब्दिके श्राद्धे नपरा पुत्रहानिदेति। वचनादस्तम
यमात्रकाले या तिथिः। सैव प्रत्याब्दिके श्राद्धे ग्राह्येति चेत् तदास्तसमयकाल एव श्राद्धं प्राप्नोति। वचनबलात्
अपसकाले तत्समीपे च श्राद्धप्रतिषेधात्। तदा न क्रियत इति ध्यायद्युच्यते न ह्येपराह्णकालेस्तु तिथे

रभावेनश्राद्धकरणेसैवप्रत्याब्दिकइति।द्वयोर्नानुष्ठितःस्यात्।इतरस्यांपुत्रहानिदायांप्रतिषिद्धायांनकर्म्म
सुस्नानदानजपादिषु।यांतिथिंसमनुप्राप्यअस्तंयातिदिवाकरः।सातिथिःसकालाज्ञेयादानाध्ययनक
र्मसु।इतिदेवलवचनाभ्यामुदयास्तमययोगिन्योस्तिथ्योःसकलत्वाभिधानात्।यदाकदाचि — —
त्कर्म्मविहिततिथावेवकृतंभवतीतिचेत्।नतथास्तमयसंबंधेनपूर्वेद्युस्तस्याःसकलत्वेतथैवपरे
द्युरप्युदयसंबंधेनसकलत्वात्।अह्नोस्तमयवेलायांदिनद्वयेपिविमानत्वेनेनज्ञायते।सैवप्रत्याब्दिक
इति।काविधीयते।पूर्वावापरावेति।काचप्रतिषिध्यतेति।नितरांपुत्रहानिदेति।किंचाएवंपरिभाषितमवा
स्तवंसकलत्वंयदिगृह्यते।तदासर्वाएवोदयास्तमययोगित्वेनसकलानकदाचिखंडतिथिरस्ति।तत्रसर्वा का॰हि॰
सांसकलत्वेनसर्वकर्म्मकालव्यापित्वात्।कर्म्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिरिति।मध्याह्न २४३
व्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत्।अपराह्णव्यापिनीयास्यात्पार्वणेसातिथिर्भवेत्।इत्यादिवच
नजातस्यव्यावर्त्तनीयाभावात्।आनर्थक्यमेवस्यात्।किंचकिमत्रापराह्णबाधेनास्तमयवेलाकल

५२

योप्रत्यब्दश्राद्धविधानं।अथवाद्विमुहूर्त्तेत्रिरह्णश्चेतित्रिमुहूर्त्तबाधेनवा।आद्येपक्षेपराह्णःपितॄ
णामितिश्रुतेर्विरोधःस्यात्।तदप्युक्तं।स्मृत्यंतरे।अपराह्णःपितॄणांतुयापराह्णानुयायिनी।।साका
र्यापितृकार्येषुनसायाह्नानुयायिनी।संपूर्णायामपितिथावस्तमयवेलायांश्राद्धंप्रसज्येत।।
किंवाप्रत्याब्दिकशब्देनकिंश्राद्धमभिधीयते।कर्म्मांतरंवा।श्राद्धपक्षेपि।किंमृताहश्राद्धमन्वष्
टकीयाश्राद्धंचेति।यावत्प्रमाणांतरवशादवधारयते।तावदपराह्णःपितॄणामितिश्रुत्याकथं
चिन्नबाध्यते।।द्वितीयेपक्षेचायंविशेषः।तिथ्यभावेअपराह्णेश्राद्धेकृतेमृताहश्राद्धंनकृतंस्यात्।
मासपक्षतिथिस्पृष्टेयोयस्मिन्म्रियतेऽहनि।प्रत्यब्दंतुतथाभूतंमृताहंतस्यतद्विदुरिति।।तल्लक्षणा
त्।नचैवमपिदिनांतेविद्यमानयातिथ्यातदहःस्पृष्टमिति।तन्मृताहःस्यादिति।तत्रापिश्राद्धंप्राप्नोति
इतिवक्तव्यं।यतोअनग्निमतउक्तंतेसाग्नेःसंस्कारकर्म्मणःशुद्धिःसंचयनंदाहान्मृताहस्तुयथाति
थिरिति।मरणकालीनतिथिवशेनमृताहस्त्वुक्तं।मरणदिनतिथियोगवशेनअन्यथैकस्मिन्नह

नात्तिथिद्वययोगेसत्यत्रयत्रापिसिद्धं।श्राद्धंप्राप्नोति॥नन्वस्तिविद्धा।अविशेषात्।पूर्वेद्युर्निर्वपेत्पिंडमि
त्यादौचसंगम्यातिथेराधारत्वावगमात्।तत्तिथिंविनाश्राद्धेक्रियमाणे।अकालेयत्कृतंकर्मविधिशौच
विवर्जितं।अन्तंतद्विजानीयात्पुनरित्याकृतेवेलात्।इत्यापतति।तस्मान्मासपक्षतिथिस्पृष्टइत्यस्या
यमर्थः।यस्मिन्मासेयस्मिन्पक्षेयस्यांतिथौयोमृतस्तस्यतेषुविद्यमानेषुमृताहइति।अस्तमयवेलारा
हेनकिंसायंसंधिरुच्यते।ततोर्वाग्वाउपरिवा।आद्येपक्षेअस्तीतिनोपपद्यते।संपूर्णादित्यमंडलोपल
क्ष्यावरः।शाद्धंप्रयुंजतेप्राज्ञाः।द्वितीयेपक्षेमध्याह्नादुपरिसर्वोप्यस्तमयवेलास्यात्।उदयेवर्द्धमानाभिरा
मध्याह्नात्तपेद्रविः।ततःपरंह्रसंतीभिर्गोभिरस्तंसगच्छ॥तीत्यस्तमनसंधिः।कालस्यमध्याह्नादुपरि
पुराणेप्रतिपादनात्।तथासत्यपराह्णःपितृणामितिश्रुत्यासहविरोधोनभवेत्।तृतीयःपक्षोपिन
युक्तः।अंतोस्तमयवेलायामित्यहरहरस्तमयवेलायाः सामानाधिकरण्यानुपपत्तेः।तस्मादयम
र्थोवचनस्य।अन्त्यस्तमयवेलायाः।अह्निदिवसमध्येयास्तमयवेला।अस्तमयसंनिहितःकालः।साया का॰ नि॰ २४४

५३

ह्नस्त्रिमुहूर्त्तःपंचमोविभागस्तस्यप्रवेशोयाकलामात्राप्यस्तिसैवप्रत्याब्दिकेग्राह्या।तस्याःश्राद्धादिकृतप
दिमुहूर्त्तपंचकरूपापराह्णव्यापित्वात्।नितरापूर्वोयासायंह्नमात्रवर्त्तिनीश्राद्धयोग्यमपराह्णंनव्या
प्नोति।सापुत्रदानिदानग्राह्येत्यर्थः।एवंविधेवचनार्थेनानुपपन्नंकिंचित्।नापिवचनांतरस्यानर्थक्यंवि
रोधोवा।अथवापूर्वस्मिन्नहनिलोकप्रसिद्धास्तमयकालव्यापिनीद्वितीयेहनितदेकदेशव्यापि
नीयदातदाद्वितीयोहनिपूर्वेतिथ्यपवादेश्राद्धंनियम्यतइति।निरवद्यंस्मृतिचंद्रिकाकारः।अस्तमय
स्पृष्टातिथिः।पूर्वैवग्राह्यानचात्रचतुर्थप्रहरांतरार्द्धव्यतिरिक्तापराह्णकालेतिथिसंयोगासंभवेनति
थियुक्तापराह्णकालाभावादननुष्ठानमेवश्राद्धस्येतिवाच्यं।यदाहनारदीयपुराणेवशिष्ठः।पारणेमर
णेन्दृणांतिथिस्तात्कालिकीस्मृता।पित्र्येस्तमयवेलायांस्पृष्टापूर्वानिगद्यतइति।अस्तमयवेलायांस्पृ
ष्टेत्यनेनास्तमयेकलासद्भावेपिमृततिथिःपूर्णेवयुक्तमितिमंतव्यं।यत्तुस्मृत्यंतरं।दिनांतेपंचनाड्य
स्तुपुण्याःप्रोक्तामनीषिभिः।उदयेचतथापित्र्येदैवेचैवकर्म्मणीति।पित्र्यकर्म्मणिकालत्रेननोदितति

थिसंबंधिन्योदिनांतेवर्त्तमानाःपंचनाड्यःपुण्यास्ततःप्रकृतिनाडीतिथियोगजन्यपुण्यत्वापादिकाःनतु
ततोन्यूनाः।दैवेकर्म्मणिकालत्वेनचोदिततिथिसंबंधिन्युदयेसतिवर्त्तमानाःपंचनाड्यःपुण्याः।।
ततःउपरितननाडीनामपितिथियोगपुण्यापादिका।नतुततोन्यूनाइतितस्यार्थः।तदेतत्प्रतिपन्नसा
मायद्वितीयाद्विपादस्यादिना।श्राद्धंकुर्वीतामावास्यायांयत्नेनपुरुषःशुचिः।सर्वान्कामानवाप्नोतित्ये
वंतेनश्राद्धकालतयाविहितकृष्णप्रतिपदादितिथिद्वैधविषयं।नतुश्राद्धांतरकालतयाविहिततिथिद्वै
धविषयोपि।अथश्राद्धंकृष्णपक्षदिनेस्तमययोगिनीतिप्रस्तुत्यतत्रैवविशेषाभिधानपरत्वादस्यवचनस्य
वचनस्यतेनपूर्वोक्तविशिष्टवचनेनसहकश्चिद्विरोधः।भविष्यपुराणे।।व्रतोपवासनियमेघटिकैका
यदाभवेत्।सातिथिःसकलाज्ञेया।पित्रर्थेचापराह्णिकी।।संध्यासमाप्तस्थापराह्णिकी।घटिकैकायदाभ
वेत्।सातिथिःपित्र्यर्थेसकलाज्ञेयाइत्यर्थः।यदातुपूर्वदिनेस्तमयात्पूर्वेक्षणेतिथियोगः।उत्तरदिनेस्तम
यादुपरित्रिमुहूर्त्तयुक्ता।तदाउत्तरमहःश्राद्धकालः।तथाचसुमंतुः।उदितेदैवतंभानौपित्र्यंचास्तमितेरवौ

द्विमुहूर्त्तेत्रिरह्नोवासातिथिर्हव्यकव्ययोः।।अस्यार्थः।उदितेभानौसत्यह्नःसंबंधिनीदेवकर्म्मोपयुक्ताति
थिर्याद्विमुहूर्त्ताद्विरूनाभवति।सासंपूर्णतिथिः।अस्तमितेरवौसतियात्रिमुहूर्त्तमनुवर्त्तते।वह्नस्तस्या
ह्नोहव्यदानकालतामापादयति।नैवतस्मिन्नहनिदैवंतत्कुर्यात्।पित्र्यकर्म्मोपयुक्तातिथिरस्तमितेरवौस
तियात्रिमुहूर्त्तमनुवर्त्तते।साहव्यदानकालतांस्वसंबद्धस्याह्नआपादयति।तेनतत्संबंधेह्निपित्र्यंपित्र्यसं
बंधिसांवत्सरिकादिकंश्राद्धंकुर्यादिति।अनेनोत्तरदिनेअस्तमयादुपरित्रिमुहूर्त्तोर्ध्वत्वभावेस्तगा
मिनीपूर्वतिथिरेवग्राह्येत्यर्थादुक्तंभवति।एवंचयदुक्तंनारदीयपुराणे।दर्शेचपौर्णमासेचपितुःसांव
त्सरेदिने।पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइति।तदुपरिदिनेअस्तमयादुपरिमुहूर्त्तत्रयानुवृत्त्यभावेद्र
ष्टव्यं।यदातुपूर्वेद्युरस्तगामिनीतिथिःसंभवति।उत्तरेद्युरस्तमितेरवौत्रिमुहूर्त्तत्रयानुव्यापिनीभवति।।
किंतु।अस्तगामिनीभवति।तदापिसैवग्राह्या।श्राद्धादावस्तगामिनीतिस्मरणादेव।यदातुदिनद्वयेप्य
स्तगामिनीतिथिर्नभवति।तदोत्तरेद्युरेवास्तगामित्वरूपगुणाभावेपिगुणलोपन्यायेनसांवत्सरिकश्रा

हिककर्त्तव्यो।तिथिरुक्तापराह्णकालव्यतिरेकेणग्रस्यवायापरेऽस्येति।तदुक्तं।अस्तमयस्पर्शमात्रेणसांव
त्सरिकश्राद्धंपूर्वेतिथिग्रहणेह्यह्नव्यापिनीचेस्यात्।मृताहस्ययदातिथिःपूर्वविद्धैवकर्त्तव्यात्रिमुहूर्त्तानचे
द्यदीति।मनुवचनविरोधात्।व्रतोपवासनियमइति।भविष्यत्पुराणवचनस्यापराह्णव्यापिन्याएवतिथेर्ग्रहणंप्रति
पादयति।वचनांतरविरोधेनघटिकैकैत्यस्यानुवृत्तौप्रमाणाभावात्।उक्तप्रमाणेनगतिसंभवाच्च।परेतुःश्रा
द्धसंभवेवेनोपपत्तेश्चायदपिसमेतुवचनस्यास्तमयोपरितनत्रिमुहूर्त्तविषय--- व्याख्यातं।तदप्ययुक्तं।
अहःशब्दपर्यालोचनयाह्निमुहूर्त्तस्यचदिनसंबंधित्वावगतेः।अन्येत्वाहुः।द्वितीयेह्यपराह्णव्यापिनीचेत्त्रिमुहूर्त्ता
चेत्पूर्वविद्धैवकर्त्तव्यात्रिमुहूर्त्तानचेद्यदीतिवचनात्मनाः।अपराह्णःपितृणामितिहारीतवचनं।सांवत्स
रिकव्यतिरिक्तविषयं।एवंचसतिअह्नव्यापिनीतिथिसुमंतुवचनस्यदैवकार्येतिथिर्ज्ञेयेति।वृद्धयाज्ञ का॰ हि॰
वल्क्यवचनस्याभिप्रायः।ग्रांतउपोष्यइति।।शिवरहस्यसौरपौराणवचनस्यातिथेःप्रांतमितिनारदीयपु २४६
राणस्यउदितेदैवत्वमितिबौधायनवचनस्यव्रतोपवासात्स्नानादिइति।भविष्यत्पुराणवचनस्याप्यस्त

५५

मयेवलायामितिव्यासवचनस्यास्तमयवेलायाविशिष्टवचनस्यदर्शेचपौर्णमासमितिशिवरह॰
स्यापिमनुवचनस्यैववचनदशकबाधनलाघवंस्यात्।नचस्यपक्षेतुबाधगौरवंस्यादेतत्।नचत्पक्षेपि
कर्म्मणोयस्ययःकालइतिव्यासवचस्ययस्मिन्कालेयत्कर्म्मेति।।स्कांदवचनस्यअपराह्णिका।
स्तिथिरयइतिनिगमवचस्यापिराह्णःपितृणामितिहारीतवचनसव्रतोपवासनियमइतिभविष्य
त्पुराणवचनस्ययस्यामस्तारंवियातिइतिलघुवृद्धमनुवचनयोरपराह्णव्यापिनीयेति।वृद्धगौतमवचन
स्ययोयस्यविहितकालइति।बौधायनलघुविष्णुवचनयोर्मध्याह्नव्यापिनीति।बौधायनवचनस्यत्ये
वंवचनैकदशकस्यबाधगौरवंभविष्यति।अस्मिन्पक्षेतुबाधलाघवमितिचेत्।उच्यते।पक्षद्वयेवाक्य
बाधाविशेषेयाचारानुगुण्यात्पूर्वविद्धात्रिमुहूर्त्तोगृह्यते।तदप्युक्तं।आचारेद्वैविध्यात्।नचत्पक्षेमृ
ततिथिसांवत्सरिकविधायकवाक्यबाधोपिभवेत्।ततश्चबहुवाक्यबाधान्नायंपक्षोह्याश्रयान्।किं
चयथाश्राद्धेत्रिमुहूर्त्ततिथिग्रहणश्रवणात्कर्म्मकालव्यापिशास्त्रबाधोऽंगीक्रियते।तथायस्यांतिथाव

वत्सरमियास्तर्यस्तुत्रिमुहूर्त्तैवतिथिके।योगदानजपादिस्यस्नानमेवोपक्रमेतिथिं॥इतिवचनात्कर्म्मोत्तरेपित्रिमु
हूर्त्तेतिपितृग्रहणश्रवणान्नबाधःप्रसज्येतेति।वैषम्याङ्गीकरणंयुक्तं।तत्रापिचैवमभ्युपगमेदोषःप्राग
भिहितः॥अन्येत्वाहुः॥क्षयाहश्राद्धेआचारविप्रतिपत्तेर्वचनविप्रतिपत्तेश्चपरंपराप्राप्ताचारात्प्रय
त्नेनतिथिग्रहणमिति।येषांपरंपराप्राप्तःपूर्वजैरप्यनुष्ठितः।नदेवतैर्नउष्यते।पुराचारैर्नेतरैः॥पुनरि
तिवचनात्॥तथाचव्यासः॥तर्कोऽप्रतिष्ठःश्रुतयोविभिन्नानासावृषिर्यस्यमतंनभिन्नं।धर्म्मस्यतत्वं
निहितंगुहायांमहाजनोयेनगतःसपंथाः॥इतियदत्रयुक्तंतद्ग्राह्यं॥ ॥इतिक्षयाहद्वैधनिर्णयः॥ ॥
अथक्षयाहापरिज्ञानेसांवत्सरिकश्राद्धकालनिर्णयः॥ ॥भविष्यत्पुराणे॥अरुणउवाच॥नजाना
तिदिनंयस्तुमासंवाथमराधिप।मृतायास्तुगृहाग्रज्ञःपित्रोस्तुसकथंनरः।श्राद्धंकरोतुचैतान्यांविधिव का.हि. २४)
द्वत्सरात्मकं।अत्रपित्रोरित्युपलक्षणं।अन्येषामपिश्राद्धस्यमासदिनापरिज्ञानेतथैवाचरणात्।आ
दित्यउवाच॥मृताहंयोनजानातिमानवोविनतात्मज।तेनकार्यममावास्यांश्राद्धंसांवत्सरंनृप।यस्य

५६

प्रोषितस्यप्रोषितस्यवामृतस्यतिथिर्नज्ञायते।मासस्तुज्ञायते।तस्यतन्मासामावास्यायांसांवत्सरिकं
कार्यमित्यर्थः॥तदाहबृहस्पतिः॥नज्ञायेतमृताहश्चेत्प्रमीतेप्रोषितेसति।मासश्चेत्तुविज्ञातस्तद्दर्शेस्यान्मृतेऽह
नि।दर्शेतन्मासामावास्यायांमृतादिनीत्यत्रयत्कर्तव्यंतदितिशेषः।प्रोषितइत्यज्ञानकरणोपलक्षणं।तथा
चभविष्योत्तरे।प्रवासमंतरेणापिस्यातांतौविस्मृतौतदा।तदानीमपितौग्राह्यौपूर्ववन्मृतादिकौ।अस्मि
न्नेवविषयेएकादश्यांश्राद्धमाह॥मरीचिः॥श्राद्धविघ्नेसमुत्पन्नेअविज्ञातेमृताहनि।एकादश्यांतुकर्त्त
व्यंकृष्णपक्षेविशेषतः॥अतोविशेषतइति।कृष्णपक्षस्यप्रशस्ततराभिधानेनशुक्लपक्षोप्यनुज्ञायत
इतिगम्यते।तत्रशुक्लकृष्णैकादश्योर्विकल्पेप्राप्तेएवव्यवस्था।मासेपक्षेचविज्ञातेतिथिमात्रापरिज्ञात
स्यमासस्यतस्यतत्पक्षस्थितायामेवैकादश्यांश्राद्धंकार्यंविज्ञायमानपक्षपरित्यागेकारणाभावात्पक्षस्या
प्यपरिज्ञानेकृष्णैकादश्यां।तदभावेशुक्लैकादश्यां।भविष्यत्पुराणे।दिनमेवविजानातिमासान्नैवतुयो
नरः।मार्गशीर्षेथवामास्माघेवाथसमाचरेत्।भोजकश्चविशेषेणयोमांजयतेसदा।यस्यतुमृताहःप

रिज्ञायते।तस्यमार्गशीर्षेनाऽऽद्येमाघेवातस्मिन्नहनिश्राद्धंकर्त्तव्यं॥तदाहबृहस्पतिः॥यस्यमासोन
विज्ञातोविज्ञातंदिनमेवतु।तदामार्गशिरेमासिमाघेवातद्दिनंभवेत्।यदातुप्रोषितमृतस्यदिनमा॰
सावुभावप्यज्ञातौस्यातां।तदायैतत्प्रस्थानकालिकदिनमासयोस्तत्सांवत्सरिकंकार्यं।तदाहसएव।दिनमा
सौनविज्ञातौमरणस्ययस्यवाप्रस्थानमासौतुप्राग्वोर्ध्वोक्तयादिशादिनशब्देनसर्वत्रतिथिरवगंतव्या।
पूर्वोक्तयादिशेत्यस्यमयमर्थः।प्रस्थानतिथ्यज्ञानेतस्मात्संज्ञानेवतन्मासवर्त्तिन्याममावास्यायांसांवत्स
रिकंप्रस्थानतिथिएवज्ञानेमासाज्ञानेचमार्गशीर्षेमाघेवातस्यामेवतिथौकुर्यात्।प्रस्थानतिथिमासयोरु
भयोरप्यनुज्ञानेतुतन्मरणश्रवणकालिकयोस्तिथिमासयोःकुर्यात्।तदाहप्रचेताः।अपरिज्ञानेअमावा
स्यायांश्रवणदिवसेवा।श्रवणदिवसेमरणवार्त्ताकर्णनतिथौ।भविष्योत्तरेपि।मृतवार्त्ताश्रुतेर्योयोतौ का॰ हि॰ २४८
पूर्वोक्ता।क्रमेणतु।श्रवणतिथिविस्मरणेचतन्मासवर्त्तिन्याममावास्यायांसांवत्सरिकं।श्रवणतिथिविस्म
रणेमासस्मरणेचमार्गेमाघेवातस्यामेवतिथौकार्यं।श्रवणतिथिमासयोरुभयोरपिविस्मरणेमाघस्य

मार्गशीर्षस्यवाअमावास्यायांश्राद्धं।तदुक्तंप्रभासखंडे।मृतस्याहर्नजानातिमासंवापिकथंचन।तेनकार्यम
मावास्यांश्राद्धंमाघेथमार्गके।कथंचमरणप्रस्थानश्रवरूपेणकेनाप्युपलक्षणेनेत्यर्थः।यस्यतुप्रोषित
स्यमरणवार्त्ताजीवनवार्त्तापिनाकस्येतिपंचदशवर्षपर्यंतमागमनंचनास्ति।तस्यतदूर्ध्वंपालाशीभिःसमि
द्भिःकुशैर्वाशरीरप्रतिकृतिंकृत्वायथाविधिदाहसंस्कारंनिवर्त्यतदानीतन्मासपक्षतिथिस्वेष्टेहनिसांव
त्सरिकंकर्त्तव्यमित्याहजातूकर्ण्यः।पितरिप्रोषितेयेनवार्त्तानैवनचागतिः।ऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रति
रूपकं।कुर्यात्तस्यचसंस्कारंयथोक्तविधिनाततः।तदादीन्येवसर्वाणिशेषकर्माणिसंचरेत्॥ ॥इतिमृत्या
द्यपरिज्ञानेसांवत्सरिककालनिर्णयः॥ ॥अथमाघश्राद्धनिर्णयः॥वायुपुराणे॥माघस्यकृष्णेतुश्राद्धानिस
र्वान्कामानवाप्नुयात्।प्रत्यक्षमर्चितास्तेनभवंतिपितरःसदा।मघाश्राद्धंचयःकुर्यात्तस्यपुण्यफलंशृणु।पितर
स्तस्यतुप्यंतिसंततिश्चाक्षयाभवेत्।एतेनैवतुयोगेनवस्त्रयानमुपानहौ।योददातिगयाश्राद्धेभोजनंचविशे
षतः।त्रयोदशसमास्तस्यतृप्यंतिपितरोनृपापितापितामहश्चैवतथैवप्रपितामहः।जातंपुत्रंनिरीक्ष्यंतेरा

कृतात्र [illegible]ष्णस्तं मधुमांसेन खड्गेन पयसा पायसेन वा । एवमेतदा स्यात् श्राद्धं वर्षासु च मघासु [illegible] नगा[illegible]
न न चतुरो लभते वरान् । धनमन्नं सुतानायुर्ददंति पितरोर्चिताः । शातातपः । मघासु पित्र्यसुतं च तानि [illegible] दत्त
[illegible] यत्नेन [illegible] तद्दत्तं चतथैव पद्मे दत्तं नवेच्छिन्नं सहस्रं तु तस्या विनश्यावाकुर्युः श्राद्धं सदैव हि । मघासु च
ततोन्यत्र नाधिरः पृथ्वि नेति । आह च वृद्धवसिष्ठः । दधि गव्यं समं स्पृष्टं सात्विकान्नाना विधास्तथा । इदं तु मधु
नु शौचेति वर्षासु च मघासु चेति । एतानि वाक्यानि पिंडदानरहित श्राद्धविषयाणि । तथा च नविष्यपुराणे । सं
क्रांत्यामुपवासेन पारणेन च जागरे । मघायां पिंडदानेन ज्येष्ठपुत्रो विनश्यति । तथा च षट्त्रिंशन्मते । मघासु कुर्वतः
श्राद्धं ज्येष्ठः पुत्रो विनश्यति । संक्रांत्यामुपवासं च चंद्रसूर्यग्रहे तथा । यथाचारः सारकृतापुराणवचनमुदाहृतं ।
मघायां पिंडदानेन चतुरो लभते वरानिति । तत्तु च वृद्धस्तव्यतिरिक्तविषयं । अन्ये त्वाहुः । केवलपिंडदाननिरो
धएवायं । अस्ति हि तत्संभवति । तथा च षट्त्रिंशन्मते । पिंडदानं प्रदातव्यं न च नावेद्यविषये । श्राद्धं नि
त्यं संप्राप्ते न चेत्स्त्रिरत्नानोपि चेत् । ननु न यत्रापि निषेधः प्रवर्तते । न । अनेकबाधस्यान्याय्यत्वात् । तस्मान्म

का॰ दि॰
२४९

घाश्राद्धमपि संबंधिनि सपिंडमाचरणीयमिति । तदप्युक्तं । विनयमकारणत्वाभावात् । उभयत्रापि निषेधः प्र
वर्तते । अन्ये त्वाहुः । त्रयोदशी श्राद्धं तु स्वं न्यायतया मघाश्राद्धमपि एकवर्गसंबंधिनिषेध इति । तदस
त् । श्राद्धन्नैवैकवर्गस्य त्रयोदश्यामुपक्रमेदित्यादिवचनबलेन हि तद्व्यवस्थादर्शिता । इदं तु वचनाभावात्
न युज्यते । न्यायतुल्यत्वादिति चेत् । न तुल्यत्वान्मघाश्राद्धं कुर्यादिति । निषेधस्य सपिंडश्राद्धगोचरतया पर्यवसि
तथा पिंडदानेन पुत्रो नश्यतीति श्रूयते । न श्राद्धाचरणेन तत्कर्तृतायाः प्रदर्शितत्वात् ॥ ॥ इति मघाश्राद्धनिर्ण
यः ॥ ॥ अथ शौचादिनियमेषु श्राद्धकालनिर्णयः ॥ तत्राह ऋष्यशृंगः । दैवे पित्र्ये च णं श्राद्धे तु आशौचं जाय
ते तदा । आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं प्रदीयते । मुख्यकालिकोपक्रमात् । प्राग्यदा श्राद्धिकारिणामा
शौचं जायते । तदा मुख्यकालप्रत्यासन्ने आशौचे न वा इष्टे आशौचापरामानंतरकाल एव पैतृकं कर्म
कार्यमित्यर्थः । यच्च त्रिवचनं । तदहस्यैव स्वभ्युपेतके न विसृतकादिना । सूतकानंतरं कुर्यात्पुनस्तादहारवचो
ति । तत्र श्राद्धास्तु ते केन प्रदुष्टे सूतकानंतरं कुर्यादिति । पद्मस्यावदृष्यशृंगवचनाद्विरुद्ध एव । पुनस्तादहारवचे

तेष ञ ना दितशब्दोक्तनिमित्तांतराबद्धितः। तुल्यकालविषय इति। इत्वचनाविरोधप्रकल्पनीयं। एत
च्चपक्षांतरं इत्याह क्रियमाणप्रतिमासिकश्राद्धविषयं। तन्मासस्य इष्टकालतावेपि पक्षतिथिमात्रस्य
इष्टस्यापि ग्राह्यत्वात्। अत एवाह देवलः। एकोद्दिष्टं तु संप्राप्ते यदि विघ्नः प्रजायते। मासेन्यस्मिन् ति
थौ तस्मिन् श्राद्धं कुर्यात्प्रयत्नतः। अन्यस्मिन्नंतरे मासि ततिथौ मृततिथौ यस्मिन् कृष्णे शुक्ले वा
मृतस्तत्पक्षे श्राद्धं विघ्नवशादतिक्रांतं कुर्यादित्यर्थः। यदि विघ्न इत्यत्रापि ऋष्यशृंगवचनाविरोधाय शौ
चव्यतिरिक्तनिमित्तेनेति विशेषो द्रष्टव्यः। अशौचनिमित्तेन तु विघ्ने जाते मासिकविषये सूतकानंतर
मेव श्राद्धानुष्ठानं ऋष्यशृंगवचनोक्तमनुसंधेयं। अत एव स्वामिनाप्युक्तं। एतदृष्यशृंगवचनं सूतका
शौचविषयं निमित्तांतरस्तु तद्देवविषये। एकोद्दिष्टं तु संप्राप्ते यदि विघ्नः प्रजायत इत्यादिस्मृत्यं
तरवचनमिति व्यासः। श्राद्धविघ्ने समुत्पन्ने अंतरा मृतसूतके। अमावास्यां प्रकुर्वीत श्राद्धं चैवमनीषिण इति
अंतरा मृतसूतके श्राद्धप्रयोगमध्ये पाकोपक्रमात्प्राक् सूतके मृतके वा जाते अमावास्यायां शुद्धेः शुद्ध्यनं

५४

तरं एतत्सांवत्सरिकश्राद्धविषयमिति केचित्। तदयुक्तं। मासिकाब्दे तु संप्राप्ते अंतरा मृतसूतके। वदंति शु
द्धे तत्कार्यं दर्शे वापि विचक्षणा इति। षट्त्रिंशन्मतवचनेन मासिकस्यापि तत्र विधानात्। अमावास्याग्रहणं शु
क्लैकादश्याः कृष्णैकादश्याश्चोपलक्षणार्थं। अत एव मरीचिः। श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेहनि। ए
कादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः। कृष्णपक्षे या एकादशी तस्यां विशेषतः। विशेषत इत्यन्वयः। पितृ
कार्ये यतः कृष्णपक्षस्यैव प्रधानत्वात्। कृष्णैकादशीतोप्यमावास्यायाः पितृकार्ये श्रेष्ठत्वं दर्शपूर्वं न्याय
सिद्धं बोद्धव्यं। अत्र शुद्ध्यनंतरः कालो मुख्यकालप्रत्यासन्नत्वात् श्रेष्ठः सर्वकालतो जघन्यः। दर्शकाल
प्रत्यासन्नत्वादिति मंतव्यं। तथा च ऋष्यशृंगः। शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते। सा तिथिस्तस्य
कर्तव्या न त्वन्या पि कदाचनेति। अयमर्थः। शुचीभूतेन तावद्दातव्यं तेन मुख्यकालशुद्ध्यसंभवे शुद्ध्यनंतरं या
तिथिः सा तिथिः प्रतिपद्यते लभ्यते। तस्य कर्तव्या कर्मोपगता नेया न त्वन्या मुख्या तिथिराशौचदूषिता कदाचि
न्नानुष्ठेयेति। आशौचदूषिता तु मुख्या तिथिः सदानुष्ठेयेत्याह। स एव तिथिच्छेदे न कर्तव्यो विनाशौचं य

×आश्वलनो तिमंत्रणानंतरं ५ सजेनात्मा वृ ४

दृच्छया। पिंडश्राद्धं च कर्त्तव्यं विच्छित्तिर्नैवकारायदिति। यदृच्छया स्वेच्छया मृतस्तत्काल्यां मृतोऽर्ऽपयातेतद
तिक्रम्याशौचनिवृत्तौ श्राद्धं कर्त्तव्यमित्युक्तं। तस्माकोपक्रमान्निमंत्रणादूर्ध्वमेवाशौचविज्ञाने सति नोत्तर
कालं। तथा च ब्रह्मपुराणे। निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि। निमंत्रणाद्धि विप्रस्य स्वाध्यायाद्विरतस्य
वा देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्। अपि दातृग्रहीतृश्च सूतके तथा। अविज्ञाते न दोषः स्याच्छ्राद्धादि
षु कथं च न। विज्ञाते भोक्तुरेव स्यात्स्वायप्रिशादिकं क्रमात्। भोजनार्थं तु संयुक्तो विप्रे दोऽत्वविपद्यते। यदा कश्चि
द्दोष्ठि छ्रेषपत्यक्वा समाहितः। आचम्य परकीयेन जलेन स्तु च यो द्विजाः। विवाहयज्ञयोर्मध्ये सूतके सति चां
तराशेषमन्नं परैर्देयमित्येतत्तु भोक्तुर्गृह्यातिरिक्तजन्ममरणविषयं दातृन्नीशौचान्यस्ववृत्तेरादित्यत्रदो
षविशेषः। आह ऋतुः। पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति उक्तमिति। आशौचदूषितोऽधिकारिणि मुख्य का॰ हि॰ २५१
कालमतिक्रम्याशौचनिवृत्तौ श्राद्धं कर्त्तामिव्यमिति। गृहमेधिनस्तु मायेयासेदेवाधिकारात्तस्यां राजा निबंध
मास्तु चिवदूषितायां मुख्यकालमतिक्रम्यास्तु चिवनिवृत्तौ विवश्राद्धं कर्त्तव्ये प्राशेरजलापति नैवोकाकिनामु

६०

ख्यकाल एवामश्राद्धं। अस्मिन्पक्षे श्रस्य चानवकाशकत्वेन प्रत्यक्षत्वेन च। योगिकाक्रात्यनिकाद्बलीयम्
स्त्वान्नैवेदेवबाधः। किंतु परिभाषया योगिकस्यमात्रदित्येतदर्थमेवायोगसिद्धोप्यर्थः परिभाषितः। स्कं
दपुराणे। आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः इति। आवर्त्तनं दिनमध्यं इति द्विधा विभक्तस्याह्नो
द्वितीयो भागोऽपराह्णः इत्येकमतं। अथ त्रिधा विभक्तस्याह्नः भागोऽपराह्णमित्यपरं मतमुच्यते। तत्र श्रुतिः
पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामिति। तस्मादपराह्णे ददाति। अत्र पंचदश मुहू
र्त्तात्मकस्य दिवसस्य पंच पंच मुहूर्त्तपरिमिता। पूर्वो दिनान्यस्त्रीन भागान्परिकल्प्य क्रमाद्देवमानुषपैतृके
षु कर्मसु विनियुक्तेषु तीरप्रतीतेर्जायते। अत्रापराह्णकाले विहितस्य पार्वणश्राद्धस्यावसरस्तृतीयांश
मानवाः कर्त्तव्यतापदेशः कालविनियोगप्रकरणे दर्शयिष्यते। सापि त्रिधा विभक्तस्याह्नस्तृतीयो भा
गोऽपराह्णः इत्येकः इत्यत्रान्यार्थदर्शनेनैवानुसंधेयः। इति त्रिधा विभक्तस्य तृतीयो भागोऽपराह्ण इति मतां। अ
थ चिपंचभागेश्च चतुर्थीविभक्तस्य तृतीयो भागोऽपराह्ण इत्यपरं। तथा च गोभिलः। पूर्वाह्णः प्रहरं सार्द्धं मध्याह्न

प्रहरं तथा। आतृतीयादपराह्णः सायाह्नस्ततः परमिति। अत्र सूर्योदयात्प्रभृति सार्द्धप्रहरपरिमितं मध्याह्नो
त ऊर्द्धं तृतीयप्रहरसमाप्तिवर्जितं सार्द्धप्रहरपरिमितमपराह्णं तदूर्द्धं प्रहरमात्रं सायाह्नमाहुरित्यर्थः। इति चतु
र्द्धा विभक्तस्य तृतीयो भागोऽपराह्ण इति मतं॥छ॥ अत्र समविभागैः पंचधा विभक्तस्याह्नश्चतुर्थो भागोऽप
राह्ण इत्यपरमपि मतं। तत्र श्रुतिः। आदित्यस्त्वेव सर्वऋतवः स यदैवोदेत्यथ वसंतो यदा संगवोऽथ ग्रीष्मो
यदा मध्यंदिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमंत इति। एवं पंचदशमुहूर्त्तसंमितस्य दिवस्य पंच
धा विभागे क्रियमाणे त्रिमुहूर्त्तपरिमिताः प्रातरादयः पंचकाला भवंति। अत्र यद्यपि तस्मादु मध्यंदिन ए
वाधीते त्यनंतरमेवाम्नायसमानस्याध्यायसंबंधे मध्यंदिनविधेः शेषभूतया पंचधा विभागः श्रूयते तथापि प्रा
तरादिविहितैः कर्म्मभिराकांक्षितस्य कालपरिणामज्ञापकोनयोपजीव्यमानः सर्वकर्म्मसंबंधितो भवतोऽत्र का॰हि॰
त एवायं त्रिमुहूर्त्तपरिमाणावयवः पंचधा विभागः साधारणेन वक्ष्यते। तथा च प्रभासखंडे मुहूर्त्तत्रितयं प्रातस्ता २५२
वानेव तु संगवः। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः। सायाह्नस्त्रिमुहूर्त्तोऽपि सर्वकर्मबहिष्कृत इति।

६१

अत एव तत्कालकर्म्ममात्रोपयोगितामस्य विभागस्याह॥ पराशरः। लेखाप्रभृत्यथादित्यान्मुहूर्त्तास्त्रय एव तु
प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचमः। संगवस्त्रिमुहूर्त्तोऽथ मध्याह्नस्तासमस्ततः। ततस्त्रयो मुहूर्त्ता
श्च अपराह्णो विशिष्यते। पंचमोऽथ दिनांशो यः स सायाह्न इति स्मृतः। यथोदितेषु विहितं तत्र कुर्याद्विचक्ष
णः। उदयमानस्य भास्वन्मंडलस्य रेखावस्थाकारामनभ्रप्रथमोपलंभनायोग्यो भागो लेखाः। आदित्या
दादित्योदयात्। तथा च लेखाप्रभृत्यादित्योदयादारभ्य यो मुहूर्त्तास्तः प्रातःसंज्ञका भवंतीत्युक्तं भवति। उक्तं
हि स्कंदपुराणे। लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तो गते तु वै। प्रातस्तत्र स्मृतः कालो भागस्त्वह्नः स पंचम
इति। यद्यदेतेषु प्रातःरादिषु कालेषु कर्म्मविहितं। तत्तदेतेषु यथोक्तेषु त्रिमुहूर्त्तपरिकुर्यादित्यर्थः॥छ॥
अथ यथोक्तवचनप्रपंचप्रमितानां पूर्वाह्णमध्याह्नापराह्णसायाह्नानां कस्मा विविच्यंते॥ प्रातःसंगवयो
रेकैक एव कस्म इति। सत्ताविपुक्त एवातः। पूर्वादिकालकस्मा एवोच्यंते। तत्र द्विधा विभागे भास्वन्मंडलोर्द्ध
दर्शनिरीक्षणक्षणादारभ्याष्टममुहूर्त्तपूर्वार्द्धसमाप्तिपर्यंतः पूर्वाह्णः त्रिधा विभागे लेखाप्रकाशात्प्रभृति पंच

धाविभागेत्वस्मादारभ्यपंचमुहूर्त्तपरिमितस्यकालस्यपूर्वाह्णत्वंवक्तव्यं।तदाहि।योगिकींवृत्तिंपरिकल्प्यपू
र्वाह्णशब्दस्यार्थोवाच्यः।सचतद्धिरूढमध्याह्नादिसंज्ञानविरुद्धोवक्तुमुचितः।यद्यपिदिनाद्यस्यपंचमुहूर्त्त
स्यप्रातःसंगवात्मकसंज्ञाद्वयावरोधोस्ति।तथाप्यसौनियोगविरोधीतिनपूर्वसंज्ञानिवेशपरिपंथितां
प्रतिपद्यते॥ ॥इतिचतुर्विधपूर्वाह्णविवेकः॥ ॥छ॥ ॥अथमध्याह्नकल्पः।द्विधाविभागेदिवसस्यमध्याह्न
त्वणाद्वयतोमध्याह्नविहितकर्मप्रयोगपर्याप्तमध्याह्नः।अमात्याचात्रविरुद्धसंज्ञांतरनिवेशविशेषा
भ्रपेयत्रिधाविभागेपंचमुहूर्त्तादारभ्यदशममुहूर्त्तावसानावधिर्मध्याह्नः।चतुर्द्धाविभागेषष्ठमुहूर्त्तेतृ
तीयपादोत्तरार्द्धादारभ्यदशममुहूर्त्तद्वितीयपादपूर्वार्द्धसमाप्तिपर्यंतः।पंचधाविभागेऽष्टममुहूर्त्ता का·हि·
दारभ्यदशममुहूर्त्तसमाप्तिपर्यंतः॥ ॥इतिचतुर्द्धामध्याह्नविवेकः॥ ॥अथापराह्णकल्पः॥द्विधाविभागेऽष्ट २५३
ममुहूर्त्तोत्तरार्द्धादारभ्यपश्चिमसंध्यारंभपर्यंतोऽपराह्णः।त्रिधाविभागेचैकादशमुहूर्त्तादारभ्यपश्चिम
संध्यारंभपर्यंतः।चतुर्धाविभागेदशममुहूर्त्तद्वितीयपादोत्तरार्द्धादारभ्यद्वादशमुहूर्त्ततृतीयपादावसानपर्यंतः

६२

पंचधाविभागेदशममुहूर्त्तादारभ्यद्वादशमुहूर्त्तावसानपर्यंतः॥ ॥अथसायंकालो।द्विधात्रिधाविभागे
तत्कालविहितकर्मप्रयोगपर्याप्तोत्तमयामपूर्वकल्पनीयः॥चतुर्द्धाविभागेद्वादशमुहूर्त्तद्वितीयपाद
दारभ्यसूर्यास्तमयाविधिः।पंचधाविभागेत्रयोदशमुहूर्त्तादारभ्यसूर्यास्तमयावधिः॥सायाह्नः॥इति
सायाह्नविवेकः॥ ॥एतेचपूर्वाह्णादयेवक्ष्यमाणविनियोगानतिक्रमेणयथासंभवंग्राह्याः।प्राशस्त्यता
रतम्यक्रमेणवा।योयंकालमपेक्ष्यसूक्ष्मः।सतस्मात्प्रशस्तमःसावधिवचनेनहिमवतःकालस्यपूर्वा
ह्णत्वेप्रमितेतदेकदेशस्यापिप्रमितमेवपूर्वाह्णत्वं।यथाहिमवत्कुहरादारभ्यपूर्वसमुद्रसीम्नोजलप्र
वाहविशेषस्यगंगात्वेप्रमितेप्रमितमेवदंतवर्त्तिनः।प्रवाहैकदेशस्यापिगंगात्वं।कथमन्यथागंगायां
स्नानंकुर्यादपराह्णेपिदृष्टयज्ञमाचरेदिति।विहितस्यतदेकदेशेनुष्ठानविधिःसिद्धः।दृश्यंतेकेचित्।समु
दायतदेकदेशयोःसाधारणाःशब्दाः।युक्तमाचार्यैः।विदोवसमुदायेचतोपराह्णेयथेष्यते---त्रिरूप
रूपवासृक्वावाक्यपदंतथेति॥अतोवांतरावधिवचनस्यमहावचनिनःपूर्वाह्णप्रमितेकदेशेननिवर्त्ते

केनचान्निः। यस्मात्तिथ्यन्तरस्य प्रतिपादनपरत्वेन चार्थवत्त्वं वक्तव्यं। तत्राद्यपक्षे महावधिवचनानार्थक्यं बाधो
स्यात्। अस्मिंस्तु अतो वांतरावधिवचनं प्रकारान्तरत्वात् सार्थमिति निश्चीयते॥ ॥अथ कुतपकालः॥ ॥स्कंदवायुपु
राणयोः॥ ऊर्ध्वं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपति क्षणं। स कालः कुतपो ज्ञेयः स्तत्र दत्तं महाफलं॥ कुः पृथ्वीं तां गोप
तिः स्वदेगोभिः स्वकीयैः करैः कार्त्स्न्येन समग्रं यस्मिन्क्षणे तपति प्रकाशं करोति स कालः कुतपसंज्ञको ज्ञेयः। तदनेन
कुतपशब्दनिर्वचनेन कुतो निरूपितः कुतपोयमसौ विति सर्वोच्छायासंकोचाद्दिवस एव मध्ये कुः पृथिवीं तप
ति। अतो दिवसमध्यः कुतपः स्यैवमसौ निर्धारितो भवति। स च मुहूर्तपरिमितोपि स्वल्पत्वमनुसंधायोपचार
वृत्त्या क्षणशब्देनोक्तः॥ उक्तं हि वायुपुराणे एवा मुहूर्तात्सप्तमादूर्ध्वं मुहूर्तान्नवमादधः। स कालः कुतपो ज्ञेयः
पितॄणां दत्तमक्षयं॥ प्रभासखंडेपि॥ अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुत
पः स्मृतः। खड्गपात्रादिकं तु कुतपदशकं॥ मध्याह्नवाक्यस्थात् पृथक्कर्तुमशक्यमिति। मध्याह्नप्रसंगादिहैवल
क्ष्यते॥ कालिकापुराणे॥ ब्राह्मणः कंबलो गावो रूप्याग्नितिथयोपि च। तिला दर्भाश्च मध्याह्नो नवैते कुतपा

का॰ हि॰
२५४

९२

स्मृताः॥ प्रभासखंडे॥ मध्याह्नः खड्गपात्रं च तथा नेपालकंबलः। रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः। पा
पं कुत्सितमित्याहुस्तस्य संतापकारिणः। अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः॥ कोपीनकीनोतुतथा
न्यः कास्त्रकंबल इति पठितो। इति कुतपः॥ ॥अथैतेषामपराह्णादिकालानां पार्वणादिश्राद्धेषु विनियोगः
कथ्यते॥ ॥तत्र शातातपहारीतौ॥ आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः। पार्वणं चापराह्णे तु प्रातर्वृद्धि
निमित्तकं॥ मनुरप्याह॥ पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्त
कं॥ मार्कंडेयः॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः। कृष्णपक्षापराह्णे तु रौहिणं तु न लंघयेत्॥ अ
त्र शुक्लपक्षे पूर्वाह्णं तागतेः कुतपः पूर्वाह्ण एव पार्वणमेकोद्दिष्टं वा श्राद्धमारंभणीयं॥ कृष्णपक्षे त्वपराह्णा
तागतेः कुतपापराह्णे एव पार्वणमेकोद्दिष्टश्राद्धमारंभणीयं॥ अथ प्रतिपत्प्रभृतिक्रमेण पुण्यतिथयः। तत्र
तावत्पुण्यः प्रतिपत्॥ पद्मपुराणे॥ चैत्रमासि महाबाहो पुण्या प्रतिपदा पुरा। तस्यां यः स्वपनं दद्यात्स्नानं कु
र्यान्नरोत्तम। न तस्य दुरितं किंचिन्नाधयो व्याधयो नृप। भवंति कुरुशार्दूल तस्मात्स्नानं समाचरेत्॥ दिव्यंनी

राजन्नेतद्धि सर्वरोगविनाशनं ॥ गोमहिष्यादि यत्किंचित्तत्सर्वं स्वगृहे नृप ॥ वस्त्रद्रम्यैस्त्रिदिसर्वैस्तोरणध
स्तातो नयेत् ॥ ब्राह्मणान्नीतथा मोज्यं कुर्यात्कुरुकुलोद्वह ॥ तिस्रएताः पुराप्रोक्ताः स्त्रियःकुरुनंदन ॥ कार्त्ति
काश्वयुजे मासि चैत्रे वापि तथा नृप ॥ भविष्यत्पुराणे ॥ तिथीनां प्रवरा यस्माद्ब्रह्मणा समुदाहृता ॥ प्रतिपादि
ता पश्चात्पूर्वं प्रतिपत्तेन चोच्यते ॥ तिस्रो ह्येताः पुराप्रोक्ताः स्त्रियःकुरुनंदन ॥ कार्त्तिकाश्वयुजे मासि चैत्रे वापि
तथा नृप ॥ स्नाने दाने शतगुणं कार्त्तिके या तिथिर्भवेत् ॥ अग्निमिष्ट्वा तु बहुधा प्रतिपद्यपि यत्कृतान् ॥ हविषा सर्वधा
न्यान प्राप्नुयाद्धर्मितो धनं ॥ वाराहपुराणे ॥ कार्त्तिके सितपक्षादौ तिथौ ऋतुमांसकैः ॥ पत्राद्यैः यत्र रात्रिः स्या
त्कार्यो वैष्णवसुखाय सा ॥ ब्रह्मपुराणे ॥ कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवान् ॥ जितश्च शंकरस्तत्र जये लेभे
च पार्वती ॥ ततो हरं शंकरो दुःखी गौरी नित्यसुखोषिता ॥ तस्माद्द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः ॥ तस्मिन्द्यूते जयो यस्य
तस्य संवत्सरं जयः ॥ पराजयो विरुद्धश्च सस्यनाशकरो भवेत् ॥ श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलंकृतैः ॥ विशे
षतश्च भोक्तव्यं प्रशस्तैर्बांधवैः ॥ तस्यां निशायां कर्तव्यं शय्यास्थाने सुशोभने ॥ गंधैः पुष्पैस्तथा वस्त्रैर्दिव्यरत्नैरलंकृतं

दीपमालापरिक्षिप्तं तथा धूपेन धूपितं ॥ दयिता निश्वसहितैर्नैत्या सा च भावे निशा ॥ नैवेद्यैः स्त्रीश्वसंहृष्ट्या
द्विजसंबंधिबांधवाः ॥ पद्मपुराणे ॥ प्रतिपदि — ब्राह्मणं गुडमिश्रैः प्रदीपकैः ॥ वासोभिरहितैः पूज्य माल्यैर्ब्रा
ह्मणा पदं ॥ गंधैः पुष्पैर्नैवेद्यैश्च शस्तानं नृपयेन्नृपात स्या प्रतिपदायां तु सगोष्ठे ब्राह्मणः पदामरपुण्यातिथि
रियं बलिराज्यप्रवर्त्तिनी ॥ ब्राह्मणेभ्यः प्रिया नित्यं बालेयी परिकीर्त्तिता ॥ ब्राह्मणान्पूजयेत्तस्यामारमानं च विश्रो
षतः ॥ सपातिपरमेस्थानं विष्णोरमिततेजसः ॥ वामनपुराणे ॥ बलिं प्रति त्रिविक्रम उवाच ॥ वीरप्रदानामतिथिर्नवभावी
महोत्सवः ॥ तत्र त्वां नरशार्दूल हृष्टपुष्टाः स्वलंकृताः ॥ पुष्पधूपप्रदानेन अर्चयिष्यंति यत्नतः ॥ तत्रोत्सवो मुख्यतमो भ
विष्यति दिवानिशं ॥ इति पुण्यप्रतिपत् ॥ अथ पुण्यद्वितीया ॥ ॥ तत्र देवीपुराणे ॥ उमां शिवं हुताशं च द्वितीयायां तु पू
जयेत् ॥ हविष्यमन्नं नैवेद्यं — — यं गंधानेतया ॥ अत्र चैत्रादौ दमनकपूजा प्रक्रांता ॥ स्कंदपुराणे ॥ आश्विने मासि
वै पुण्या द्वितीया शुक्लपक्षजा ॥ दाने प्रदत्तमेतस्यामनंतफलमुच्यते ॥ वृश्चिके च द्वितीयायां शुक्लायां पितृपूज
नां यो न कुर्याद्धिनश्यंति भ्रातरः सप्तजन्मजाः ॥ ब्रह्मपुराणे ॥ बृहस्पतौ द्वितीयायां विधिवद्विधिपूजने ॥ कृत्वान

जं समभ्यर्च्य यत्नेन तिमीक्षिताः । विधिवत्स्नातः पूजनं गायत्र्या ब्रह्मपुराणोक्तेनान्येन मंत्रेण वा कार्यं ॥
इति शुक्लद्वितीया । अथ शुक्लतृतीया देवीपुराणे । तृतीयायां यजेद्देवीं शंकरेण समन्वितां । सुगंधैः पु
ष्पधूपैश्च दमनेन सुमालिना । अत्र चैत्रो मासः प्रकृतः । पद्मपुराणे । वैशाखमासे या पुण्या तृतीया शु
क्लपक्षजा । अनंतफलदा सा तु स्नानदानादिकर्म्मसु । भविष्योत्तरे । या चैका कृतयुगाद्या सा वैशाखे सुमहातिथिः ।
तृतीया साक्षया लोके गीर्वाणैरपि पूजिता । यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु । तत्सर्वमक्षयं यस्मा
त्तेनेयमक्षया स्मृता । श्रवणेन समायुक्ता तृतीया या विशेषतः । बुधश्रवणसंयुक्ता तृतीया यदि लभ्यते । तस्यां
स्नानोपवासाद्यमक्षयं परिकीर्त्तितं । वारिदानं प्रशस्तं स्यान्मोदकानां तथैव च । वैशाखमासि राजेंद्र तृतीया
यां चंदनं देयमिति शेषः । गुडरूपाश्च दातव्या मासि भाद्रपदे तथा । पायसं वै तृतीयायां वामदेवस्य प्रीतये । मा	का॰ हि॰ २५६
घे मासि तृतीयायां गुडस्य लवणस्य च । दानं श्रेयस्करं राजन् स्त्रीणां च पुरुषस्य च । तेन सुतावाप्यमानस्तृती
या रोहिणीयुता विशेषाद्बुधयुक्ता तु तदा सा सुमहत्फला ॥ इति शुक्लतृतीया ॥ ॥ अथ शुक्लचतुर्थी ॥ वारा

५

हपुराणे ॥ चतुर्थ्यां तु गणेशस्य पार्वत्याश्च विशेषतः । पूजा कार्येत्यनुवर्त्तते ॥ देवीपुराणे ॥ गणेशं कारयेत्पूजां
लड्डुकादिसुभावितां ॥ चतुर्थ्यां विघ्ननाशाय सर्वकामसमृद्धये । चैत्रशुक्लचतुर्थ्यां च दमनकैरियं पूजा ॥
भविष्यत्पुराणे ॥ शिवा शांता सुखा राजन् चतुर्थी त्रिविधा मता । मासि भाद्रपदे राजन् शिवा लोकेषु पू
जिता । तस्यां स्नानं च दानं च उपवासो जपस्तथा । भवेत्सहस्रगुणितं प्रसादेति नृपास्तथा । तस्यां तु नृप
शार्दूल पूजयंति सदा स्त्रियः । गुडलवणपूपैश्च श्वश्रूं स्वसुरमेव च । ताः सर्वाः सुभगाः स्युर्वै विघ्नराजप्रसा
दतः । कन्यका तु विशेषेण विधिनानेन पूजयेत् । माघमासि तथा शुक्ला या चतुर्थी महीयते । शांता सा शां
तिदा नित्यं शांतिं कुर्यात्सदैव तु । स्नानदानादिकं कर्म सर्वमस्यां कृतं विभो । भावसहस्रगुणितं प्रसाद
दंतिनो नृप । कृतोपवासो यस्तस्यां पूजयेद्विघ्ननायकं । तस्य होमादिकं कर्म भवेत्साहस्रिकं नृप । मोदकं
सगुडं शाकं गुडपूपाश्च भारत । दद्याद्ब्राह्मणेभ्यस्तु विप्रेभ्यः फलं साहस्रिकं स्मृतं । विशेषतः स्त्रियो राजन् पू
जयंत्यो गुरुं नृप । गुडलवणघृतैर्वीर सुभगाः स्युः कुरूद्वह । यदा शुक्लचतुर्थ्यां तु वारो भौमस्य वा भवेत् ॥

तदासौ सुखदा ज्ञेया सुखनामेति कीर्तिता॥ स्नानदानादिकं कर्म्म सर्वमक्षयमश्नुते॥ यमः॥ चतुर्थ्यां भरणीयोगे
शनैश्चरदिने यदि॥ तदाभ्यर्च्य यमं देवं मुच्यते सर्वकिल्बिषैः॥ इति पुण्या चतुर्थी॥ ॥अथ पुण्या पंचमी॥ भ
विष्यपुराणे॥ पंचमी दयिता राजन्नागानां हर्षदायिनी॥ पंचम्यां स्नपयंतीह नागान्क्षीरेण ये नराः॥ तेषां कु
ले प्रयच्छंति अभयं प्राणदक्षिणां॥ ब्रह्मपुराणे॥ शुक्लपक्षे अथ पंचम्यां चैत्रे मासि स्तनानना॥ श्रीब्र
ह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया॥ तस्मात्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुंचति॥ एषा श्रीपं
चमी कार्या विष्णुलोकेगतिप्रदा॥ भविष्यत्पुराणे॥ सुप्ते जनार्दने कृष्णपंचम्यां भवनांगणे॥ पूज
येन्मनसा देवीं स्नुहीविटपसंश्रयां॥ पितृमंदपलाशानि स्थापयेद्भवनोदरे॥ पूजयित्वा नरो देवीं नस
र्पभयमाप्नुयादिति॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥ द्वारस्योभयतो लेख्या गोमयोल्बणाः का॰हि॰ २५७
न विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ ये तस्यां
पूजयंतीह नागान्भक्तिपुरःसराः॥ तेषां तु सर्पतो वीर भयं भवति न क्वचित्॥ तथा भाद्रपदे मासि पंचम्यां श्र

५६

द्धयान्विताः॥ समालिख्य नरो नागान्कृष्णवर्णादिवर्णकैः॥ पूजयेद्गंधपुष्पैश्च सर्पिर्गुग्गुलपायसैः॥
तस्य तुष्टिं प्रयांत्याशु पन्नगास्तक्षकादयः॥ आसप्तमात्कुलात्तस्य न भयं सर्पतो भवेत्॥ भविष्यपुराणे
॥पुण्या भाद्रपदे प्रोक्ता पंचमी नागपंचमी॥ स्कंदपुराणे॥ शुक्ला मार्गशिरे पुण्या श्रावणे या च पंचमी॥ स्ना
नदानैर्बहुफला नागलोकप्रदायिनी॥ वाराहे॥ माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः॥ पंचम्यां कुं
दकुसुमैः पूजा कार्या समृद्धये॥ ॥अथ पुण्या षष्ठी॥ ब्रह्मपुराणे॥ जातः स्कंदस्तु षष्ठ्यां तु शुक्लायां
चैत्रनामनि॥ सेनापत्येऽभिषिक्तश्च देवानां ब्राह्मणस्तथा॥ जितवांस्तारकं दैत्यं क्रौंचं चैवाबिभदच्च॥
तस्मात्तत्र विधिना स्कंदो मास्यैः सुगंधिभिः॥ दीपालंकारवस्त्रान्नकुक्कुटैः पूज्य एव हि॥ सकुक्कुटक्रीड
नकैरम्यैर्घं— चामरदर्पणैः॥ सर्वासु शुक्लषष्ठीषु विधेयमिति॥ भविष्यत्पुराणे॥ ये यं भाद्रपदे मासि ष
ष्ठी तु भरतर्षभ॥ स्नानदानादिकं सर्वमस्यामक्षयमुच्यते॥ षष्ठ्यां फलाशनो यो राजन्विशाखाकार्त्तिके च प
[illegible] स्तु नियतो ब्रह्मचारी समाहितः॥ षष्ठ्यां फलाशनो यः स्यान्नक्ताहारो भविष्यति॥ इह चामुत्र योग्य

र्यैलभते ख्यातिमुत्तमां ॥ राज्यच्युतो विशेषेण राज्यं च लभते चिरात् ॥ तथा षष्ठी भाद्रपदे भानुप्रीत्यै पुण्या सपा
पवा ॥ तथा ॥ यश्च भाद्रपदे मासि षष्ठ्यां स्नात्वा तु मानवः । योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनं ॥ ब्रह्महत्यादि
पापैश्च मुच्यते नात्र संशयः ॥ तस्मात्तस्यां सदा पश्येत्कार्त्तिकेयं स देवहि ॥ त्रिः कृत्वा दक्षिणामाशां गाङ्गेयः श्र
द्धयान्वितः ॥ पूजयेद्देवदेवेशं सगच्छन्ति मन्दिरं ॥ गाङ्गेयं कार्त्तिकेयं त्रिः कृत्वा दक्षिणामाशां गच्छेत्युक्तो विंध्यात्
रतो गच्छतामेतत्फलं ॥ भविष्यपुराणे ॥ या षष्ठी शुक्लपक्षस्य मार्गशीर्षे हरिप्रिया । महाषष्ठी तु सा ख्याता
यस्यां कृतोऽकृतनाशनः ॥ इति पुण्यषष्ठी ॥ ॥ अथ पुण्यसप्तमी ॥ भविष्ये ॥ षष्ठ्यामुपोष्य यः सम्यक् सप्तम्यां कृ
ष्णमर्चयेत् । रोगमुक्तो वित्तवांश्च प्राप्नोति । सितेफलो मासि भाद्रपदे शुक्ला सप्तमी या गणाधिपा । अपराजे
ति विख्याता महापातकनाशिनी ॥ या तु मार्गशिरे शुक्ला सप्तम्यानंददायिनी ॥ जयंति नाम सा प्रोक्ता महापापह का॰ हि॰ २५८
रा स्मृता ॥ यस्यामभ्यर्चितस्यादौ रूपानाय दिवाकरः ॥ माघमासस्य सप्तमी सा तस्माद्रथसप्तमी ॥ इत्येषा कथिता वीर
रथाख्यसप्तमी परा महासप्तमीति विख्याता महापातकनाशिनी ॥ विष्णुः ॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य स

९१

प्तमी ॥ अरुणोदयवेलायां तस्याः स्नानं महाफलं ॥ तथा ॥ माघमासस्य सप्तम्यामुदयत्येव भास्करः ॥ विधि
वत्तत्र वस्नानं महापातकनाशनं ॥ माघे मासि सिते पक्षे सप्तमी कोटिभास्करे ॥ कुर्यात्स्नानादिदानान्या
युरारोग्यसंपदः ॥ भविष्यपुराणे ॥ शुक्लपक्षस्य सप्तम्यां सूर्यवारो भवेद्यदि । सप्तमी विजया नाम तत्र द
त्तं महत्फलं ॥ भविष्ये ॥ शुक्लपक्षस्य सप्तम्यां नक्षत्रे पंचतारके । रोहिण्यश्लेषा हस्त पुष्य मघा ॥ शुक्लपक्षे
तु सप्तम्यां नक्षत्रे सविता भवेत् । आद्ये पक्षे तु देवेश तदा सा भद्रतां व्रजेत् । स्नपनं तत्र देवस्य घृतेन कथितं बु
धैः ॥ इत्येषा कथिता वीर भद्रनामेति सप्तमी ॥ यास्तु पोष्य नरो भास्करं ब्रह्मलोकमवाप्नुयात् । सवितृनक्षत्रे हस्तो
प्रथमे पादयोग इति ॥ तथा शुक्लपक्षे तु सप्तम्यां यदा कर्कसंक्रमो भवेत् । तस्मात्सा सुमहापुण्या सप्तमी पाप
नाशिनी ॥ तस्यां संपूज्य देवेशं चित्रभानुं दिवाकरं ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ यश्चोपवासं
कुरुते तस्यां नियतमानसः । सर्वपापविशुद्धात्मा स्वर्गलोके महीयते ॥ शुक्लपक्षे तु सप्तम्यां यदा संक्रमते
रविः ॥ महाजयेति तस्याद्धि सप्तमी भास्करप्रिया ॥ स्नानं दानं जपो होमः पितृदेवादिपूजनं ॥ सर्वं कोटिगुणं प्रोक्तं

भास्करस्य वचो यथा॥ आदित्यपुराणे॥ रेवतीरविसंयुक्ता सप्तमी स्यान्महाफला॥ रेवती यत्र सप्तम्यां आ
दित्यदिवसे भवेत्॥ तदानंशात सहस्रमिति प्राह दिवाकरः॥ इति पुण्यसप्तमी॥ अथ पुण्यात्॥ अशोको
र्चयेद्दुर्गामशोकैः कालिकां पिबेत्॥ गर्गः शिवः॥ चैत्रमासि सिताष्टम्यां ये पिबंति पुनर्वसौ॥ अ
शोककस्याष्ट कालिकां सन शोकमवाप्नुयात्॥ त्वमशोक शिवा भीष्ठं मधुमासे समुद्भवे॥ पिबामि
शोकसन्तप्तं मामशोकं सदा कुरु॥ इति पानमंत्रः॥ क्वचिद्धरा भीष्ठ इति पाठः॥ भविष्यत्पुराणे॥ पौ
षे बुधाष्टमी युक्ता महापापमहाफला॥ ब्रह्मांडपुराणे॥ ॥महादेव उवाच॥ पौषे मासि यदा देवि अष्ट
म्यां यमदेवतं॥ नक्षत्रं जायते पुण्यं यमलोके यमदेवतं॥ भरणी॥ तदा सा तु महापुण्या जयंती साष्ट
मी स्मृता॥ तस्यां स्नानं तपो दानं जपहोमश्च तर्पणं॥ सर्वे कोटिशतं देवि कृतं भवति कृत्स्नशः॥ भ॰ का॰हि॰ २५९
विष्णोर्नरः॥ सिंहगे केहरो हिएयां यदा कृष्णाष्टमी भवेत्॥ तस्यामभ्यर्चनं शौरे र्हंति पापं त्रिजन्मजं॥ वायुपु
राणे॥ शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलं॥ संवत्सरकृतं पापं तत्क्षणादेव मुंचति॥ क्वचिद्वर्ष

५८

पापात्॥ माघमासि सिताष्टम्यां सलिलं भीष्मवर्मणे॥ श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभा
गिनः॥ वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च॥ अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे॥ इ
ति जलमंत्रः॥ अत्र केचिदाहुः॥ प्रास्तुत्वः श्राद्धं कुर्यो भीष्मस्य वसुतारवो देवत्वस्या क्षपतीन
वाच्यं॥ वसुवतारत्वेपि तस्य क्षत्रियस्य सतस्तस्य सकलजनपितृत्वावगमाद्दक्षिणाभिमुखः
श्राद्धं कुर्यादिति॥ क्षत्रियत्वपुरस्कारेण प्रवृत्तौ शिष्टाचारविरोधप्रसंगात्॥ ब्राह्मणोहीनव
र्णस्य क्षत्रियस्यौर्ध्वदेहिकानुष्ठानप्रतिषेधः॥ देवत्वपुरस्कारेणानुष्ठानेन शिष्टाचारविरोधो द्वय
पालोचन[illegible]ः क्षत्रियत्वपुरस्कारावगमात्॥ वर्म्मेति क्षत्रियेषु क्तमिति शंखस्मरणात्॥ माघमा
सि सिताष्टम्यां सलिलं भीष्मवर्मणे इति॥ इति विधिवाक्यादप्येवमेवावगम्यते॥ न च ब्राह्मण एव
राद्धे वर्म्मेशाद्धो विधीयत इति वाच्यं॥ क्षत्रियश्राद्धे ब्राह्मणस्यापि सादिशाद्धानामपि विधाननिषेध

स्यात्तदन्यक्षत्रियविषयेति वाच्यं। क्षत्रियस्याब्राह्मणरूपकर्तृविशेषनिषेधस्याष्टम्याश्राद्धविषयत्वमि
ति। यदि तर्हि विपरीतप्रसंगः। न चास्य निषेधस्यैव ब्राह्मणापेक्षत्वाद्धिकस्यापत्तेरष्टम्याश्राद्धे विषयत्वमि
ति ब्राह्मणस्याप्यधिकार इति वाच्यं। विकल्पस्य न्यायादेवतानां वाजेषु यामहे करोमीति वाच्यपर्युदासस्या
त्। श्राद्धाचारस्य नियतो न निषिध्यते। विद्यमानत्वेपि बाध्यते। श्रुतिस्मृतिविहितो धर्मस्तदनेनाशि
ष्टाचारः प्रमाणमिति वशिष्ठस्मरणात्। षट्त्रिंशन्मते रेकन्यां कृष्णपक्षे विशिष्यते॥ अष्टमी साष्ट
कानाम शाकेनापि न लोपयेत्॥ ब्रह्मांडपुराणे॥ आग्रहायण्याः परं तस्त्वष्टकास्तिस्रः कृष्णपक्षेषु।
चैंद्री प्राजापत्या द्वितीया वैश्वदेवी तृतीया। आद्या शाके द्वितीया मांसे स्मृता तृतीया त्वपूपैः। शिवरहस्ये॥ म
र्गाद्यपरपक्षेषु सर्वामध्याद्युशाष्टितास्फः॥ स्वस्त्वष्टकास्तिस्रः सपुष्पादिष्वनुक्रमात्॥ आश्वला
यनः। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति देवता इति॥ शतपथे तु॥ द्वादशा
पौर्णमास्यो द्वादशाष्टका द्वादशामावास्या इति॥ अष्टका इति कृष्णाष्टम्य इत्यर्थः॥ अष्टकासु

६७

च पदत्तेन दनेन समुदाहृतं॥ शशिपुत्रसमायुक्ता परिहर्षसिताष्टमी॥ तस्यां नियतकर्तारो नस्फः
खंडितसंपदः॥ शशिपुत्रो बुधः॥ ॥इति पुण्याष्टमी॥ ॥अथ पुण्यनवमी॥ वाराहपुराणे॥ अष्टका
सु च वृद्धौ च माघ्यां श्राद्धं प्रयोजयेत्॥ वृद्धादौ तासाष्टकासु च देयमिति महाचारात्॥ नवम्यां हिम
राह्व्यायो देवी समाधिना॥ वरदा सर्वलोकस्य भविष्यति न संशयः॥ नवम्यां यश्च पिष्टाशी भवि
ष्यति हि मानवः॥ महीच वित्तसंपन्नो भविमानागतस्य तस्याश्चेत्यर्थः॥ केचिदश्विनशुक्लनवमी
गृहीतवत्यः कुः॥ तृतीयाचेवंवैशाखे नवम्यश्च युजेतथेति॥ भविष्यत्पुराणे॥ प्राशस्त्यश्रुतेरिति तद
युक्तं॥ प्राशस्त्यश्रवणे फलाधिक्यमवगम्यते। न तु नवमीविशेषपरत्वं। संकोचे प्रमाणाभावात्। देवी
पुराणे॥ नवम्यां पूजयेद्देवीं महामहिषमर्दिनीं॥ कुंकुमागरुकर्पूरमहान्नध्वजतर्पणैः॥ दमनैर्मरुप
त्रैश्च विजयाख्यं पदं लभेत्॥ ब्रह्मपुराणे॥ चैत्रनवम्यां शुक्लायां भद्रकाली महाबला॥ योगिनीनां तु
सर्वासामाधिपत्ये निवेशिता॥ तस्मात्तां पूजयेत्तत्र सोपवासो जितेंद्रियः॥ विचित्रैर्बलिभिर्न स्या

सर्वासु नवमीषु च॥ देवीपुराणे॥ आश्विने नवमी शुक्ला तस्यां कोटिगुणं फलं॥ तथा॥ आश्विनस्य तु मास
स्य नवमी शुक्लपक्षजा॥ जायते कोटिगुणं पुण्यं दानं तस्यां नराधिप॥ शुक्लपक्षे नवम्यां च कार्त्तिक
स्य समाहितः। स्नायाद्दद्यान्नमस्कुर्याद्दक्षयं लभते फलं॥ पद्मपुराणे॥ कार्त्तिके नवमी शुक्ला पितॄ
णामुत्सवाय च॥ तस्यां स्नातं कृतं दत्तं अनंतफलदं भवेत्॥ ॥इति पुण्यनवमी॥ ॥अथ पुण्यदशमी
ज्येष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता॥ तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषतः॥ दशपापान्याद
।पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः॥ असंबद्धप्रलापश्च पापं यस्याच्चतुर्विधं॥ अदत्तानामुपादा
नं हिंसा चैवाविधानतः॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतं॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंत
नं॥ वितथाभिनिवेशश्च त्रिविधं कर्म मानसं॥ भविष्ये॥ ज्येष्ठशुक्लदशम्यां च भवेद्भौमदिनं यदि॥ गंगाव
तीर्णा हस्तर्क्षं सर्वपापहरा स्मृता॥ हस्तान्विता ज्येष्ठशुक्लदशमी दशपापहरा॥ सेवं गंगास्नानान्मंगलदि
नसंयुक्ता सर्वपापहरेत्यर्थः॥ प्रस्थितहस्तार्क्षे इत्यस्यानंतरमेव पठ्यते॥ सैषा दशहरा स्मृता॥ गंगास्ना

का॰हि॰
२६१

७.

न कृतार्थः स्यात्तस्मिन् योगे सकृन्नरः॥ हरेद्दशपापानि गंगा तत्र न संशयः॥ लघुपापक्षयश्चात्र दृष्ट
व्यः॥ न तु गुरुपापादिक्षयः॥ तद्विषयगुरुप्रायश्चित्तविधानवैयर्थ्यप्रसंगात्॥ तथा च गौतमः॥ ए
नसि गुरुणि गुरुणि लघुनि लघुनि॥ ब्रह्मांडपुराणे॥ कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा॥
तस्यां व्रतानि कुर्वाणो लभते फलमुत्तमं॥ ॥इति पुण्यदशमी॥ ॥अथ पुण्यैकादशी॥ वाराहपुरा
णे॥ एकादश्यां तु नक्तेन नरः कुर्यात्तथा विधि॥ मार्गशीर्षे शुक्लपक्षादारभ्याहं विचक्षणः॥ तदं
धनदश्रेष्ठं कृतं वित्तं प्रयच्छति॥ तस्य प्रसाददो प्रीतस्तिथिमेकादशीं प्रभुः॥ तस्यामनग्निपक्वा
शी यो भवेन्नियतः शुचिः॥ तस्मात्सो धनदो देवस्तुष्टो वित्तं प्रयच्छति॥ देवीपुराणे॥ पुष्यर्क्षैकादशी
शुक्ला सुपुण्या पापनाशनी॥ विष्णुधर्मे॥ एकादश्यां शुक्लपक्षे यदर्क्षं वै पुनर्वसुः॥ नाम्ना सावि
जया ख्याता तिथीनामुत्तमा तिथिः॥ यो ददाति तिलप्रस्थं सर्वकालं तु वत्सरं। उपवासपरस्तस्यां
कारयेत समं स्मृतं॥ एकादश्यां सिते पक्षे पुष्यर्क्षं यत्र सत्तमा। तिथौ भवति सा प्रोक्ता विष्णुना पाप

नाशनी॥ तस्यामाराध्य गोविंदं जगतामीश्वरेश्वरं॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः॥ यश्चोप
वासं कुरुते तस्यां स्नातोऽहि सर्वतः॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ दानं प्रदीयते किंचित्स
मुद्दिश्य जनार्दनं॥ होमो वा क्रियते तस्यामक्षयं कथितं फलं॥ ॥इति पुण्यैकादशीविवेकः॥ ॥अथ पु
ण्यद्वादशी॥ वाराहपुराणे॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ द्वादश्यां योर्चयेद्विष्णुमनंतफल
माप्नुवेत्॥ द्वादश्यां शुक्लपक्षस्य चंपकैरर्चयेद्धरिं॥ विष्णुधर्मोत्तरे॥ द्वादशीषु च यद्दत्तं शुक्लामनुवि
शेषतः॥ श्रवणेन च शुक्ला सु तत्रापि द्विजसत्तमाः॥ विशेषाद्बुधसंयुक्ता स्तु कृष्णपक्षायुता तथा॥ तथ्य
र्क्षसंयुता वै चैत्रे द्वादशी स्यान्महाफला॥ मार्गशीर्षे फाल्गुनी॥ हस्तयुक्ता तु वैशाखे ज्येष्ठे तु स्वातिसं
युता॥ मैत्रेण च तथाषाढे मूलोपेता च वै नभे॥ वैष्णवे श्रावणे मासि पुनर्भोऽष्टपदे तथा॥ श्रवणेनैव स
मायुक्ता अश्विन्येकादशी भवेत्॥ भवेत्याजर्क्षसंयुता॥ अजर्क्षं भद्रपदा॥ कार्तिके रेवतीयुक्ता सौम्ये
कृत्तिया तथा॥ सौम्ये मार्गशीर्षे। पौषे मृगशिरोपेता माघे वादित्यसंयुता॥ आदित्यं पुनर्वसुः योगे एते

का॰हि॰
२६२

६१

संयुतासु स्नानमुपोषितं॥ सकृत्कृतं मनुष्याणामक्षयं फलदायकं॥ विष्णुः॥ मार्गशीर्षे शुक्लैकादश्यामु
पोषितो द्वादश्यां भवेत्तं वासुदेवमर्चयेत्॥ गंधधूपदीपनैवेद्यैर्वह्नि ब्राह्मणतर्पणैः॥ व्रतमेतत्संवत्सरं कृ
त्वा पापेभ्यः पूतो भवति॥ यावज्जीवं कृत्वाश्वमेधफलमवाप्नोति॥ उभयपक्षे द्वादशीष्वेवं संवत्सरेण स्व
र्गलोकं प्राप्नोति॥ यावज्जीवं विष्णुलोके॥ गरुडपुराणे॥ मासि कृष्णे च द्वादशी ज्ञेया उपवासे महाफला
॥ फलं दत्तकृतानां च तस्यां लक्षगुणं भवेत्॥ विष्णुधर्मे॥ माघ्यां तु समतीतायां श्रवणेन च संयुता॥ द्वा
दशी या भवेत्कृष्णा प्रोक्ता सा तिलद्वादशी॥ तिलैः स्नानं सितैर्होमो दीपश्च तिलतैलेन तथा देयं तिलादिकं
तिलाश्च देया विप्रेभ्यस्तस्मिन्नहनि पार्थिव॥ मूलर्क्षे गे शशिधरे माघे मासि प्रजापते॥ एकादश्यां कृष्ण
पक्षे सोपवासो जितेंद्रियः॥ द्वादश्यां षड्विलाधारं कृत्वा पापैः प्रमुच्यते॥ तिलोद्वर्ती तिलस्नायी तिलहो
मी तिलोदकी॥ तिलभुक् तिलदाता च षट् तिलाः पापनाशनाः॥ असकृत्षट्तिलान् सर्वपापैः प्रमु
च्यते॥ त्रीणि वर्षसहस्राणि स्वर्गलोके महीयते॥ ज्योतिःशास्त्रे॥ पंचाननस्थो गुरुभूमिपुत्रो मेषे रविः॥

स्यात्यदि शुक्लपक्षे॥ समानेषानाकरान्नरःणशुक्लातिथिर्व्यतीपातहृतीद्‌योगः॥ अस्मिंस्तु गोभूमिहिरण्य
वस्त्रदानेन सर्वं प्रविलयपापं॥ सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्वं लभते मनुष्यः॥ पंचाननः सिंहराश्यनिधा
नः तिथिर्द्वादशीकरनंदनक्षत्रे॥ ॥इति पुण्यद्वादशी॥ ॥अथ पुण्यत्रयोदशी॥ स्कंदपुराणे॥ चैत्रत्रयोदशी
पुण्या तस्यां दशगुणं फलं॥ पाद्मे॥ यस्तु चैत्रत्रयोदश्यां स्नानदानं समाचरेत्॥ फलं दशगुणं प्रोक्तं तस्य कर्मण
त्रमतेन नरः॥ तथा॥ चैत्रे शुक्लत्रयोदश्यां मदनं चंपकात्मजं॥ कृत्वा संपूज्य यत्नेन विजनीस्वजनीस्वजनेन तु॥ त
नः संतुष्टः धुक्तितः कामः पुत्रपौत्रसमृद्धिदः॥ देवीपुराणे॥ कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि॥ रतिपत्नी
समायुक्तो ऽशोकगुणभूषितः॥ कुंभे तु सितवस्त्रैर्वालेख्या वस्त्रफलादिभिः॥ खंडशर्करनैवेद्यैः सौभाग्यम
तुलं लभेत्॥ कामचंद्रमनके पूज्य इति विधेयं॥ ब्रह्मपुराणे॥ त्रयोदशीषु च यथा कामः पूज्यस्तथा जनैः॥ का॰ नि॰ २६३
न्दातिथिसंस्थे॥ कृष्णपक्षे त्रयोदश्यां मघास्विंदुः करे रविः॥ यदा तदा गजच्छाया श्राद्धं पुण्यैरवाप्यते॥ इति पुण्य
त्रयोदशी॥ ॥अथ पुण्यचतुर्दशी॥ पुराणे॥ चैत्रसितचतुर्दश्यां नवेत्कामं महोत्सवे॥ जुगुप्सलौकिकोनर्त्त

७२

त्तगीतवाद्यादिनिर्घोषं॥ नगवस्तु भ्यते कामः पुत्रपौत्रसमृद्धिदः॥ चैत्रकृष्णचतुर्दश्यां यः स्नायात्तु शि
वसन्निधौ॥ गंगायां तु विशेषेण स न प्रेतो ऽभिजायते॥ चैत्रकृष्णचतुर्दश्यां अंगारकदिने यदि॥ पि
शाचत्वं पुनर्वस्या गंगायां स्नानभोजनात्॥ ब्राह्मे॥ आषाढमासि संताक्षि शिवं संपूज्य मानवः॥ सर्व
पापविनिर्मुक्तः सर्वसंपदमाप्नुयात्॥ मत्स्यपुराणे॥ आराधिते महेंद्रध्वजाकारासु यष्टिषु॥ त
तः शुक्लचतुर्दश्यामनंतं पूजयेद्धरिं॥ कृत्वा दर्भमयं चैव वारिधानीसमन्वितं॥ पुष्पधूपादिभि
र्देवमीप्सितं काममाप्नुयात्॥ लिंगे॥ ॥वैशाखे शुक्लपक्षे च या पाषाणचतुर्दशी॥ तस्यामाराधयेद्गौ
रीं वक्तं पाषाणभक्षणैः॥ पाषाणकरपिष्टकैरित्यर्थः॥ कार्त्तिके सोमवारेण चित्राकृष्णचतुर्दशी॥
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवं॥ स्कंदे॥ चैत्रे चतुर्दशी शुक्ला श्रावणप्रोष्ठपादयोः
माघस्य या कृष्णपक्षे दाने बहुफला हि सा॥ मात्स्ये॥ यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशीं
पापुनर्यातितस्यां तु नियतस्तर्पयेद्यमं॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वतप्प

कालायसर्वभूतक्षयायच॥दध्नोदरायदंडायचताधिपायपाशिने॥उदुंबरायघोरायचित्रगुप्तायतेनमः
एकैकस्यतिलैर्मिश्रान्दद्यात्त्रींस्त्रीन्जलांजलीन्॥संवत्सरकृतंपापंतत्क्षणादेवनश्यति॥देवीपुराणे
तथाकृष्णचतुर्दश्यांसोमाहेपितृतर्पणे।सोमाहइतिशास्त्र्यातिशयंदर्शयति॥सर्वोप्यचतुर्दश्यांन
दीजलेस्नातोधर्मराजेश्वजपित्वासर्वपापेभ्यःस्तोभवति॥ ॥इतिपुण्यचतुर्दशी॥ ॥अथपौर्णम
सी॥संवर्त्तः॥मासिमासितुसंप्राप्तेपूर्णिमायामुपोषितः॥ब्राह्मणेभ्यस्तिलान्दत्वासर्वपापैःप्रमुच्यते॥अ
वदानंपौर्णमास्यांविधीयते।प्राशनवात्।ततश्चार्थाच्चतुर्दश्यामुपवासः॥विष्णुधर्मोत्तरात्॥पौर्ण
मासीषुसर्वासुमासर्क्षसहितासुच।दत्तानामिहदानानांफलंदशगुणंभवेत्॥महतीपौर्णमासीसा
प्रोक्ताहर्षेणदुनागुरौवैशाखीकार्त्तिकीमाघीपूर्णिमातुमहाफला॥स्कंदपुराणे॥यस्याःहर्षेणदुनायोगं
यातिजीवोमहाबलः॥पूर्णमासीतुसाज्ञेयामहापूर्वाद्विजोत्तम।स्नानेदानेतथाजप्यमनंतफलद का॰१ह॰ २६४
देस्मृता।ज्योतिःशास्त्रे॥दृश्यतेसहितोदैत्यस्यांदिविचेंदुबृहस्पती।पौर्णमासीतुमहतीप्रोक्तासंव

७२

त्सरेणसा॥तस्यांदानोपवासाद्यमक्षयंपरिकीर्त्तितं॥मासाख्यर्क्षेचेद्गुरुस्तस्मात्सचंद्रश्चरविः॥पूर्णिमाजीववा
रेतुमहच्छ्वेतुसातिथिः॥हरिक्षेत्रेचगंगायांसमुद्रेनैमिषेतथा॥महाशब्दतिथौस्नानंदानंश्राद्धमनंतकं॥ऐंद्रेगु
रुः॥शशीचैवप्राजापत्येरविस्तथा॥पूर्णिमायाःसमासस्यमज्येष्ठीतिकीर्त्तिता॥ऐंद्रंज्येष्ठाप्राजापत्यरोहिणी॥
पद्मपुराणे॥आग्नेयेतुयदाऋक्षेकार्त्तिक्यांतुभवेत्क्वचित्॥महतीसातिथिर्ज्ञेयास्नानदानादिचोत्तमा॥आ
ग्नेयमृक्षंकृत्तिकायदायाम्येभवेद्दक्षेपौर्णमास्यांतिथौक्वचित्।तिथिसापिमहापुण्याऋषिभिःपरिकी
र्त्तिता॥याम्यमृक्षंभरणी॥प्राजापत्यंतथाऋक्षंतिथौतस्यांनराधिप।सामहाकार्त्तिकीप्रोक्तादेवानामपि
दुर्लभा।प्राजापत्यमृक्षंरोहिणी॥मंदेवार्केगुरौवापिवारेष्वेतेषुचत्रिषु।त्रीण्येतानिचऋक्षाणिस्वयंप्रोक्तानि
ब्रह्मणा।अत्राश्वमेधिकंपुण्यंस्नातस्यभवतेनृप।दानमक्षयतांयातिपितृणांतर्पणंतथा॥कार्त्तिकीरो
हिणीयाश्चेद्युक्तायाकार्त्तिकीभवेत्॥सामहाकार्त्तिकीप्रोक्तादेवानामपिदुर्लभा॥ब्रह्मपुराणे॥पुण्यामं
हाकार्त्तिकीस्याज्जीवेंदूकृत्तिकासुचामघास्थयोश्चजीवेंद्वोर्महामाघीतिकथ्यते॥ज्योतिःशास्त्रे॥मे

षष्ठेत्पदा शौरि- हिंनगुरुर्नंभमाः। भास्करस्य श्रावण्यां स्यान्महामाघीति सा स्मृता॥ शालिग्रामे महाचैत्री ज्ञेता
पुंसां महाफला। गंगायां चैव वैशाखी ज्येष्ठी वै पुरुषोत्तमे॥ आषाढी वै कनखले केदारे श्रावणी तथा॥ महानादी बदर्यां
च तु आयामेव वाश्विनी॥ पुष्करे कार्त्तिकी कन्याकुब्जे मार्गशीर्षी तथा॥ अयोध्यायां महापौषी ह्येताः स्युः महाफलाः
महामाघी प्रयागे तु नैमिषे फाल्गुनी तथा॥ लिंगपुराणे॥ आश्विने पौर्णमास्यां च आद्ये जागरणं निशि॥ कौमुदी सा
समाख्याता कार्या लोकविभूतये॥ कौमुद्यां पूजयेल्लक्ष्मीं इन्द्रमैरावतस्थितां॥ सुगंधैर्निशि सा वेशा साद्ये जागरणं
निशि॥ फाल्गुने पौर्णमासी च सदा बालविलासिनी॥ ज्ञेया फाल्गुनिका मा च जया लोकविभूतये॥ वाराहपुराणे॥
फाल्गुने पौर्णमास्यां च पटवासविलासिनी॥ ज्ञेया सा फाल्गुनी लोके कार्या लोकसमृद्धये॥ ॥इति पुण्यपूर्णिमा॥
अथ पुण्यामावास्या॥ शातातपः॥ अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै॥ जाह्नवीस्नानमात्रेण गोसहस्र-
फलं लभेत्॥ महाभारते॥ अमा सोमे तथा भौमे गुरुवारे यदा भवेत्॥ तत्तीर्थं पुष्करं नाम सूर्यपर्वशताधिकं॥
विष्णुपुराणे॥ अमावास्या यदा मैत्रे विशाखा स्वाति योगिनी॥ श्राद्धे पितृगणास्तृप्तिं सदा षिकं॥

का॰ नि॰ २६४

ध्नवित्तु विशाखास्वातियोगिनीति पाठः॥ मैत्रमनुराधा॥ अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः॥ अ-
र्द्धोदयः स विज्ञेयः सूर्यपर्वशताधिकः॥ अमावास्या यदा पुष्ये रोहिण्ये वा पुनर्वसौ॥ द्वादशाब्दी तथा तृ-
प्तिं प्रयांति पितरोर्चिताः॥ रोहिण्येमाहवासवाजैकपादर्क्षे पितृणां तृप्तिमिच्छता॥ वारुणे कंपदे वस्त्रे दे-
वानामपि दुर्लभा॥ वासवं धनिष्ठा॥ अजैकपादं पूर्वभाद्रपदा॥ वारुणं शततारकाख्यो॥ पूर्वभाद्रपदा मा-
घासिति पंचदशी कदाचिदुपैति योगं यदि वारुणेन॥ ऋक्षेण कालः स परः पितॄणां महान्यपुण्यैर्नृप ल-
भ्यते सौ॥ वारुणं ऋक्षे शततारका॥ ॥इति पुण्यामावास्या॥ ५ अथ नानापुण्या॥ वराहपुराणे॥ ॥
प्रतिपद्य पितृज्या तु पंचम्यां श्री क्रमहस्य तु॥ भविष्यपुराणे॥ शुक्ला वा यदि वा कृष्णा षष्ठी वास-
प्तमी तथा॥ रविवारेण संयुक्ता तिथिः पुण्यतमाः स्मृताः॥ सौरपुराणे॥ सोपवासश्चतुर्दश्यामष्टम्यां
च सुरेश्वरं॥ यस्तु पूजयते नित्यं तस्य तुष्यति शंकरः॥ लिंगपुराणे॥ अष्टम्यां च चतुर्दश्यां पः शिवं शं-
सितव्रतः॥ मुमुक्षुः पूजयेन्नित्यं स लभेदीप्सितं फलं॥ वाराहपुराणे॥ अष्टम्यां मातृयोगं तु पंचम्यां तु

जनार्द्दनं। पौषमाघाष्टमी पुण्या चैत्रे मासत्रयोदशी। कार्त्तिकी पौर्णमासी च द्वादशी कार्त्तिकी दश। मार्गशी
र्षे। स्कंदपुराणे। ज्येष्ठस्य शुक्लदशमी द्वादशी च मकाधिका। चतुर्थी पौर्णमासी च नित्यं पुण्यतमा स्मृता।
उपवासं वा देवा। पौर्णमास्याममावास्यामष्टम्यामष्टकासु च। चतुर्द्दश्यां कृतस्नानमष्टम्यां शिवसंनिधौ।
मार्कंडेयः। एकादश्यां सिते पक्षे पुष्यर्क्षे यदि सत्तमाः। द्वादश्यां च यदा राजेंद्र पापक्षयकरं ध्रुवं। व्यासः। शुक्ले
वा यदि वा कृष्णे चतुर्थी च चतुर्द्दशी। सोमवारेण पुण्या सा सोमवारेऽकं कृष्णपूर्ण्या। अमावै सोमवारेण रविवा
रेण सप्तमी। अंगारकदिने प्राप्ते चतुर्थी वा चतुर्द्दशी। तत्र यः कुरुते कर्म शुक्ले वा यदि वा ऽसिते। षष्टिर्व
र्षसहस्राणि कर्त्ता तत्फलमश्नुते। ब्रह्मांडपुराणे। दुर्गायै सप्तमी नवमी विष्णुस्नपनद्वादशी। वह्निस्थापस्य या
षष्ठी महत्यो मासि सप्तमी। विष्णुः। पंचदशी पौर्णमासी पंचद्वादशी ध्रुवं। सेवत्सरमतु जानः सततं विजितेंद्रियः। मुच्य
ते सर्वपापेभ्यः स्वर्गलोकं च गच्छति। लिंगे। वक्रकृत्स्य च सिते पक्षे माघमासि तपक्षे निशि। द्वादश्यां यथा कर्त्त
व्यः पौर्णमास्यां महोत्सवः। पितामहः। प्रतिपद्ब्रह्मदस्या काद्वितीया तु श्रियः स्मृता। तृतीया तु भवान्याश्च च

का॰हि॰
२६६

७५

तुर्थी तत्सुतस्य च। नागानां पंचमी प्रोक्ता षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता दुर्गाया अष्टमी स्मृता। मा
तृणां नवमी प्रोक्ता दशमी वासुकेस्तथा। एकादशी ऋषीणां तु द्वादशी चक्रपाणिनः। त्रयोदशी त्वनंगस्य
शिवस्योक्ता चतुर्द्दशी। पौर्णमासी तथा धातुः तिथीनामुत्तमा स्मृता। अमावास्या सर्वदैवपित्र्यैकर्म्मण्यप्र
स्तुता॥ ॥इति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमा
द्रिविरचिते चतुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये प्रतिपदादिपुण्यतिथिनिर्णयः॥ ॥अथ नक्ष
त्रयुक्ततिथिनिर्णयः॥ स्कंदपुराणे॥ प्राजापत्येन संयुक्ता कृष्णा नभसि चाष्टमी। मुहूर्त्तमपि लभ्येत सोपो
ष्या सा महाफला। श्रावणे द्वादश्येवमेवोक्तं च। द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा स्मृता। न तु सा तेन
संयुक्ता तावत्येव प्रशस्यत इति। अन्यत्र तु यावता कालेन यत्कर्म समाप्यते। तावति कालेन नक्षत्रादियु
क्तापेक्षायां। यदुक्तं शंकरगीतायां। कृत्तिकादिभरण्यंतं वारे वारे विसप्तमं। नैतैः संयोगमात्रेण पुनाति सका
लो तिथिमिति। उक्तं च। अस्त्यैव ब्रह्मो पूर्वे नागस्त्विष्ठेये स्याद्दृक्षयोगान्विता न वेत्। सा तिथिः सकलाह्

आनीते रुद्रेण संयुता। यावत्सा तिष्ठति ब्रह्मंस्तावत्कालः प्रशस्यते। दानस्नानादिकं सर्वं तस्यां तत्फलदं भवेत्॥
इति नक्षत्रयुक्ततिथिनिर्णयः॥ ॥अथ युगादिनिर्णयः॥ स्कंदपुराणे भविष्यत्पुराणयोः॥ नवम्यां शुक्ल
पक्षस्य कार्त्तिके निरगात्कृतं। वैशाखसिततृतीयायां त्रेता वै समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वाप
रं युगं॥ नागरखंडे॥ कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः॥ युगाद्याः स्मृता ह्येता दत्तस्याक्षयकारि
काः॥ नागरखंडे॥ अधुना शृणु राजेंद्र युगाद्याः परिकीर्त्तिताः। यासां संकीर्त्तनेनापि क्षीयते पापसंचयः।
नवमी कार्त्तिके शुक्ला तृतीया माधवे सिता। अमावास्या तपस्ये च नभस्ये च त्रयोदशी। त्रेधा कृतक
लीनां च द्वापरस्यादयः क्रमात्। स्नाने दाने जपे होमे विशेषात्पितृतर्प्पणे। कृतस्याक्षयकारिण्यः सुकृत
स्य महाफलाः॥ माधवो वैशाखः सिता शुक्ला तपसो माघस्य। मत्स्यपुराणे॥ वैशाखस्य तृतीया या नवमी
कार्त्तिकस्य तु। पंचदश्यपि माघस्य नभस्ये च त्रयोदशी। युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः।
दत्तः॥ तृतीया रोहिणी शुक्ला वैशाखस्यासिता तु या। मघाभिः सहिता कृष्णा नभस्ये च त्रयोदशी। युगाद्

का॰नि॰ २६७

७६

स्मृता ह्येता दत्तस्याक्षयकारकाः। विष्णुपुराणे भविष्यत्पुराणयोः॥ वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिक
शुक्लपक्षे। नभस्यमासस्य तु कृष्णपक्षे त्रयोदशी पंचदशी च माघे। एता युगाद्याः कथिताः पुराणे॥ अनंतपुण्या
स्तिथयश्चतस्रः। पंचदशी च माघस्य इत्यत्र कृष्णपक्षस्त्वनुषज्यते॥ अत एव नारदीयपुराणे॥ द्वे शुक्ले द्वे कृष्णे च युगाद्याः
कवयो विदुः॥ ब्रह्मपुराणात्॥ माघस्य पौर्णमासी युगादिरिति स्फुटं॥ वैशाखशुक्लपक्षस्य तृतीयायां कृतं युगं। कार्त्ति
के शुक्लपक्षे तु त्रेता च नवमेऽहनि॥ अथ भाद्रपदे कृष्णत्रयोदश्यां तु द्वापरं॥ माघे तु पौर्णमास्यां च घोरं कलियुगं त
दा। युगारंभास्तु तिथयो युगाद्यास्तेन विश्रुताः॥ फलं दत्तकृतानां च अनंतं परिकीर्त्तितं॥ तथा॥ एताश्चतस्रस्तिथयो यु
गाद्या दत्तं हुतं चाक्षयमाशु विद्यात्॥ युगे युगे वर्षशतेन यत्र युगादिकाले दिकाले च तत्कृवेत्॥ वैशाखस्य तृतीया
या समा कृतयुगेन तु। नवमी कार्त्तिके या तु त्रेतायुगसमा तु सा॥ त्रयोदशी नभस्यस्य द्वापरेण समा तु सा॥ माघे पंचद
शी राजन् कलिकालसमा तु सा॥ क्वचित्तु कलिकालादिरुच्यत इति पाठः॥ एताश्चतस्रो राजेंद्र युगानां प्रभवाः शुभाः।
युगादयस्तु कथ्यंते तेनैताः पूर्वसूरिभिः॥ उपवासस्तथा दानं श्राद्धं होमो जपस्तथा। यदत्र क्रियते किंचित्सर्वं को

ऽपि तुल्यं भवेत्। कृतयुगेन समेति। समन्तेऽपि कृतयुगे प्रत्यहं क्रियमाणेन कर्मणा यावत्पुण्यं भवति॥ ता
वदस्यामेकस्यां भवतीत्यभिप्रायः॥ प्रभासखंडे॥ यदा चंद्रश्च सूर्यश्च यदा तिष्यबृहस्पती। एकराशौ स
मेष्यंति प्रवेक्ष्यति तदा कृतं॥ अत्र केचिदाहुः। नभवादिशब्दवद्वैशाखादिशब्दा गुणावयवाभ्यां। किंतु
सौरचंद्रमासवचना इति। तदयुक्तं। तथा सति वैशाखस्य द्वित्वात्। उभयत्रापि तिथिद्वैधात् युगादिद्वय
प्रसक्तिः। तथा सति च तस्त्र इति परिसंख्यानमनुपपन्नं। एकत्वे सति सौरचांद्रमासविगनिमनार्थं इदं
केचिदाहुः। चांद्रमासमासाद्या युगादिरनुष्ठाना हि पितृकार्ये प्रधानत्वात्। युगादीनां पितृकार्येऽपि चां
द्रमासः प्रारभ्येत॥ तदुक्तं॥ आह्निके पितृकार्ये च मासश्चांद्रमसः स्मृत इति। सितासितपक्षव्यपदे
शोपपक्षद्वयात्मकत्वात् चांद्रमासाश्रयत्वेन गृह्यते। किंच माघासिते पंचदश्यां कदाचिदुपैति योगं य
दि वारुणेन ऋक्षेण कालः स परः पितृणां न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ॥ इति स्मृतिः॥ यासौ वैशाखमा
सस्यामावास्या रोहिण्यां समपद्यत इति श्रुतेः। चांद्रमासगतानामेव युगादित्वमवगम्यते। नहि मकरादित्ये

का० नि० २६८

७१

माघे शततारकायोगेऽमावास्यायां न भवति। तदपोहि रविमंडलं न निवेशाच्चंद्रस्य रवियुक्तत्वात्। राशिनोऽपि मकर
गामिन्यां स्यात्। तथा सति शततारकायोगो न स्यात्। कुंभसंबंधित्वात्। तस्याः कुंभादित्ये रविचंद्रमसोरेकराशि
वर्तित्वे वारुणयोगोऽमावास्यायां चांद्रमासाद्यपदेशात् युज्यत एव। वैशाखसितपक्षस्य रोहिणीयोगा
नुसंधेयः। तथा पौषे प्रतिपदः कल्पत्रयोदशीति विष्टे युगादौ चांद्रमसं दर्शयति। न चैवं सति युगादिषूत्कर्षप्रस
क्तिः। पिंडकार्यापरतया सौरमासगोचरतायाः स्थितेः युगादित्वे नोत्कर्षप्रसक्तेरुत्कर्षः कालदृष्टोऽस्याऽपकर्षा
दिकर्मणां। अभिषेकादिवृद्धीनां नक्षत्रकर्पा युगादिषु॥ इति निषेधात्॥ अथवा सत्यपि युगादिद्वित्वे चां
पितृकार्येऽन्यथानुपपत्तेः। सौरमासगतातिथिर्दैवकार्ये गृहीतव्या आग्निवोष्टा- आग्निवेश्यः। चांद्रमसी या पितृ
कार्यन्निमाता इह माघपाजेश्वरं तिथौ तत्परः कालः पितृणामिति वचनात्। तत्रैकालसंबंधिपितृकार्यो
त्कर्षो नानुपपन्नः। तेन कुंभादिराशिगतरविमासेऽपि माघादिस्नानादमावास्यादितिथीनां तद्गतानां पितृका
र्ये युगादित्वं सौरमासगतानां तु दैवकार्ये च तस्माद्युगाद्या इति श्राद्धकालाभिधानपरमिति। विष्णुः। एतानि श्रा

ढकालानि निख्याह प्रजापतिरिति॥ तत्र युगादिचतुष्टये तथा षट्चरणमाघसितदशादि चांद्रमासगतयुगा
दिप्रतिपादनपरं व्याख्यानं॥ यथोक्तं॥ स एव कालः षडशद्वयत्वात् पुण्यो युगादिष्वाखेण्यतरो न ह्यत्रयो
गात्तत्पुण्यतम इति॥ यच्च दशाहरासु नोत्कर्षोऽस्त्वपि युगादिषु उत्कर्ममेमहाषष्ठ्यादेतदिष्टं वृषादित इति
पठंति। तदसन्मूलत्वादुपेक्षणीयं। अत्र पंडितपरितोषकृता दूषणमभिहितमनुपपन्नं। एतच्चांद्रमासए
वमासे एवं वैशाखादिव्यपदेशनात्। तत्र गौणी शाद्वत्यं सौरिरिति। तावत्सर्वमेव निराकृतो। यत्तु पित्र्य
कार्यप्रधानत्वात् युगादीनां पित्र्यकार्येपि चांद्रमसस्य स्मृतेः। तत एव युगादिग्रहणमिति। तन्न सौरेचांद्रेपि
पित्र्यकार्ये विधिरिक्तं। ओक्तं न च पित्र्यकार्ये प्राधान्यं युगादिषु देवपित्र्यकार्ये संबंधित्वात्। तथा चोक्तं का॰वि॰
अनंतपुण्याः स्तिथयः प्रोक्तास्तु इति। तथा व्यासः। स्नानदानादिकं सर्वं युगादावक्षयं भवेदिति। न च सिता २६९
सितपक्षद्वयमेव चांद्रस्य सौरेरपितस्यैव संभवात्। परंतु माघासितपंचदशीलक्षणो हतो न तेन चांद्रमासादि
गतामावास्यादिका तिथिर्युगादिरित्युच्यते। किंतु चांद्रे मासे न क्षत्रयुक्ता सिनीवाली पित्र्यतर्पणे भवती

७८

ति। न ततोऽयं कालः पित्र्यवल्लभः। स युगादिर्मघायनपक्षादिश्ववत्त्वात्। माघे अमावास्या युगादिश्चांद्रेपि सा
तिथिर्युगादिरिति चेत्। नैवं सौरचांद्रमासविनिगमहेतोरभावात्। न चैनयत्रापि युगादिक्षं चतस्र इति प
रिसंख्यानानुपपत्तेः। न च श्राद्धकालानि प्रायेणेत द्वचनं। यत्तु चतस्रो युगादय इति षाष्टिकाश्राहियवा
पाकादिति वचनाद्युगादयश्चतस्रस्तिथय इति गम्यते। तथापि कायुगादिरित्युच्यते। सौरमासगतेति
अन्यथा प्युत्कर्षः स्यात्। न च पित्र्यकार्योत्कर्षवचनादिति ज्ञाप्यं। वचनाभावात्। उत्कर्षो युगादिष्विति तिथय
श्च सर्वेषोत्कर्षं प्रतिषेधयति। वृषादिराशिस्थगतभागे दशाहरा तिथिश्च ज्येष्ठोपदेशात् दृष्टंगः। दशाहरासु
नोत्कर्षोऽन्तत्वपि युगादिषु। उपाकर्म महाषष्ठ्या एतदिष्टं वृषादित इति। उत्कर्षनिषेधाच्च परः कालः॥
पित्र्यमिति परः शब्दः। अपि तावद्वचनोऽन्तरं सर्वकालगतकार्योत्कर्षप्रतिपादकः। न च वाच्यं दशाहरास्विति
वचनमासमूलं वचनासमस्तशास्त्रविरुद्धान्मूलोपन्यासाच्चापत्तु रां स्वधरं व्याख्यातं तं नैनं तद्वदि
कं वचनं। येनाविचारितमुपादद्महे। तस्मात्सकलजनप्रसिद्ध्यनुगुणादनुष्ठानादराच्च सौरमासगतेव

युगादिरूपा देया न चांद्रमासगता॥ न हि मिथुनादित्ये सत्कार्त्तिकामी दर्शादर्शा शुन्नादित्ये वासितपंचदशी अ
मावास्यादावस्य विधानमपि श्रूयते। तस्मात्सौरमासगता युगादिरिति सिद्धांतः। वस्तोयं क्रमो यद्य
पि वैशाखादिशब्दाश्चांद्रमासवचन एवेति प्रमाणं निरूपितं। तदापि गौडादिकृतयुगाद्यकर्षे निषेधव
चनपर्यालोचनप्रसिद्धमनुष्ठानीद परार्द्धे सौरमासगतेव युगादिर्ज्ञेयेति॥ ॥इति युगादिनिर्णयः॥ ॥
अथ युगांताः॥ ब्रह्मपुराणे॥ सूर्ये सिंहस्य संक्रांत्यामंतः कृतयुगस्य च। अपवृश्चिकसंक्रांत्यामं
तस्त्रेतायुगस्य तु। शेषस्तु वृषसंक्रांत्यां द्वापरांतस्तु संख्यया॥ तथा तु कुंभसंक्रांत्यामंतः कलियु
गस्य तु॥ आदित्यपुराणे॥ दिनं चैरेवतीयत्र गमनं चैव राशिषु। युगांतदिवसं विहितं तत्र दानमनं
तकं। ग्रहणे विषुवे सोमे --- हिरयदि। सप्तमी शुक्लकृष्णा वा युगांता दिवसं विदुः। सौम्यगे तु रगय
नेः। ब्रह्मपुराणे॥ युगाद्यौ तु युगांतेषु श्राद्धमक्षयमुते॥ पद्मपुराणे॥ युगादिषु युगांतेषु स्नानदानजपा
दिकं। यत्किंचित्क्रियते तस्य युगांतफलसाक्षिणः। मनुः। सहस्रगुणितं दानं भवेद्दत्तं युगादिषु॥ कर्म्म

श्राद्धादिकं चैवैवतथा मन्वंतरादिषु॥ इति युगांताः॥ ॥अथ युगधर्म्माः॥ आत्रोपकायनः। कृतिश्च त्रेता च माचा
रः प्रतिकालं विनिर्दिष्टे। नानाधर्म्माः प्रवर्त्तंते मानवानां युगे युगे॥ मनुः॥ अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे
परे। अन्ये कलियुगे नृणां युगह्रासानुरूपतः। तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते। द्वापरे यज्ञमेवाहु
र्दानमेकं कलौ युगे। कलौ दानं दयादमः इति बृहस्पतिः। शिवपुराणे॥ तपः कृच्छ्रचांद्रायणादि परं प्रधा
नं महाभारते। तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमं। द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे। कलौ दानं
दयादम इति बृहस्पतिः। शिवपुराणे। ध्याने परं कृतयुगे त्रेतायां हवनक्रियां हवनक्रिया। अहिंसा द्वाप
रे धर्म्मः कलौ राशिशिवोत्सवः॥ तथा॥ ध्यानं परं कृतयुगे त्रेतायां लिंगपूजनं। द्वापरे ध्यायनं तिष्टं मंदा
दिवस्य कीर्त्तिता॥ तथा॥ ध्यानं परं कृतयुगे त्रेतायां यजनं तथा। द्वापरे लिंगपूजा च कलौ शंकरकीर्त्तने॥
विष्णुधर्म्मोत्तरे॥ ज्ञानं परं कृतयुगे त्रेतायां च तपः परं। द्वापरे च तथा यज्ञः प्रतिष्ठा च कलौ युगे॥ मनुबृह
स्पती॥ कृते यद्द्वेकर्म्मः स्यात्त्रेतायामृतुत्रयेः। द्वापरे तु त्रिपक्षेण कल्लावहनि तद्भवेत्॥ ब्रह्मांडपुराणे॥

त्रेतायामाह्निको धर्म्मो द्वापरे मासिकः स्मृतः। यथाशक्तिवरः प्राज्ञस्तादृक्प्राप्नुयात्कलौ॥ विष्णुपुराण
ब्रह्माण्डपुराणयोः॥ यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तु॥ द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ॥ ब्र
ह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः। द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः। वाराहपुराणे। कृते
नारायणः शुद्धः सूक्ष्ममूर्त्तिरुपास्यते। त्रेतायां यज्ञरूपेण पञ्चरात्रेण द्वापरे। भागवते। कृते त्रेता द्वा
परं च कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानैव विधिनेज्यते। कृते शुक्लश्चतुर्बाहुर्जटिलो व
ल्कलाम्बरः। कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलू। मनुष्यास्तु तदा शान्ता निर्वैराः सुहृदः समाः। य
हं जन्ति तपसा देवं शमेन च दमेन च। हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः। ईश्वरः पुरुषोऽव्यक्तः परमात्मेति
गीयते। त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः। हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः। तं का॰ हि॰ २७२
तदा मनुजा देवं सर्वदेवमयं हरिम्। यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः। विष्णुर्यज्ञो विष्णुगर्भः सर्व
देव उरुक्रमः। वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते॥ द्वापरे भगवान् श्यामः पीतवासा निजायुधः॥

धि तदा

पृश्नि

२८

श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः। तं तदा पुरुषं मर्त्या महाराजोपलक्षणम्। यजन्ति वेदतन्त्राभ्यां परं
जिज्ञासवो नृप। नमस्ते वासुदेवाय नमः संकर्षणाय च। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः। नारायणा
य ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः। इति द्वापर उर्वीश स्तुवन्ति जगदीश्व
रं। नानातन्त्रविधानेन कलावपि यथा शृणु। कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदं। यज्ञैः संकीर्त्तनप्रा
यैर्यजन्ति हि सुमेधसः। एवं युगानुरूपेण भगवान् युगवर्त्तिभिः। मनुजैरिज्यते राजञ्छ्रेयसामीश्वरो हरिः॥
अपराजितपृच्छायां॥ सोमं वामेन हस्तेन दक्षिणेन रविं वहेत्। वह्निं हृदयमध्ये यो वासुदेवं प्रकीर्त्तयेत्॥
आदित्यमूर्त्तिभिर्द्विजैः पूज्यः श्वेतवर्णः कृते युगे। संकर्षणो वहत्येवं लांगलं मुशलं तथा। रक्तवर्णः प्रपू
ज्यते त्रेतायां क्षत्रजातिभिः। प्रद्युम्नो द्वापरे पूज्यो वैश्यैः शार्ङ्गधनुर्धरः। पीतवर्णः पीतवासाः शिल्प
ज्ञानप्रदायकः। कलौ युगे निरुद्धश्च पूज्यते शूद्रजातिभिः। कृष्णवर्णो भवत्येव चर्म्मखड्गकरद्वये
। त्रासयन्नखिलं विश्वं पापवृन्दं विनाशयेत्। अपराजितपृच्छायां। कृष्णवेशादिविभेदेन कृतादिषु

गभेदतः।विष्णोर्विवर्णभेदेनचतुर्वक्त्रश्चतुर्भुजः।ब्रह्मापितामहश्चैवविरंचिःकमलासनः।चतस्रइति
संप्रोक्तामूर्त्तयःपरमेष्ठिनः।पुस्तकंचाक्षसूत्रंचस्रुवाचैवकमंडलुः।अवर्णश्चभवेन्मूर्त्तिःकृतेतु
सुखदायिनी।सुवक्त्रश्चसुनासश्चकर्णकुंडलमंडितः।मालायुक्तःसुग्रीवोसाक्षोमांसलांगः
सुकेशकः।तप्तकांचनवर्णाभोरक्तहारोज्वलद्युतिः।केयूरकटकन्यायःसर्वाभरणभूषितः।रूप
यश्चाश्रिताःकार्यादेवतानांचपार्श्वतः।चतुर्वेदसमायुक्तोब्रह्मास्यासर्वज्ञातिदः।दक्षिणोर्ध्वक
रक्रमादायुधानिवेदितव्यानि।सिद्धार्थहस्तायां।पुस्तकाक्षसूत्रंकुंडीकृतेब्रह्मा।चतुर्मुखः।ब्रह्मा
नामाचऋग्वेदप्रधानःपूज्यतेद्विजैः।कमलाक्षोसुवर्णैवपुस्तकंचपितामहः।त्रेतायांचयजुर्वेदःप्र का॰ हि॰ २७२
धानाद्यत्रपूजितः।अपराजितहस्तायां।कमंडलुत्वाक्षसूत्रंस्रुवाचपुस्तकंतथा।पितामहोभवेद्
मूर्त्तिस्त्रेतायांसुखदायिनी।अक्षसूत्रंपुस्तकंचस्रुवाचैवकमंडलुः।विरंचिश्चभवेन्मूर्त्तिर्द्वापरे
सुखदायिनी।सिद्धार्थहस्तायां।सहज्योद्वापरेवेदोयविरंचिःस्तुक्सामन्ततः।अक्षसूत्रंपुस्तकंचस्रु

वंकुंडींचधारयन्।अक्षसूत्रंपुस्तकंचकुंडीचकमलासनः।कलावथर्ववक्त्रोसौसर्ववर्णैःप्रपूज्यते।
अपराजिताहस्ते।अक्षसूत्रंकरेदक्षेरिक्तस्योपरिसंस्थितः।वामेतुपुस्तकंहस्तेतस्याधश्चकमंडलुः
कर कमलासनोरेतुस्यामंमांसमाश्रयेत्सर्ववर्णसुखप्रदः।विष्णुधर्मोत्तरे।पुष्करंतुकृतेसत्यंत्रेतायां
नैमिषंतथा।द्वापरेशांखलिखिताःकलौपौगंगांसमाचित्।पराशरः।कृतेतुमानवोधर्मस्त्रेतायां
गौतमस्यतु।द्वापरेशांखलिखिताःकलौपाराशराःस्मृताः।कालोत्तरे।पवित्रारोहणप्रकरणेयु
गभेदेनपवित्रद्रव्याण्यभिहितानि।कृतेमणिमयंकार्यंत्रेतायांहैमसंभवं।पट्टजंद्वापरेसक्तंकार्पा
सेतुकलौहितो।यतिभिर्मनिसंकार्यंदारवेवाल्कलंहितो॥ ॥इतिनानायुगधर्माः॥ ॥अथयुगभेदेनव
र्ज्यानि॥तत्रशातातपः॥त्यजेद्देशंकृतयुगेत्रेतायांग्राममेवच।द्वापरेकुलमेकंतुकर्त्तारंतुकलौयुगे।कृ
तेसंभाष्यपततित्रेतायांस्पर्शनेनतु।द्वापरेचान्नमादायकलौपततिकर्मणा।क्वचित्त्वन्यथापाठः॥द्वा
परेचान्नमेवोच्यते॥ ॥इतियुगभेदेनवर्ज्यानि॥ ॥अथकलियुगधर्माः॥महाभारते॥यस्त्वोनंतः

त्रीवाप्नोति मुच्यते च कलौ नरः। शाठ्येनापि नमस्कारः प्रयुक्तः शार्ङ्गपाणये। संसारदोषसंधानमुद्दिश्य नरकः क
लौ॥ तथा सदा तेय जते यस्तु श्रीयामुनिपुंगव। लिंगे यस्थंडिले वापि कौतुकं। विधिपूर्वकं। युगदोषविनि
र्जित्य प्रयाति परमं पदं॥ व्यासः। ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन्। यदाप्नोति तदाप्नोति कलौ सं
कीर्त्य केशवं। व्यासः। ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन्॥ श्रीभागवते॥ कलिं सभाजयंत्यार्या गु
णज्ञाः सारभागिनः। यत्र संकीर्तनेनैव सर्वः स्वार्थोपि लभ्यते। संकीर्त्यनेन हरिसंकीर्तनेन। अतः परमो नष्ट
लाभो देहिनां भ्राम्यतामिह। यतो विंदेत परमां शांतिं नश्यति संसृति। अग्निपुराणे॥ नास्ति श्रेयः करं नृणां॥
विष्णोराराधनान्मुने। युगेस्मिंस्तामसे घोरे यज्ञवेदविवर्जिते। कुर्वीताराधनं राजन्वासुदेवे कलौ युगे। काशहि
यदभ्यर्च्य हरिं भक्त्या कृते वर्षशतैर्नृप। विधानेन फलं सेनेऽहोरात्रात्कलौ विति। कलौ कालिमलध्वंससर्व २७३
वेपापहरं हरिं। येर्चयंति नरा नित्यं तेपि वंद्या यथा हरिः। धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ॥
स्वल्पायासेन धर्मज्ञ तेन तुष्टोस्म्यहं कलेः। धन्ये कलौ भवद्विप्रा अल्पक्लेशैर्महत्फलं। विष्णुधर्मे। दैव

तार्थेरमश्वीणि नगराणि कलौ युगे। कर्त्तव्यानि महीपालैः स्वर्गलोकमभीप्सुभिः॥ ॥ इति कलियुग
धर्माः॥ ॥ अथ कलियुगवर्ज्यानि॥ आदि। यस्तु कर्त्तयुगे धर्मो न कर्त्तव्यः कलौ युगे। कर्त्तः कृत
युगसंबंधी। तथा नियोगं प्रत्युक्तं। अयं कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे। दीर्घकालं ब्रह्मच
र्यधारणं च कमंडलोः। गोत्रान्मातृसपिंडाश्च विवाहे गोवधस्तथा। नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्वि
जातिभिः। क्षतयाः पुनरुद्वाहं ज्येष्ठांशं गोवधस्तथा। कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुं। अ
क्षुः देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते। न यज्ञे गोवधः कार्यः कलौ च न कमंडलुः। स्मृत्यंत
रे। देवराच्च सुतोत्पत्तिं गोवधं च कमंडलुं। अक्षतां पौरुषं मद्यं कलौ पंच विवर्जयेत्। तथा।
नियोगं धर्मे नानावधं न्यवीधापि च। तथा द्वार विना गोपि नैव संप्रतिवर्त्तते॥ आदित्यपुराणे।
रापध्यौ शाकुनाः स्वभ्राः सामुद्रिकमुपश्रुतिः। उपयाचितमादेशाः संभवंति कलौ क्वचित्॥ तस्मा
त्तन्मात्रलाभेन न कार्यं पंच न कारयेत्। तथा धर्मे यशमय वशादन्यान्यपि कलौ वर्ज्यानि विहिता

न्यपिकर्माणिधर्मलोपलोपभयाद्बुद्धिसमयेननिवृत्तानिसाक्षिभावाक्कलौयुगे।विधवायांप्रजोत्पत्तिर्दैव
रस्यनियोजनं।बालिकाक्षतयोन्याश्चवरेणान्येनसंगतेः।।कन्यानामसवर्णानांविवाहश्चद्विजाति
भिः।आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनं।द्विजस्याब्धौतुनौयातुःशोधितस्यापिसंग्रहः।सत्र
दीक्षाचसर्वेषांकमंडलुविधारणं।महाप्रस्थानगमनंगोसंज्ञप्तिश्चसासवे।सौत्रामण्यामपिसुराग्रह
णस्यचसंग्रहः।अग्निहोत्रहवण्याश्चलेहोलीढापरिग्रहः।वानप्रस्थाश्रमस्यप्रवेशोविधिचोदितः।वृत्त
स्वाध्यायसापेक्षमघसंकोचनंतथा।प्रायश्चित्तविधानंचविप्राणांमरणांतिकं।संसर्गदोषस्तेयाद्यमहा
श्व पातकनिःकृतिः।वरातिथिपितृभ्यःपशूपाकरणक्रिया।दत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः।सवर्णान्यां का॰हि॰
गतापुष्टः संसर्गःशोधितैरपि।अयोनौसंग्रहेवृत्तेःपरित्यागोगुरुस्त्रियाः।परोपदेशात्मसंत्यागउच्छिष्ट २७४
स्यापिवर्ज्जनं।प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः।अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवच।शामित्रं
चैवविप्राणांसोमविक्रयणंतथा।षड्भक्ताहरणेनान्नहरणंहीनकर्मणः।एतानिलोकगुप्त्यर्थंकलेरादौ

८३

महात्मभिः।निवर्त्तितानिकर्माणिव्यवस्थापूर्वकंबुधैः।समयश्चापिहिसाधूनांप्रमाणंवेदवद्भवेत्।आ
पस्तंबोपि।धर्मज्ञसमयःप्रमाणंवेदाश्चेति।ननुकलियुगेयद्वर्ज्यंतद्वाक्याध्याहारार्थोदृष्टार्थोऽदृ
ष्टार्थोवानतावद्दृष्टार्थो।अनुष्ठानानुपयोगितयातथाविबोधस्यप्रयोजनत्वानुपपत्तेः।नापिदृष्टार्थोवेद पवृह
स्यानुपपत्तेः।उच्यते।तद्वाक्याननुष्ठानेपिवेदप्रकृतिज्ञानाद्युपयोगितयादृष्टार्थत्वाददोषः।अन्यथा
ब्राह्मणस्यराजसूयादिवाक्याध्ययनमपिनस्यात्।यद्राजसूयादौयागतिःसैवेहापि।किंचैवंदशाक
लियुगवर्ज्जनस्मृतेरप्रामाण्यमुच्यते।अध्ययनविधिदृष्टार्थज्ञानावाप्त्यैनतावेदप्रमाणं।स्मृत्यंतरवदत्रापिशि
ष्टत्रैवर्णिकदृष्टपरिग्रहस्याविशेषात्।अध्ययनविधेर्दृष्टार्थज्ञानावश्यत्वस्वप्रकृतिकेयमेतेइति॥ ॥इतिक केयमात
लियुगवर्ज्यानि॥ ॥अथमन्वंतरादयः॥मत्स्यपुराणे॥अश्वयुक्शुक्लनवमीद्वादशीतिथौकार्तिकस्यचैत्र
स्यतृतीयायाचतथाभाद्रपदस्यच।फाल्गुनस्यचमावास्यापौषस्यैकादशीतथा।श्रावणस्याष्टमीकृष्णा
तथाषाढस्यपूर्णिमा।आषाढस्यतुदशमीमाघमासस्यसप्तमी।कार्तिकीफाल्गुनीचैत्रीज्येष्ठीपंचदशीत

यामन्वंतरादयश्चैता दत्तस्याक्षयकारकाः। स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं। पूर्वमेवाक्षयं विद्या
त्कृतं मन्वंतरादिषु। अत्रामावास्याव्यतिरेकेण सर्वाः शुक्लाः एव। पुराणांतरे। श्रावणमावास्या भाद्रपद
कृष्णाष्टमी युगादिरिति प्रतिपादितं। तथाहि। अश्विने दशमी शुक्ला श्रावणे कार्त्तिकी तथा। मन्वंतराद
यो ह्येता दत्तस्याक्षयकारकाः। मनुः। सहस्रगुणितं दानं भवेद्दत्तं युगादिषु। कर्म श्राद्धादिकं चैव तथा म
न्वंतरादिषु॥ ॥इति मन्वंतरादयः॥ ॥तत्र नागरखंडे॥ अथ कल्पादयो राजन् कथ्यंते तिथयः शुभाः। या
सु श्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत्। चैत्रशुक्लप्रतिपदि श्वेतकल्पः पुराभवेत्। तस्यां शुक्लत्रयोद
श्यां मुदानः समजायत। कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत्। अथ कृष्णत्रयोदश्यां गौरी
कल्पो व्यकल्पत। वैशाखस्य तृतीयायां कृष्णायामुपपद्यते। माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत्।
ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः। पौर्णमास्यां तु तस्यैव कौर्मः प्रववृतेऽनृपा कृष्णपक्षे तृती
यायामाग्नेयः समगच्छत। पितृकल्पश्चमावास्यां तस्यैवाश्रित्य प्रपद्यते। शुक्लचतुर्थ्यां तु कल्पो राथं

८४

तरो भवेत्। तस्यां तस्यैव कृष्णायां सोमकल्पः समापतत्। श्रावणे शुक्लपंचम्यां रौरवः समवर्त्तत।
सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः। वृहत्कल्पस्तु सप्तम्यां शुक्लायामश्विनस्य तु। कृष्णाया
मपि वैकुंठः प्रविवेश विशांपते। कार्त्तिकस्य सिताष्टम्यां कल्पः कंदर्पसंज्ञकः। असितायां पुन
र्जज्ञे लक्ष्मीकल्पस्य कल्पना। मार्गे शुक्लनवम्यां च कल्पः सद्योऽभ्यपद्यत। असितायां च सावि
त्रीकल्पः प्रारंभमभ्यगात्। तस्यामेव तमिस्रायां वाराहः प्रापनृपते। सारस्वतस्तु द्वादश्यां शुक्लायां
फाल्गुनस्य तु। कृष्णायामपि वैराजो विरराज महामते। इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः।
प्रारंभतिथयस्तेषां प्रसूताः पुण्यतामयाः। तासु श्राद्धे कृते पुण्यमाकल्पस्थायि कल्प्यते। मत्स्यपुरा
णे। मन्वंतरे युगादिर्वा कल्पस्यादिः प्रकीर्त्तितः। वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च। पं
चमी चैत्रमासस्य तस्यैवांत्या तथा परा। शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी। नवमी मार्गशी
र्षस्य सप्तैताः संस्मराम्यहं। कल्पनामादयो ह्येता दत्तस्याक्षयकारकाः। अंत्या अमावास्यावै

शारद्वतृतीया फाल्गुनस्य तृतीया चैत्रपंचमी चैत्रामावास्येति कृष्णा माघत्रयोदशी कार्त्तिकस्य सप्तमी
मार्गशीर्षेण नवमी त्वेताः प्रोक्ताः॥ ॥इति कल्पादयः॥ ॥अथ व्यतीपातः॥ याज्ञवल्क्यः। शतमिंदुक्ष
ये दानं सहस्रं तु दिनक्षये। विषुवद्दशसाहस्रं व्यतीपाते त्वनंतकं। वाराहे। दर्शे शतगुणं दानं तच्छतघ्नं
दिनक्षये। शतं वै तस्य संक्रांतौ शतघ्नं विषुवे ततः। युगादौ तच्छतगुणमयने तच्छतामहे। सोमग्रहे तच्छत
घ्नं तच्छतघ्नं रविग्रहे। असंख्येयं व्यतीपाते दानं विदो विदुः। शतघ्नं शतगुणं। व्यतीपातोत्र विष्कंभादियो
गेषु सप्तदशो योगः। अस्य चोत्पत्तिः। भ्रमणपतनसमये पुपतनानंतरं च क्रियमाणं श्राद्धदानस्नाना
दिकं महाफलं भवतीति। तदाह याज्ञवल्क्यः। उत्पत्तौ लक्षगुणं कोटिगुणं भ्रमणनाडिकायां तु। अर्बु   का॰दृ॰
दगुणितं पतने जपदानाद्यक्षयं पतिते। नृसिंहपुराणे। फलं सहस्रमुत्पत्तौ भ्रमणे कोटिरुच्यते। प   २०६
तने दशकोट्यः स्युः पतिते दत्तमुत्तमं। उत्पत्त्यादिमानं वा ज्योतिःशास्त्रे। विंशतिर्द्वियुतोत्पत्तौ भ्रमणे चैकवि
शतिः। पतने दश नाड्यः स्युः पतिते सप्त नाडिकाः। इदमन्येन प्रकारांतरेण व्यतीपातो दर्शितः। श्रवणाश्विधनि

९

ष्ठार्द्रानागदैवतमस्तकाः यद्यमारविवारेण व्यतीपातः स उच्यते। नागदैवतमश्लेषा मस्तकः प्रथम
चरः। मस्तक इति श्रवणादिभिः प्रत्येकं संबध्यते। केचित्तु मस्तकः मृगशिर इति व्याचक्षते। अमा
अमावास्या। सा यद्येतेषु नक्षत्रेषु आदित्यवारयुक्ता भवति। तदा स एष योगो व्यतीपातसंज्ञो भवति।
शास्त्रांतरे। पंचाननस्थो गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे। पाशाभिधाना करभेण यु
क्ता तिथिर्व्यतीपात इतीह योगः। अस्मिन्हि गोभूमिहिरण्यवस्त्रदाने सर्वं प्रविलाय पापं। सुर
त्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्यः। पंचाननः सिंहः। गुरुभूमिपुत्रौ बृहस्पत्यंगार
कौ। पाशाभिधा द्वादशी। करभं हस्तनक्षत्रं। अत्र च व्यतीपाते श्राद्धं कर्त्तव्यमित्याह पितामहः॥
इति व्यतीपातः॥ ॥अथ वैधृतव्यतीपातौ॥ तत्र भृगुः। संक्रांतिसाम्ये समयः समीरितः स्व
ल्पपर्वसदृशो मुनीश्वरैः। अत्र दत्तहुतजप्तपूजनं कोटिकोटिगुणमाह भार्गवः। अस्यार्थः।
सूर्याचंद्रमसोः संक्रांतिसाम्ये कुतपकाले ह्ययं संभवति। व्यतीपातो वैधृतः। स तत्र संक्रांतिसा

मलक्षणं व्यतीपातस्य गंडान्तरार्द्धादारभ्य क्रमकसार्द्धेन योगेषु संभवोस्ति वैधृतस्य तु शुक्लयोगा
दारभ्य सार्द्धेषु यो। अमावास्या व्यतीपातः पौर्णमास्यष्टकास्तुथा विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीय
यते तु सः। अत्र प्रायश्चित्तमपेत इति वचनं। श्राद्धस्यावश्यकतां गमयति। बहुयोगेषु संभवतेस्यास्मिन्
काले संख्यते दश घटिकास्तु समारभ्य एकसप्तत्यधिकपर्यंते संभाव्यते। तथा वेदांगज्योतिषे गंडो
न्तरार्द्धे व्यतिपातसंभवः शुक्लादिको वैदिके संभवो भवेत्। साध्येषु पंचस्वपरेषु कृत्स्नकर्म्मसाधारणं प्र
कीर्तितं। विष्णुः। वैधृते च व्यतीपाते दत्तमक्षयकं भवेत्। भारद्वाजः। व्यतीपाते वैधृते च दत्तस्यांतो न विद्यते।
व्यतीपाते विशेषेण सहि - - प्रकीर्तितः। स्थूलप्रकारेण प्रसिद्धस्तु सप्तविंशतितमो योगो वैधृत इ
ति॥ ॥इति वैधृतव्यतीपातौ॥ ॥अथ प्रकीर्णपुण्यकालाः॥ तत्र विष्णुः॥ अमावास्या व्यतीपातो ग्रह
णं चंद्रसूर्ययोः। मन्वादयो युगादिश्च संक्रांति वैधृतस्तथा। दिनक्षयं दिनछिद्रमयनं च तथा परं। द्वयने वि
षुवे युग्मे षडशीतिमुखं तथा। चतस्रो विष्णुपद्यश्च पुत्रजन्मादिकापरं। आदित्यादिग्रहैश्चैव नक्षत्रैः सह

का॰ दे॰ २७७

संगमे। विज्ञेयः पुण्यकालोयं ज्योतिर्विद्भिर्विचारिभिः। अत्र दानादिकं कुर्यादात्मनः पुण्यवृद्धये॥ दिनक्ष
यलक्षणमुक्तं॥ पद्मपुराणे॥ द्वौ तिथ्यंतावेकवारे यस्मिन् स स्याद्दिनक्षयः। वशिष्ठः। एकस्मिन् सावसा
नेह्नि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलं। दिनछिद्रलक्षणमाह गर्गः। तिथ्य
र्द्धं तिथियोगक्षवेदादीशांतिपर्वणः। सदृशो दिवसे छिद्रसमाख्यो प्राह भार्गवः। अस्यार्थः। तिथ्यर्द्धं कर
णं करणं तिथियोगनक्षत्राणां मते आदौ पर्वकालः। सोमग्रहणतुल्यः। स च दिनछिद्रसंज्ञ इति। कालमा
नमपि स एवाह। छेदादिकालः कथितस्तिथिकृत्यो घटीद्वयं। नागवह्निबलोपेतं तत्र वेदपलेयुतं। पले
षोडशभिर्युक्तं नाडिकार्द्धं ततः पुनः। छेदादिसमयः प्रोक्तो दानेनंतफलप्रदः। कृतिकरणनागाश्व
द्वौ वक्तपक्षयः। ननक्षत्रे। तत्रानि पंचविंशति। श्रुतिर्योगः। तेनायमर्थः। तिथिकरणयोरा
द्यंते घटिकाद्वयमष्टविंशतिपलानि पुण्यकालः। नक्षत्रस्य पंचविंशतिपलेर्युक्तं घटिकाद्व
यं। योगस्यापि षोडशभिः पलैर्युक्तं घटिकाद्वयमिति। अवमलक्षणमुक्तं। विष्णुना। तिथित्र

यस्यन्तास्येकोवारःस्यादेवमंक्लिदिनत्। त्रिवारस्पृक्तिथिर्यत्रत्रिदिनस्पृक्समुच्यते। अत्रदिनावमयोरि
यान्मैनूनेदः। यत्रतिथिद्वयावसानेवारावसानंखण्डितस्तुक्षयः। यत्रतिथिद्वयेपिवारानुवृत्तिःसोऽव
मइति। विषुवादीनिसंक्रान्तिनिमित्तिपदर्शितानि। पद्मपुराणे। मंदेवार्केगुरौवापिऋक्षेष्वेतेषुउत्तरेषु
त्रीण्येतानिचऋक्षाणिस्वयंप्रोक्तानिलक्षणे। अश्वमेधादिकंपुण्यंस्नानस्यैतुनवेत्संपादानमक्षयतो
यातिपितृणांतर्पणंतथा। त्रीणिऋक्षाणि। आग्नेययाम्यप्राजापत्यानि। मत्स्यः। यदामृगशिरेऋक्षेशशी
सूर्योबृहस्पतिः। तिष्ठंतेसातिथिःपुण्यानक्षत्रापरिकीर्तिता। ब्रह्मप्रोक्ते। एकादश्यमावास्याशर्मिमापुत्र
...न्मद्विवेधतस्त्रव्यतीपातोनरावावमवासरः। युगमन्वादयस्तेस्युरिंडुपर्वसमानकाः। संक्रान्तिसाम्यंदिन का॰हि॰
च्छिद्रंग्रहणंनगमस्तथा। नगमोराशिनक्षत्रगमनं। देवीपुराणे। व्यतीपातोविषुदिनेषडशीतिमुखंतथा।
दिनच्छिद्राणिसंक्रान्तिर्ज्ञेयंविष्णुपदंपुनः। इतिकालःसमाख्यातःपुंसांपुण्यविवर्द्धनः। अस्मिन्दानानिदत्तानि
स्नानहोममतपांसिच। अनंतफलदानिस्युःस्वर्गमोक्षप्रदान्यपि। च्यवनः। अमावास्यासंक्रान्तिव्यतिपातविषु

७

वायनषडशीतिमुखविषुवदादिवैधृतग्रहणंतंसएवपुण्यकालः। आदित्यपुराणे। ग्रहणेषडशीतौ
चचन्द्रसूर्यग्रहेतथा। युगादौवैधृतेचैवदत्तंभवतिचाक्षयं। तथा। तिथश्चभवत्यामिथ्यासुदत्तंमहाफलं
ग्रहोपरागेसंप्राप्तेगमनेचैवराशिषु। मिहिरेचचतुर्दश्यांद्वादश्यांसप्तमीषुच। षडशीतिमुखेपर्वण्ययन
नेदक्षिणायने। गहलामिनित्यंभक्तानांविशेषात्सुप्रकीर्तिताः। इतिविषुदशगुणंवदंतिदानंशतगुणितं
चयनावसानकाले। दशगुणितंकथितंग्रहोपरागेविषुवतिचक्षयफलंदसुगांतो। शातातपः। अयनेषुचय
दत्तंषडशीतिमुखेषुच। चन्द्रसूर्योपरागेचदत्तंभवतिचाक्षयं। शिवरहस्ये। महद्भुद्भपुण्ययायावासापपदा
तिथिः। सामावास्यासमा...याक्षनाध्ययनकर्मसु। शंखः। यदाविष्टिर्व्यतीपातोभानुवारेणसंयुतः। पद्म
कंनामतत्प्रोक्तंअयनाच्चचतुर्गुणं। विशाखासुयदाभानुःकृत्तिकासुचचन्द्रमाः। सयोगःपद्मकोनामपु
ष्करेष्वपिदुर्लभः॥ ॥इतिप्रकीर्णपुण्यकालाः॥ ॥अथनिमित्तानुरोधेनसदापुण्यकालः॥ विष्णुधर्मे॥
कालःसर्वोपिनिर्दिष्टःपात्रेसमुदाहृतं। अयनस्यप्रदानेतुनात्रकार्याविचारणा। तदेवदानकालस्तुयदान

यमुपस्थितो। यथा। न कालनियमाः द्विजोदीयमाने प्रतिग्रहे। तदीयदानमस्योक्तं यथापापसमागमः। न
हि कालं प्रतीक्षेत जलं दानं तु तृषान्वितो। अन्नोदकं तथा देयमित्याह भगवान्मनुः। स्कांदे। अर्हत्तमस्तु तां
गां दद्याच्छ्राद्दिने चैव विचारयेत्। कालः स एव ग्रहणे यदा साधिमुखो द्विजोत्तमः। आसन्नमृत्युना देया गौः
सवत्सा तु पूर्ववत्। तदभावे पगोदानं नराकाद्धरणाय वै। यदा तदा यदि नरः करोति दानं तु वैतरणीं
तु गां। शक्तोन्यो ऽ रुरुं दाद्वा श्रियो ददाम्यतस्य च। वाराहपुराणे। व्यतीपाते यसंक्रांतौ तथैव
ग्रहणे रवेः। पुण्यकालास्तथा दानं सर्वे यदा मृत्युरुपस्थितः। तदा गो भू हिरण्यादि दत्तमस्य यतामि
माता। अदृष्टमकृतं दानं मुक्तो चैव न दृश्यते। इति व्यासस्मृतिवचनविशेषः। शास्त्राद्यनुरोधेन कृ॰हि॰
विपर्येषु प्रवर्त्तते। सूर्योपरागेण तमाकृः समयं समं विष्णुधर्मोत्तरे। अच्छिन्ननाड्यां यद्दत्तं २०९
पुत्रे जाते द्विजोत्तमाः। संस्कारेषु च पुत्रस्य तदक्षय्यं प्रकीर्त्तितं। विष्णुपुराणे। यदा वा जायवित्तं
चिरोस्यधासमर्चितं। तदेव दानकालं तु यतो ऽनित्यं हि जीवितं। इति निमित्तानुरोधेन सदापु

९८

ण्यकालाः। अथ तिथिविशेषेण वर्ज्यानि। तत्र चतुर्थी वर्ज्या। तथा मार्कंडेयः। सिंहादित्ये शुक्लपक्षे चतु
र्थ्यां चंद्रदर्शनं। मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्नतं सदा। इति चतुर्थी वर्ज्या। अथ सप्तमी वर्ज्या। त
विष्णुपुराणे। सप्तम्यां न स्पृशेत्तैलं नीलवस्त्रं न धारयेत्। न चाप्यामलकैः स्नानं न कुर्यात्कलहं नरः। स
सप्तम्यां नैव कुर्वीत ताम्रपात्रेण भोजनं। बुधः। निषिद्धस्य नक्षणं तैलं तिलैस्तर्प्यणमंजनं। सप्तम्यां नैव भुंजी
त ताम्रपात्रेण भोजनं। इति सप्तमी वर्ज्यानि। अथ पर्वानुष्ठेयं। तत्र मनुः। सावित्रान् शांतिहोमांश्च कुर्या
त्पर्वेणि नित्यशः। सावित्राः सवितृदेवत्याः। अस्मिंश्च होमे गायत्री मंत्रः। अस्तु तेऽर्च्यां। यदाह शंखः। शांति
कामस्तु जुहुयात्सावित्र्या चाहतैः शुचिः। शांतिश्च धर्मोत्तरोदिका निर्दिष्टनिर्दिष्टाः। वर्षाणि तु विष्णुपुराणे
दर्शितानि। चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च। तैलस्त्री
मांससंभोगी पर्वस्वेतेषु नो भवेत्। इति नित्यत्वात् इति वचनात्। पर्वस्वावश्यकर्त्तव्यो यं होमेस्य च सावि
त्रहोमस्य शांतिफलं। विष्णुः। पर्वस्ववश्यं तिलहोमानुकुर्वीत। अलंकृतस्तिष्टदेवमाचरसेवी स्यात्

कात्यायनः। पौर्णमासीममावास्यामथः स्वापो विधीयते। अनाहिताग्निरप्येष पक्षादग्नेर्विधीयते। अनाहिता
ग्निरस्मन्तो मन्त्रिमानू। आपस्तम्बः। दिवादित्यसंख्या निगोपायति। नक्तं चन्द्रमास्तस्मादमावास्यां निशायां
संधीयसीमात्मनो गुप्तिमिच्छेत्। प्रायत्यश्च नचर्यकाले च जायया सहैतां रात्रिं सूर्यचन्द्रमसौ वसतः। सधी
यसी न्द्ररं गुप्तिरक्षा। प्रायत्यं ताम्रायेत्यानमित्वद्दण्डस्पर्शापसर्पणेन वर्जनादिना संम्यकु। शैवा वमन्
किंपादनेन कस्य चर्यया विहितकाल एव। तत्कर्मकरणेन। षडिंशान्मते। कात्यायनस्मृतौ। मासिनत्वस्या
मावास्यादर्शाग्नायोन व स्मृतः। अयातयामास्तेदर्भा नियोज्याः स्युः पुनः पुनरिति। तथा च कात्यायने
न। अमावास्यायां दर्भच्छेदने विधायोक्तं। पितृदेवजपार्थं च वा समादद्यादिति। तथा तद्धिजेन नियोक्त
व्या दैवेपि कर्मणीति। तस्मात् पित्रादिकार्यार्थं कुशग्रहणाय एवामरीचिना। आश्रावणमावास्यायां
दर्भोपादानमुक्तं। मासेन नत्स्य मावास्या तस्यां दर्भो न्वयामतः। अयातयामास्तेदर्भा नियोज्यास्तु पु
नः पुनः। यस्त्वमावास्यायां कुशच्छेदनिषेधः। स तत्कृत्यातिरिक्तविषयः॥ ॥इति पर्वानुष्ठेयं॥ ॥अथ
८२

१८
पर्वणि वर्ज्यानि॥ तत्रौशनसः। पर्वसु च नाधीयीत न मांसमश्नीयात्। न च स्त्रियमुपेयात्। पर्वसु हिरक्षः पिशा
चव्यभिचारिवन्तितं विनीति। विष्णुः। पर्वसु न च्छणमपि छिद्यते। पैठीनसिः। न पर्वसु तैलं क्षुरं मैथुनं मांस
मिसुपेयात्। उपेक्षा ऽनुपयुंजीत। विष्णुपुराणे। चतुर्दश्यादिपंचपर्वाण्यभिधायोक्तं। तैलस्त्रीमांससंभो
गी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नरकं नृप। मनुः। चतुर्दश्यष्टमी दर्शपौर्णमास्य
र्कसंक्रमः। एषु स्त्रीतैलमांसादिदंतकाष्ठानि वर्जयेत्। देवलः। पंचदश्यां चतुर्दश्यामष्टम्यां च विनि
शारदः। तैलं मांसं व्यवायं च क्षुरं चैव विवर्जयेत्। हारीतः। तैलं मांसं नगं स्त्रीरं पर्वकालेषु वर्जयेत्। एते
ष्वलक्ष्मीर्वसति पर्वकालेषु नित्यशः। यमः। श्लोकं तकेतथा लक्ष्मीर्नित्यमेव तातलसा। नगमांसेक्षु
रे तैले नित्यं पर्वसु तिष्ठति। वृद्धशातातपः। दंतकाष्ठममावास्यामैथुनं च चतुर्दशी। दंति समन्ततः
तस्यतैलाभ्यंगणमष्टमी। यमः। आसप्तमं कुलं दंति शिरोभ्यंगाच्चतुर्दशी। मांसाशने पंचदशी का
मधर्मे तथाष्टमी। मत्स्यपुराणे। छिन्नति वीरुधो यस्तु वीरुत्संस्थे निशाकरे। पात्रं वा पातयेत्यस्तु कस्ते

D.R. BHAU DAJI

इत्वांसविंदति।वीरुत्संस्थेवनस्पतिगते।पैठीनसिः।नामावास्यायांहरितानिछिंद्यात्।कुशांश्चसमिध
श्चतथा।सर्वत्रावस्थितःसोमोहिंसायांब्रह्महाभवेत्।क्वचिदमावास्यायांनहिंस्यादितिपाठः।पित्रा
दिकार्यार्थंचकुशाग्रास्या।एवेतिपर्वानुष्ठेयत्रस्तावदर्शितं।तथा।सायंसंध्यापरान्हेचपुनर्भोजनेति
लपिष्टंतथैवच।अमावास्यांनसेवेतरात्रौमैथुनभोजने।स्मृतिसमुच्चयात्।सायंसंध्यापरान्हेचपुन
र्भोजनमैथुने।तिलंमांसंशिलापिष्टंअमावास्यांविवर्ज्जयेत्।सूर्येन्दुयोगतेसोमेपरान्नंयोहिभक्षयेत्।
तस्यमासार्जितंपुण्यंयस्यान्नंतस्यतद्भवेत्।अमावास्यासुसर्वासुनवंवस्त्रंनधारयेत्॥इतिपर्ववर्ज्यानि॥
अथकालविशेषेणनानावर्ज्याणि॥स्कंदपुराणे।शिरःकपालमंत्राणिनरवंचर्मतिलास्तथा।एता
निक्रमशोनित्यमष्टम्यादिषुवर्ज्जयेत्।शिरःनालिकेरं।कपालमलाबु।अंत्रंपटोलीफलं।नरवंनि
ष्पावाः।चर्म्ममसूरः।तिलाःवार्त्ताकमपि।व्याकुर्वतेहलाः।चतुर्विंशतिमशेनन्नराहमेवंपच्यते।यदीच्छे
द्गमनमष्टम्यादिषुवर्ज्जयेत्।व्यासः।षष्ठ्यष्टम्यमावास्यापक्षद्वयचतुर्दशी।अत्रसंनिहितंपापंतैले

का·हि·
२८

मांसेभगेक्षुरे।अत्रकेचिदाहुः।षष्ठ्यादिषुक्रमेणतैलादीनांनिषेधः।षष्ठ्यांतैलमनायुष्यंअष्टम्यांपिशि
तंतथा।कामभोगश्चतुर्दश्याममावास्यांक्षुरक्रियेति।स्मरणात्।अन्यत्रतैलादौदोषाभावइतितद्युक्तं।
अन्यत्रापितैलादिनिषेधात्।तत्रमनुः।मांसाशनेपंचदशींतैलाभ्यंगेचतुर्दशीं।अष्टमींग्राम्यधर्म्मेषु
क्षुरंतमपिपातयेत्।ग्राम्यधर्म्मोमैथुनं।क्षुरकर्म्मचतुर्दश्याममावास्यांचमैथुनमिति।षड्विंशन्मते
संक्रांत्यांपंचदश्यांश्राद्धवासरे।वस्त्रंसंपीडयेत्नैवक्षुरेणापिनक्षुयते।तिलतैलनिषेधश्चतिथ्यंतर
प्रस्तावदर्शितः।व्यासोपि।तैलंनस्पृशेदामंचसादीनुच्छेदयेन्नच।क्षुरकर्म्माणिवर्ज्याःस्युःपर्वसं
धौतथैवच।इतिपर्वनिषिद्धकालाः॥अथश्मश्रुकर्मणिनिषिद्धकालाः॥मरीचिः।निराशनस्यभु
क्तस्यतिष्ठतश्चतथैवच।सायंप्रभृतकश्चैवस्नातस्यभूषितस्यच।यात्रायुद्धोद्यतस्यापिश्मश्रु
कर्मविवर्ज्जयेत्॥इतिक्षुरकर्म्म॥अथमांसवर्जनकालाः॥नंदिपुराणे॥ईश्वरवचनं।यदिनामचतु
र्दश्यांसदामांसंविवर्जयेत्।वर्जयेदयनेमुख्येकृतस्वर्गमतिर्नरः।चतुर्थींचाष्टमींचैवद्वादशींच

चतुर्दशी। तदा पंचदशी वज्योषडशीतिमुखाने वा संक्रमणं चापि सूर्यस्य विषुवे चापवार्षिको मां
सादिविरतो मर्त्यः स्वर्गं याति दिनत्रयं। अथवाश्वयुजं मासं वर्जयेन्मांसभक्षणे। बहुमासस्कृ
तं पुण्यं लभतीत्यश्वयुजान्तरः। मांसभोजनसंत्यागात्पुरुषः शुद्धमानसः। यो नरः कार्तिकं मासं
मांसं तु परिवर्जयेत्। संवत्सरस्य लभते पुण्यं मांसविवर्जनात्। इति मांसवर्जनकालाः॥
अथ शयने विहितनिषेधकालाः॥ तत्र दक्षः। प्रदोषपश्चिमौ यामौ वेदाभ्यासरतो नयेत्। यामद्व
यं शयानस्तु ब्रह्मभूयाय कल्पते। शंखलिखितौ। त्रयाणां वर्णानां पूर्वरात्रे जागरणं। प्रचेताः। न
संध्यायां वा स्थाने। अंगिराः। नोच्छिष्टो न दिवा स्वाप्यात् संध्ययोर्नैव नग्नस्तनि। व्यासः। न दिवा नार्द्र
पादस्तु न पूर्वापररात्रयोः। मनुः। न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्। परिश्रान्तोऽपि न स्वा
पादित्यर्थः। गौतमः। नापररात्रमधीत्य पुनर्न संविशेत्। हारीतः। ब्राह्मे मुहूर्ते प्रतिबुध्य स्वाध्यायम
वस्यैन प्रति संविशेदिति। आपस्तंबः। मध्यं नीरूपयन्तया सार्धं रात्रिं राधीता॥ इति शयने नि   का॰ हि॰ २८२

षिद्धकालाः॥ ॥ अथ दंतधावननिषिद्धकालाः॥ ॥ तत्र कात्यायनः। उत्थाय नेत्रे प्रक्षाल्य शुचिर्भू
त्वा समाहितः। परिजप्य च मंत्रं तेन भक्षयेद्दंतधावनं। आयुर्बलं यशो वर्चः प्रजापशुवसूनि च।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते॥ इति मंत्रः॥ व्यासः। शुक्लपक्षे प्रातरुत्थाय भक्षयेद्दंतधा
वनं॥ श्राद्धे यज्ञे च नियमान्नाद्यात्प्रोषितभर्तृका। व्यासः। श्राद्धे जन्मदिने चैव विवाहे मुखदूषि
ते। व्रते चैवोपवासे च वर्जयेद्दंतधावनं॥ संवर्तः॥ आद्ये तिथौ नवम्यां च षष्ठ्यां चैव दर्शस्तथा। आ
दित्यवारे शौचे च वर्जयेद्दंतधावनं। कात्यायनः। प्रतिपद्दर्शषष्ठीषु नवम्यां च विशेषतः। दंतानां काष्ठ
संयोगाद्दहत्यासप्तमं कुलं। व्यासः। प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनं। पर्णैर्न द्रुमकाष्ठैः स्या
ज्जिह्वोल्लेखं तथैव च। व्यतीपातसंक्रांतिनंदापर्वसु दंतकाष्ठनिषेधः। कालविशेषेण नाना वर्ज्य
प्रस्तावे दर्शिताः। अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ। अपां द्वादशगंडूषैर्विदध्याद्दंतधाव
नं। भक्षविरूशराद्यैनैव पर्णैः। ता। अपां द्वादशगंडूषैः पत्रैर्वा शोधयेन्मुखं। तथा। यो मोहात्स्नानवेला

यां न द्द्याद्दंतधावनं। निराहारस्य गच्छंति पितरो देवतास्तथा। पालाशमासनं यानं दंतकाष्ठं च पादु
के। वर्जयेद्गुरुप्रयत्नेन सममाश्वमेव वा मध्याह्नस्नानविषमेतत्। प्रातःस्नानविधानेन पदार्थया
सरः। दंतान् सर्वमधो वर्षे त्रातः सिंचेच्च लोचने। तोयपूर्णमुखो ग्रीष्मे शीतेन शारदि स्मृतः। प्रक्षा
ल्य मन्त्रयेत्पूर्वं गंडूषान् वै वर्जयेत्स्फुटम्॥ ॥इति दंतधावनकालनिर्णयः॥ ॥अथ संध्याकालादि
षु वर्ज्यानिर्णयः॥ तत्र गौतमः। तिष्ठेत्पूर्वामासीनोत्तरामेवाऽऽतिथ्यो ज्योतिर्दर्शनाद्वाग्यतः सज्यो
तिषकाले प्रारंभः। ज्योतिरित्यर्थदर्शनान्निष्टिशिरित्यर्थः। प्रातःसंध्यासनक्षत्राद्यास्तापि तैलेन स्पृशदा
मंद्रवारादौ श्लेदयेन्न च पश्चादौ च रवौ पर्व्यां रिक्तायां च तथा तिथौ। चतुर्दश्यष्टमी चैव अमावास्या
च पूर्णिमा। वर्ज्यानेतानि सर्वाणि रविसंक्रांतिरेव च। तैलस्त्रीमांससंभोगी पर्वस्वेतेषु यो नरः। का॰नि॰ २८३
विण्मूत्रभोजनं नाम प्रयाति नरकं नृप। बृहस्पतिः। अमावास्याष्टसंक्रांतिचतुर्दश्यष्टमीषु च।
स्त्रीनारांर्द्धर्वस्त्राकस्यात्तस्मादत्रापि तैलनिषेधसिद्धतिथिविशेषसंबंधेन तैलादिविशेषनिषेधो दोषवि

शेषार्थः। अत्र तावत्षष्ठ्यादितिथिकाले तैलादिनिषेधः। ननु षष्ठ्यादिसंबंधाद्दोषरात्रोपलक्षणं प्र
माणं नायात्। वामनपुराणे। नंदासु नाभ्यंगमुपाचरेत क्षौरं च रिक्तासु जयासु मांसं। बुधेच्छयो पूर्णा
सु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेत। नाभ्यंगमर्के न च भूमिपुत्रे क्षौरं च शुक्रे च कुजे
च मांसं। बुधे च योषां न समाचरेत शेषेषु सर्वाणि सदैव कुर्यात्। चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशा
खाप्रतिपत्सु वर्ज्यं। मूले मृगे भाद्रपदासु मांसं योषिन्मघाकृत्तिकसोत्तरासु। चतुर्दश्यष्टमीदर्शपौ
र्णमास्यर्कसंक्रमः। एषु स्त्रीतैलमांसादि दंतकाष्ठं विवर्जयेत्। देवलः। पंचदश्यां चतुर्दश्यामष्ट
म्यां च विशारदः। तैलं मांसं व्यवायं च क्षुरं च परिवर्जयेत्। यमः। सिताष्टमीषु नक्तादि दक्षयेत्तथा। तैला
भ्यंगक्षौरकर्मस्त्रीसंगं च विवर्जयेत्। पुराणे। चतुर्दश्यां तथाष्टम्यां पंचदश्यां च पर्वसु तैलाभ्यंगं त
था भोगं योषितश्च विवर्जयेत्। न स्नानं नोदकं वापि न निशायां च गोमयं। गोमूत्रं तु प्रदोषे च नरः स्त्री
पाकं छिमां नरः। निशायामपि स्त्रीहरकास्याभिरत संबध्नतो। अर्थं याहकर्मार्थेन निशायां स्नात्वा

निषेधः।स्कांदे।स्नानेचैवमहादानेस्वाध्यायेवाथतर्प्पणे।प्रथमेऽह्निनकुर्वीतमहागुरुनिपातने।मांडव्यः।
श्रुतिवेधजातकान्नप्राशनयात्राप्रतिमार्चाः।रविन्नवनस्थेजीवेनकार्यंविवाहस्थनात्रविष्णुपुराणे।वि
ष्णौसुप्तेविवर्ज्यंतेक्रियाःसर्वाःशुभादिकाः।विवाहव्रतबंधादिचूडासंस्कारदीक्षणं।यज्ञोगृहप्रवेशश्च
प्रतिमादेवतादृष्टां।पुण्यनियानिकर्म्माणिनस्कःसुप्तेजगत्पतौ॥इतिविशेषनानातिथ्यावर्ज्यानि॥ ॥अथ
क्षौरकर्म्मनिषिद्धकालः॥तत्रव्यासः॥क्षौरेशनैश्चरादित्यभौमाहोरात्रमेवच॥तिथिंप्रतिपदंरिक्तांतिथिं
चपरिवर्जयेत्॥ज्योतिःशास्त्रे।नाभ्यक्तभुक्तरणकालनिराशनानांनस्नातसुभगमनांशुकभूषितानांसंध्या
निशासुकुजसौरशनैश्चराणांक्षौरंहितंनवतिवाह्निनचापिवेदं॥मार्कंडेयः॥अष्टमीचतथाषष्ठीनव का॰नि॰ २८४
मीचचतुर्दशी।क्षुरकर्मणिवर्ज्याःस्फःपर्वसंधौतथैवच॥ ॥इतिक्षौरकर्मनिषिद्धकालाः॥ ॥अथसंध्याकर्म्म
णि।प्रातःसंध्यांसनक्षत्रामुपासीतयथाविधि।सादित्यांपश्चिमांचैवनोपासतेविप्राःकथंतेब्राह्मणाः।
स्मृताः।अथब्राह्मणपंचकमभिधायोक्तं।शातातपः।अनागतांतुयःपूर्वांसादित्यांयश्चपश्चिमां।नोपासी

८३

तद्विजःसंध्यासशूद्रोब्राह्मणैःस्मृतः।योगियाज्ञवल्क्यः।सायंसंध्यामुपासीतनास्तमन्यागतेरवौ।
व्यासः।सूर्येतमसिसंप्राप्तेपादशौचक्रियाचिताः।बहिःसंध्यामुपासीतनो~~स्तमन्यागतेरवौ~~कुशपाणिः
समाहितः।कविःसूर्येस्नानवलसंप्राप्तेइतिपाठः।पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्।प
श्चिमांतुसमासीनःसम्यगृक्षविभावनात्।याज्ञवल्क्यः।जपन्नासीतसावित्रींप्रत्यगातारकोदयात्।
संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात्।अहोरात्रस्ययःसंधिःसूर्यनक्षत्रवर्जितः।सातुसंध्या
समाख्याताऋषिभिस्तत्त्वदर्शिभिः।तत्रसंध्यामुपासीतेत्युक्तं।तत्सर्वंप्रदर्शितवचननिचयपर्यालोच
नेयैवव्याख्येयं।पूर्वसंध्योपास्तिःसूर्यदर्शनावधिका।पश्चिमसंध्योपास्तिर्नक्षत्रदर्शनावधिकेति।श्रु
तिः।यएवंविद्वान्सायंप्रातःसंध्यामुपास्तइति।अत्रसायंशब्देनपूर्वोक्तएवसंध्याकालोगृह्यते।यदातुनक्ष
त्रदर्शनात्संध्यासायंतत्परतःस्थितः।तत्परारजनीज्ञेयातत्रधर्म्मान्विवर्जयेत्।इतिवचनान्नक्षत्रदर्शनो
र्द्ध्वकालस्यसायंशब्देनाभिधानंतदापूर्ववचनपर्यालोचनयाकथंचित्सर्वकालातिक्रमएवंवेदितव्यः।यो

गियाज्ञवल्क्यः। ह्रासवृद्धी तु सततं दिवसानां यथाक्रमं। संध्यामुहूर्त्तमात्रं तु ह्रासवृद्धौ च सा स्मृता॥ वह्नि
पुराणात्॥ सर्वकालमुपस्थानं संध्यायाः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥ पुलस्त्यः।
संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतके वापि त्यजन्गच्छेदधोगतिं। एवं द्वैधे सति
व्यवस्थामाह॥ सूतके मृतके चैव संध्याकर्म च संत्यजेत्। मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः॥ ए
वं च यानि सूतकादि संध्यानिषेधपराणि वचनानि तानि मंत्रप्रयोगनिवृत्तिपराणीति मंतव्यं। अं
जलिप्रक्षेपस्तु उच्चार्यमाण एव सावित्र्या कार्यः। तथा पैठीनसिः सूतके तु सावित्र्यांजलिं प्रक्षिप्य प्रद
क्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्॥ इति संध्याकालनिर्णयः॥ ॥अथ संध्याकालवर्ज्यानि॥ तत्र मनुः। च
त्वारीमानि कर्म्माणि संध्यायां परिवर्जयेत्। आहाराज्जायते व्याधिर्गर्भो रौद्रश्च मैथुनात्। निद्रातोऽप
तेलक्ष्मीः स्वाध्यायादायुषः क्षयः। वृद्धमनुः। आहारं मैथुनं निद्रां संध्याकाले विवर्जयेत्। कर्म चाध्यय
नं चापि तथा दानप्रतिग्रहौ। आहाराद्व्याधिमाप्नोति गर्भो रौद्रश्च मैथुनात्। स्वपनात्स्यादलक्ष्मीकः।

का॰ नि॰
२५

९४

कर्म्म चैवात्र निष्फलं। अध्येता नरकं याति गृहीता धो निमज्जति॥ ॥इति संध्याकालवर्ज्यानि॥
अथ रात्रिकरणीयवर्ज्यानि॥ स्कांदे। रात्रौ दानं न कर्त्तव्यं कदाचिदपि केनचित्। हरंति राक्षसा यस्मा
त्तस्माद्दातुर्भयावहं। विशेषतो निशीथे तु न शुभं कर्म्म शर्म्मणे। अतो विवर्जयेत्प्राज्ञो अन्नादि
शुभमहानिशां। देवलः। राहुदर्शनसंक्रांतियात्रार्त्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्य
ते। यात्रादावपीति पाठः। यज्ञविवाहयात्रायां तथा पुस्तकवाचने। दानान्येतानि शस्तानि रात्रौ
देवालये तथा॥ महाभारते। रात्रौ दानं न शंसंति विना चाभयदक्षिणां। विद्यां कन्यां द्विजं शय्यां दी
पमन्नं प्रतिश्रये। विष्णुधर्मोत्तरे। भोजनं चातिथीनां च पांथानामपि भोजनं। तच्च रात्रौ तथा ज्ञेयं
गवामुक्तं च भोजनं। मार्कंडेयपुराणे। महानिशा तु सा ज्ञेया मध्यस्थं प्रहरद्वयं। स्नानं तत्र न कुर्वी
~~त स्नानं चैव विशेषतः~~। काम्यनैमित्तिकादृते। विश्वामित्रः। महानिशा तु कथिता रात्रौ मध्यमया
मयोः। नैमित्तिकं यदा कुर्यान्नित्यं तु न मनागपि। क्वचित्तु न काम्यं मनागपीति पाठः॥ भविष्यपुरा

णे राशौ स्नानेन कुर्वीत दानं चैव विशेषतः। नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु॥ ग्रहणोद्वाहसंक्रांति
यात्रार्त्तिप्रसवेषु च। श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते॥ विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु
तथोपरागपातेषु स्नाने दाने निशा शुभा॥ ऋतुर्गर्भाधानं। पातो व्यतीपातः। वशिष्ठः। पुत्रजन्मनि यज्ञे
च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि॥ तथा। पुत्रजन्मनि यात्रायां शर्वर्यां द
त्तमक्षयं॥ ॥इति रात्रिकरणदानवर्ज्यानि॥ ॥अथ चतुष्पथासेवनकालः॥ तत्र व्यासः। मध्यंदिने उष
काले अर्द्धरात्रे च सर्वदा। चतुष्पथं न सेवेत ~~चतुष्पथं~~ उभे संध्ये तथैव च॥ मनुः। मध्यंदिनेऽर्द्धरात्रे च श्राद्धं भु
क्त्वा सामिषं। संध्ययोरुभयोश्चैव न सेवेत चतुष्पथं॥ श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा। प्रा
~~त्स्येदायतप्राण आपन्न~~ः प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ वैयाघ्रपदः। श्रोत्रियं सुभगं गां च अ
ग्निमग्निचितं यथा। यः पश्येदायतप्राण आपद्भ्यः स प्रमुच्यते॥ कात्यायनः। रोचनं चंदनं हेम मृदंगं दर्प
णं मणिं। गुरुमग्निं तथा सूर्यं प्रातः पश्येत् समाहितः॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः॥

हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः। एतानि सततं पश्येन्नमस्येच्च समाहितः॥ यज्ञमिष्टान्नदंस
त्रिशतायुर्धार्मिकान्स्तुविनुज्ञानवृद्धांस्तपःसिद्धान्दृष्ट्वा पापात्प्रमुच्यते॥ पराशरः। अग्निविप्र
पिलासत्रीराजानिभ्रुमहोदधिः। दृष्ट्वैमाः पुनं तैते तस्मात्पश्येत नित्यशः। पापिष्टं दुर्भगं मत्तं न
ग्नमुत्कृत्तनासिकं। प्रातरुत्थाय यः पश्येत् स कलेरुपलक्षणं॥ ॥इति कालविशेषेणावलोकनीया
नवलोकनीयानि॥ ॥अथ नदीनां रजःकालनिर्णयः॥ तत्र मार्कंडेयः। द्विमासं सरितः सर्वा नवेति हि
रजःस्वलाः। अप्रशस्तं ततः स्नानं वर्षादौ नववारिणा॥ कात्यायनः। मासद्वये श्रावणादौ सर्वा नद्यो
रजःस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥ तथा। नदीनदस्ययोर्म्मध्ये सर्वा नद्यो रजःस्वला
॥ तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणं। धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दव
हा गर्तास्ताः परिकीर्तिताः॥ अत्रिः। सिंहकर्कटयोर्म्मध्ये सर्वा नद्यो रजःस्वलाः। तस्मान्नादीनि कर्मा
णि तासु कुर्वीत मानवः॥ योगियाज्ञवल्क्यः। अगस्त्यास्यागतास्यापो नद्यः प्रथमवेतिकाः। प्रक्षी

गताः पतेतास्तु याः स्रवंत्यो विनिःसृताः॥ क्वचिच्च यामा इति पाठः॥ तीर्थे जलावतारणमार्गः॥ तथा च स्मृ
त्यंतरं॥ अजा गावो महिष्यश्च ब्राह्मणश्च प्रसूतिकाः॥ दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकं॥ याज्ञव
ल्क्यः॥ यावन्नोदेति भगवान् दक्षिणाशाविभूषणः॥ तावद्रजोवहा नद्यो वर्ज्याश्चैवाद्य जाह्नवी॥ प्रथमेक
र्कटे देवी त्र्यहं गंगा रजःस्वला॥ सर्वा रक्तवहा नद्यः करतो नद्यां पि स्नाने प्रशस्ते नान्यथा निरः॥ तथा॥ तथा
पुत्रजन्मनि यात्रायां शर्वर्यां दृष्टसंक्रमे ह्ययं॥ ॥ इति रात्रिकरणबुवाहिनी॥ प्रावृट्काले महानद्यः संति
नित्यं रजःस्वलाः॥ चतुर्थेहनि संप्राप्ते शुद्धा भवति जाह्नवी॥ आदित्यदुहिता गंगा प्लक्षजा च सरस्वती॥ का॰ हि॰
रजसा नाभिभूयंते ये चान्ये नदसंज्ञकाः॥ आदित्यदुहिता गंगा प्लक्षजा च सरस्वती॥ अपर्युषितपापास्ते २७
नद्यः स्त्रियः पिबंति ये॥ गंगा च यमुना चैव प्लक्षजा च सरस्वती॥ रजसा नाभिभूयंते शोणश्चापि महान
दः॥ स्मृत्यंतरे॥ कालिंदी गोमती गंगा पवित्रा देवनिर्मिता॥ सामान्या फल्गुणी गोदा च रजो नाभिभवत्य
तो निगमः॥ गंगा धर्मद्रवी पुण्या यमुना च सरस्वती॥ अंतर्गतरजोयोगाः सर्वास्वपि चामलाः॥ निगमः

प्रतिस्रोता रजोयोगो रथ्याजलनिवेशनं॥ गंगायां नैव दुष्यंति सा हि धर्मद्रवः स्वयं॥ तास्रो
णमुपगच्छंति ग्रीष्मे कुसरितो भुवि॥ तासु स्नानं न कुर्वीत प्रावृषे रथ्यां तु दर्शनात्॥ कात्या
यनः॥ याः शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि॥ तासु प्रावृषि न स्नायाद्दशर्णो दशवासरं॥
कर्कटादौ रजोदुष्टा गोतमी वासरत्रयं॥ चंद्रभागा गोमती सिंधुः सरयूर्नर्मदा तथा॥ उपाक
र्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः॥ पिपासावस्तु गच्छंति संहृष्टाः स्वशरीरिणः॥ वे
दाश्छंदांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः॥ जलार्थिनश्च पितरो मरीच्याद्यास्तथर्ष
यः॥ समागमस्तु यत्रैषां तत्रास्तां सरितो मलाः॥ नूनं सर्वव्यपयाति किमुतैकं नदीरजः॥
उपाकर्मणि चोत्सर्गे प्रेतः स्नाने तथैव च॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते॥ स्वर्धुन्यंभ
समानि स्युः सर्वाण्यंभांसि भूतले॥ कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः॥ स्वर्धुनी गंगा नवांबु स्तु
विभूमिष्ठं महार्घमिति स्मृतं॥ एकाहिं वेगन सम पुराणसततं तु वि॥ इति नदीनां रजः॥ कालनिर्णयः

अथ श्वेतसागरस्पर्शास्पर्शकालः। श्वेतसागरे सेव्यो न स्पृष्टव्यो कदाचन। कोणवीरे स्पर्शोस्ति वै मु
शंपर्वणि स्पृशेत्। कश्चित्स्य मंदवारो ऽपि तिपादः ॥ ॥ इति श्वेतसागरस्पर्शास्पर्शकालः ॥ ॥ अथ स्नानदा
त्रनिर्णयः ॥ तत्र कात्यायनः। यथाहनि तथा प्रातर्नित्यं स्नायादतंद्रितः। अत्यंतमलिनः कायो नवछिद्र
समन्वितः। स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं। प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत्। वैयाघ्र
पदः। प्रातः संक्षेपनः स्नानं शौचं कुर्यात्तदिष्यते। मंत्रैस्तु विधिनिष्पाद्यं मध्याह्ने तु सविस्तरं। प्रातः स्ना
यी नयेन्नित्यं मध्यस्नायी नवे सदा। सप्तजन्मकृतं पापं त्रिवर्षेण व्यपोहति। उषस्युषसि यत्स्नानं वै सूर्य
ग्रहे तथा। प्राजापत्येन तत्तुल्यं रुषिः शातातपोऽब्रवीत्। प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥ का॰ दि॰ २८८
यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः। योगि याज्ञवल्क्यः। उभे संध्ये तु स्नातव्यं ब्राह्मणैश्च गृहाश्रितैः
तिसृष्वपि च संध्यासु स्नातव्यं तु तपस्विना। व्यासः। द्वादश्यां कृष्णपक्षे तु न स्नातव्यं कथंचन। सुतसंतान
मिच्छद्भिर्धनधान्ये नरैरपि। दशमी पुत्रनाशाय धननाशाय त्रयोदशी। द्वितीया नयनाशाय स्नाने वै तानि वर्ज

७

येत्। कश्चित्तृतीयपादोन्यथा पठ्यते। तृतीया नष्टनाशाय वरिष्ठः प्रतिपद्यनपत्यः स्यात्तृतीयायां द्युप
त्यकः। दशम्यामधनः स्नाने सर्वं हंति त्रयोदशी। काण्वः। दशमी नवमी चैव तृतीया च त्रयोदशी। प्रतिप
च विशेषेण स्नानमेतासु वर्जयेत्। षट्त्रिंशन्मते। दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः। नवच
म्यां नभवेशत्र निमित्ताशत्रसंभवः। यमः। दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः। पुत्रः कुर्वन्निरा
वष्टमीं च पित्रोस्तु जीवितोः। कुर्यादन्यतमे तीते शुक्लरस्तो दिवाकरे। गर्गजाबाली। त्रयोदश्यां तृतीयायां
दशम्यां चैव सर्वशः। शूद्रविट्क्षत्रियाः स्नाने नाचरेयुः कदाचन। अस्तंगते रात्रौ नोगायक्रियते यत्तु स्ना
ने यादृच्छिकं नरैः। तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु। गर्गजाबाली। क्रियते वा न वा यत्तु शास्त्र
यंत्रणया विना। मलव्यपोहनफलं स्नानं यादृच्छिकं च यत्। तन्न कुर्यात्तृतीयायां चतुर्दश्यां तथा ति
थौ। शाश्वतीं तृप्तिमन्विच्छन्दशम्यामपि पंडितः। तथा नित्यं न शापये स्नानं काम्यं नैमित्तिकं च यत्। द
शम्यामपि कर्तव्यं न तु यादृच्छिकं क्वचित्। बौधायनः। विनाद्भिस्तत स्नानं न स्नायाद्दशमीषु चावशि

रुषेणेनसिः।पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा।नित्यस्नानंप्रकर्तव्यंतिथिदोषनविद्यते।वर्जयेदित्य
नुवृत्तावापस्तंबः।अस्तमितेवस्नानं।नस्नायात्पराशरः।दिवाकरकरैःपूतंदिवास्नानंप्रशस्यते।अप्रशस्तंनि
शिस्नानंराहोरन्यत्रदर्शनात्।परांनसितथैवान्येनाशिरस्कंकथंचनावशिष्ठः।पुत्रजन्मनियज्ञेचतथासं
क्रमणेरवेः।राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशि।व्यासः।स्नानंदानंतपःश्राद्धमनंतंराहुदर्शने॥
आसुरीरात्रिरन्यत्रतस्मात्तांपरिवर्जयेत्।तथाचाराजौस्नानंनकुर्वीतदानंचैवविशेषतः।नैमित्तिकंचकु
र्वीतस्नानंदानंचरात्रिषु।पराशरः।उपरागेपरंस्नानंस्मृतेवैवमुदाहृतं।महानिशातुसाप्रोक्तामध्यस्थंप्रहरद्व
यं।प्रदोषपश्चिमौयामौदिनवत्स्नानमाचरेत्।दिवायदाहृतंतोयंकृत्वास्वर्णयुतंतथा।रात्रिस्नानेतुसंप्राप्ते का॰हि॰
स्नायादानलसंनिधौ।उछिष्टाकयवातादौस्नानंनैमित्तिकंस्मृतं।विरश्म्योपरागेचतथैवग्रहसूतके।मनु २८९
ःनस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि।नवासोभिःसहाजस्रंनाविज्ञातेजलाशये।उक्तेतिननित्यस्नानं
स्यप्रतिषेधः।तस्यभोजनानंतरप्राप्त्यभावात्।नापिचांडालस्पर्शनिमित्तस्यनोस्तुविःद्वाणमपितिद्दि

तिवचनविरोधप्रसंगात्।विधिशास्त्रनिषेधासंभवस्यैतेलास्येगकालप्रस्तावेदर्शितत्वात्।तस्मात्प्रा
स्थिकस्नाननिषेधोऽयं।अतुरस्यतुसर्वदावारुणस्नाननिषेधः।अजस्रमनवरतं।नस्नायादुत्तरेत
तोमांगल्यानिनिर्वर्त्येच।अनुव्रज्यसुहृद्बंधून्पूजयित्वेष्टदेवताः।मार्कंडेयः।महानिशावेषयि
करात्रौमध्यमयामयोः।नैमित्तिकंतदाकुर्यात्काम्यंनतुमनागपि।कश्चित्तुनित्यंनमनागपीतिपाठ
अस्मात्वचनान्नित्यस्नानंकथितंकथंचिदतिक्रांतस्वकालमहानिशावर्जरात्रावपिकर्तव्यंनतुका
म्यमित्यत्रोपरतिगम्यते।महानिशातुविज्ञेयामध्यस्थंप्रहरद्वयं।स्नानंतत्रनकुर्वीतकाम्यंनैमित्ति
कादृते।अत्रकाम्यशब्देनफलार्थंविहितंस्नानमुच्यते।पूर्ववाक्येतुयादृच्छिकमित्यविरोधः।विश्वामित्रः
महानिशातुविज्ञेयारात्रौमध्यमयामयोः।तस्यांस्नानंनकुर्वीतकाम्यमाचमनक्रिया।अत्रकाम्यंयाद
च्छिकमितिमतं।आचमनस्यापिनैमित्तिकस्यप्रतिषेधः।तत्रचाहा।मूत्रोच्चारमध्येरात्रौकुर्यान्नाच
मनंबुधः।स्नायश्चित्तीयतेविप्रःप्राजापत्यार्द्धमर्हति।पुलस्त्यः।रव्यंगारदर्शनेवारिस्नानंकुर्वंतियेनराः

विधिनिःस्नानपीडितमतोः कारिणो यथा। अयनं च गोकेषु श्रूयते। हस्ते ये समुद्रमवगाहयेत्। नान्यत्रावगा
हेत। पुलस्त्यः। पुष्ये जन्मनक्षत्रे व्यतीपाते च वैधृतौ। अमावास्यां नदीस्नाने पुनात्यासप्तमं कुलं। अष्टद
नी रेवती योगे तथा चैरावते नसि। श्रावणं समनुप्राप्य यत्र कुचनसंगमे। सप्तोचनर्देः पुण्या रेविकायां
तथा नसि। चैत्रशुक्लचतुर्दश्यां यः स्नायात् शिवसंनिधौ। न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः। यमनाऱ्या
स्विन्नामितत्या चैत्रीशोकेश्व चतुर्दशीं। शुक्लदशम्यां स्नानं तु पुंडरीके तथैव च। संनिहित्यां ममावास्यां प्रत्तासे
व तथा पुनः। अंजसेव नरः स्नात्वा मुच्यते सर्वकिल्बिषैः। पुलस्त्यः। ज्येष्ठमासे तु संप्राप्ते दशम्यां हस्तसंयुते।
दशजन्माघहा गंगा तेन पापहरा स्मृता। आषाढ्यां सरयूयोगे श्रावण्यां सततं तथा। यमः। प्रौष्ठपदस्य का॰ष्टि॰ २९०
माघस्य शुक्ला या तु त्रयोदशी। तस्यां स्नात्वा वितस्तायां सर्वपापैः प्रमुच्यते। यदीच्छेद्विपुलान् भोगान् चं
द्रसूर्यग्रहोपमान्। प्रातःस्नायी भवेन्नित्यं मासौ द्वौ माघफाल्गुनौ। प्रातःस्नायी तु सततं मासौ द्वौ माघ
फाल्गुनौ। दिवान् पितॄन् समभ्यर्च्य मुच्यते सर्वकिल्बिषैः। बालस्तारुणको वृद्धो नरो नारी नपुंसकाः। स्नात्वा

माघे स्नानेन तीर्थे प्राप्नुवंती स्थितं फलं। माघमासि रटंत्यापः किंचिदभ्युदिते रवौ। ब्रह्मघ्नं वा सुरापं वा कं पतंतं पु
नीमहे। प्रासादाय त्रैलोक्यः स्त्रियश्चाप्सरसां समाः। तत्पथ्ये या निमज्जंति ये माघे भास्करोदये। संयतः
पथि गच्छेत्तु भैरीयैः अन्यवर्जितः। यदीच्छेद्विपुलान् भोगान् चंद्रसूर्योपमान् शुभान्। माघफाल्गुन
यो मध्ये प्रातःस्नायी सदा भवेत्। अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत्। पादे पदेश्वमेधस्य फलमाप्नो
ति मानवः। पिता पितामहैः सार्द्धं वृद्धमातामहैस्तथा। एकविंशकुलैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान्। माघ
मासं नसि स्नात्वा विष्णुलोकं स गच्छति। नारदीयपुराणे। संप्राप्ते माघमासे तु तपस्विजनवल्लभे। क्रोशंति
सर्ववारीणि समुद्गति दिवाकरे। पुनीमः सर्वपापानि त्रिविधानि न संशयः। ब्रह्मघ्नस्तेयकायानि सुरास्त्रीव
कर्म्मकृतानि च। उत्तमो माघमासस्तु बहुपुण्यः प्रकीर्तितः। दिवै स्नोजः परिक्लिष्टं माघे मासि जले शुभे। अ
तः पवित्रे द्विजलेशपापौघनाशनं। न तुल्ये भुवना स्नाप्याः कोपि नोजायते तथा। नसुखात् स्नायते पुण्यं पुण्यं
कृष्ण एव स्यात्। तथा च कात्यायनः। यत्र स्यात्कृच्छ्रभूयस्त्वं श्रेयसोपि मनीषिणः। भूयस्त्वं ब्रुवते तत्र कृच्छ्रात्

अयोग्यवाप्यतोतस्मास्नातोवह्निंनसेवेत। अस्नातोवाकथंचनासेवतापदिष्टोमार्घ्येनाशीतार्थेकथंच
नासरितोयंमहावेगेनवक्तुंनास्थितेतथा। वायुनाताडितेरात्रौगंगास्नानसमंस्मृतं। माघमासेवरारो
हेशसोवानिम्नगाजले। माघस्नायीनरोयःस्याद्दुर्गतिंनहपश्यति। तत्रास्तिमानुषेलोकेकिल्बिषंनेव
शोधयेत्। अग्निप्रवेशादधिकंमाघस्नानंवरानने। विष्णुः। दर्शेवापौर्णमास्यांवाप्रारभ्यस्नानमाचरे
त्। पुण्याहेन्यदानित्रिंशन्मकरस्थेदिवाकरे॥ ॥इतिस्नानकालनिर्णयः॥ ॥अथोष्णोदकस्नान
कालनिर्णयः॥ तत्रशंखः। स्नातस्यवह्नितप्तेनतथैवपरवारिणा। शरीरशुद्धिर्विज्ञेयानचस्नानफ
लंलभेत्। याज्ञवल्क्यः। स्वभावदूषिताःसिक्ताउद्धृताभिस्रमानवः। उष्णाभिराचमनैस्नानेनविशुध्यतिमा
नवः। दृष्टोष्णोदकस्नानंवृथाजप्यमवैदिकं। षट्त्रिंशन्मतात्। आपःस्वभावतोमेध्याविशेषाद
ग्नितापिताः। अतःसंतःप्रशंसंतिस्नानमुष्णेनवारिणा। आपएवसदापूतास्तासांवह्निर्विशेषका
तस्मात्सर्वेषुकालेषुउष्णांभःपावनंस्मृतं। अत्रोष्णोदकनिषेधः। काम्यनिमित्तविषयः। विधिस्त

का॰हि॰ २९५

१००

द्व्यतिरिक्तविषयः। तथाचगर्गः। कुर्यान्नैमित्तिकंस्नानंशीताद्भिः। काम्यमेवच। नित्यंयादृच्छिकंचैवयथारुचि
समाचरेत्। क्रियास्नानमथुष्णोदकेननकार्यं। तथाचव्यासः। क्रियास्नानंविनाकुर्यादुष्णोदकपरोदकैः। आ
तुरस्यतुसर्वदोष्णोदकस्नानमेव। तदाहसएव। आदित्यकिरणैःपूतंपुनःपूतंतुवह्निना। आख्यातमातुरस्ना
नेप्रशस्तंतूष्णतोदकं। शीतोस्यश्चनिषिद्धोष्णमंत्रसंस्कारयोगतः। गृहेपिशस्यतेस्नानंतद्विनावाफलंभवे
त्। स्मृतेजन्मनिसंक्रांतौग्रहणेचंद्रसूर्ययोः। अस्पृश्यस्पर्शनेचैवनस्नायादुष्णवारिणा। वृद्धमनुः। संक्रांत्यांभा
नुवारेचसप्तम्यांराहुदर्शने। आरोग्यपुत्रमित्रार्थंनस्नायादुष्णवारिणा। पौर्णमास्यांतथादर्शेयःस्ना
यादुष्णवारिणा। सगोहत्याकृतंपापंप्राप्नोतीहनसंशयः॥ ॥इतिउष्णोदकस्नानकालनिर्णयः॥ ॥अथ
धामलकस्नानकालः। तत्रबृहस्पतिः। उपस्यामलकैर्विष्णुरेकादश्यांविशेषतः। व्यासः। श्रीकामःसर्वदा
स्नानंकुर्यादामलकैर्नरैः। सप्तमींनवमींचैवपर्वकालंचवर्जयेत्। अत्रकेचिदाहुः। पर्वोत्रामावास्येति। य
दाहव्यासएव। अमावास्यानवम्योश्चसप्तम्यांचविशेषतः। धात्रीफलानियत्नेनदूरतःपरिवर्जयेत्। धात्र्याम

लकी। वीर्यहानिं प्रजाहानिं यशोहानिं तथैव च। करोति त्रितयं जन्मतस्माद्यत्नं विवर्जयेत्। तदयुक्तं। श्रीम
द्वाक्येन सप्तमीनवमीपर्वकालव्यतिरिक्ते काले फलार्थं विहितं। अमावास्यादिवाक्येन चामावास्यादि
ष्वनिष्टपरिग्रहार्थं प्रतिषिद्धं। अतो नित्यविषयत्वान्नोपसंहारयोगः। याज्ञवल्क्यः। धात्रीफलस्नानेन सप्त
मीनवमीषु चायः स्नायात्स्यहर्यंतेतेज आयुर्धनं सुताः। षट्त्रिंशन्मते। सप्तम्यां च नवम्यां च संक्रान्तौ
रविवासरे। चंद्रसूर्योपरागे च स्नानमामलकैस्त्यजेत्। षष्ठीं च सप्तमीं चैव नवमीं च त्रयोदशीं। संक्रान्तौ र
विवारे च स्नानमामलकैस्त्यजेत्। यदा चैकादश्यामादित्यवारस्तु विष्णुतुष्ट्यर्थमामलकैः स्नायादेवायत्र
मलकस्नाने प्रत्यवायोक्तं। षट्त्रिंशन्मते। उष्मत्यामलकैर्विष्णुरेकादश्या विशेषतः इति। नन्वादित्यवारआ का॰हि॰
मलकीस्नाननिषेधादेकादश्यामामलकस्नानविधेर्वारांतरविषयता। एकादश्यामामलकस्नानविधे २५५२
रादित्यवारामलकस्नाननिषेधस्य तिथ्यंतरविषयतायाअप्युपपत्तेः। कथं तर्हि निर्णयः। उच्यते। निषेधे
रागप्राप्तिस्नानविषय इति विधिप्राप्तविषयत्वे विकल्पापत्तेः। तस्य चान्याय्यत्वात्। तस्मादादित्यवारस्यैका

दश्यामामलकस्नानं कार्यमिति सिद्धं॥ ॥इत्यामलकस्नानकालनिर्णयः॥ ॥अथ तिलस्नानविहि
तनिषिद्धकालौ। तत्र बृहस्पतिः। सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः। षट्त्रिंशन्मते। सप्त
म्यां च नवम्यां च संक्रान्तौ रविवासरे। त्रिषुसप्तस्यमावास्यासंक्रान्तिगृहस्थितिषु धनपुत्रकलत्रार्थी ति
लपिष्टं न संस्पृशेत्॥ ॥इति तिलस्नानविहितविधिकालाः॥ ॥तथाभ्यंगविहितनिषिद्धकालौ॥
तत्र मार्कंडेयः। अपुष्टिः कांतिरायुर्धनानि रोगवर्जितः। निर्धनो नृपतिश्चैव वारेष्वभ्यंगकृन्नरः।
आदित्यादिषु वारेषु यथाक्रमेणाभ्यंगफलविशेषो ज्ञेयः। ज्योतिःपराशरः। संतापः कांतिरायुर्धनं
नाशया। अनारोग्यं सर्वकामा अभ्यंगे भास्करादिषु। यः सदा कुरुतेऽभ्यंगं ग्रीष्मान्स्वकालवासरान्। नूतवेदपम्ह
सुः स्यात्स्यावदन्योऽर्कनंदनः। बोधायनः। अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः। शिरोऽभ्यंगं वर्जयेत्तु पर्वण्य
पि तथैव च॥ ॥इत्यभ्यंगविहितनिषिद्धकालौ॥ ॥अथ तैलाभ्यंगे कालनिर्णयः॥ तत्र कात्यायनः। पक्षादौ च र
वौ षष्ठ्यां रिक्तायां च तथा तिथौ। तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते। अत्र च तिलोद्भवं तैलं न तु कुसुमादि

ष्णवमिति। तस्य विकार इति। पाणिनिस्मृतेः। तत्र प्राणिकृते निष्पन्नः। तैलशब्देनान्यदभिधत्तं क्कोति
केचिदाहुः। सर्षपाणां तु भवस्नेहान्यस्नेहवाचकस्तैलशब्दस्तत्रापि यो दिति तदयुक्तं। किंच तस्य तैल
शब्दस्य तिलविकारान्यवाचकत्वाभावात्। यत्तु वार्त्तिककृता स्नेहाते तैलजिति तैलप्रत्ययो विहितः। स स्ने
हमात्रवाचकः। अतसीतैलमैरंडतैलामित्यादौ। तथा चायुर्वेदग्रन्थे तारस्वहारीतसुश्रुतपराशराग्निवेश
रजातूकर्ण्यादयो न स्नेहमात्रे केवलेन तैलशब्देनाभिदधति। तिलविकार एव प्रयुंजते। न च तिलविका
रयवनेऽपि एयाकादिवृपि तैलशब्दप्रवृत्तेः। तैलनिषेधात्तन्निषेधोऽपि प्रसज्यत इति वाच्यं। तैलशब्दस्य
स्नेहांतरेऽपि प्रयोगः। स सादृश्यादुपपन्नः। अत एवाहुः। शब्दविदः निष्पन्नस्तद्गुणाश्रये तैलवर्मितरेऽपि यातीति। त का॰शि॰ २९३
स्मात् तिलविकार एव स्नेहः तैलं। न तु स्नेहमात्रमिति। षष्ठ्यां तैलमनायुष्यं चतुर्दश्यपि च पर्वसु। सप्तम्यां न स्पृ
शेत्तैलं नवम्यां प्रतिपद्यपि। अष्टम्यां च चतुर्दश्यां अमावास्यां विशेषतः। राजार्स्तुपदगमे कालेऽजलदस्याप्रदी
यते। तथा उपोषितस्य व्रतिनः। कृतश्मश्रुकेशस्य नापितैः। तावत् स्वास्तिसिद्धिः तिश्री तायावत्तैलं न संस्पृशेत्। त

१९२

न खंडत्येरमश्रुशिरोरुहनिवर्त्तने। न स्नायात्तु नरः शेषे तैलस्नानं विधीयते। नारदपुराणे। सप्तम्यां
संस्पृशेत्तैलं स्निग्धा नार्यो विनश्यति। सुमंतुः। तैलाभ्यंगो नार्कवारे न भौमे न संक्रांतौ। वृद्धगौतमः विष्टि
षष्ठ्याः पर्वसु चाष्टम्यां वने हसरदः। श्रीकान्मुक्त्वा वासरेऽस्य स्नानेः। गर्गः। पंचमी दशमी चैव द्वितीया
च त्रयोदशी। एकादशी द्वितीया च पक्षयोरुभयोरपि। अभ्यंजनस्य पानाद्यैर्यस्तैलं निषेवते। चतुर्णां
तस्य वृद्धिः स्याद्धनापत्यबलायुषां। व्यासः। पंचमीं दशमीं चैव पूर्णिमां च त्रयोदशीं। तृतीयां चैव यस्तैलेन नरः स
मुपसेवते। अभ्यंगात्स्पर्शनाच्चैव मज्जनाद्वा तथैव वा। चतुर्णां तस्य वृद्धिः स्याद्धनापत्यबलायुषां। योगि
याज्ञवल्क्यः। दशम्यां तैलमस्पृष्ट्वा यः स्नायादविचक्षणः। वयाद्वि तस्य नश्यंति आयुः प्रजा यशो बलं।
मोहास्त्र तिपदं षष्ठ्यां क्रं रिक्तां तथा तिथिं। तैलेनाभ्यंजयेद्यस्तु चतुर्भिः स हीयते। पंचदश्यां चतु
र्दश्यां सप्तम्यां रविसंक्रमे। द्वादश्यां सप्तमी षष्ठ्यां तैलस्पर्शं विवर्ज्जयेत्। त्रयोदश्यां तृतीयायां प्र
तिपन्नवमी ह्याः तैलाभ्यंगं न कुर्वीत कुर्याच्चेन्नवमीं विना। अत्र एकासु तिथिषु तैलाभ्यंगो विहितः।

प्रतिषिद्धः स्यात्तत्रैके दाहुः। विधिः पक्वतैलविषयः। निषेधस्त्वपक्वतैलविषयः। तदुक्तं। षट्त्रिंशन्मते। सूर्यशु
क्रादिवारेषु निषिद्धासु तिथिष्वपि। स्नानेनैव यदि वा स्नेहः पक्वतैलं न दुष्यति। नवम्यां च नयोरपि निषे
धः। कुर्युर्वा न नवमीं विनेति वचनादिति। तदप्युक्तं। निषेधस्य रागप्राप्ततैलाभ्यंगविषयत्वात्। विहिततैलाभ्यं
गविहितत्वे विकल्पप्रसंगात्। न च विधिशास्त्रे तैलमात्रप्राप्तौ तैलोत्पत्तितैलरूपविशेषनिषेधान्न वि
कल्प इति वाच्यं। यियजामहकरणस्याप्येषवैसप्तदशप्रजापतिर्यज्ञे यज्ञेष्वायत्त इति वाक्यात्सर्वयज्ञेषु प्राप्त
वन्नूयाजरूपविशेषनिषेधान्निषेधपक्षे विकल्पाभावप्रसंगात्। तत्र च यः परिहारः। सोत्रापीत्यदोषः। रागप्रा
प्तविधिप्राप्तिसामान्यविषयत्वेन निषेधशास्त्रं तरबाधसापेक्षो निषेधः। अन्यत्र निरपेक्षविधिवैषम्यं प्रसज्येत। का॰हि॰
न च विधिवैषम्यपरिहारार्थं विधिप्राप्तस्यैव प्रतिषेध इति वाच्यं। शास्त्रांतरबाधं विना निषेधस्यासंभवेन तद्बाध २९४
स्याप्युपपत्तेः। तस्मान्निषेधो न पक्वतैल इति क्रियते। तस्मादपक्वमिति तैलं विहिततैलाभ्यंगमुपादेयमिति
सिद्धं। व्यस्य हेतिः। संक्रांत्यां रविवारे च षष्ठ्यां सोमदिने तथा। द्रव्यांतरगतं तैलं न दुष्येत्तु कदाचन। अत्रैके वि

१०३

दाहुः। कदाचनेत्यनेनास्मिन्नपि निषिद्धकाले द्रव्यांतरगतस्य तैलस्यादुष्टत्वमुच्यते। अन्यथास्यैव य
थ्यापत्तेरिति। तदप्युक्तं। यदि सर्वस्मिन्नपि निषिद्धकाले द्रव्यांतरगतस्य तैलस्यादुष्टत्वमुच्यते। स्या
त्तदेकदेशेनैव तत्सिद्धेः। इत्यर्द्धवैयर्थ्यं प्रसज्येत। इत्यर्थानुवादपक्षोऽपि कदाचनेत्येतावन्मात्रस्यानुवादत्व
मुक्तं। तस्मात्संक्रांत्यादिषु द्रव्यांतरगतं तैलं कदाचिदपि न दुष्यतीत्यर्थः। अन्ये तु संक्रांत्यादि चतुष्टय ए
व द्रव्यांतरगतस्य तैलस्यादुष्टत्वं नान्यत्रेति सिद्धमित्यन्ये। तदप्युक्तं। सर्वस्मिन्काले द्रव्यांतरगतस्य
तैलस्य वचनांतरेणादुष्टत्वमभिधानात्। संक्रांत्यादिग्रहणस्य वाशिष्टोपप्रदर्शनार्थत्वात्। संक्रां
त्यादावपि न दुष्यतीति किमुतान्यत्रेति। तदाह श्वेताः। सार्षपं तैलं गंधद्रव्ययुतं तैलं पुष्पवासितं। अन्यद्र
व्ययुतं तैलं न दुष्यति कदाचनायमः। घृतं च सार्षपं तैलं यत्तैलं पुष्पवासितं। न दोषः। पक्वतैले पुस्ना
नाभ्यंगे पुनित्यशः। कात्यायनः। मांगल्येषु विधौ तैस्नानं वृद्धिपर्वसु। सर्वेषु चास्ते हमंत्रे समायुक्तं मध्या
ह्नात्रविशिष्यत इति॥ ॥इति तैलाभ्यंगकालनिर्णयः॥ ॥अथ तिलतर्पणनिषिद्धकालः॥

सप्तम्यां रविवारे च गरे जन्मदिने तथा। पुत्रकलत्रार्थी न कुर्यात्तिलतर्पणं। कश्चित्तु गरसिनीति पाठः।
पक्षयोरुभयो राजन् सप्तम्यां निशि संध्ययोः। विद्यापुत्रकलत्रार्थी तिलास्तेन विवर्जयेत्। ॥ इति ति
लतर्पणनिषेधकालः॥ ॥ अथ मिथुनकालनिर्णयः॥ तत्र याज्ञवल्क्यः। षोडशर्तुनिशाः स्त्रीणां तासु
युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्। एवं गच्छन् स्त्रियं क्षामां मघां मू
लं च वर्जयेत्। सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्। यथाकामी भवेद्वापि स्त्रीणां वर
मनुस्मरन्। रजोदर्शनप्रभृति षोडशनिशाः स्त्रीणां ऋतुः। गर्भग्रहणकालस्तस्मिन् युग्मासु समा
सु रात्रिषु संविशेत्। ज्येष्ठे तु यदि पुत्रार्थी कन्यार्थी चायुग्मासु। यदाह मनुः। युग्मासु पुत्रा जायन्ते स्त्रि का॰ हि॰
योऽयुग्मासु रात्रिषु। तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियं। हारीतः। संगच्छेत पुंसा याव २९५
त्षोडशमे दिने। युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु। युग्मास्वपि उत्तरोत्तरैव प्रशस्ता यथा
स्यपत्यं वः। चतुर्थी प्रशस्ता षोडशान्तोत्तरोत्तरा युग्मा प्रजा निरामया पश्चात्करहितागमने इत्यपदिश्यते
॥

२४।

॥

व्यासः। रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः। पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः। सप्तम्यामप्रजा
योषिदष्टम्यामीश्वरः पुमान्। नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः। एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तम
त्रयोदश्यां सुता पापा वर्णसंकरकारिणी। जायते सर्वदुःखार्ता दुःखशोकभयप्रदा। धर्म्मध्वजः कृतज्ञः स्यादात्म
वेदी दृढव्रतः। प्रजापतिश्चतुर्दश्यां गुणैर्वै जगतः पतिः। राजपुत्री महाभागा सा राजवरांगाव्रता। जायते पंचद
श्यां तु बहुपुत्रा पतिव्रता। विद्यालक्षणसंपूर्णः सत्यवादी जितेन्द्रियः। आश्रयः सर्वभूतानां षोडश्यां जायते
पुमान्। निशाग्रहणाद्दिवसनिषेधः। अत एवाह मनुः। न दिवा मैथुनं व्रजेत्। क्लीबाश्चाल्पवदा यदि वा प्रसूयन्ते
अल्पायुषश्च। तस्माद्दिवा परिवर्जयेत्। ज्योतिःशास्त्रे। अल्पायुरल्पवीर्यो वा क्लीबो वा पुत्र जायते। एवं श्रद्ध
या तेन स्त्रीदिवामैथुनसंभवः। अन्ततोऽप्येतत्। यदाह पराशरः। गृहमेधिनो व्रतमहन्यसंवेशः। ब्रह्मचार्येव प
र्वणीति। अष्टम्यां चतुर्दश्यां पौर्णमास्यमावास्या रविसंक्रान्तिश्चेति पंचपर्वाणि। पञ्चानुष्टेय प्रशस्तायेदशी तानि।
तत्र ब्रह्मचार्येव। स्त्रियं नोपेयादित्यर्थः। पैठीनसिः। ऋतुमुपासीत तास्वपि पर्वाणि वर्जयेत्। पुमानुपपाद

येत्। मनुः। ऋतुकालाभिगामी स्यात्स्वदारनिरतः शुचिः। पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया॥ वशिष्ठोपि। ऋतु
कालाभिगामी स्यात्स्वदारनिरतः स्मृतिः। ऋतुकालाभिगामी स्यात्पर्वग्रहणवर्जं। पर्वग्रहणं कालांतरोपलक्ष
णार्थं॥ मनुः। अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः।
अमावास्यासाहचर्यादष्टमीचतुर्दश्योः पक्षयोर्नाप्यृतौ॥ विष्णुः। नाष्टमीचतुर्दशीपंचदशीस्त्रियमु
पेयात्। न श्राद्धं भुक्त्वा न दत्वा न संध्ययोः। शिवरहस्ये। दिवा जन्मदिने चैव न कुर्यान्मैथुनं व्रती। श्राद्धं
दत्वा च भुक्त्वा च श्रेयोर्थी न च पर्वसु। सौरपुराणयोः। षष्ठ्यष्टमीं पंचदशीं अमावास्यां चतुर्दशीं। ब्रह्म
चारी भवेन्नित्यं जन्मर्क्षे च विशेषतः। वाराहपुराणे। वैष्णवं प्रकृत्य वाराह उवाच। षष्ठ्यष्टमीममावा
स्यां उभे पक्षे चतुर्दशीं। मैथुनं नैव सेवेत द्वादशीं च मम प्रियां। तथा। अष्टम्यां च चतुर्दश्यां षष्ठ्यां च
द्वादशीं तथा। अमावास्यां चतुर्थ्यां च मैथुनं यो न गच्छति। तिर्यग्योनिं न गच्छेत्स मम लोकं हि गच्छति॥
आद्याश्चतस्र इति रजोदर्शनादारभ्य चतस्रो रात्रीर्वर्जयेदित्यर्थः। तथा पैठीनसिः। न प्रथमेन द्विती

का०दि०
२७६

२७५

येन तृतीयेन चतुर्थे आहूयते। अन्ये त्वाहुः। स्नायाद् आरभ्य चतस्रो वर्जयेत्। एवं तस्या अस्पर्शनि
षेधेनैव गमनस्यापि निषिद्धत्वादिति। तदयुक्तं। स्पर्शनिषेधादि स्पर्शमात्रप्रत्यवायः। गमननिषे
धेन च तस्मादपीति फलभेदात्। अत एव रजःस्वलास्पर्शगमने च भिन्नप्रायश्चित्तमाम्नातं।
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः। चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः। मनु
वचनविरोधश्चाद्यानामहस्तु गर्हितरात्रिसंभवात्। तथा च कात्यायनः। रजस्वला चतुर्थेह्नि स्नाता शुभमवा
प्नुयात्। अर्वाक् पुनर्गर्हिता रात्रयः संभवंति। शेषाब्रह्महत्यास्त्रीणां यस्मिन्मासे रजोदर्शने यस्त
वान् जायते सोभिशस्त इत्यादिवाक्यैर्गर्भसंभवेन। तस्माद्रजोदर्शनादारभ्य चतस्रो वर्ज्या इति वक्त
व्या तिस्रो रात्रीः। ज्योतिःस्फुटे। अस्तु दिवसे यत्ता मैथुनार्थं यदि व्रजेत्। आयुः प्रजाश्च धर्मश्च
तस्य पुंसः प्रहीयते। तस्मात्त्रिरात्रं दारान्पुष्पितां परिवर्जयेत्। ऊर्ध्वं त्रिरात्रात्संभवत्येकाशीति
पि। चतुर्थ्यां रात्रौ गर्भाधानमुक्तं। चतुर्थेहनि स्नातायां पुमान् गर्भाधानवदुपेतं ब्रह्मचर्येण गर्भं संदध्या

तिा ततश्च विकल्पः संव्यवस्थितः। चतुर्थेऽह्नि रजोनिवृत्तौ विधिर्वैपरीत्ये न तु निषेधः। एत एव गोभिलः
यदृतुमती भवत्युपरतशोणिता तदा संभवकालः। तथा च मनुः। सं रजस्युपरते नारी स्नानेन स्त्री
रजस्वला साध्वी गमनीया नादिविहितयोगाः। मनुः। नोपगच्छेत्प्रमत्तोपि स्त्रियमार्तवदर्शने।
रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः। प्रज्ञा तेजो यशश्चक्षुरायुश्चैव प्रहीयते। तां विसर्जयतेत
स्य रजसा समभिप्लुतां। प्रजा लक्ष्मीर्यशश्चक्षुरायुश्चैव विवर्द्धते। देवलः। अष्टद्दिवसेश्वेतां
मैथुनार्थं यदि व्रजेत्। आयुः प्रज्ञां च धर्मश्च तस्य पुंसः प्रहीयते। तस्मात्त्रिरात्रं चाण्डालीं पु।
ष्पितां परिवर्जयेत्। आद्याश्चतस्रस्तूपलक्षणं। एकादश्यां त्रयोदश्यां द्वादश्यामपि निषि का॰नि॰ २८७
द्धत्वात्। तथा च मनुः। तासामाद्याश्चतस्रस्तु निंदितैकादशी च या। त्रयोदशी च शेषाः स्युः प्रश
स्ता दशरात्रयः। अत्रैकादशीत्रयोदश्याश्चैनपक्षस्य। तथा निंद्यास्वष्टासु चान्यासु स्त्रियो रात्रि
षु वर्जयेत्। ब्रह्मचर्यैव भवति। यत्र तत्राश्रमे वसन्। निंद्यास्वाद्यासु आद्याश्चतस्र इति। एकादशी

२०६

त्रयोदशी चा। एतासु षट्सु। अन्यास्वष्टासु। अनिंद्यास्वपि यासु कासु चिरात्रिषु स्त्रियो वर्जयेत्। रात्रि
द्वय एवेति स्त्रियोभिगच्छेदित्यर्थः। देवलः। अप्रशस्ता द्वादशाहस्याष्टकाद्दुधारणा दशाष्टषट्
च शेषाणां विधीयंते तु पर्वसु। एतेष्वपि च पर्वसु वर्जयेद्वा रजस्वलां। युग्मासु तां ततो नार्याः संभ
युः पुत्रकारणात्। इदं च ब्राह्मणादीनां द्वादशादिरजस्तु धारणवचनं गम्यत्वाभिप्रायेण रुकालाभिप्रायेण रु
तुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः मनुवचनविरोधाच्च। युग्मां कालतः स्वस्थ इंद्राविति चंद्रबले सति म
घामूले विहाय च लक्षणमुक्तं। पुत्रं संजयेन नपेदित्यर्थः। ज्योतिःशास्त्रेपि पित्र्यपौष्णे नैरृते चापि धिष्ण्ये त्यक्त्वा
नारीं सुप्रसन्नः प्रसन्नां। पुष्टः क्षामां पुत्रकामो दिगच्छन् सद्गुणं पुत्रमाप्नोति सम्यक्। स्त्रियास्तु संग
तः पित्र्यपौष्णे वा नैरृते थवा। यः समुत्पद्यते पुत्रो वसक्षेमो गुणैर्युतः। पुमानूविंशतिवर्षश्च रत्न षोडश
शावर्षया। स्त्रिया संगच्छता शाशेशये शुद्धे रजस्यपि वीर्ये च स्यात् दृशापत्यं तयोर्न्यूनाब्दयोः पुनः रो
गस्या पुरधन्यो वा गर्भे भवति नैव वा। रुत्रा। योगपद्ये तु गमने कममाह। देवलः। योगपद्ये तु तीर्थानो वा।

ग्रादिक्रमदोषवर्जनार्थमपुत्रो वा गर्भलक्षणादौ दिवाऽतितीर्थं स्तुतायोगपद्येऽपि गर्भ ऋतौ
गच्छेत् पुत्रो वाऽप्यवमिश्रयेः। कात्यायनः। योगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्। रक्षणार्थमपुत्रां
वा ग्रहणक्रमशोऽपि वा॥ अन्यत्र ग्रहणक्रमं ऋतुग्रहणक्रमः। एतच्च ऋतुग्रहणमात्रस्यार्थं। तथा
यमः। ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। स्मृत्यंत
रेऽपि। ऋतौ तथा त्रीणि वर्षाणि ऋतुमतीं यो भार्यां नानुगच्छति। स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसं
शयं। देवलः। यः स्वदारान् ऋतुस्नातां सन्निधौ नोपगच्छति। भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाश्य
सः। संनिधानेऽप्यशक्तस्य न दोषः। तथा च स्मृत्यंतरे। यः स्वदारान् ऋतुस्नातां स्वस्थः सन्नोपगच्छति। भ्रूण
हत्यामवाप्नोति प्राप्तं विनाश्य वा॥ अत्र केचिदाहुः। एतदजातपुत्रविषयं॥ जायमानो वै ब्राह्मण का॰न॰ २९८
स्त्रिभिर्ऋणवान् जायते। ब्रह्मचर्येण ऋषिभ्यः। यज्ञेन देवेभ्यः। प्रजया पितृभ्यः। एष वा अनृणो यः पुत्री
यज्वा ब्रह्मचारिवासी। तस्मात् ऋतौ एकपुत्रोत्पादनेनैव चरितार्थता। तदुक्तं कूर्मपुराणे। ऋतुकाला

भिगामी स्याद्यावत्पुत्रोऽभिजायते। न तु पुत्रांतरोत्पत्तिविधायकोऽस्ति श्रुतिः। दशास्यां पुत्रानाधेहीति
मंत्रो यदीयं विधायिका स्यात्। किं तु बह्वपत्यप्रशंसार्था। अन्ये त्वाहुः। नैतदजातपुत्रविषयं। एष्टव्या
बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेदिति वाक्ये बहुपुत्राश्रयणा
त्। कूर्मपुराणवचनस्य त्वयमर्थः। ऋतुकाल एव यावज्जननसंभवो भवति। तावदृतावेव गमनं संभवेनतो
त्यमिति। गमने संभवविरहस्तु श्रूयते वर्ज्यतानि। गर्भो गृहीतगर्भा या श्रमो ग्लानिः पिपासा सन्धि
स्पंदनं शुक्रशोणितयोर्वैधः। स्फुरणं योनेरिति। ऋतुकालगमनं स्त्रीणामप्यावश्यकं। ऋतुस्नातां तु
या नारी भर्तारं नोपगच्छति। सा ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत्। न लयथामीत्यनेन ऋतु
तावपि स्त्रीणां मिथुनाकालमनतिक्रमणं गच्छेदिति विधीयते। गौतमः। ऋतुपर्यासर्वत्र प्रतिषिद्धवर्जं।
देवलः। ऋतुकालाभिगमनं पुंसां कार्यं प्रयत्नतः। सदैव पर्ववर्ज्यं च नन्दानां च विहितं हितं। यत्तु बौधाय
नवचनं। ऋतौ नोपैति यो भार्यामृतौ नोपगच्छति। तस्य मासे तु यो दोषमयोनौ ये शूद्रासं चरति। तस्मीण

मिछा नाने वेदितव्यं। अत्र केशवः। वासरेऽन्तुगमने विकल्पमाह। तद्दिवागमनमपि स्त्रीरक्षणसा
मर्थ्यं यस्यां सा चेत्तावपि गच्छेदिति। तथा च हेतुरुक्तः। स्त्रियो रक्ष्या यतः स्मृता इति। तदयुक्तं। यदि
स्त्रीणां मिछायां सत्यां गमनं यथा कामी स्यादिति विरुध्यते। वाराहः। पूर्वोक्तमृतुगमनापेक्ष
या वेधव्यार्थेन हेतुवशाद्व्यवस्था स्त्रीणां वरमनुस्मरंति। नित्यमेव पर्यालोचनया श्रेयमेव गम्यते
तिथ्या चैते तैत्तिरीयकोऽहं। इंद्रः स्त्रियः अत्र कत्योर्ध्वांता अद्य वनूवरं वृणीमहे। ऋत्वियाः प्रजां विंदामहे।
काममाविजनितोः संभवाम इति। तस्मात्स्त्रियः ऋत्वियाः प्रजां विंदते। काममाजनितोः संभवति। वरेद्ध
तेह्यासामिति। तथा च वशिष्ठः। अपि च काठकवचनेन विज्ञायते। अपि नः श्वो विजनिष्यमाणाः पतिभिः
सह यामा इति स्त्रीणां इंद्रदत्तो वरः। ऋतुविशेषणं गमने कालविशेषप्रदर्शकं। आयुर्वेदग्रंथे सेवेत तस्यां तेत
तः पश्चात्पुनोदयेऽसिवते कामतः कामं हेमंत शिशिरे पिबाग्रयां तेराः श्वेयोऽन्यथापद्यते। पक्षेव संतरा
रदो मासे ग्रीष्मे निदाघयोरिति। तथा च शास्त्रापेक्षया व्यवस्थिति। आपस्तंबः। प्रवनयुक्तो वर्षाशरदो मैथुनं

का॰ हि॰ २९९

१०८

वर्जयेत्। एतद्वसमावर्तनविषयं। अत एव शौनकीयाऽधीयीत समावर्तितो ब्रह्मचारिकस्येयथान्यायमितिरेजायापे
की पेपीपत्यं प्राजापत्यं तदिति। तज्जायोपयोगमं प्राजापत्यमित्यर्थः॥ ॥इति मिथुनकालनिर्णयः॥ ॥
अथ पुंसवनकालः। तत्र याज्ञवल्क्यः। गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरा। प्रागर्भे चलनात्पुंसवनाख्यं
कर्म कार्यमित्यर्थः। यमः। गृहीतायां प्रथमे मासि द्वितीये तृतीये वा पुन्नाम्ना नक्षत्रेण चंद्रमा युक्तः स्यादिति
पुंनक्षत्राणि च रत्नकोशे कथितानि। हस्तो मूलं श्रवणः पुनर्वसुमृगशिरस्तथा। पुष्यः पुंसंज्ञितेष्वेषु कार्यमे
तेषु। अनुक्तानि ष्विस्यानि नक्षत्राणि। बृहस्पतिः। सवनं स्पंदने शिशो॥ ॥इति पुंसवनकालः॥ अथानवलोभनकाल
केरवः। गर्भस्य स्फुटताज्ञाने निषेकः परिकीर्तितः। विष्णुः। गर्भस्य स्पष्टताज्ञाने निषेककर्मकर्म सोमः। चतुर्थे ग
र्भरक्षणं। आश्वलायनगर्भे परिशिष्टे। चतुर्थेऽनवलोभनं बीजवापायनगर्भे। अथ पुंसवनानवलोभ
न करोति। मासि द्वितीये तृतीये वा पुरास्पंदतश्च त्याशयी माणपक्षेय यापुंसा नक्षत्रेण चंद्रमा युक्तः स्यात्
॥इत्यनवलोभनकालनिर्णयः॥ अथ सीमंतोन्नयनकालः। तत्र लौगाक्षिः। तृतीये गर्भमासे सीमंतोसी

मंतं कारयेत् ॥ शुक्लपक्षस्य पुण्याहे पर्वणि वा ॥ आपस्तंबः ॥ सीमंतोन्नयनं प्रथमे गर्भे चतुर्थे मासि वै ज
पारः ॥ अथ सीमंतोन्नयनं मासि चतुर्थे षष्ठे पंचमे वा सोमः ॥ षष्ठे सीमंतोन्नयनं शांखायनगृह्ये सप्तमे मा
सि प्रथमे गर्भे सीमंतोन्नयनं ॥ बृहस्पतिः ॥ सीमंतोन्नयनं षष्ठेऽष्टमे मासि ॥ विष्णुः ॥ षष्ठेऽष्टमे मासि सीमंतोन्नय
नं ॥ शंखयाज्ञवल्क्यौ ॥ षष्ठेऽष्टमे वा सीमंतः ॥ शौनकः ॥ चतुर्थे गर्भे सीमंतोन्नयनं ॥ षष्ठाष्टमयोर्वा इत्यर्थ मासपक्षो
यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यात् ॥ पुंनक्षत्राणि पुंसवनकालप्रस्तावे दर्शितानि ॥ गोभिलः ॥ अथ सी
मंतप्रकरणं ॥ प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा ॥ पुंनामर्क्षगते चंद्रे बलिस्थैः सौक्तितो न रिक्त न वाराकेपि का॰हि॰ ३००
लग्ने सुरपतिमंत्रिसितेमिंदौ केंद्रत्रिकोणे व्ययधनपंचमेषु केंद्रेषु सुखारोगरहितेषु गर्भे पुष्पोदकादि राष्ट्रार्थः
प्रासादाद्यारंभकाले दर्शितः ॥ एतत्सीमंतोन्नयनं क्षेत्रसंस्कारपक्षे सकृदेव कार्यं ॥ यदाह हारीतः ॥ सकृत्संस्कृ
तसंस्काराः सीमंतेन द्विजस्त्रियः ॥ यं यं गर्भं प्रसूयंते स गर्भः संस्कृतो भवेत् ॥ गर्भसंस्कारपक्षे प्रतिगर्भमाव
र्तनीयः ॥ तथा च विष्णुः ॥ सीमंतोन्नयनं कर्म्म स स्त्रीसंस्कार इष्यते ॥ केचिज्जन्मस्य संस्काराज्जन्मे गर्भे प्रयुज्यते ॥

१०९

अकृतसीमंतायां प्रसवे तु कथं च न ॥ गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति ॥ ॥ इति सीमंतोन्नयनकालः ॥
अथ जातकर्मकालः ॥ तत्र शंखः ॥ जाते जातकर्म ॥ विष्णुः ॥ जाते वै दारके जातकर्म ॥ संजाते जातकर्म ॥ वि
ष्णुः ॥ जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितं ॥ यथावित्स्वगृह्योक्तेन ततः स्नानानंतरं ॥ तथा च संवर्त्तः ॥
जाते पुत्रे पितुः सचैलं तु विधीयते ॥ मनुः ॥ प्राग्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते इति ॥ नाभिवर्द्धनं ना
लच्छेदनं ॥ हारीतः ॥ प्राग्नाभिच्छेदात्संस्कार पुण्यार्थानुकुर्वंतीति ॥ छिन्नायामाशौचमिति ॥ संस्कारो जातक
र्म ॥ पुण्यार्थं दानानि ॥ बैजवापः ॥ जन्मानंतरं कार्यं जातकर्म यथाविधि ॥ दैवात्तदतीतकालं चेदतीते सूतके
भवेदिति ॥ एतच्चाशौचमध्येपि कार्यं ॥ यदाह प्रजापतिः ॥ आशौचे च समुत्पन्ने पुत्रजन्म यदा भवेत् ॥ कर्तुस्ता
त्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति ॥ मदनरत्ने प्रजोत्पादद्येपि वा गुरौ शुक्रेऽस्तवार्केऽ जातक
र्म च नाम च ॥ मृदूनि चित्रानुराधामृगशिरांसि उत्तरात्रयरोहिणी ॥ चराणि पुनर्वसुस्वातिश्रवणधनि
ष्ठाशतभिषाख्यप्राणि हस्ताश्विनीपुष्यनामानि नक्षत्राणि केंद्रस्थ प्रासादाद्यारंभकाले दर्शितः ॥ इति

जातकर्मकालः॥ ॥अथनामकरणकालः॥तत्रपारस्करः॥दशम्यामुत्थाप्याहजपित्वापितानामकरो-
ति॥विष्णुपुराणे॥ततस्तुनामकुर्वीतपितादशमेहनिसोमः॥दशम्यांप्रकाशनामकरणं॥वशिष्ठः॥आ-
शौचव्यपगमेनामधेयं॥शंखः॥आशौचेव्यतिक्रान्तेनामकर्मविधीयते॥याज्ञवल्क्यबृहस्पती॥अहन्ये-
कादशेनामायमः॥नामधेयंदशम्यांतुद्वादश्यांवास्यकारयेत्॥पुण्येहनिमुहूर्त्तेवानक्षत्रेवागुणान्वि-
तइति॥अतःपितुःकथंचिन्नामकरणयोग्यत्वेकार्यरयेदितिविधीयते॥अतएवशंखः॥कुलदेवतानक्ष-
त्रसंबद्धंपितानामकुर्यात्॥अन्येवाकुलवृद्धाइति॥पितुःकथंचिदयोग्यत्वेअभावेवाकुलवृद्धःकुर्या-
त्॥ननुयोग्यस्यसद्भावेप्रागभिहितः॥विष्णुवचनविरोधप्रसंगात्॥अत्रकेचित्कारयेत्कुर्यादितिव्याचख्यु-
स्त॥तदयुक्तंलक्षणयाकारणाभावात्॥पितैवकुर्यादितिवचनविरोधस्यपरिहृतत्वात्॥लक्षणंतस्य
संकोचस्ययुक्तत्वात्॥भविष्यत्पुराणे॥नामधेयंदशम्यांकेचिदिच्छंतिपार्थिवाः॥द्वादश्यांपररात्रेवामासेपूर्णे
परे॥अष्टादशेहनितथावदंत्यन्येमनीषिणः॥गृह्यपरिशिष्टे॥जननाद्दशरात्रेव्युष्टेशतरात्रेसंवत्सरेवानामक-

का॰हि॰ ३१

रणं॥अत्रचस्वगृह्यानुसारेणव्यवस्था॥एषांतुतत्तत्कालविशेषाणामुक्तानांविकल्पएव॥तत्रपूर्वकालासंभवेउ-
त्तरग्राह्यः॥ज्योतिःशास्त्रे॥मृदुध्रुवचरक्षिप्रभेषामुदयेवा॥गुरौशुक्रेथवाकेंद्रेजातकर्मचनामच॥मघादी-
निचनक्षत्राणिजातकर्मप्रकरणेदर्शितानि॥किंस्त्वाद्यर्थःप्रासादाद्यारंभकालेदर्शितः॥पुलस्त्यः॥ ॥इति
नामकरणकालः॥ ॥अथनिष्क्रमणकालः॥तत्रपुराणे॥द्वादशेहनिकर्त्तव्यंशिशोर्निष्क्रमणंगृहात्॥शं-
खलिखितौ॥अतऊर्ध्वंतृतीयेमासिनिष्क्रमणिका॥याज्ञवल्क्यबृहस्पती॥चतुर्थेमासिनिष्क्रमः॥मासिचतु-
र्थेकर्त्तव्यंनिष्क्रमणंगृहात्॥तत्रकिंकार्यमित्याकांक्षायामाह॥लौगाक्षिः॥तृतीयेवृद्धमासेदर्शनमादि-
त्यस्य॥यमः॥ततस्तृतीयेकर्त्तव्यंमासिसूर्यस्यदर्शनं॥विष्णुः॥चतुर्थेमास्यादित्यस्यदर्शनं॥शंखः॥चतुर्थेमा-
सिकर्त्तव्यंबालस्यादित्यदर्शनं॥यमः॥चतुर्थेमासिकर्त्तव्यंशिशोश्चंद्रस्यदर्शनं॥अत्रापिस्वगृह्या-
नुसारेणव्यवस्था॥येषांगृह्येकालविशेषोनश्रूयते॥तैःसर्वएवैतेकालाविकल्पेनोपादेयाः॥तत्रापिपू-
र्वकालासंभवेसत्युत्तरकालग्रहणं॥ ॥इतिनिष्क्रमणकालः॥ ॥अथान्नप्राशनकालः॥तत्रवि-

ष्ठसंमे। षष्ठेऽन्नप्राशनं। शंखबृहस्पतियाज्ञवल्क्याः। षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मंगलं कुले। यमः। ततोऽन्नप्राशनं मा
सि षष्ठे कार्यं यथाविधि। अष्टमे ष्ठ वाथ कर्त्तव्यं यद्वेष्टं मंगलं कुले। लौगाक्षिः। षष्ठे मासेऽन्नप्राशनं जातेषु दंतेषु
वा। संवत्सरे अन्नप्राशनमर्द्धसंवत्सर इत्येके। अत्रापि नामकरणव्याख्यानुसारेण व्यवस्था वेदितव्या॥ ॥इत्य
न्नप्राशनकालः॥ ॥अथ कर्णवेधनकालः॥ ज्योतिःशास्त्रे॥ कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेपि वा। कर्णवे
धं प्रशंसंति शुक्लपक्षे शुभे दिने॥ सुनक्षत्रे शुभे चंद्रे स्वस्थे शीर्षोदिते दिवा। दिनक्षिद्रव्यतीपाते विष्टिवैधृतवर्जिते
॥ शिशोरजातदंतस्य मातुरुत्संगसर्प्पिणः॥ सूविकोवेधये कर्णौ सूच्या द्विगुणसूत्रया॥ हस्ताश्विनीस्वातिपु
नर्वसौ च तिष्ये तु चित्राहरिरेवती च। चंद्रेनुकूले गुरुशुक्रवारे कर्णौ तु वेध्यावमरेज्यलग्ने॥ अमरेज्यो बृह का॰हि॰ ३०२
स्पतिः। तथा। पुष्यानुराधाश्रवणे च मैत्रे पौष्णादितौ वा द्रुमवासवे वा। शुभ्यंति विद्धाः हि रुजो न वेति संपीडय
ते वापि विशिष्टः कदाचित्। शुष्यस्यर्कदिने ध्रुवे रात्रौ न्वतिः स्यात् दारस्ता कर्णयोः सौरे बंधुविनिघ्नता श्रवणयोः
षष्ठे सुतेत्युद्धृतिः॥ ॥इति कर्णवेधकालः॥ ॥अथ चूडाकर्मकालः॥ तत्र सोमः। संवत्सरे चूडाकर

११

णं विष्णुः। तृतीये चूडाकरणं। लौगाक्षिः। तृतीये वर्षस्य नृपिष्टे चूडाकारयितव्या। बृहस्पतिः। चूडाक
र्म त्रिवार्षिकं। वैजवापः। त्रिवर्षस्य चूडाकरणं। पारस्करः। संवत्सरे चूडाकरणं तृतीये वा प्रति
हतो। मनुः। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेब्दे तृतीये वा कर्त्तव्यं श्रुतिनोदनात्। शां
खायनगृह्ये। संवत्सरे चूडाकर्म तृतीये वा वर्षे। यमः। ततः संवत्सरे वृत्ते चूडाकर्म विधीयते। द्विती
ये तृतीये वाप्यर्थं कर्त्तव्यं श्रुतिचोदनात्। शंखलिखितौ। तृतीये वर्षे चूडाकर्म पंचमेपि वा। शंखयाज्ञवल्क्यौ।
चूडाकर्म यथाकुलं। आश्वलायनगृह्ये। तृतीये वर्षे चूडं यथाकुलधर्मं वा। लौगाक्षिः। शुक्लपक्षस्य
पुण्याहे पर्वणि वा चूडाकरणं। वैजवापगृह्ये। उदगयने आपूर्यमाणपक्षे पुण्याहे चूडाकर्म। आश्व
लायनगृह्ये। उदगयने आपूर्यमाणपक्षे कल्याणे नक्षत्रे। आपस्तंबः। जन्मवेधि तृतीये वर्षे चौलं पुनर्व
सौ। इति। व्यासः। आश्विने श्रवणे स्वाति चित्रा पुष्य पुनर्वसु। धनिष्ठा रेवती ज्येष्ठा मृग हस्तेषु कारयेत्॥
वारनक्षत्रयोगेषु शुभेषु करणेषु च। शुभानि पुनर्वसौ च क्षौरे उक्तकर्म्माणि हितान्युदये क्षणे च। प्रोक्तानि चापु

पतिना यदि श्रुतास्तारा। विषयविशेषेण नक्षत्रविवाहकालेष्व। तस्तु तके च सर्वेषु शस्तं क्षुरकर्म तेषु नक्षत्रेषु
॥इति चूडाकरणकालः॥ ॥यस्मिन् जातो न वक्रः। न प्रोष्ठपदयोः कार्यं नैवाग्नेयेषु भारते। दारुणेषु
च सर्वेषु कुष्ठतां च वर्जयेत्। वारे शनैश्चरादित्य भौम ------ इति चूडाकर्मणि कालः॥
अथ विद्यारम्भकालः॥ तत्र मार्कण्डेयः। प्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्दने। षष्ठीं प्रतिपदं चैव वर्जे
यित्वा तथाष्टमीं। रिक्तां पञ्चदशीं चैव सौरभौमदिने तथा। एवं सुनिश्चिते काले विद्यारम्भं तु कारये
त्। पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं। स्वविद्यां सूत्रकारांश्च स्वां विद्यां च विशेषतः। ए
तेषामेव देवानां नाम्ना तु जुहुयात् घृतं। दक्षिणा निर्द्विजेभ्यः कर्त्तव्यं ततश्च जनो। प्राङ्मुखो गुरुरासीनो का॰ हि॰
वरुणामुखं शिशुं। अध्यापयेत् प्रथमं द्विजाशीर्भिः पुरस्कृतो। ततः प्रभृत्यनध्यायान्वर्जनीयान्विवर्जये ३०३
त्। अष्टमीं द्वितीयां चैव पक्षान्ते च दिनद्वयं। आशौचं इन्द्रयात्रायां भूकम्पे राहुदर्शने। व्यतीपाते च होरात्रम्
उल्कापाते तथैव च॥ ॥इति विद्यारम्भः॥ ॥अथोपनयनकालः॥ सप्तमे वर्षे ब्राह्मणस्योपनयनं नवमे राजन्

११२

न्यस्यैकादशे वैश्यस्य राजन्यं गर्भद्वादशेषु वैश्यं। बोधायनः। गर्भादिसंख्या वर्षाणां तदष्टमे ब्राह्म
णमुपनयेत्। तदधिकेषु च राजन्यं। तस्मादेकाधिकेषु च वैश्यं। शंखलिखितौ। गर्भाष्टमे ब्राह्मण
मुपनयेत्। राजन्यमेकादशे वैश्यं। पैठीनसि। अष्टमे ब्राह्मणमुपनयेत् गर्भाष्टमे वा। गर्भैकादशे रा
जन्यं। गर्भद्वादशे वैश्यं। गर्भषोडशे वा देवलः। प्रथमे मातापितृभ्यां गर्भाधानादिभिः संस्कृतो ग
र्भाष्टमे वर्षे उपनयनार्हो भवति। मनुशंखौ। गर्भाष्टमेषु कुर्वीत ब्राह्मणस्योपनायनं। एकाद
शे क्षत्रियस्य वैश्यस्य द्वादशे तथा। विष्णुः। गर्भाष्टमे कुर्वीत ब्राह्मणस्योपनायनं। राज्ञामेका
दशे सैके विशामेके यथाकुलं। उपनयनं ब्राह्मणस्य गर्भग्रहणेनाष्टमे वर्षे कार्यं। एकेन स
ह वर्त्तेन सैकः। एकस्मिन्नेकादशे द्वादशे इत्यर्थः। एकवेचर्यान्यं ते यथाकुलमुपनायकार्य
मित्यर्थः। अन्ये त्वेवं व्याचक्षते। कुलस्थित्या गर्भाष्टमादिष्वब्देषु केचिन्मन्यंते। अत्र केचिदुपनाय
नशब्देन महोपनमधीयते इत्याहुः। तदुक्तमुपनयनविषयप्रायोजकव्यापारस्योपनायनोप

नयनशब्दवाच्यत्वात् लक्षणया चकारेण वा वा । अत एव बृहस्पतिः । गर्भाष्टमे वर्षे वसंते ।
ब्राह्मणं ब्राह्मणमुपनयेत् एकादशे क्षत्रियो ग्रीष्मे वैश्यं वर्षासु तस्मादुपनयनादुपनयन
मपि विधीयते । बृहस्पतिः । गर्भाष्टमे विप्रस्य क्षत्रियस्यैकादशे तथा । वैश्यस्य द्वादशे वर्षे
कार्यं मौंजीनिबंधनं । उपनयने प्रतिशाखं लिखितौ । द्विजातीनां वसंते ग्रीष्मे शरदि इति कालः ।
वसंतो ग्रीष्मः शरदिति ऋतौ वर्णानुपूर्वेण । आपस्तंबः । वसंते ब्राह्मणमुपनयेत् ग्रीष्मे राजन्यं शरदि वैश्यं
तथा च माघादयः पंच मासा उपनयने ग्राह्याः । तथा च ज्योतिःशास्त्रे माघादिषु च मासेषु मौंजी पंचसु शस्य
ते । एतच्च वर्णत्रयसाधारणं । तत्र युक्तं वसंतेऽग्रजन्मनां ग्रीष्मे नृपाणां च शरदि विशां च । अतस्य बं का॰१२॰ ३॰४
धे यदि वा सैर्विलानां माघादयः पंच त्वेति मासाः । एतच्च सर्वेषु विषयं । यत उक्तं रत्नकोशे । ज्येष्ठमासि विशे
षेण सर्वे ज्येष्ठपुत्रकाः । उपनीतस्य विप्रस्य जलत्वं मृत्युरेव च । यजुःशाखिनां तु सर्वत एवोपनयने पुनर्व
संतग्रहणं नियमार्थं द्वाविति रुक्तं नाष्यकारेण चैत्रे वैशाखे वा वसंतः । तथा च श्रुतिः । मधुश्च माधवश्च वासंतिका

२२३ २

वृतू । यदा मीनमेषयोः खगयोर्वसंतः । तथा च ज्योतिःशास्त्रे मृगादिराशिद्वयभानुयोगात् षड्तवः स्युः शिशिरो वसंतः ग्री
ष्मश्च वर्षाश्च शरच्च तद्वत् हेमंतनामा कथितश्च षष्ठः । मृगो मकरः । बोधायनः । मीनमेषयोर्मेषवृषयो
र्वा वसंतः । काम्योपनयनकालमाह गौतमः । नवमे पंचमे वा काम्यो गर्भादि संख्या वर्षाणां । एतच्च ब्राह्मणवि
षयं । यदाहांगिराः । ब्रह्मवर्चसकामस्य पंचमेऽब्दे द्विजन्मनः । आयुःकामस्य नवमे कार्यं मौंजीनिबंधनं । म
नुः । ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे । क्षत्रियवैश्ययोस्तु काम्योपनयनकालमाह । अंगिराः । षष्ठे त
था द्वादशे च राज्ञो वृद्धिबलायुषोः ईहायुषोस्तु वैश्यस्य अष्टमे च चतुर्दशे । ईहा कृष्यादिविषया चेष्टा । अथ पूर्वोदि
क्रमाद्दारणीयः । तथा च मनुः । राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे । आपस्तंबः । अथ काम्याः सप्तमे ब्र
ह्मवर्चसमष्टमे आयुःकामो नवमो नवमे तेजःकामो दशमेऽन्नाद्यकामः एकादशे इंद्रियकामो द्वादशे पशुकामः । एत
च्च वर्णत्रयसाधारणं । तदुपनयनानंतरमस्य विधानादित्युक्तं । तन्नाष्ये । ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे ॥
क्षत्रियवैश्ययोस्तु काम्योपनयनकालमाहांगिराः । षष्ठे तथा द्वादशे च राज्ञो वृद्धिबलायुषोः । ईहायुषोश्च वैश्यस्य अ

ष्टमेवचतुर्दशोऽहनि ब्रह्मवर्चसकामस्येत्यादिस्वेष्टदर्शितमष्टगिरसो वैवनविरोधात् ॥ तस्मादन्या ज्यविधिवद्रूपमपि
अवलग्नविषयमुक्तं तु विधिचतुष्टयबाधकाभावादर्शत्रयसाधारणमिति ॥ अवक्ष्ये ज्योतिःशास्त्रोक्तत्रयेण
माघनिष्टयोऽपि पौष्णाश्वसौम्यादितिविष्णुनेवाराकेतिथिबोधं रवेखेनयुक्ते कार्यो द्विजानां व्रतबन्धमोक्षौ । गुरुर्न्दे गुरु
लोधात्रीपुत्रः शशिधरात्मजः । स्फुरेते ऋग्यजुःसामाथर्वणामधिपाः क्रमात् । शाखाधिपे बलिनि केन्द्रगते तु मौंजीबंध
नादीयदिवसे च तु नायकत्वः । अस्मिन्नृबलेन रहिते तु पुनर्द्विजानां स्याद्गुणैः संकर इति प्रवदंति तज्ज्ञाः । केंद्रशाद्वाव्या
स्यात् । प्रासादाद्यारंभकालनिरूपणे ऽस्तात्रये ऽस्तु न तिथोव्रतबंधराशिबले द्विजानां स्यान्मौंजीबंधनः स्मरवेदम
स्क्रियाहीनः । नवे क्रूरो जडः पापः पांडुयक्ष्मामयान्वितः । मूर्षे गुर्वादिनोगेषु क्रमेणाद्ययवार्धोष्पदकमेतस्त्रवर का॰ दि॰
धीः सुरराजसहज्यः स्याद्दीक्षितो न गुरुसूतेति सुखी धनी वा अध्यापकः शशितेर विजेत्यसेवी राजोपजीव्यहिमरोचिपि ३०५
मर्कटस्थो । शस्त्राजीवी निपुणो वैरयवह्निस्फुजायते । कंटकस्थायी नित्यो गानंदानव्रतबंधने । गुरौ केंद्रगते शुक्रे नवप
मवर्ग्नि नीचे स्वस्तुकपांगे सर्वे सर्वे वेदावेदनवेन्नरः । सशांगारे हतघ्नोयोसाक्षात्वे वजुरुद्रोश । विद्यार्थशीलसंयुक्तः प

हे वाष्टमगो ऽप्यसुः । शशिनि जीवेन सार्के निर्गुणो वित्तहीनः क्रूरः । सौरेस्या म्रद्भुतोऽपि सौम्य भानोः पुत्रेण नासौ
अस्यासौम्यं ऽप्युक्तवत्सर्वदा भौरन्नको ऽशौ नष्टवेद्ग्लो गम्तु के निरंशो वैव भास्करो । कर्तव्यं स्योपनयनं नानध्या
ये गलग्रहे । राशेः प्रथम भागस्थितः सूर्यो निरंशः । त्रयोदशी चतुष्कं तु सप्तम्यादि त्रयं तथा । चतुर्थ्येकाकिनं
प्रोक्ता अष्टावेते गलग्रहाः । इत्युपनयने विहितकालनिषेधौ ॥ ॥ अथोपनयनगौणकालाः ॥ आषोडशाभ
ब्राह्मणस्य सावित्री ति मनुवचनात् । आद्वाविंशात्क्षत्रबंधोः सचतुर्विंशतेर्विशः । आज्ञेयमभिविधौ । अत आह ।
व्यासः । उपनायनिकः कालः परः षोडशवार्षिकः । आद्वाविंशति परो ज्ञेयश्चतुर्विंशः परं परः । अ- तिमहि
शोरीक्ष्वंदःसुपदावदत्यसमुदाय उपनयनं ब्राह्मणस्य गायत्र्योपनयनं । तस्याश्चैकैकं तस्मिन्यादि अष्ट
वर्षाणि । एवं च तत्समुदायेषोडशवर्षग्रहणे उपनयनौ एतच्चाभिविधावुत्पद्येते । अस्यायतिक्रमे पातित्यं य
तआह यमः । सावित्रीपतिता व्रात्याः परिहार्याः प्रयत्नतः । याज्ञवल्क्यः । आषोडशादाद्वाविंशाच्चतुर्विंशाच्च
वत्सरात् । ब्रह्मक्षत्रविशां कालः औपनायनिकः परः । अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः । सावित्रीप

तितावात्यावास्तोमाद्दते क्रतोः ॥ शंखलिखितौ ॥ आषोडशाद्ब्राह्मणस्यातीतः कालो भवति ॥ आद्वाविंशाद्राजन्यस्या
चतुर्विंशाद्वैश्यस्यातिक्रांतः कालः ॥ पतंतीति शेषः ॥ सर्वे ह्येते वरोत्तरकालातिक्रमेषु पतिता भवंति व्रात्याः ॥ शंखः ॥
षोडशाब्दानि विप्रस्य राजन्यस्य हि विंशतिः विंशतिः सचतुर्भागं वैश्यस्य परिकीर्तिता ॥ नातिवर्तेत सावित्री ॥ अत ऊर्ध्वं
तु निवर्तेते ॥ विज्ञातव्यास्त्रयोप्येते यथाकालमसंस्कृताः ॥ सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ॥ गौतमः ॥ आ
षोडशाद्ब्राह्मणस्य पतितसावित्री द्वाविंशते राजन्यस्य अधिकाद्वैश्यस्य ॥ आपस्तंबः ॥ आषोडशाद्ब्राह्मणस्याऽ
नातीत आद्वाविंशात्क्षत्रियस्य आचतुर्विंशाद्वैश्यस्य ॥ बौधायनः ॥ आषोडशाद्द्वाविंशाच्चतुर्विंशादनत्ययः ॥ पैठी
नसिः ॥ आविंशात्षोडशाद्विंशतिश्चेत्यतीता विरुद्धकाला भवंति ॥ ब्राह्मणक्षत्रियविशां विराभेदकालो व्याख्या
तः ॥ यमः ॥ आषोडशात्त्रयावर्षाद्ब्राह्मणस्याकृतात्मनः ॥ सावित्री नातिवर्तेत अत ऊर्ध्वं निवर्तते ॥ आद्वाविंशा
त्क्षत्रियस्य त्रिष्टुप्छंदो विवर्तते ॥ अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः ॥ सावित्रीपतिता व्रात्या भवंत्यार्य
विगर्हिताः ॥ ॥ इत्युपनयनगौणकालः ॥ ॥ अथानध्यायकालः ॥ ॥ तत्रानध्यायाध्ययनकालदोषमा

११५

हालिखितः ॥ षडिमान्येतानि विप्राणां येनध्यायाः प्रकीर्तिताः ॥ छिद्रेभ्यः स्रवति ब्रह्म ब्राह्मणेन यदर्जितं ॥ तत्का
लेत स्परक्षांसि स्त्रियं च ब्रह्मणो बलं ॥ सर्वमादाय गच्छंति वर्जयेत् ॥ स्मितं फलं ॥ शंखः ॥ छिद्रेष्वेवावतिष्ठं
ति ये केचिल्लघुपादकाः ॥ तत्रस्था घ्नंति तद्ब्रह्म ब्राह्मणस्यास्य मेधसः ॥ तत्कालेत स्परक्षांसि स्त्रियं ब्रह्म
यशो बलं ॥ शंखः ॥ सर्वमादाय गच्छंति येध्यनध्यायेष्वधीयते ॥ हारीतः ॥ षडिमान्येतानि विप्राणां येनध्यायाः
प्रकीर्तिताः ॥ हिंसंति राक्षसास्तेषु तस्मात्तान्परिवर्जयेत् ॥ विष्णुः ॥ यस्मादनध्यायाधीतमात्रफलप्रदं ॥
तत्राध्ययने नायुषः परिक्षयो गुरुशिष्ययोश्च तस्मादनध्यायान्वर्जयेत् ॥ इंद्रनारदसंवादे अनध्यायेष्व
धीयानो नरोत्र किं दन्निष्यति ॥ असुरास्ते दुरात्मानो ब्रह्मघ्ना ब्रह्मदूषकाः ॥ अनध्यायेष्वधीयंते ने तेषां
ति स्ववेदिकं मताः स्वर्गं न गच्छंति किं नारद न ते हताः ॥ यमः ॥ षडिमाण्यपाकृत्य द्विजातीनामनध्यायान्मनीषिणः ॥
छिद्रेभ्यः स्रवति ब्रह्म ब्रह्महत्याणेन यदर्जितं ॥ आयुः प्रजां पशून्मधांऽकृत — — — युक्तं च यत् ॥ अन
ध्यायेष्वध्ययसता ब्रह्म ब्रह्मदहते सतः ॥ अनध्यायेष्वध्ययने प्रज्ञामायुः प्रजां स्त्रियः ब्रह्मवीर्यं श्रियं तो

नोनिकृंतति।यमः।स्वयंमेत्रवीर्यस्ययत्र्यादिंनोवक्त्रेणहंतिवाब्रह्मराक्षसतांयातिनरत्वेनलभेत्॥कूर्मे॥
आयुरस्यनिकृंतामिप्रजांमेधांकरोम्यहं।यउच्छिष्टःप्रवदंतिस्वाध्यायमनध्यायेधीयते।अष्टमीहंत्यु
पाध्यायंशिष्यंहंतिचतुर्दशी।हंतिपंचदशीमेधांतस्मात्पर्वाणिवर्जयेत्।प्रजापतिः।हंतिहंतिसर्वावि
द्याहिपर्वसु।तस्माद्धर्मार्थकामोवैनैताःपर्वसुकीर्तयेत्।मनुः।अमावास्यागुरुंहंतिशिष्यंहंतिचतुर्द
शी।ब्रह्माष्टकापौर्णमास्यौतस्मात्ताःपरिवर्जयेत्।गौतमः।अमावास्यावाहोरात्रेद्व्यहंवायदाह्यमा
वास्येतदाद्व्यहमनध्यायः।हारीतः।प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः।श्वोनध्यायेऽद्यशर्वर्यांना का॰हि॰
धीयीतकदाचनास्मृत्यंतरे।श्वोनध्यायेसत्यघरात्रावनध्यायः।एकानध्यायेषुरम्भेषुचपररात्रेनध्या ३०७
यः।अनाध्यायस्तुग्मात्स्वेदिनापररात्रेवेत्येके।पारस्करः।यातेवामावास्यायामितिसर्वानध्याये॰
ष्विन्यनुवृत्तौ।याज्ञवल्क्यः।पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूतके।ऋतुसंधिषुभुक्त्वाश्राद्धिकंप्रतिगृह्य॰
स्ववाराहुनेचेत्सूर्योपरागोऽत्रचत्रिरात्रंकालिकाहोरात्राणांविकल्पः।तथाचमनुः।प्रतिगृह्यद्विजो॰

॰नुद्दिष्टस्यस्नेहोगंधश्चाति

विप्रानेकोद्दिष्टस्यकेतनं।अहंनकीर्तयेद्ब्रह्मराहोरन्यत्रसूतकोद्या।यावदेकोद्दिष्टस्यसंधौलेपस्तिष्ठति।विप्र
स्यविदुषोदेहेतावद्ब्रह्मनकीर्तयेत्।अपचंदनगंधादियावतिष्ठतितावद्धानध्यायः।केतनमंतिमंत्रणं।
एकमुद्दिश्ययच्छ्रादेकोद्दिष्टं।शंखः।उपाध्यायेराजनिचश्रोत्रियेमृतेसब्रह्मचारिणिचराहुदर्शनेश
क्रध्वजप्रपतनआचार्येचमृतेत्रिरात्रं।गौतमः।आकालिकेनिर्घातभूकंपराहुदर्शनोल्कापातेषुसंधि
षुगम्यास्तामितेअहमनध्यायमाहुः।ऋतुसंधिषुऋतूनांवसंतादीनांसंधिषुप्रतिपत्सु।तथाचरामाय
णमंप्रतिहन्तामग्रावंघ्या।सास्वत्रावेनतन्द्वर्णावद्वितानुकर्षिता।प्रतिपत्पठनशीलस्यविद्येवतनुतांगता॥
गौतमः।प्रतिपत्सुत्रयोदश्यांनाध्येयंचप्रदोषयोः।अमावास्याष्टकापुष्पसंध्ययोरुन्नयोरपि।अमावा
स्याप्रतिपदिच्छिन्नंविद्याप्रणश्यति।अह्नयोःसंधिराद्धिकं।तत्रकंप्रतिगृह्यद्युतिशामनध्यायइत्यर्थः।
चान्यच्छ्राधि तथाचवशिष्ठः।फलंन्यौपस्तिसाध्वान्य~~श्राद्धि~~कंनवेत्।प्रतिगृह्याप्यनध्यायःपाण्यास्याब्रा॰
ह्मणाःस्मृताः।एतच्चैकोद्दिष्टव्यतिरिक्तविषयं।तत्सर्वोदाहृतमनुवचनेनत्रिरात्रविधानात्।गौतमः।प्रा

यानामेकार्त्तिके सोदर्णौ च अकृतान्वष्टाह्ययोगे चातत्स्या कालिकाहोरात्रयोर्विकल्पः ॥ स्मृत्यंतरे नवम्या
दं शुक्लाचतुर्जरणपर्यंता मन्वः प्राणिअनुप्राणीयक्किंचयदिवाप्रणिकं नवेतान्तदा तस्याथनध्यायः । पाण
म्यादिषु द्विजाः स्मृताः । पंचदश्यां चतुर्दश्यामष्टकासु महोत्सवे । प्रदोषे च त्रयोदश्यामष्टम्यां प्रतिपद्यपि । पुरा
णान्मेधाकाम त्रयोदश्यां चतुर्थ्यां चैव सर्वदा । सप्तम्यां तु प्रदोषे च न स्मरेत्तापिकीत्येतन् । प्रजापतिः । प
ष्ठी च द्वादशी चैव अर्द्धरात्रेन नाडिका । प्रदोषेन न चाधीयीत तृतीया नवनाडिका ॥ अर्द्धेति अर्द्धरात्रघटिकयो
रित्यर्थः । नवनाडिकाति निशायामिति ज्ञेया । प्रदोषे निशा प्रथमप्रहरेगो तमः । निशायां चतुर्मुहूर्ते प
त्रयोदशी विषयां तथा चोशनाः । तत्र त्रयोदशी प्रथमां प्रदुते मुहूर्ते न नाधीयीतेति दक्षः । प्रदोषपाश्च
मौ यामौ वेदाभ्यासरतो नयेत् । यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते । आपस्तंबः । अमावास्यां पौ
र्णमास्यां अध्यायं विवर्जयेदिति सामान्यविषयमेतत् । दिनांतैकमुहूर्त्तं या तिथिः सा त्रयगामिनी ॥ त्रि
मुहूर्त्ताधिकाशेषा या तिथिर्द्विहिगामिनी । नक्षत्रे तिथिवज्ज्ञेयं विपरीतमथोदये ॥ इति वचनात् ।

का॰हि॰ ३०८

क्वचित्तु क्वचिद्देशे यावत्षड्दिनताडिकाः । तावदेव चानध्यायो न तस्मिन्प्रदिनांतरे । उपवासव्रतादीनां तिथीनाकृत्स्ना
येव वा चतुर्थ्यां पूर्वरात्रेकोऽधीमी नवनाडीपुर्दरैनिनाध्येयं पूर्वरात्रेऽस्याः सप्तमी च त्रयोदशी । अर्द्धरात्रात्परं स्या
त्तेन नाध्येयं पूर्वरात्रके । अधीयीत तु सन्तुष्टो । शंखः । अष्टम्याः प्रदोषइति । पैठीनसिः । शुक्लाचतुर्थ्यां सर्वा
सु नाष्टमी पुनः क्रमध्यायार्थे ष्टकावर्ज्यं पुराणान् । महानवमी द्वादशी माघमाससप्तमी प्रपठेतैवाक्षणक्षणवे
विद्याविनाशयेत् । नरसिंहपुराणात् । महानवम्यां द्वादश्यां भरण्यामपि चैव हि । तथाक्षयतृतीयायां शिष्यान्नाध्या
पयेद्द्विजः । माघमासे तु सप्तम्यां रथाख्या यां च वर्जयेत् । महानमी । अश्वयुक्शुक्लपक्षस्य । रथाख्या सप्तम
माघशुक्लपक्षस्या स्मृत्यंतरे । मन्वादिषु मघा भरण्योरनध्यायः । सश्रवणयोरेकादशी द्वादशमस्या आषाढी
कार्त्तिकी फाल्गुनी समीपस्थ द्वितीयासु च अपरपक्षांते तथा द्वितीयायां च नाधीयीतेत्यनुवृत्तो । गौतमः । का
र्त्तिकी फाल्गुन्याषाढी पौर्णमासी प्रवृत्ति त्रिरात्रमित्यर्थः । अष्टकाशब्देनाष्टकाधर्माणि [?] सप्तम्यादि त्रिरात्र
मुपलक्ष्यते । अन्नाष्टकांत माघीतमे वानध्याय निमित्तमेवाह । पैठीनसिः । पौषप्रवृत्तयः क्षणेन वास्तिस्रो

ष्टकामार्गशीर्षप्रभृतयस्त्र्यैकेशौनकस्त्वाहेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकास्त्याकुः।मनुश्च
अष्टकासुत्वहोरात्रमृत्वंतासुचरात्रिषु।नारदीये।शयनेविबुधेचैवशयनेबोधनेहरेः।अनध्यायस्तुकर्तव्यो
मन्वादिषुमन्वादयोयुगादयश्चतन्निर्णयेदर्शिताः।निशाद्वयेदिवारात्रौसंक्रमेदिवसद्वये।अनध्यायंप्रकुर्वी
त।शयनेविबुधेतथा।पुराणेतु।युगादिषुसर्वेषुतथामन्वंतरादिषु।अनध्यायंप्रकुर्वीतयाश्चसोपपदातिथिः॥
तथाऽसिताज्येष्ठद्वितीयाचआश्विनेदशमीसिता।चतुर्थीद्वादशीमाघेएतासोपपदाःस्मृताः।अहर्मिस्तनुव्र
तो।याज्ञवल्क्यः।उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेमृते।स्मर्यंतेरेविदसमपेतेप्रथमसंध्यासुतदहोरात्रंप
रपुनरनध्यायः।द्वितीयादिसंध्यासुचनिशि।कांडोपरमेणवामाष्टकस्यकांडसमापनेवापिष्टकस्यमनुष्यप्रकृतं। का॰ नि॰ ३०९
नांचदेवानांयज्ञतुल्येकेपर्युषितेस्तंडुलेरासमामेवनेयाध्यायेतातथौषधिवनस्पतिमूलफलेयेकांडमुपा
कुर्वीत।यस्यचानुवाक्यं।कुर्वीततनतदहरधीयीतेपिकरणसमापनेयोऽस्यामनुः।यथास्त्वेडकंचैवमुत्सर्गेत्रिदश
याहिविरमेत्पक्षिणींरात्रिंयद्वाप्यकमहर्निशं।उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतमिति।उत्पत्तोऽपिदिवसा

रात्रिःपक्षिणी।एतेषांचपक्षाणांस्वशक्त्यनुसारेणव्यवस्था।मनुः।विद्युत्स्तनितवर्षेषुमहोल्कानांचसंप्लवे।आ
कालिकमनध्यायमेतेषुमनुरब्रवीत्।एतेषुविद्युदादिषुप्रत्येकमाकालिकंनिमित्तकालादारभ्यापरेद्युर्याव
त्सएवकालस्तावदनध्यायइत्यर्थः।अत्रविद्युदादित्रयवर्षान्यत्रसंध्याकालेनध्यायः।यदाहसएव।एता
नभ्यःदितान्विद्याद्यदाप्रादुःष्कृताग्निषु।यदाविद्यादनध्यायमनृतौचाभ्रदर्शने।प्रादुःकरणंविहरणं।तेनसंध्या
कालस्रक्षणमाकालिकेत्वनुवृत्तौ।गौतमः।स्तनयित्नुवर्षविद्युतश्चप्रादुःष्कृताग्निषु।उल्कायांतुसर्वदाआ
कालिकएवानध्यायः।यथाहापस्तंबः।उल्कायामप्सुपांतेचसर्वासांविद्यानामाकालिकः।मनुः।चौरैरुपप्लुतेग्रा
मेवाग्निवारिते।आकालिकमनध्यायंविद्यात्सर्वाद्भुतेषुच।अद्भुतेषुरुधिरादिवर्षेषु।यथाहवसिष्ठः।दि
क्पर्वतानांदाहास्वेदनंगप्रपतेहपलवर्षपांशुवर्षेष्वाकालिकमेतत्प्रबलपांशुवर्षविषयंस्मर्यंतेरे।अ
ल्पेपस्तेकालवृष्टौचाकालिकोऽनध्यायः॥शंखः।निर्घातभूमिकंपोल्कापातादिग्दाहपांशुशोणितमांसा
स्थिकसदधिलाजगोरवर्षेषुशांतिस्वस्त्ययनेष्वान्यत्रानध्यायंतत्रमङ्गःस्वप्नदर्शनेचैकोद्दिष्टसूतकमृत

केषांचिद्ग्रामप्रस्थितं कव्वाग्नास्तमयमने पर्वादीनि दश तु ज्ञाप्याधीयीरन् । विद्युदादित्रयायोगप्रयुक्तस्य त्र्यहमनध्
ध्यायः । तथा च त्रिरात्रमित्यनुवृत्तौ गौतमः । वर्षविद्युत्स्तनयित्नुसन्निपाते इति । एतद्वर्षाकालादन्यत्रापादा
हापस्तंबः । विद्युत्स्तनयित्नुवृष्टिपाते यत्र संनिहितेस्त्र्यहमनध्यायः । भूमिरस्तु द्वेक्ष्वेको । एकेन द्वाभ्यां चैतेषा
मकालः । अत्र नारदो जोपि । अनुत्पत्तौ यत्तु वर्षस्वर्गमनेनाध्ययनं न वेत । आलिकां । त्रिरात्रं तु सविद्युत्स्तनयि
त्नुके पिठानसिः । एकादश्यां द्वादश्यां तु उल्का उपग्रहयत्नु दृष्ट्वा वज्रपतनादाचार्यमरणात्सूर्याचंद्रमसोरुपप्लवाद्भुत्केतुद
र्शनानिर्घातभूमिचलनादेकैकस्मिंस्त्रिरात्रं । श्रोत्रियमरणे संध्यास्तमिते करकापतनेनीललोहितप्रादु
र्भावे च यदा सुवर्षास्ववसंध्यायां विद्युत्स्तनिते वातदाहे तिरनध्यायः । तथा मनुः । प्रादुष्कृतेष्वग्निषु तु विद्यु
त्स्तनितनिस्वने । सज्योतिः स्यादनध्यायः शेषरात्रौ यथा दिवा । प्रातःसंध्यायां निमित्तादेः सज्योति यावत्सूर्यः स्तावदे
वानध्यायोर्थः । हारीतः । स्तनितविशेषमहासायंसंध्यास्तनिते रात्रौ नाधीयीत । प्रातःसंध्यास्तनितमिति चाहोरात्रं । आप
स्तंबः । संध्यामस्तमिते रात्रिस्वप्नपर्यंतं विद्युत्युपविषयावतावारोहणीमेवसस्यात्स्यासाहि ज्ञानीयादेतस्मिन्काले विद्यो
×वेदितव्य इत्यर्थः । अपरस्यां तु यावन्नक्षत्राणि तावदेव वा शेषरात्रौ यथा दिवा नध्यायस्तथा रात्रावपीत्यातुर

का॰ हि॰
३१॰

...११९

तमानं सप्रदोषमहरनध्यायो दक्षोपरात्रे स्तनयित्नुनोर्ध्वमर्धरात्रादित्येके । गवां चाविरोध इति संध्याहोरात्रसंबंधि
लक्षितकाले स्तनिते मेघध्वानो रात्रिमनंतरं नाधीयीतानुस्वप्नपर्यंतं स्वप्नांतं यावत् । अन्ये तु सूर्यास्तमनादित्यर्थः । उषा
स्युषसि विद्युति द्योतमानो अयवामस्यात्रासपरिमिते देशे स्थितागोः । कृष्णलोहितेवाशयने सौतदापरात्रे द्योतमा
नायां विद्युति प्रदोषसहितमहर्वरमनध्यायः । अर्धोपरात्रे स्तनयित्नुनामर्जिते न निमित्तेन प्रदोषमहरनध्यायस्त्व
र्थः । निर्घातादिषु वर्षास्वाकालिको नध्यायः । मनुनोक्तः । निर्घाते भूमिचलते ज्योतिषां चोपसर्जने । एतानकालिकान्वि
द्यादनध्यायानृतावपि । निर्घातश्चांतरिक्षो ध्वनिविशेषः । ज्योतिषामुपसर्जने चंद्रसूर्ययोः परिवेषः । ग्रहयुद्ध
दिश्च । याज्ञवल्क्यः । संध्यागर्जितनिर्घातभूकंपोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च । अनिश
महोरात्रं । ततश्चाकालिकाहोरात्रो यात्राविकल्पः । यत्तु मनुवचनं । शक्रध्वजनिपाते च उल्कापाते तथैव च । अ
नध्यायस्त्रिरात्रं तु भूमिकंपे तथैव च । तदुल्काविद्युतां सह सावेदितव्या । उल्काविद्युत्समासत्रिरात्रं कर्णश्रावे
तिरात्रौ दिवायां तु समुद्रने । एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते । कर्णमंतरेण श्रवणेसंजवाद

तिरायोत्र विवक्षितः दिवा वा तत्समं इति वा पाठः। याज्ञवल्क्यः। त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। गुरुरत्रा
चार्यः। न तु मुख्यः। तत्र दशाहविधानात्। मनुः। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। बंधवोत्रासपिंडा ग्राह्याः।
सपिंडेषु दशाहादिविधानात्। शिष्यर्त्विगादिषु वशिष्ठेनाहोरात्रमुक्तं। आचार्यपुत्रशिष्यभार्यास्वाहोरात्रमृत्विक्सु
योनिसंबद्धेषु। योनिसंबंधा मातुलादयः। अहोरात्रमित्यनुवृत्तौ गोभिलः। सब्रह्मचारिणि प्रेते प्रेते न्नमिपतावपि।
गुरुराचार्ये उपाकरणे इति। अपरा— —संधिषु उक्तां तेषु मातरि पितर्याचार्ये इति दशाहः। आचार्ये त्वनहोरात्रानि
त्येके। यास्त्रियसंस्थायामपरे। संवत्सरायामेके। सब्रह्मचारिणीत्येके। महागुरुस्मृतौ दशरात्रं। असपिंडे गुरौ त्रिरात्र
माचार्ये उपाध्याये पक्षिणीत्येके। गोविंदस्मृतौ त्रिरात्रं। नरसिंहपुराणे। नीयमाने शवं दृष्ट्वा महीस्थे च द्विजोत्तमः। अक
लगर्जिता दोषपर्वस्वाशौचकादिषु। अनध्यायं बुधः कुर्यादुपरागादिके तथा। स्मृत्यंतरे। शवानुगमनपरिचरणे
षु चाक्रोशशावदर्शने स्यहोरात्रं। यमः। न गर्जिते नास्तमिते तथा चट्चटायते। न चंद्रार्कोपरागे तु न राजव्यसने तथा स
मान विद्ये च मृते तथा सब्रह्मचारिणि। श्वादितामध्येन्मध्यागमने गोतमेनोक्तं। श्वंतरागमने उ नरूपसदनकुलसर्प्य

का॰ ३११

१२॰

मंडूकमार्जाराणां त्र्यहमुपवासो विप्रस्य प्राणायामो घृतप्राशनं नेतरेषां स्मशानमनध्ययनं चैवं। येन केन चिदंतरागा
गमने कृते उपसदनं कार्यं। उपसदनं च पाणिना पाणिमुपसंगृह्येत्यादिना यत्राल्पवहविहितं पुनस्तदेव कर्तव्यं॥
आद्यंतरागमने शिष्योपाध्याययोस्तु हस्तपाणिमुपसंगृह्योवासः सहवासात्रवतो पित्रिरात्रमेव। तथा हारीतः।
अश्वगोमायुमार्जारनकुलसर्पमूषिकामुहूर्त्तावेतेषामेवं मंतरागमने त्रिरात्रमुपवासः। अहं च दिवा सदिवसेषु
कृवान्। तथा च त्र्यहमनध्यायः। त्र्यहमुपवासो सामर्थ्ये तु वशिष्ठ आह। मार्जारनकुलव्याघ्राणां च होरात्रं॥
त्र्यनो जनमिति। प्रकृतो उपवासः। मार्जारांतरागमने घृतं प्राश्य त्र्यहमुपवसेत्। आपस्तंबः। चांडालादिव्यवा
ये षण्मासानध्ययनमाह। चांडालश्वपाकशवाश्च षण्मासानध्याय इति। अनुवृत्तौ हारीतव्याघ्रसर्पैश्चेव नाया
ज्ञवल्क्य हि। श्वादिगमने नाहोरात्रमनध्यायमाह। पशुमंडूकनकुलश्वाहिमार्जारतस्करैः। कृते तु अंतरे च होरात्रं
शक्रपाते तथोच्छ्रये। शक्रपातोच्छ्रयकालश्च निर्णयप्रस्तावे दर्शितः। पुराणे तु। मासि मासि ऽपदे राजन् शक्रय
ष्टिप्रदर्शने। उत्थापने प्रसिद्धं यत्तानध्याय उच्यते। मनुरपि। पशुमंडूकनकुलमार्जारसर्पाखुभिः। अंतरागम

नेविद्यादनध्यायमहर्निशं।अन्येप्याहुः।काकोलूककुक्कुटमूषकमंडूकाद्यंतरागमनेसतिदिनेद्दितयदिनंतेरात्रौचे
त्र्यंतेअनध्यायः।श्वसूकरमूषकनकुलादावहोरात्रं।मार्जारयोश्चप्रथमानध्ययनेनतुश्वनकुलमंडूकस
र्पमार्जाराणांचदस्युपवासोविप्रवासश्च।आरण्यकमार्जारसर्पनकुलपंचमजात्यादौत्रिरात्रं।खरवाराहोष्ट्र
द्विवेडालादिस्रुतकौदासवादौमासं।अविगवयादिनास्तिकादौत्रिमासं।गजगंडसारससिंहव्याघ्रमहापापि
कृतघ्नावष्टमनध्यायः।स्वाध्यायेप्रवचनेवर्तमानेतरागतो।आधिव्याधेमृत्युविघ्नपापानिगुरुशिष्ययोः।स्मृतं
नेर।सर्वेक्षितगंधेषुपरिवासुसत्रासुच।अभ्यंगस्नानकालेचमहावेदविकंपने।गोविप्ररोधनेसर्वेराहुदृषुश्चा
हुपंक्तिषुश्लेष्मलस्यमधुकस्यकोविदारकपित्थयोः।श्लेष्मातकस्यछायायांचेतितान्कालिकान्विदुः।याज्ञवल्क्य का॰नि॰
ः।श्वक्रोष्टृगर्दभोलूकसामबाणार्तनिस्वने।अमेध्यशवशूद्रांत्यश्मशानपतितांतिके।देशेशुचावात्मनिचविद्" ३१२
द्युत्स्तनितसंप्लवे।भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते।पांसुवर्षेदिशांदाहेसंध्यानीहारभीतिषुधावतः।पूति
गंधेचशिष्टेचगृहमागते।खरोष्ट्रयाननस्तस्यवनौवृक्षरूपारोहणेसप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्वि

दुः।श्वादीनांशब्दश्रवणमात्रेतावत्कालमनध्यायः।कौथुमाः।सामशब्देषुऋग्यजुषेनध्यायः।यदाहय
मः।सामशब्देनाथर्वणेयजुषीमारुतेवातिवायति।सामध्वनावृग्यजुषीनाधीयीतकदाचन।अत्रहेतुमा
हाऋग्वेदोदेवदैवत्योयजुर्वेदस्तुमानुषः।सामवेदःस्मृतःपित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः।अंगिराः।श्मशा
निकानांदेवानांसामवेदोननित्यशः।क्रियतेयजनेयस्मात्तस्मात्तस्याशुचिर्ध्वनिः।अर्थवादमात्रमेततुत
दासएवयस्मात्ध्वनिरमूर्तोऽशुच्यर्थेनैवविद्यते।तस्यतस्मान्निदानमात्रंप्रोक्तमिदमर्थवादेननिदानंप्र
तिषेधनिमित्तमात्रं।एवमृगादिनिस्वनेसाम्नामनध्यायः।तथापस्तंबः।शाखांतरध्वनौचसाम्नामनध्या
यः।बाणवीणाविशेषः।आशौडुःखिताः।मनुरपिनाहारेबाणशब्देचसंध्ययोरुभयोरपिनीहारेरश्मिका
यांबालत्वेरीमृदंगागर्दश्राब्देषुगर्दःशाकटं।अनध्यायानुवृत्तौ।बौधायनः।नृतगीतवादित्ररुदितशब्दे
षुतावंतंकालमार्तेचा।गोभिलः।गीतवादित्ररुदितानिचेतेषुतत्कालं।आपस्तंबः।श्वगर्दभनादशालावृकंति
काकोलूकशब्दाः।विवादिशब्दरोदनगीतसामशब्दाश्च।एतेषुतत्कालमनध्यायः।अमेध्यादीनामंतिके॥

×नोदकांतेन पादोपहतपादो नाचांतो न विरिक्तो नाजीर्णे प्रेतेतां चतुष्पथमश्लापथसंक्रमोद्याने र
-न्तिकं समीपं । अन्त्याः श्वपचादयः । निकृष्टाः विल्लुरपि न स्वरूपतितयाः समीपे न देवतायातनश्मशाने चतुष्पथ
स्थाने षुन देवसमीपे । धीयीत । मनुः । नाधीयत श्मशानान्ते ग्रामान्ते गोव्रजे पि वा । वसित्वा मैथुने वासः ।
प्राद्यादिकं प्रतिगृह्य च । अन्तः समीपे मैथुनं वासः । येन सह मैथुनमाचरितं तद्वासः परिधायेत्यर्थः । एतदनिर्णिक्त वा
सो विषयं । अत एव यमः । वासस्यपि च निर्णिक्ते मैथुनाचरिते तैर्द्वासदावासेष्टः । मैथुने व्यापतायां शय्यायां
वाससा च मैथुने व्यपितेन च निर्णिक्तेन ग्रामान्ते च्छर्दितस्याच्छादितेत्र होत्रमनध्यायः । गौतमः । न कुलोपाहितव
द्रुः छर्दिस्याद्रमनुष्ययज्ञानवरोरात्रं । अस्मुत्पातउपाहितः । मनुष्ययज्ञः । पात्रादिनिमित्तं ग्राम तोजनो स्मृत्यन्तरे । मनु
ष्यप्रवृत्तीनां चतुर्क्षो दशरात्रे सुगीतमित्येके । एते प्राश्य नाधीयीतेत्यापस्तंबः । स्वादयित्वा स्वप्नान्ते सर्पिर्वा प्राश्य
तिस्वप्नान्तेउदयादित्यर्थः । मनुः । नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु वा धर्मनैपुणकामानां । इतरे विद्याने पुणका का॰ १॰ ३१३
मा । तेषां तु ग्रामेष्यध्ययने विरुद्धं । अत एव वसिष्ठः । नगरे तु कामं गोमयपर्युषिते परिलेखिते चेति । अत एव मनुरा
ह । अन्तर्गते शवे ग्रामे वृषलस्य च संनिधौ । अनध्यायो रुद्यमाने समवाये जनस्य च । वृषलोऽधार्मिकजनः । श

२२२

श्वज्ञानसंनिधावितिश्वरजनसंनिधाने । अध्ययनस्यैतेनैव निषिद्धत्वात् वशिष्ठोपि संध्यास्वासो दिवाकीर्तिर
ति दिवाकीर्त्तिते चाण्डालग्रामे नाधीयीतेत्यर्थः । गौतमः । नित्यमेके नगरे । चतुष्पथमश्लापथे नगरोद्याने पुनन्न
देवसमीपे अधीयीत । गौतमः । श्मशानग्रामान्तमहापथाशौचेष्विति श्मशाने तु विशेषमाह । आपस्तंबः । श्म
शाने सर्वतः शम्याप्रासानु ग्रामेण व्यवसिते क्षेत्रेण वा नानध्यायो ज्ञायमानो वास्मिंश्चैव देशे नाधीयीत । श्म
शानवत् शूद्रपतितौ समानागार इत्येके । शूद्रान्त्यप्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः । तथान्यस्यां स्त्रियां
वर्णव्यतिक्रान्तायां मैथुने विद्युस्तनयित्नुस्तानितसंप्लवेषु संप्लवः पुनरुपप्लवः । न वृक्षस्थो न तीर्थस्थो नाप्सु नोपु
सनासु वा वक्रसंकीर्णमध्ये च नाधीयीत कदाचन । नारोहणं नाधीयीताश्वमारूढो न च वृक्षे न हस्तिनो न नावं न
खरं नोष्ट्रं नेरिणस्थो न यानगः । शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां । नाधीयीतामिषं जग्ध्वा सूतकान्ना
द्यमेव च । न विवादे न कलहे न सेनायां न संगरे । न भुक्तमात्रे नाजीर्णे न मुक्त्वा न च सूतके । शरणं स्पर्शं प्रौढपा
दः । अवसक्थिका । जान्वोर्मध्ये वस्त्रादिनावष्टंभो । भुक्तमात्रे नाजीर्णे न यावदार्द्रपाणिरित्यर्थः । उदके तु न य

र्मार्थं जपप्रतिषेधः किं तर्हि अपूर्वग्रहणार्थं । एते चाध्ययनार्थानाम्यन्नध्यायेषु मानसमप्यनुज्ञेति केचि
त् । अपरे तु मानसमपि नेच्छंति । तथा च बौधायनः । अन्येषु चाकुतोत्पातेष्वनध्यायमपत्रमानसात् । मानसो
विजननमरणयोरनध्यायः । उदके मध्यरात्रे च विण्मूत्रे परिवर्जयेत् । उच्छिष्टः श्राद्धभुक्तो च मनसापि
न चिंतयेत् । ऊर्ध्वं भोजनादुच्छिष्टः प्राधीतस्य उपनयनादूर्ध्वं भोजनादनध्यायः प्राधीतस्याध्ययने प्रथ
मे प्रवृत्तस्य भोजनादूर्ध्वमनुसवे ऽपि पूर्ववदनध्यायः । स्मृत्यंतरे । शोभननगरदेशोभननदिवसे वानध्यायः
विवाहमौंजीबंधनप्रतिष्ठास्थापनादिषु मार्जने समाप्ते सपिंडसगोत्राणामनध्यायः । यद्वा चानुबध्या
नंष्ठविजामावार्याणां च । मनुः । पांसुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुवति पंक्तौ च का॰हि॰
न पठेद्द्विजः । यमः । शिवारुते तथा श्ववासंध्ययोर्न द्विजोत्तमः । नापराह्णे न मध्याह्ने नार्धरात्रे कदाचन शि ३१४
ष्टे च गर्दभागतेन तदनुज्ञावाधरनध्यायः । तथा च यमः । आगते चातिथिं दृष्ट्वा नाधीयीत च द्विमानात् । अ
प्यनुज्ञकैते तस्मिन्नध्येतव्यं प्रयत्नतः । अतिथिं वाननुज्ञाप्य मारुते वा निवायति । रुधिरे च स्रुते गात्रात् शस्त्र

१२३

ण च परिक्षिते । हारीतः । ब्राह्मणागमने ऽधीयानो दत्त्वानुज्ञाप्याधीयीरन् । आपस्तंबः । ब्रह्माध्येष्यमाणो मलवद्वा
ससेच्छन्संभाषितुं ब्राह्मणेन संभाष्य तया संभाषेत संभाष्य तु ब्राह्मणेन च संभाष्याधीयीत । तथा श्रोत्रि
याभ्यागमे ऽधिजिगांसमानो ऽधीयानो वा अनुज्ञाप्याधीयीत । अध्यापयेद्वा गुरुसंनिधौ वाधीहीत्युक्त्वाधीयीताध्याप
येद्वा नयमुपसंग्रहणमधिजिगांसमानस्याधीयीतेत्यबाधयानेषु वा यत्रान्यान्याधेतीयादेवंरूपमेवमुपयुं
ज्याधीयीत । तथान्तावसदर्शने ऽप्यनध्यायमाह गौतमः । अंत्यदर्शनेन चापत्ताविति । अग्नेजलस्थरोमे
घः । यमः । श्लेष्मांतकस्य छायायां शाल्मलेर्मधुकस्य च । कदाचिदपि नाध्येयं कोविदारकपित्थयोः । तच्च ब्रह्म
यज्ञाध्ययनविषयं । तथा च ब्रह्मयज्ञं प्रकृत्य तैत्तिरीयकाः समामनंति । तस्य वा एतस्य ब्रह्मयज्ञस्य द्वावन
ध्यायौ यदात्मा ऽशुचिर्यद्देश इति । अत एव मनुरपि वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोस्त्यन
ध्याये होममंत्रेषु चैव हि । वेदोपकरणान्यंगानि नित्यस्वाध्यायो ब्रह्मयज्ञसंबंधी होममंत्रग्रहणं बलि
यज्ञादिमंत्राणामप्युपलक्षणं नैत्यके । नास्त्यनध्याये ब्रह्मसत्रं हि तत्स्मृतं । ब्रह्माहुतिहुतं पुण्यमनध्याय

षट्कृतः । अथर्ववेदग्रहणार्थे वानध्यायानत्तु कर्म्मणि । प्रयोगे शौनकोपि । नित्ये जपे च काम्ये च क्रतौ पारायणेपि च ॥
नानध्यायोनावदेवं ग्रहणे च सदा स्मृत इति । पुराणान्तरे । शिष्योध्ययनं कुर्वन्ननध्यायान्विवर्ज्जयेत् । स्मृत्यु
क्तं तु कलादौ तु पुराणे कापि न द्विजः । मनुः । तत्र नित्यमनध्यायो नाधीयानो विवर्ज्जयेत् । अध्ययनं च कुर्वी
णानां शिष्याणां विधिपूर्वकं ॥ मनु । प्रयोगकाले यथा दोत यथा प्रणवव्याहृतीनां च सावित्र्याः शिरसः सदा नि
त्यनैमित्तिके कार्ये व्रते यज्ञे क्रतौ तथा । प्रकृष्टे काम्यकार्ये च नानध्यायाः स्मृतास्तथा । दैवार्चने मंत्राणां
नानध्यायस्मृतः सदा । चतुर्दश्यष्टमी पर्व प्रतिपत्स्ववसर्वदा । दुर्मेधानामनध्यायस्त्वेतरागमनेषु वा तत्र वि
स्मृतिशीलानां बहुवेदप्रपाठिनां । चतुर्दश्यष्टमी पर्व प्रतिपत्सु द्विजातिभिः । वेदांगन्यायमीमांसाधर्मशा
स्त्राणि वाभ्यसेत् । गौतमः । प्रतिपदं यावत्समाम्नानेति यथा चतुष्पथभोजने तरकाले छंदोगानामनध्या का॰नि॰ २९५
यः । यथा वप्राग्रोजनीयाप्रदोषीयारण्यगेयानि । आपस्तंबोपि । यथोक्तमन्यदत्तपरिषत्स्वपि ॥ ॥इ
ति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमाद्रिविरचिते च

॰ द्वर्जितपुत्रेति पुस्तकांतरे पाठः

तुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये ऽनध्यायनिर्णयः ॥ ॥अथ केशांतकर्म्मकालः ॥ ॥तत्र याज्ञवल्क्यः
केशांतः षोडशे वर्षे केशांतो गोदानाख्यं कर्म्म ॥ एतच्च ब्राह्मणविषयं । यदाह मनुः । केशांतः षोडशे वर्षे ब्राह्मण
स्य विधीयते । राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः । ज्योतिःशास्त्रोक्तान्युक्तानि सौरेषु ज्ञानि तान्येव चूडा
करणे । उपनयने गोदाने केशांते प्रशस्तानि ॥ ॥इति केशांतकर्म्मकालः ॥ ॥अथ ब्रह्मचर्यकालविधिः ॥
तत्रापस्तंबः ॥ उपेतस्याचार्यकुले ब्रह्मचारिवासोष्टाचत्वारिंशद्वर्षाणि पादोनमार्द्धेन त्रिभिर्वा द्वादश्यावरा
र्ध्येन ब्रह्मचारिणो विद्यार्थस्य परोपवासोस्ति त्रिभिः पादैरूनं द्वादशैर्वर्षाणीत्यर्थः । एच्चोतशाकविषयं ॥ यदाह
देवलः । अतः परमष्टाचत्वारिंशद्वार्षिकी वेदब्रह्मचर्यो मातिष्ठेत् । अशक्तस्त्वेतु षट्त्रिंशद्वार्षिकी चतुर्विंश
तिवार्षिकी चेति । एतच्च प्रतिपदविषयं । यदाह यमः । वसेद्द्वादशवर्षाणि चतुर्विंशतिमेव वा । षट्त्रिंशन्मतं वर्षा
णि प्रतिवेदं व्रतं चरेत् । बौधायनोपि । अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् । चतुर्विंशति द्वादशावा प्र
तिवेदं संवत्सराद्वैवा प्रतिकांडग्रहणाद्वा जीवितस्यास्थिरत्वात्कृष्णकेशोग्नीनादधीतेति श्रुतेः । पैठीनसिः

द्वादशवर्षाणिएकवेदब्रह्मचर्यंचरेत्।प्रतिद्वादशवासार्धंग्रहणांतंवा।शंखलिखितौ।द्वादशवर्षाणि
वाप्रतिवेदं।यावद्ग्रहणंवावेदस्यतावद्ब्रह्मचर्यमाचरेत्।मनुः।षट्त्रिंशदाब्दिकंचर्यंगुरौत्रैवैदिकंव्रतं
तदर्धिकंपादिकंवाग्रहणांतकमेववा।त्रैविद्याऋग्यजुःसामाख्यावेदत्रयविषयं।तत्षट्त्रिंशदाब्दिकंका
र्यमेवंचप्रतिवेदंद्वादशवर्षाणिब्रह्मचर्यमित्युक्तंभवति।अर्धिकपक्षेप्रतिवेदंषड्वर्षाणिपादिकपक्षेत्री
ण्येवा।याज्ञवल्क्यः।प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानिपंचवाग्रहणांतिकमित्येके।केशांतश्चैवषोडशे॥ ॥इति
ब्रह्मचर्यकालविधिः॥ ॥अथसमावर्तनकालः॥ ॥तत्रदक्षः।स्वीकरोतियदावेदंचरेद्वेदव्रतानिच।ब्रह्म
चारीभवेत्स्नातोततःपश्चाद्गृहीभवेत्।वेदस्वीकरणंवेदार्थविचारस्याप्युपलक्षणं।तथाचस्मृत्यंतरे।वे का॰लि॰
दमधीत्यत्वरितोविवक्षयानर्थानुबुध्यास्नायात्।तथाचव्यासः।नवेदपाठमात्रेणसंतोषंकारयेद्गुरुः।पाठमात्राव ३१६
सानेतुपंकेगौरिवसीदति।यथापशुर्भारीनतस्यभजतेफलं।द्विजस्तद्वदनर्थज्ञोनवेदफलमश्नुते।वेद
स्याध्ययनं।सर्वंधर्मशास्त्रस्यचापियत्।अजानतोर्थंतत्सर्वंतुषाणांकंडनंयथा।योधीत्यवेदविद्विप्रोवेदा

र्थंनविचारयेत्।ससान्वयःशूद्रसमःपात्रतांनप्रपद्यते।अधीत्ययत्किंचिदपिवेदार्थाधिगमेरतः।ब्रह्मलोकम
वाप्नोतिब्रह्मानुष्ठानविद्धिसः।श्रुत — नधनः।यन्नेहामुत्रनतद्भवेत्।तथा।ज्ञानंकर्मचसंयुक्तंमुक्त्यर्थं
कल्पितंयथा।अधीत्यश्रुतसंयुक्तंतथाश्रेष्ठंनकेवलं।पाठमात्ररतान्नित्यंद्विजातीनर्थवर्जितान्।पशू
निवचतान्प्राज्ञोवाङ्मात्रेणापिनार्चयेत्।ऋक्यादमधीत्यनस्वाध्यायस्तुतदर्थवित्।तत्रहारीतः।त्रयःस्नातका
भवंति।विद्यास्नातकोव्रतस्नातकोविद्याव्रतस्नातकइति।यःसमाप्यवेदंअसमाप्यव्रतानिसमावर्ततेसवि
द्यास्नातकः।यस्तुवेदंव्रतानिचसमाप्यसमावर्ततेसव्रतस्नातकः।यस्तुनरुभयंसमाप्यसविद्याव्रतस्नातकः।या
ज्ञवल्क्यः।गुरवेतुवरंदत्वास्नायीततदनुज्ञया।वेदंव्रतानिवापारंनीत्वाह्युभयमेववा।आपस्तंबेनास्नातामित्ये
के।तथाव्रतेनाष्टचत्वारिंशत्परिमाणेननविद्याव्रतेनचेत्येके।आधानाद्युपरिष्टाद्वाछयत्रिपवर्गमुदकमु
पस्पृशाननग्निपक्षवृत्तिरस्थायोगस्थानासनिकःसंवत्सरमेवतद्व्रतंचरेत्।एतद्ध्यष्टाचत्वारिंशत्सम्मितंस्या
चक्षते।व्यासः।गुरुशुश्रूषयाविद्यांसंप्राप्यविधिवद्द्विजः।स्नायीतगुरुणानुज्ञातोदत्वासौदक्षिणां॥गौतमः

विद्यान्ते गुरुरर्थेन निमंत्र्य कृत्वानुज्ञातस्य स्नानमिति विद्यान्ते गुरुरर्थेनादत्तुमनिमंत्र्य प्रष्टव्यः। कोऽर्थस्त्व
येमया देय इत्यर्थः। स स्वयं ब्रूयात् तमर्थमेवाचार्याय दत्वा स्नायात् दत्ते कृतेऽनुज्ञया वेत्यर्थः। बुधोऽपि गुरु
णानुज्ञातः स्नायाद्विति॥ ॥इति समावर्त्तनकालः॥ ॥अथाश्रमकालनिर्णयः॥ तत्राश्रमाणां समुच्चयो विक
ल्पश्च। तत्र समुच्चयपक्षे स्मृत्यन्तरे। ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा॥ एते गृहस्थप्रभवाश्चत्वारः
पृथगाश्रमाः। सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः। यथोक्तकारिणं विप्रं नयंति परमां गतिं। गृहस्थ
प्रभवास्तदुपजीविनः। क्रमश इति प्रातिलोम्यं निषिद्धं। दक्षः। त्रयाणामानुलोम्यं तु प्रातिलोम्यं न विद्यते। प्रा का॰दे॰
तिलोम्येन यो याति न तस्मात्पापकृत्तमः। यो गृहाश्रममास्थाय ब्रह्मचारिणा भवितव्यं। तत्र ब्रह्मचारिगृहा ३१७
श्रमशब्दाभ्यां तदाश्रमिणः। इतरेतराश्रमाणामाश्रयिणां प्रतिपादनपरौ। अन्यथा प्रातिलोम्येन विद्यत इति
त्रयाणामहणेन विवक्षितं स्यात्॥ कूर्मपुराणे॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोयभिक्षुकः। अथ क्रमशो द्विजाने
नमागाः पुत्रकृतवर्त्मना। आपस्तम्बः। चत्वार आश्रमाः। गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति। तेषु सर्वेषु

यथोपदेशमव्यग्रो वर्त्तमानः क्षेमं गच्छति। तेषु सर्वेषु वर्त्तमान इति समुच्चयो दर्शितः। श्रुतिषु चतु
र्णां त्रयाणां द्वयोर्वा समुच्चय इत्यर्थः। ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत्। प्रव्रजेद्यदि वे
तरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति समुच्चये कालविशेषाकांक्षायां। आह मनुः। चतुर्थमा
युषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्। वनेषु तु विहृत्यैवं तृतीयं
भागमायुषः। चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेत्। शतायुर्वै पुरुष इति श्रुत्या निर्दिष्टमा
युषश्चतुर्थो भागः पंचविंशति वर्षाणि। गौतमस्तु विकल्पमाह। तस्याश्रमविकल्पमेके ब्रुवते। अ
यं तु विकल्पो ब्रह्मचर्याश्रमव्यतिरिक्तविषयः। वशिष्ठः। चत्वार आश्रमा ब्रह्मचारी गृहस्थो वानप्रस्थः परि
व्राजकस्तेषां वेदमधीत्य वेदौ वा वेदान्वा विशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदित्याप वेदान्वेदौ वे
तिपद्योफलनूयस्त्वमनिवेसावेदमधीत्याविप्लुतब्रह्मचर्यस्तेषां चतुर्णामाश्रमाणां मध्ये यमिच्छेत्तमावि
शेषदाश्रमेयेनैवे वतिष्ठेत् यावज्जीवमित्यर्थः। वामनपुराणे। गार्हस्थ्याश्रमकामस्तु गार्हस्थ्याश्रममाच

रेत्। वानप्रस्थाश्रमं वापि चर्यस्थे ब्रूयात्पुनः। न विष्णुस्मराणे। गार्हस्थ्यमिच्छन् नृपाल कुर्याद्वा रपरियदं ब्र
ह्मचर्येण वा कालं नयेत्संकल्पपूर्वकं। विधानं सो वापि न वेत्सरिव्राड्वा पयेद्ब्रूयात्। गुरवे दक्षिणां दद्यात् तत्र देवा
नुधर्मो दितः। गृहं वनं चोपवसेत्प्रव्रजेद्वा द्विजोत्तमः। उक्तानां आचार्येण अनुज्ञात अन्यतमेकमाश्रमं आ
विमोक्षाच्छरीरस्य सोपि तिष्ठेद्यथाविधिः। अयं च विकल्पः समुच्चयानुष्ठानरहितानां वेदितव्यः॥ ॥इति च
तुराश्रमकालनिर्णयः। अथोद्वाहविकल्पः॥ ॥तत्र बृहस्पतिः। वेदानधीत्य विधिना समावर्त्याकृतव्रत
ः समानाम् उद्वहेत्पत्नीं यशः शीलवयोगुणैः। वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमं। अविप्लुतब्रह्मचर्यो गृह
स्थाश्रममाविशेत्। यमः। गुरुं वा समनुज्ञाप्य प्रदाय गुरुदक्षिणां। सदृशानाहरेद्दारान् मातापितृमते स्थितः। वि का० दे०
दं वेदौ च वेदान्वा ततो धीत्य यथाविधि। अविशीर्णब्रह्मचर्यो दारान्कुर्यात धर्मतः। अत्र नैष्ठिकानन्तरं ब्र २१८
ह्मलिखितो। अथानुज्ञातो गुरुणा मातापित्रोरनुमतो दारान्नाहरेत्सदृशान्। गौतमः। एकं द्वौ त्रीन्वा आ
धिगम्य गुरुं परितोष्यानुज्ञातो मुञ्जापनयनं कृत्वा सवर्णापरिणये द्व्यष्टादि विवादे नादद्यात्स्वीक

रोति यथा वेदांश्चैव हेदव्रतानि च। ब्रह्मचारी भवेत्तावद्दूर्ध्वं स्नातो गृही भवेत्। अनधीत्य द्विजो वेदान् स्नातो
द्रात्वय थातथा। अधीते ब्रह्मचर्येण सांगं वेदं गुरोर्गृहे। वाक्स्यः। युग्मे हृष्टे संपदे विद्याद्धर्मकर्मायुषां स
दा। नर्द्दिष्टा नव-- वर्षकस्याच्च संज्ञाया। माघमासे नवेद्याकन्या सौभाग्यसंयुता। फाल्गुनोढा
न वेत्साध्वी वैशाखे पुत्रिणीं न वेत्। धर्मयुक्ता भवेत्। ज्येष्ठे जननी कार्तिके भवेत्। देवष्टजारती निस्वमा
से स्यात्सोमदैवते। उक्तवर्जिते यथान्येषु मासेषु प्राप्नुयाद्यदि विवादं कन्यका सा स्यात्सुतशीलार्थव
र्जिता। सितपक्षे तु यश्चासा प्रकाशयति सा कुललोकं न्यायाद्वसिता ध्रुवत्रिंशो त्रेषे च निर्द्धना। शुक्लपक्षं प्र
शंसति विज्ञो पेणो तरायणं वशिष्ठः। आपूर्यमाणपक्षे तु विवाहो ब्राह्मणस्य तु। इतरेषां तु वर्णानां कृ
१८ ष्णपक्षे विधीयते। वास्यः। उग्रसेनोग्ररिक्तासु तिथीषु स्याद्दमर्द्दिता। दुर्भगा चेति निषेधा अंसुसुता सौभाग्यसंयुता। त
था। कल्पने वा विता प्रीतिः। सौभाग्यधनसंचयः सुखार्थो बकु विख्याति शीलासौख्यप्रकीर्तयः। शेक
मयो सुदः सो रव धान्यमेवात्मजायूजः। उपद्रवाः स्युः फलं सु क्रमेण प्रतिपदादिषु। तथा गुरुस्तु क्लें उपत्वा

णं दिनेषु परिणीता। या कन्या सा भवेन्नित्यं भर्तुश्चित्तानुवर्तिनी॥ अर्केन्दुजन्मनां दिनेषु कलह
प्रिया सा पतिं न प्राप्नोति तु षारकरवासरे। अष्टवर्गगतो नीचस्थानस्थो यस्य स ग्रहः। उद्वाहस्ता
स्य दिवसे शुभो नायसमतो मुने। अष्टवर्गगतो निचस्थानप्राप्तश्च सन्ग्रहः। यदा तदा तद्दिवसे विवाहे
न प्रशस्यते। यद्यस्य दिवसे प्रोक्तं ग्रहस्य सदसत्फलं। तदशेषं तदीयायां होरायामपि निर्दिशेत्
। प्रशस्ता जन्मतारासु केचिदाकुस्तथापरे। हिता रजन्मनक्षत्रे त्यक्ताश्चेषां फलप्रदा। अर्कादीनां दिनेषु
क्तं यत्फलं तद्धि लग्नगोत हृगोपि भवेत्कालं होरायां तु विशेषतः। आदित्याद्यामवारेण कृतोर कोष्ठ
मस्य वा स ग्रहोधिपतिस्तास्य वदंतीति महर्षयः। दिवसे फलमेतेषां ग्रहणो यदि होदितो तन्मासर्वा का.दे.
यनाद्दिष्ठ सदैवा विकल्पो भवेत्। तिर्यगूर्ध्वं चाष्ठ गाः पंचरेखे द्वे द्वे च कोणगो। राश्चरेखादि विन्यस्तो मे ३१९
षित्रपि - अथ तथा वेश्यं प्रासंने रूतसंभवो देवता - अश्विन्यौ ... इयं मा वापि पोष्णश्चोत्तनिशाकराः। तथा
। आद्यं मघा च तु नांगेनेर्ह तस्या अधएव वारेव - रुद्रोच तु नगे विवाह प्राणनाशनः। पडूनाग शेषश्वन्ये

उनक्षत्रेषु न शस्यते। स्वात्यजेषु त्रिषु सद्रापाणिग्रहमिष्यते। तथा। हस्तोत्तराणि वायव्यं मैत्रं मूलं च रेव
ती। रोहिणी सौम्यमित्रं च श्रुतं पाणिग्रहे सदा। त्यजेद्विषुवतं यत्नादयनी पातयानं तथा। उत्पातैर्दूषिग
श्च हान्विधतं च विशेषतः। क्रूरं तु संध्योसमानागर्भस्ता वस्तु वस्तु नारीणां अयने वेपि वारिता। नर्नारं नानि
ने दिति। नारी तु विषुवद्ययोपि विधवा षण्मासीतिमुखे सा म्रियते विष्णुपदे धनवर्जिता। कन्या विकले द्वि
पाव्यतीपाते वैधृति विध्यो नष्टासु नगाषडेकेषु वा समः। विष्टिवर्जिते ... यानिष्टकरे रोवधनान्विता। सावि
त्रातिलसंयुक्ता मुहूर्त्तानपि निर्दिशेत्। समानदेवते लुल्यन हस्तैः फलमादिशेत्। मुहूर्ते ... निजिद्धि
शुधारे कालवित् केः। अष्टमो दिवसे स्पेवयो निजिसंज्ञकः क्षणः। संब्रह्मणो वृ रानितं सर्वकामफलप्रदः।
उपग्रहोदयाधेश्च पापे पत्तेन्द्र दिवाश्यते। तथा॥ विवाहिकर्त्तृदैवत्यमुहूर्तेषु निजायते। पाणिग्रहं क्रम
शेणमभीष्टार्थफलप्रदः। वेधवं दिन वांधवस्यजगती सूनोरपत्यं हुतं सोम्य स्यार्धपरिस्तुतिः। सुरगु
रोर्दृस्पिव थाउःस्विता। प्रव्रज्यान्गुनेश्चिनः। स्तुतिरपि सागस्त्यसौरे पुनर्नारीणां गणिका वेमवत मसः

केतोश्च वेधवता। सारावल्यां। सर्वेष्वनुक्तकालाः शास्त्रेष्वेते निजगोचरविशुद्धो। अस्य यात्राकस्य पुनर्यमस्य ग
नदस्य वा कुलटा। रविर्नृत्रेगते जीवे जीवक्षेत्रेगते रवौ। वर्जयेत्सर्वकर्माणि व्रतस्वस्त्ययनादि वा। गुरोरुन
जन्माष्टमे गे विवाहः। शनैश्चरे जन्मगते तथैव। न चाष्टमे शीनकरे च क्रूर यक्रेषु वैव राज्ञे धनगे प्रयत्ना
त्। ग्रहणाद् यमध्यस्थे ग्रहणे होसप्तरात्रमपि हृत्तं। यत्रो विवाहस्समयं मनसापि न चिंतयेत्। त्रात्रःन्न
तबंधो द्विजातिनां मुवाहः सुंदरीषु च। गुरुवल्लिते नित्यं न कुर्याद्भार्गवे तथा। रविक्षेत्रगते जीवे जीव
क्षेत्रगते रवौ। जयवैधव्यमाप्नोति शक्रस्यदुहिता यदि। धनुमीनगते सूर्ये रविसंक्रान्ति नेतथा। विवा
हमपि नेच्छंति मुनयः क्रूरपादयः। यथापि येत याचैत्रे केचिदिच्छंति तान्। यासिंहगते जीवे विवाहे बाह का०हे०
रायणः। बृहस्पतिः। विवाहे व्रतबंधे च यात्रायां शुभकर्मणि। गुरावस्तमिते शुक्रे जातस्य परिणीयते। गु ३२०
रुर्नष्टः पतिं हन्यात् शुक्रो नष्टस्तु कन्यकां। द्वे नो दनष्टेनो दंतिविवाहे नो विवर्जयेत्। पश्चादस्तुदितो
बालो दशाहं प्राग्दिने त्रयं। पक्षं वृद्धस्तु पूर्वेण पंचाहं पश्चिमेसितं। विन्नपुणयातिनां बलप्रतापो वहम्

एलयनेदृष्टाचारस्तावद्दोषो विधिंत्योऽदृष्टोदृष्टो यास्थिति। सैव कार्या। लोकद्विष्टं पंडितावर्जयंति दैवज्ञा
तो लोकमार्गेण यायात्। बृहस्पतौ न्योनन गोचरस्थे विवाहमिच्छंति हि दाक्षिणात्याः। रवौ सुनस्थे च वद
ति गौडा नगोचरोमालवके प्रमाणं। गौडा सूर्यबलं प्राकुः श्याद्विणात्या गुरोर्बलं। मालवालग्नमिच्छंति
लाटाना स्थानजं बलं। तारंबलमागधी याः प्रयंति कुर्वंति। तारैङुबलेन मध्याः। तथोन्नराभौ कुलस
न्ति हस्ताभांग व्यवानीरउरखारकेषु। ग्रहहर्षे योगास्ति थि वा जोरं ताशुनास्तु नायेकथिता प्रजुतः। विजे
षु तस्याकफलानवंति नान्येषु देशेषु विचिंतनीयाः। सारावल्यां। षष्ठे द्विलग्नाद्विरष्टमोवानागं मूर्त
र्तौ यदि युज्यते च। सूर्ये दुताराबलसंप्रयुक्तागे। धूलिकासर्वफलप्रदात्री। लग्नसुद्धियदान स्याद्योत
नेतु प्रवर्त्तते। तदा तु सर्ववर्णानां कालो गो। धूलिकः स्मृतः। रात्रौ निर्ज्ञायते यस्मात् पिलग्नस्य निश्चयः। ल
भेल यविलियस्मिस्तत्र सर्वं प्रशस्यते। सौरस्यैकेबलो ज्ञेयो माड्यो द्विबलः स्मृतः। निबलस्तु बुधो ज्ञेय
स्त्वतुर्गुणबलो गुरुः। शुक्रः पंचबलो ज्ञेयः षड्भः षड्बलस्तु चंद्रमाः। सर्वग्रहबलैर्नित्यं तु लग्नं वै दिवाकरः

यात्राविवाहकालेषुकार्येषुविविधेषुवा॥यत्रसूर्यबलंनास्तिसर्वेततोबलं॥पुंसामर्कःस्मृतोयोनि
र्योषितामम्मृतद्युतिः॥अतोन्दुर्योषितोराशेर्बलंचेन्दुश्चांककं॥यत्रचंद्रश्चताराचद्वावेतौबलवत्त
रौ॥दोषास्तत्रप्रलीयन्तेयदिस्युःसर्वतोपगाः॥नेष्टेशुक्रेतदाचेन्द्रेगुरवेस्तमुपागते॥नविवाहोनया
त्रांवैनैवदानंसमाचरेत्॥द्वादशाष्टमचतुर्थेजन्मनिषष्ठाष्टमेष्टतीयेचाशाशापाणिग्रहणंजी
वेवैधव्यमाप्नोति॥सिंहेचनागेदेवत्येगुरौपुत्रवतीनवेत्॥अस्तंगतस्तुगतासाध्वीधनधान्यपतिप्रि
या॥वात्स्यायनः॥पक्षतिथिव्ययकरणलग्नेंदुर्कलग्नताराण्यः॥पाणिग्रहणेयोज्यास्तावद्वि
देकादशपक्षयोः॥विवाहकर्मनेच्छेतिप्रसुप्तेशार्ङ्गधन्वनि॥कृतावप्यगतानां तुमांडव्याद्याम
हर्षयः॥सिंहस्थितेसुरवेधिमासकेचज्येष्ठ---------- केगुरुनीचयोर्विलग्ने॥
जन्मस्थयोश्वनिखिलान्यपिमंगलानि॥रविणाचेन्दुशुक्रेननारीवैधव्यमाप्नुयात्॥भौमेनक्रि
यतेचौरैःशुक्रःपापंसमावहेत्॥रहस्यनिपुणासौम्येत्यक्तलज्जारतिप्रिया॥पतिमन्यंत्रजेन्द्रिः

का॰दे॰
३२१

शुक्रःसौम्येकेतुसंदर्शनाश्रिते॥गुरुस्थंद्रश्वयामित्रेतिष्ठेद्यदिबलान्वितः॥धनसौभाग्यपुत्रांस्तुलभतेनात्र
संशयः॥मणिमुक्ताप्रवालेश्चसुवर्णेनरत्नेस्तु॥नेहशोनतत्पिसदातिष्ठेत्तुरुणाचापिविज्ञिते॥सात्तुजन्डेपि
यानित्यंबुधेचंद्रेचसप्तमे॥आदिनत्रुवेधव्यमहादारिद्रमेवचा॥दृष्टेचंद्रेचभौमेनकुर्या- मिषाशानो॥
वेध्यावामृतवत्साचाशानेश्वरनिरीक्षिते॥वंशिष्टं॥मरणंसाहसंतीब्रंदासत्वं॥भ्रजमेवच॥चंद्रयोगे॥
ग्रहाःकुर्युर्विरक्ताःशर्किनार्गवाः॥नैपुण्यंकुलसत्वंपौश्वलंव्याधिमेवच॥बुधजीवयुताःकुर्युःकर्तु
श्चैवयथाक्रमं॥वात्सांविनिश्चतुर्निर्विवाहरुणेसहितेपुनः॥हारिग्रंमरणंवापिकन्यायाःकुरुतेध्रुवं॥जन्म
तंतत्जतेनारीगौरीकावरनूषिताः॥विदेशंवाव्रजेद्यत्रसौम्येश्चवयुतेःशशी॥जन्मानांमिथुनंश्रेष्टंततः
कन्याततस्तुला॥तथामेषविलग्नास्तुविवाहेष्मफलास्मृताः॥पतद्विपदराशीनामंशायास्तामनीषिभिः॥
युग्मकन्यातुलानांतुनस्वांशोनपरांशकः॥तुतदासौम्यषद्वयेलग्नेसौम्यनिरीक्षितः॥योवाविवाहकाले
तुभवेन्नाम्नकर्मणि॥ब्राह्मणंकुरुतेजारस्थकेतीवसमागमे॥जीवनास्करयोःस्त्रानेब्रतरठंजीवसौ

म्पयोः परितं वा ———— सरुजं वृद्धमेव च। असितांगिरसो येगिजारं कुर्यात्तु कन्यका। नोमनागवियोमि
गेत्यक्त्वा बंधून्पतिं तथा। करोति तत्क्षणं जारं कन्या नैवात्र संशयः। विलग्नाच्छास्त्र लग्नेन यफत्ताद्देन नष्ट-
रूपते। नु विनाशस्ततो जातो यद्येवं योषितस्ततः। दशमस्तृतीये नव पंचमे च तु षष्ठिमे कतत्रे च। पत्रूपति
वा दृष्ट्या फलानि चैवं प्रयच्छति। श्रेशाकयामित्रपतिलग्नव्ययनानां मेष्टांशो नासमोनवति। सनाथ
सदृष्टा। सासः। मेषाद्यायेमया सर्वमुक्ता बादरायणाद्यः। तेषां कन्यातुलाश्चैव मिथुनं च प्रशस्यते। ए
तदंशोथवान्यस्मिन्नाशौ लग्ने ग्रहदृष्टे। कन्या च या तु युग्मेषु लग्नेषु संस्ताशा केन तु। अतो शाकं फलं त्र
स्मगदृतो मे निशाप्रयाति षासकोटकन्यात्यक्तमारगतमानसा। वृताद्वृषलग्नभागे स्यात्सुगमा रो   का॰ङे॰
शीलसंयुता। विरूपा कलीरन्यागे स्यात्तृतीयरोषान्वेव च। सकलस्य संक्रांसिंहांशोपि दृष्टे कुमरतात था।   ३२२
रूपशीलगुणोपेता कन्या स्यात्कुमारिका। कर्णान्विता तुलस्यांशो दुःशीला मत्य दूषिता। विरूपा कुलमु
खी सतते वृश्चिकांशे तिकोपिना। चतुर्वर्गे तिक्तलटा मृगकुंभरुषांशाको। सुदृशा — म्पशसासा कन्या

नास्त्यत्र संशयः। गर्गः। अतिथिमासकृता दोषानत्युपस्थायानाभवाः। मुहूर्तकरणोपेतां स्ति शुक्रुत्स्यात दयां।
श्रयानूग्रहदृष्टिं दुरायपोडिशां पंचाकराशिजा। गुरुशुक्रबुधाश्चेति लग्ने संव्यवस्थिताः। श्चाचार्द्धा
लग्नस्थराशियुक्ते यामित्रगात्यवर्जितो राहुः। लग्नस्थे वैषम्यं यामित्रगते च कन्यकामरणं। दुश्चिक्ये
थैव हि स्यादंधुनाशा अयुत्रयोगो। सुतनाशः सुतस्थे स्याभ्रष्टे वृद्धिस्त्यायारिगे। यामित्रस्थे च वैधव्य
मायुर्वृद्धिस्तयाष्टमो धर्मगे धर्महानिः स्यात्कर्मगेऽर्के विशीलता। लाभः स्याद्यगे नानो व्ययो द्वादशे
भवेत्। चंद्रे व्ययप्रिया लग्ने द्वितीये धनिनी भवेत्। तृतीये सुभगा साध्वी वैश्यै बंधुप्रिया भवेत्। सुत
स्थे कन्यका माता षष्ठस्थे मृत्युमाप्नुयात्। जायास्थे सस पत्नी स्यान्मृत्यौ मृत्युमवाप्नुयात्। कन्याप्रजा
वती धर्मे विकारस्थार कर्मणि। नष्टे प्रियो पि युक्ता च शशिन्येकादशस्थिते। वर्णितौ द्वादशे च स्यात्का
मकाशीनदीधितौ। अनिष्टग्रहयातोपि प्रशस्तफलदः शशी। सौम्यांशकस्थे मैत्रेण दृश्यते तद्व
लीयसा। वैधव्यं लग्नगे भौमे कन्यामृत्युमवाप्नुयात्। अग्निचौरभयात्रास्याद्वितीयस्थे धरासुते।

तृतीयस्थे र्थसंपन्ना बंधुदृष्टा चतुर्थगे। पुत्रहीना चतुर्थे स्याद्रिपुगे सुतनाशिनी। सप्तमस्थे मृता पुत्रे पुंश्चली
खलसंयुता। अस्तका बंधुरा स्तनो मृत्यस्थे कन्यका मृता। नवमे नष्टविधिष्टा दशमे क्रूदकर्षिणी। ध
नान्विता तथा यस्थे नष्टा व्ययगे नवेत्। लग्नस्थे च कुपुत्रे स्यात् धर्मता सुप्रज्ञाः स्थिरा। स्वजूटं वरतानि स्व
धनास्त्वासो मदनं ते। स्वसूस्वसुरया सृष्टा तृतीयस्थे त्वाशाकजे। चतुर्थे बुधपूज्या स्यात्सुजगा धनसंयु
ता। बहुपुत्रा सुतेस्थे। स्याद्धनस्तु त्था गिरि क्रष्टामा पदमा मोति पुत्रःहानिं तये व च सुसप्तमं छत्रप्र
मस्थे वरो गान्त दुःस्वनाशिनी। तयोरता धर्मगे स्थ स्यान्मायाशील च धर्मगे। सुतनृत्यधरोपेता लाभगे
चा दृष्टोपि वेत्। कन्या सदृश्य संयुक्ता शशाकतनये सदा। गुरु लग्नगत कन्या धर्मशाली बहुप्रजा। सु
दीर्घमायाति धनगे धधनिनी नवेता। अतिप्रमुदिता जीवे दुश्चिक्यस्थे नवेत्सदा। सुखे धष्टदि जानीया
सर्वकामगुणान्विता। सुशीलस्था चतुर्थस्थे पंचमस्थे बहुप्रजा। सपत्नपातिनी षष्ठे बहुमूला स्ववेश्म
नि। विरूपा दुर्भगा नष्टे दिष्टा नित्यं च सप्तमे। जीवेष्टस्थे दुःस्वा नापि चलयातिकन्यका। नवमे सुभगा सार्था

का० हे०
३२३

स्ता वै दृष्टैर्ति। नैष्टे वीपतिन क्रि विमलैचरे॥ सुतकर्मसु संसिद्धिं प्रयाति दशमे गुरौ। विचित्रमाल्याभरणा पुत्र
युक्ता च कन्यका। सुवर्णमणिरत्नानि ष्वानवत्येकादशे गुरौ। व्ययस्थे सततोद्दाराज्ञ वल्लर्थमयत्रिता। आयुर्धु
र्मधृतियुक्ता लग्नस्थे भृगुनंदने। धनस्थे गुणसुक्ता स्याद्रूपेण च धनाश्रिते। पुंश्चली देवररता कन्याश्चुके
द्वितीयगे। यशासाभ्रपिता कन्या सुरूपा धनसंयुता। नित्यं चतुर्थगे शुक्रे पंचमस्थे बहुप्रजा॥ पत्न्य
श्च नृगुनेदने बंधुवर्गस्य वैरिणी। षष्ठगे भृगौ। बंधुकी सप्तमस्थे स्याद्धर्मयुक्ता प्रियंवदा। सत्कर्मयु
क्ता दशमेस्थ शुक्रे धर्मपरायणा। विविधार्थान्विता कन्या नवत्येकादशे भृगौ। व्ययस्थे नागर्वे कन्या
व्ययशीला प्रजायते। सौरे लग्नेगते कन्या पुंश्चली दुर्भगा कृशा। निर्धना रूपहीना धर्मस्थे कलि
जे नवेत। अर्थैरानकैः संयुक्ता सुभगा च तृतीयगे। स्वल्पदुग्धा चतुर्थस्थे भास्करस्यात्मजे नवेत्। पुत्र
हीना त्रिदुःस्वा न्नहि द्योगे न च पीडिता। पंचमस्थे सुपुत्रा स्यात् षष्ठस्थे हतशत्रवा। स्वयं थ्ये वै दृष्टा नि
त्य सप्तमस्थे र्कनंदने। अष्टमस्थेर्कपुत्रे स्यान्नित्यमामयवर्जिता। नष्टधर्मव्रता कन्या धर्मस्थे कालजे

नवेत्। पापशीला जनद्विष्टा सौरे स्यादृश्रामाश्विने। एकादशेऽर्के पुत्रे स्यात्कन्या सर्वार्थसंयुता। मद्यपानर
ता कन्या द्व्ययगेऽर्कात्मजे नवेत्। चतुर्थसप्तमस्थश्च मृत्यवे स्यात्पन्नगे वेत्। राजयोगे देवस्वयान्येषु निःफ
लास्याद्व्ययस्थितः। पंचपाणिग्रहे देवो यान्वर्जयेद्देवचिंतकः। हारिश्च मृत्यवे धर्म्यं पुंश्चलत्वमनपत्यतां॥
अष्टमासान्दशमासांश्च तिथिं वा त्रिंशु नाम तु ना॥ लग्नस्य पंचनवनामत्रिनस्थानस्थितानव्हानां। कार्यो वि
वाहो निर्दोषकालो कालो यस्मात्तु कुर्वन्निः। मूर्त्तिकर्माम्बुजस्तु खत्रिकोणे वगते गुरौ। नाराग्वेत विन
रुपाविसर्वदोषाविलग्नगे। सत्काउव्ययनिधने धना निउस हासोऽप्य यदान्वाष्ट नेचोक्त्ज्यासु सृजित
।शिशि धरो उश्विकालानार्यगः पाया श्चत्रि — — — स्व द्वनवन ग्रामासः हि तेर्न्दनं सुखानेवनवे ग्रसव का० ह० ३२४
त्रिगमपीपाणिग्रहे विशिष्टदाः। येजन्मनि जन्मगृहाद् ष्टमरात्रिस्थितो न वेत्स्व चरः। स विवाहलग्नव
त्रिशुनोपश्रुनदृशा तु फलेत्वोनकः। पंचनिरिष्टेरिष्टा पुष्टमनिष्टामा देस्मस्थानादिबलसमेतुश्च
तुर्निरापियवनेः। अर्केऽनुकूले सुरमर्जिते च वृद्धिं प्रयाते न गुरुर्नदने च। नवेतिना यसुखसौख्यसंपन्नो

नाप्नान्नुः स्नतत्रानुपन्ना॥ चतुर्थे द्वादशे षष्ठे तृतीये दशमेऽष्टमे। गुरोर्जन्मनि नेच्छंति मुनयस्तु करग्र
हं। ग्रहादवेस्तर्यविधूमहेश्मिगादकेः धूमरात्रिखंडुमेचाउपश्रवेषा। णिनिवक्रबधेप्राप्तेच पापं तरगे
च वेदे॥ अश्लंकयोर्वापरिवेषिणोर्वापाणिग्रहः खण्डितबिंबयोर्वा। ज्ञातोक्तमनावोविपरीतखेटकव
धकालिकां तयोर्निशा — — — — । परान्नारः द्रष्ट्रापलस्तुल्वकपालेसमघनवृत्ते षडंगुले स्वधे। ग
दग्रा मुखपरिणाहे जालषष्टिप्रपूरणि घटिका। वास्पः ताम्रपात्रे त्रिवलिकं षडंगुलसमायुर्ये॥
अष्टांगुलं विउस्तारा त्रिगुणं दत्तत्रिलाकया॥ नर्मिन्नं चतुरंगुलया। निमग्ना उसहासा सास्यात्तनाडि
केकानवे स्फुटा॥ ॥इत्युद्वाहकालनिर्णयः॥ ॥अथ वैवाहिककर्मकालः॥ वास्पः। केफेनहल
नयवारकर्मकपद्दत्वादिवर्णकाद्यखिलं। तस्तं बंधगते गतमसेऽस्ते वैवाहिके कुर्यात्। विवाहिके तु
दिवसे शुभे वाथ तिथौ शुभे। जामित्रराशौ कन्यायाः लग्ने शुभसमन्विते। चतुर्थिकां प्रकुर्वीत विधि
दृष्टेन कर्मणा॥ ॥इति विवाहकर्मकालः॥ ॥अथ परिणये कालनिर्णयः॥ तत्र बृहस्पतिः॥ पि

उद्वहेत्तु या कन्या रजः पश्यत्यसंस्कृता। भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता॥ यस्तां विवाहयेत्कन्यां ब्रा
ह्मणो मदमोहितः। असंभाष्यो ह्यपांक्तेयः स विप्रो वृषलीपतिः। वृषली संगृहीता यो ब्राह्मणो वृषलीमदमो
हितः॥ स ततेस्तत्कृतस्य ब्रह्महत्या दिने दिने। आपस्तंबः। प्राप्ते च द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते। यस्तां स
मुद्वहेन्मोहात्स ज्ञेयो वृषलीपतिः। त्रिंशद्वर्षो दशाब्दां तु भार्यां विंदति नग्निकां। एकविंशतिवर्षो वा सप्त
वर्षामवाप्नुयात्। मनुः। त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं। अष्टवर्षोष्टवर्षां वा धर्मे सीदति सत्व
रः॥ वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयं॥ ॥इति कन्यापरिणयकालनिर्णयः॥ ॥अथ देयकालः॥ सं
वर्तः। अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत्। दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता। अत्र वृषलीर का० दे०
जःस्वला तथा च देवलः। वंध्या तु वृषली ज्ञेया वृषली च मृतप्रजा। अपरा वृषली ज्ञेया कुमारी या रजःस्व ३२५
ला। बृहस्पतिरपि। पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता। भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृ
ता। विष्णुः। पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता। सा कन्या वृषली ज्ञेया हरंस्तां च न दुष्यति। एतच्चाप्र

पायिकं। कांस्ये चिदेवांगपारगयोर्दर्शनात्। अत एव यमः। अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी। दशव
र्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। यत्तु नर्यमपराशरापस्तंबैरुक्तं। प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छ
ति। मासि मासि रजस्तस्याः पिता पिबति शोणितं। अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। प्राप्ते द्वादशमे व
र्षे रजः स्त्रीणां प्रवर्तते। एतदपि प्रायिकं। अष्टवर्षा भवेद्गौरीति। कांस्ये चित्रत्रापि रजोदर्शनासंभवाद
त एव मनुः। त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं। अष्टवर्षोष्टवर्षां वा धर्मे सीदति सत्वरः। एवं च र
जोदर्शनात्पूर्वं विवाहकार्यं प्रत्यक्तं भवति। तथा च गौतमः। प्रदानं प्रागृतोः। अप्रयच्छन्दोषी प्राग्वाससः प्र
तिपत्तेरित्येके। यमः। तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत्। वरिष्ठः। प्रयच्छेन्नग्निकां कन्यामृतुका
लभयात्पिता। ऋतुमत्यां हि तिष्ठंत्यां दोषः पितरमृच्छति। संग्रहे। यावच्चैलं न गृह्णाति यावत्क्रीडति पांसु
भिः। यावद्दोषं न जानाति तावद्भवति नग्निका। अमरसिंहः। नग्निकाऽनागतार्तवेति। अंगिराः। अनावास
रजा नारी प्राप्ते रजसि रोहिणी। अव्यंजना तु सा प्रोक्ता कुचहीना तु नग्निका। व्यंजनेषु प्रजातेषु सोमो भुंक्ते

चकन्यकां। पयोधरेषु गंधर्वो वह्निस्तु कौ रजस्वलां। तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्। विवाहस्त्वा-
ष्टवर्षायाः कन्यायाः शस्यते बुधैः। बृहस्पतिः। रंजने तु कुलं हन्ति सिद्धं तु हन्त्यपयोधरे। हन्याद्दृष्टे च पु-
वांश्च धाम रजसि कन्यका। पाराशरः। माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च। त्रयस्ते नरकं यांति दृष्ट्वा
कन्यां रजस्वलां। पैठीनसिः। यावन्नोद्भिद्येते स्तनौ तावद्देया। अथ ऋतुमती भवति दाता प्रतिग्रहीता च न-
रकमाप्नोति। पिता पितामहः भ्रातृविशिष्टा युञ्जायंते। तस्मान्नग्निका देया। याज्ञवल्क्यः। अप्रयच्छन्समाप्नो-
ति भ्रूणहत्यामृतावृतौ। नारदः। यावंतश्चर्तवस्तस्याः समतीयुः पतिं विना। तावंतो भ्रूणहत्याः स्युस्तस्य-
यो न ददाति तां। यत्तु मनुः। काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि। न चैवैनां प्रयच्छेत्तु गुणहीना- का० दे०
य कर्हिचित्। तद्गुणवति संभवे गुणहीनाय न देया। तथापरत्र तु पुनर्गुणहीन निषेधार्थः। अतश्चेदप- ३२६
ः दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे। अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलां॥ बौधायनोऽपि दद्याद्गुणव-
ते कन्यां नग्निकां ब्रह्मचारिणे॥ अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलां॥ ॥इति देयकन्याकालनिर्णयः॥

अथ स्वयंवरकालनिर्णयः॥ ॥कान्या द्वादशमे वर्षे या प्रदत्ता वसेद्गृहे। भ्रूणहत्या पितुस्तस्याः सा कन्या वरये-
त्स्वयं। नैनः किंचिद्दवाप्नोति न च तं साधिगच्छति। सोपि न पापमाप्नोति। इत्यर्थः। बौधायनः। त्रीणि वर्षाण्यृतुम-
तीकांक्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिं। अविद्यमाने सदृशे गुणहीनमपि श्रयेत्। स-
दृशो गुणवान् वा विशिष्टः। कुमार्यृतुमती त्रीणि वर्षाण्युपासीत। ऊर्ध्वं त्रिवर्षान्पतिं विंदेत तुल्यं। यत्तु गौ-
तमेनोक्तं। त्रीन्वर्षानृतुमतीं स्वयं युज्यते। यत्तु विष्णुनोक्तं। ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयं वरं। ऋतु-
त्रये व्यतीते तु प्रभवत्यात्मनस्तथा। तदृतुपक्षे वाग्निषेधपरं। प्रदानं तु नवर्षत्रयमेव स्यात्तु मलं तदा ऋतु-
त्रयादूर्ध्वमपि वरयेत्। कात्यायनः। वरयित्वापि यः कश्चित्प्रणश्येत्पुरुषो यदा। ऋत्वागमांस्त्रीनतीत्य कन्या-
न्यं वरयेत्पतिं। नारदः। प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतून्समतीक्रम्य कन्यान्यं व-
रयेत्पतिं। नारदः। प्रतिगृह्य वरं पिता किं तु ऋतुत्रयादूर्ध्वं स्वयंवरविधाने। शर्वोदाहृत विष्णुगौतमव-
चनेन नारदकात्यायनवचनसामर्थ्यात् प्रत्यावृत्ते तदुक्तं। तत्र द्विपितृरदाने ऋतौ न तु वरयितुर्देशा

वरगमनं मरणं वा तस्मात्क्रमानुरोधात्स्वैर्वैवाहप्राग्वयसि। यद्वा तु नैवं कश्चित्तस्याः कन्या राजानमाक्रोशेत्
अनुतया तस्य वरं वनीता वरयेत्स्वयं। कश्चिद्यताउ कृतेषु मध्ये। याज्ञवल्क्यः। गम्यं त्वभावे दातॄणां कन्या कु
र्यात्स्वयंवरं। गम्यगमनादि॥ ॥इति स्वयंवरकालनिर्णयः॥ अथ चतुर्थाश्रमस्वीकारकालनिर्णयः॥ उषित्वैवं
ततः स्यक्तृतीयं चाश्रमं व्रजेत्। चतुर्थमाश्रमं गच्छेद्धुतहोमो जितेन्द्रियः॥ महाभारते॥ चतुर्थे वायुषः शेषे साम
पितामाश्रमं व्रजेत् केशलोमनखांश्चाप्य वानप्रस्थो मुनिस्ततः आश्रमादाश्रमं सद्यः पूतो गच्छति कर्मभिः॥ मा
र्कण्डेयपुराणे॥ सा पितस्या पितामह कुक्रमेण सुसमाहितः वानप्रस्थं समास्थाय चतुर्थाश्रममव्ययात् वनेषु तु वि
हृत्यैवं तृतीयं भागमायुषः चतुर्थमायुषो भागं त्यक्त्वा संगः परिव्रजेत् तृतीयभागमिति यावता कालेन तपसि का॰दे॰
द्धं विषयाभिलाषस्य निवर्तते तावान्विवक्षितः नहि मुख्यस्तृतीयकालो नियतायुषोऽपुरुषाणामेतावानिति शक्यो ३२७
ज्ञातुं। चतुर्थमायुषो भागं प्राप्य परिव्रजेदित्यादि अत्रापि एवमेव। यावतातपसा मनुपदिनेककालेन यावन्ति च व
यांसि महादेवस्यातदासं वेध्यते। तदा परिव्रजेदित्यर्थः। आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः। भिक्षाबलिपरि

श्रान्तः प्रव्रजेत्प्रेत्य न वर्द्धते। समुच्चयपक्षाश्रयमेतत्। यदा गृहस्थाश्रमवानप्रस्थाश्रमे कृत्वोभयत्रापेक्ष्यकानुष्ठानेन जिते
न्द्रियः। तदा प्रव्रजन्वर्द्धइति। वृद्धिः प्रव्रज्याफलप्राप्तिः। भिक्षाबलिप्रदानपरिश्रान्तइति पूर्वाश्रमधर्मानुवादः। मार्कण्डे
यपुराणे। अनुत्पाद्य सुतान्देवानसंतर्प्य पितॄंस्तथा। भूतादींश्च कथं मौढ्यात्स्वर्गतिं गन्तुमिच्छसि॥ कालिकापुराणे। अ
धीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः। ऋणानि त्रीण्यपाकृत्य इष्ट्वा यज्ञांश्च सर्वान्विशेत्। गुरुणानुज्ञातः स्नात्वा सदा
रो वैदिको नरः। अनुत्पाद्य सुतं नैव ब्राह्मणः प्रव्रजेद्गृहात्। अस्य वेववर्णाः लक्षण त्रयापाकरणमविधाय जितेन्द्रि
यः। रागद्वेषविनिर्जित्य मोक्षमिच्छन्पतत्यधः। मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनुपा
त्य मोक्षं तु सेवमानो व्रजत्यधः। मोक्षैकफलत्वात्संन्यासः एव चात्र मोक्षशब्देनोच्यते। अत मोक्षं
सेवमानो व्रजत्यधः। मोक्षैकफलत्वात्संन्यासः एव चात्र मोक्षशब्देनोच्यते। अत एव मोक्षं सेवमान
इत्युक्तं तु। अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा तु शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्। अनधीत्य द्वि
जो वेदमनुत्पाद्य तथात्मजान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः। समुच्चयपक्षमाश्रित्येतरपक्षनिराव

वचनेन पुनः प्रतिषेधः। उदितानुदितहोमनिंदावत्तु निषेधेतु। यदि वेतरथा ब्रह्मचर्याद्विप्रव्रजेदिति प्रत्यक्षश्रुत्या बाल
श्रुतिविरोधः स्यात्। जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया
पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारि वासीति। एतत्तैत्तिरीयश्रुतिवचनमपि समुच्चयपक्षाश्रयमेवाश्र
खलिखितौ। वनवासादूर्द्ध्वं ज्ञांतस्य परिणतवयसः कामतः परिव्रज्यनमेवाग्निमात्मन्यारोप्य प्रव्रजनं भयलो
भमोहक्रोधशोकद्रोहमदमत्सरकालानामनुचिंतये दनवस्थितस्य मनसाश्वाद्यनियतो भवति। तस्मात्तसा
स्थडपासीन यदहरेव विरजेत्तदहरेव संन्यसेत्। सर्वारंभपरित्यागमुक्त्स्या। विष्णुपुराणे। पुत्रद्रव्यकलत्रे
षु त्यक्तस्नेहो न नाधिपः। चतुर्थमाश्रमस्थानं गच्छेन्निर्द्धूतमत्सरः। इत्यादि तेन भागेनु विषये पंचलक्षणो।
दृष्टास्थवके वै वविरक्तः संन्यसेद्धनात्। कूर्मपुराणे। किंचिच्छ्रेयस्करतमं लोकेस्मिन् ब्रह्मसत्तमाः। य का ९८०
त्नस्तपो वरान्यासो व्रतमे सर्ववेदिनः। आराध्य तपसा देवं योगिनं परमेश्वरं। प्रव्रजेद्विधिवद्यज्ञैरिष्ट्वा सुरो ५२८
त्तमात्। तपस्तप्त्वा तपो योगाद्विरक्तः। द्वसंन्यसेद्यदि। तथा। प्रव्रजेद्गृहाद्विद्वान्वनाद्वा श्रुतिचोदनात्। अंगिराः।

वनवासात्परिश्रांतः प्रव्रजेद्विधिपूर्वकं। व्याध्यादिदृष्टो विरक्तो वा ब्रह्मचर्ये संन्यसेद्द्विजः। संन्यसेद्ब्रह्मचर्येण संन्यसेच्च गृहादपि
। वनाद्वा संन्यसेद्विद्वानातुरो वाथ दुःखितः। आतुराणां विशेषोक्तिर्न विधिर्न च सत्क्रिया। प्रैषमात्रस्तु संन्यासादातु
राणां विधीयते। उत्पन्ने संकटे घोरे चौरव्याघ्रादिगोचरे। भयभीतस्य संन्यासमंगिरा मनुरब्रवीत्। विरक्तः सं
न्यसेद्विद्वाननिष्ट्वापि द्विजोत्तम। अथापि विगीवरे। भयवार्धये। क्रैरिष्ट्वा वनमथाश्रयेत्। तपस्तप्त्वा तपो योगा
द्विरक्तः संन्यसेत्तथा। प्रकर्तुमसमर्थोपि जुहोति यजति क्रिया। अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः। स
र्वेषामेव वैराग्यं जायते सर्ववस्तुषु। तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत्। यमः। वीर्णवेदव्रतो वि
द्वान्ब्राह्मणो मोक्षमाश्रयेत्। समः सर्वेषु भूतेषु चरेषु स्थावरेषु च। जातपुत्रो गृहस्थो वा विदितात्मा जि
तेंद्रियः। निस्पृहः सर्वकामेभ्यः कृतकृत्यः परिव्रजेत्। पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेत्। वनाद्वाथ
तपा वा परं पंथानमाश्रयेत्। कूर्मपुराणे। उत्पन्नज्ञानविज्ञानो वैराग्यं परमं गतः। प्रव्रजेद्ब्रह्मचर्यादिच्छ

न्यसमांगति। प्रशान्तहृत्सविधिवद्यथावद्विधिधर्मरवेः। यज्ञेद्धत्सादयेत्सुतान्विरक्तो यदि संन्यसेत्। अनि
ष्ट्वा विधिवद्यज्ञैरनुत्पाद्य तथात्मजं। नागार्हस्याग्रहो वानुसंन्यसेद्बुद्धिमान्द्विजः। अथवैराग्यवे
गेन स्थातुं नासहते गृहे। तत्रैव संन्यसेद्विद्वाननिर्वाणविचारयेत्॥ आश्रमकः कपितोन्यमा
ये दोषावद्द्विजान्यति॥ द्वितीयस्याद्दतस्तेव आश्रमं शृणु मे धुना॥ प्रथमादाश्रमाद्वापि विरक्तो
भवसागरात्। ब्राह्मणो मोक्षमन्विच्छन्स्यक्त्वासंगान्परिव्रजेत्॥ अथ पर तीयं संप्राप्य गृह
स्याश्रमतोत्तरं॥ चतुर्थमायुषो भागं भवत्रस्यो वा परिव्रजेत्॥ ॥इति चतुर्थाश्रमका
लनिर्णयः॥ ॥ ॥अथाग्निहोत्राधानदारस्वीकारकालनिर्णयः॥ ॥ ॥तत्रम का०दे०
नुः॥ शातातपे॥ दाराग्निहोत्रसंयोगं कुरुते योग्रजेस्थिते। परिवेत्ता स विज्ञेयः परिवित्त ३२९
स्तु पूर्वजः। सवसोदरो भ्रातानान्यमातृजः। एतदेवोत्तरत्रस्फुटीभविष्यति॥ तथापतितोन्म

त्त नपुंसकांधबधिरमूकजडकुब्जकुष्ठिश्वित्रिराजयक्ष्मोदनाद्यसाध्यजठररोगाभिभूतनास्तिकपशास्त्र
योगिप्रव्रजितचिरकालप्रोषितप्रदोषदुस्तवर्गतिवयो। एतेषां परिणयनाधानाधिकारो समममानत्वान्नस्य च
विद्यमानत्वात्। अत एव छंदोगपरिशिष्टे कात्यायनः। देशांतरस्थक्लीबैकवृषणाणां स्वसहोदरान्। वेश्याभि
ष्टो स्वपतितशूद्रतुल्याधिरोगिणः। खंदमूकादिबधिरकुब्जवामनकुटकान्। अतिवृद्धानभार्यांश्च कृषिशक्तोन्
पस्य च। धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा। कुलटोन्मत्तचोरांश्च परिविंदन्न दुष्यति। शातातपः। क्लीबे देशांत
रस्थे वा पतिते प्रव्रजिते तथा। योगशास्त्राभियुक्ते च न दोषः परिविंदने। सुमंतुः। व्यसनासक्तचित्तो वा नास्तिको वा
थवा पुनः। कनीयान्धर्मकामस्तु आधानमथ कारयेत्। वसिष्ठः। पितृव्यपुत्रसापत्न्यात्परनारीसुतो तथा। दारा
ग्निहोत्रसंयोगेन दोषः परिवेदने। यमवाक्कलौ। दाराग्निहोत्रधर्मेषु नाधर्मः परिविंदतः। इति पाठः। परनारीसुतान्
तकारिभ्रातृन्। वशिष्ठः। अष्टादशाद्दादशवर्षाणि वा भ्रातरमनिविष्टमप्रतीक्षमाणाः। प्रायश्चित्ती भवति अनिविष्टमात्रा

भवति। अत्र श्लोकाद्वः दरिद्रे वा तुवर्षाणि अस्मिन्पर्वविकस्मकंन्यायात्प्रतीक्षितुं भ्रातापुनः पुनः। उन्मत्तः किल्विषी कुष्ठी पतितः क्लीब एव वा। रा
जयक्ष्मामयावी च नन्याय्यः प्रतीक्षितुं। खंजवामनकुब्जांधवधिरकुकरकान्। आधितबधिरमूके पुनदोषः परिवेदने। तिछेदाधानेनैव
कारयेत्। अनुकानमनुकुर्वीत शंखस्य वचनं यथा। वृद्धवसिष्ठः। अग्रजस्तु यदानग्निरादध्यादनुजः कथं। अग्रजानुमतः कु
र्यादग्निहोत्रं यथाविधिः। एतच्चाधिकारिणि भ्रातरि अकुर्वति वेदितव्यं। अनधिकारि ध्यतिक्रमात्। अत एवानुक्तामग्रह
णं पुत्रस्य ते। अत एव हारीतः। सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यते नाग्निहोत्रेण नेज्यया। अ
स्यार्थः। सोदरे ज्येष्ठे अनधिकारिणि। अकृतविवाहे विवाहमीहमानासंनिहितेव तिष्ठति तदनुज्ञां गृहीत्वाधा
नं वह्नि वा होतं कराचनापि कर्मेष्यः॥ पठाहो शाता॥ पितापितामहो यस्य नाग्रजो वाथ कस्य चित्। तपो का०दे०
ग्निहोत्रमंत्रेषु दोषः परिविंदने। सुमंतुः। पितुर्यस्य तु नाधीते कथं पुत्रस्तु कारयेत्। अग्निहोत्राधिकारोस्ति ३३०
शंखस्य वचनं यथा। अत्राप्यनुज्ञाते स्यात्सर्वा॥ शातातपः॥ अग्रजः परिविंदंति कनिष्ठकस्य याचकस्मा
त्पिविकृपिकाएतच्चाधिकाररहिते भ्रातरीति पूर्ववचनात्। अतिकृहपाज्येष्ठापि सती न कनिष्ठाया विवाह

रूपाज्येष्ठापि सती कनिष्ठाया विवाहविघ्नहेतुर्न भवतीति॥ ॥इत्यग्निहोत्राधानदारसंस्कारकालनिर्णयः
अथावसथ्याधानकालनिर्णयः। तत्र याज्ञवल्क्यः। आवसथ्यमनाद्दत्त्रेनायं पः प्रवर्त्तते। सोमादितामि
न्वितिपरिवेत्तातपो च्यते। अत्र केचिद्दाहुः। दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थित इति। अग्निहोत्रसं
योगं कुरुते योग्रजे स्थित इति। अग्निहोत्रशब्देनाहितोपासनपरिग्रहेपि नैव परिवेदनं भवति॥ शा
स्त्रशब्देतरस्यश्रुतिफलतादिति तद् युक्तं। न निवृत्तेरशास्त्रत्वादत एवाङ्गिरसः। सोदर्ये तिष्ठति ज्ये
ष्ठे न कुर्याद्दारसंग्रहं। आवसथ्यं तथाधानं पतितस्तु न यानवत्। ऋष्यशृंगोपि याजनाध्यापने वेवच्छ
नि चेन्नो धनेन च। औपासनं समादध्यात्स्वकाले परिवेदयन्। स्वकाले यथाविहितकाले। तथाच स्मृतिः
आधानं विधिवद्देवं षट्कुलात्र द्वादश्यापि वा। महासनार्द्रदरणे वा दारदायादकालयोः। पारस्करः। आ
वसथ्याधानं दारकाले दायाद्यकालएकेषां। गोतमः। पुत्रमुत्पाद्यावसथ्याधानं कृत्वाग्नीषोमीयं संसृजय
न्वारा। अग्निरिवैदाहिकोयेन न गृहीतः प्रमादिना। पितर्युपरते तेन गृहीतव्यः प्रयत्नतः। यो गृहीतापि

वा।अग्निरद्दस्त्विति मन्यते।अन्ये तस्य न तोक्तव्यं द्व्यापाको हि तस्य तः।ज्येष्ठस्याधिकारिणस्तत्र ज्येष्ठं कनी
यांस्त्यक्ताग्निपरिग्रहे पि ज्येष्ठे भ्रातरि वेदाध्ययनाद्यसक्ते नैवाग्निपरिग्रहमकुर्वत्यपि कस्य वा येन सह संग्र
ह्यते।अत्र गर्ग्यपि दृष्टाकोपजीविता वा दृष्टाकोपजीवकः।ज्ञानाध्ययनतिष्ठवान्दुष्टेताग्निना।अनधी
त वेदस्यापि समाहृतविवाहस्य तस्यैतेन दर्शितः।।अनधीत्य द्विजो वेदमन्यो ग्रासय यातथा।अधीते अम
चर्येण सांगं वेदं गुरोर्गृहे।। ।।इत्याधानसाधारणकालः।। ।।अथाग्निहोत्रकालः।कात्यायनः।उदिते नु
ते वैव समयाध्युषिते पि वा।सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः।रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषि
तः।कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः।तथा प्रभातसमये नष्टनक्षत्रमण्डले।रविर्यावन्न दृश्येत स
मयाध्युषितं च यत्।रेखामात्रं प्रदृश्येत तस्मिन्नेव समन्वितः।उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत्
त्र रवः।सा।प्रभातस्तु कुर्यादग्निहोत्रं यथाविधि।बौधायनः।आसायंकर्मणः प्रातराप्रातः सायंकर्मणः
स्मात्कृ विनातिवर्तेत पर्वणा पार्वणेन तु सूत्रामणीय परिशिष्टके।छपयोहस्मप्रयोजकाः।आसत्तेश्च

का॰ हे॰ ३३

ग्निहोत्रहवणं पक्षान्ते समस्तहोमेन प्राप्ते तथा द्विरात्री पक्षत्रानायद्विमासी याईमासायाग्निहोत्रमनुत्सृज्य कुर्वु
त्सस्मात्सायावरक्षामयाव्यार्त्तो र्ध्वं वा ईमासायाग्निहोत्रे जुहुयात्।पक्षहोमे पार्वणं तु सायं च प्रातरेव
वा चतुर्दशीं वा चतुर्गृहीतानि समस्तउद्धवयनामकाः समिद्धोमे समस्तानि मार्जनमित्यं प्रातः।पक्षहोमे यजमा
इनीत्यं पक्षान्ते पार्वणात् उपसंख्येइनि प्रातः सायं च चतुर्दश चतुर्गृहीतानि प्रातश्चतुर्दश।चतुर्थं हवन
मुपलक्षणार्थं।कदाचित्संवत्सरं व्याप्य न वेति।चतुर्गृहीतानि कत्रिविंशोत्तराणि।मरीचिः।पक्षहोमान्यथा
कृत्वा गत्वाकस्मान्निवर्तते।होमास्तु नः प्रकुर्वीत तन्नैवेत्यनेन सहोषणाक।। ।।इत्यग्निहोत्रकालनिर्ण
यः।। ।।अथ पक्षमासादिहोमार्थं न कालः।यथाकालं श्रुतं ह्यास्मासह नवनमाचरेत्।कैश्चित्त्वाभिमावा।ज्योतिषे
गृहं कारयेन्नरः।वैशाखे धनरत्नानि ज्येष्ठे मृत्युस्तथैव च।आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात्।श्रा
वणे मित्रलाभं च हानिर्भाद्रपदे तथा।पत्नीनाशोऽश्विने विद्यात्कार्तिके धनधान्यकं।मार्गशीर्षे तथा भक्तं पौ
षे तस्करतो भयं।लाभं च बहुशो विद्यात् माघेऽग्निं च विनिर्दिशेत्।फाल्गुने

चरं पुत्रानि प्रतिकालवलं स्मृतं ॥ विश्वकर्ममते चैत्रे ---- नुत्रावैशाखे च धनान्वितः ज्येष्ठे गृहावि
पद्येत नन्रपतिपत्राव स्तुवे ॥ श्रावणे धनवृद्धिस्यान्नस्येनसैवेन्द्रादी। कलहश्चाश्विने मासि नृत्यान
नृपतिकार्त्तिके। मार्गशीर्षे धनप्राप्तिः सहस्यकाम्यतं पदः सहस्य। पौषः। माघे नावहक्रिन यं फाल्गुनश्री
स्तुन्नमा। तथ्यासं नरे। व्याधिशोकौ न वैश्वेचैत्रे वैरूपापेषधनरत्नकं॥ गोमहिष्यादि निपुक्तौ गृहमेधीस
दैवदि ज्येष्ठे मृत्कमवाप्नोति चाषाढे पशुनाशानेपृत्या लाननस्कर नानालाभोर्थधम्वतथैवच। श्राव
णे नृत्यलाभस्तु धनवृद्धिरनाकुला॥ मासिनाद्रपदे गेहसुखासंजायते ध्रुवं। तत्रसर्वस्वहानिस्तु नुवेतन
गृहमेधिनः। आश्विने तु न वेत्ति त्यपत्निनाशस्तथा कलि। कार्त्तिके स्याद्दनं धान्यं स्वल्पना शोमहानि द्वाश का०डे०
तएव श्रवाप्यते प्रसादाद्वरं नणे सुताः। मार्गशीर्षे प्रविज्ञेयो धनलाभसुखप्रदः। नशंवे विविधं नृतेर ३३२
स्यादि सरत्नकांवस्तु लाभस्तु नश्चात्र प्रजालाभो महाननपि मित्राणां चैव पुत्राणां तथा लाभपरो भवेत्
पौषे नीतिः परिज्ञेया नस्कराणां सुहारुणा। धनधान्यादिलाभः स्यात्तु न्न मित्रादि सेपदः। मघेवक्रिन यं

ज्ञेयं सर्वहस्तापञ्चस्वरा। फाल्गुने चैत्रविज्ञेयो लाभः कांचनजस्तु जः। पुत्रलाभो महान्नत्र सुखसौख्यसंयु
तः॥ इति मासफलं प्रोक्तं श्रैविध्यमधुना ऋवे। उत्तमं मध्यं चैव कनिष्ठं चेति तत्त्रिधा। वैशाखे श्रावणे चैव मा
र्गशीर्षे च फाल्गुने। उत्तमास्ते समाख्याता ४ कथ्यन्ते मध्यमास्तथा। आषाढः कार्त्तिकः पौषो मध्यमा श्रेति।
कीर्त्तिता। कन्यकास्ते समाख्यातानि त्रामयस मासतः। चैत्रे ज्येष्ठे न नस्यस्तु रेते मासाश्च कन्यकाः। इषा
श्विनः। फलमेषां समासेन कथितं। तत्स्पतिस्फुटं। अपराजितपृच्छायां। रवौ कन्या तुला लिस्थे वाप्येस्ते पूर्व
द्वारः स्मृतं। अलि वृश्चिकः। चापे च मकरे कुंभे दक्षिणे च व्यवस्थितं। मीने मेषे वृषे चैव पश्चिमे दिव्यव
स्थितं। मिथुने कर्कटे सिंहे उत्तरे तद्यवस्थितं। आदित्यवारो योगेन सवास्तुसरतिन्नमात्। यत्र नाले तत्रि
रस्तत्र लक्षितव्यर विक्रमोत्। देवागारं गृहं चैव न कुर्यात् शीर्षसंमुखं। मृत्करोग नया निःस्फ। अश्रास्त्कु
क्षि सम्मुखं। तुला वृश्चिक कन्यासु नास्करो यदि संस्थितः। नतदा प्राग्मुखं कुर्यात् गृहं भवति निष्फलं। धनु
र्मकरकुंभेषु यदा तिष्ठति भास्करः। न तदा याम्यमुखं वश्म राजगौरात्मिनी तिहं। मीने मेषे वृषे पश्चिममुख

स्त्रीकलत्रावहं। मिथुने कर्कटे सिंहे न कुर्याच्चोत्तराननं। तथाकृतं न वेश्म स्माद्दोषशोकभयावहं। विश्वक
र्मा रवौ कन्यातुलालिस्थे गृहं वरुणदिङ्मुखं। न कुर्यात्तत्र शून्यं स्यान्न चर्द्धये न वेश्मनो॥ दक्षिणाभिमुख
ं कुम्भमृगचापस्थिते रवौ। कुर्वीत निःफलं तस्मान्नृपदं वधादिकृत्। न मीनवृषमेषस्थे कुर्वीत प्राङ्मु
खं रवौ। तदनन्तं बलिर्दूरं राजचौराग्निभीतिकृत्॥ रवौ मिथुनसिंहस्थे नक्रकर्कस्थे पश्चन्मुखं। कुर्यान्नैव
दरिद्रव्याधिदं यास्मत्तरणहासदं। विश्वकर्मप्रोक्तं। अधुना कूर्मलीचक्रं रविचक्रानुसंज्ञावारिखादयं शक
र्त्वपत्तत्र वेश्व पूर्वपश्चिमं। दक्षिणोत्तरगंत वत्तुरेषैका वह्निवायुगा। ईशानैर्नैऋते चैकात त्रराशिस्तुवि
न्यसेत्। क्रमादीशानरषाश्चाद्वेषा वा द्वशकेन वेत्। तत्र कन्यादिसिंहांता राशयो वाद्दशाक्रमात्। प का॰ हे॰
त्रयत्र न वेश्म तु स्तत्र वास्तुशिरःस्थितं। स्वस्वानां स्मप्तमे राशौ वास्तोर्दृष्टिः प्रातक्रमात्। यद्रेखायां नवे ३३२
श्मयेद्वास्तुमस्तकसंयुतः। तद्रेखाग्रस्थितेराशौ संमुखं चैव दृष्यते। तारविदृष्टिगते राशौ जानीयात्त
न्निधूमितं। रविर्तु क्रान्तयोराशोः सव्दग्धः प्रकीर्तितः॥ शिरःस्थितं कर्त्तव्यं रवेर्द्वारं कदाचन। यद्यत्ताना

प्रकुरुते क्षयं स्यात् गृहमेधिनः। वास्तुदृष्टिस्थितराशौ वदेद्द्वारं तु वेश्मनः। धननाशो न वेतत्र पुत्रमि
त्रपशुक्षयः। रविरेखाग्रहे राशौ कृते रोगभयं महत्॥ रोगचौरादिभिश्चौरवह्निराजकुलादिभिः। रवि
दृष्टिगते राशौ गृहद्वारं तु यत्र हि। तत्र संवसतो नित्यं रोगदुःखसुदारुणं। दग्धे द्वारे कृते हानिर्नानाजन्तु
स्याद्धनक्षयः। नक्रस्थे कुम्भगे नाके नो सिंहगे कर्कगे तथा। पूर्वापरं पश्चिमास्यं च न तु गेहं प्रकारयेत्। फ
लमेतत्समादिष्टं वृणोनां न वनाशयं। कन्यादौ नारनेष्टे कूर्मलिचक्रस्य फलार्थमाह। फलोद्देशं प्रव
क्ष्यामि मत्स्येके नृपरिस्फुटं। मुखवृद्धिस्तथारोग्यं ताः सर्वपापोपमर्दनं। अधुनाऽस्तशालास्तंभनकारणे फल
मीदृशं। नृपेरलक्ष्मीरविचला न वेत्। अश्वरथवृद्धिमान् नित्यं सुखसौनाग्यसंयुतः॥ सिंहे त्विकलसर्वमि
वमादिफलं न्वेत्। दृष्टपुष्टस्तु संपन्नो बहुपुत्रः श्रियान्वितः॥ मन्नाविलन्नस्य ते सोख्यकर्त्रे च फलमी
दृशं। मेषे वृषे च नायां वृश्चिके च यनद्द्वावेत्। उदक्यस्याननं चैव चैतदाह प्रकारयेत्। एतेषां तु क्रमे
णैव फलमत्र वदाम्यहं। मुनलक्ष्मीफलं सौम्यं पुत्रपौत्रसमृद्धयः। वद्धनाशोऽत्र न बन्धु सर्वसौनाग्य

संयुतः। एवमादिफलं मेषेन स्त्रीविजनते निरां वृषे सौम्यं विशालक्ष्मीः पृथुष्टा दिरनाकुला। पुत्रा स्ववकवल
स्पजायंते श्रोणनाः स्त्रियः। एवमादि फलं नर्तुस्तन्त्र मो क्रमनामांनिः। तुला यां प्रोवते सम्यक् कफलमिष्टत
मं नृणां। धनं धान्यसुखं नोगागो पुत्रसमृद्धयः। वक्रमित्रास्त था नृतां। पृशो व श्रोणनानां गृहे। पुणंपृ
त्रि श्रोत था नर्तुस्तुला यामीदृशं फलं। विपतां सञ्चयः सम्यक् लक्कलं वृद्धिरेव च। धनवान् नोगसं
पन्नो नर्तांसा बहुलनान्वितः। एवमादि फलं तत्र वृश्चिके जायते ध्रुवं। न ... न कर्तुं गोप
विज्ञे योग कामं मंदिरे दितो। हरिकाकोटको ज्ञेयो पतीवे मुखवेत्र मनिः ... तें ह्नो हरिः
-- मेषो वृषस्तथा वे तौ सौम्या श्वारं नणो दितो। तुला श्च वृक श्चैव दृश्चिणा श्वादितो मुखैः। कोणस्था का॰वे॰
नामुयाव स्रो कन्यादीनां फलं यथा। पतः कन्या स्थिते गौधां श्चो धनुर्धूमसमा श्रया त्या। स्तुनीमिनख ३३४
रे चैव मिथुनं सर्वद्दा श्रितकन्या या मेर वो सम्यक् नार ने तगृहस्तु धीः। नक्र्ा दिस्थ त्र जाये त पुत्रगोत्र
पशु च यः। सर्व सौख्ययुतो नत्र विसेदत्र नसंसयः। धनुस्थिते रवौ कार्यं नैव गेहं कदाचना। राशु

निपात्यते तत्र जायंते दुनिसंपदः। अथवा राजदंडेन पीड्यते सौवसन्गृहे। यदा नानुस्तु मीनस्थः त
दा गेहं न कारयेत्। नते चैवाधि रो का पत्र या यविपुला यच। अधीरत्वं नहोनस्पर्शानिःस्वन्मीनतः फ
लं। मिथुनस्था यदा मानुस्तदा वेश्मन कारयेत्। अश्विना दृत्वे तत दैवेश्मनि त्यसुत गृहं। मीनस्थे वृश्चि
दिकन्नागे गृहारंभो गृजा विनां। मिथुने ला श्रयोरं भई से सम्पात्ति नोहि तः। वायव्ये कन्य का ज्ञेया गृहारं
भे सुखप्रदा। खरोपजीविनां चैव वेश्यादीनां सदैव हि। नैर्ऋत्यां धनुषस्तु स्या द्वारं नैश्वप चा गृहे। इंद्रीनां
कथये दस्मा मासरा शिस माग मं। चैत्रे मेषो न वैश्य त्रैतत्रो ग्र्गं न कारयेत्। ज्ञ वे व्याधि मृत्युनिताने
ग्रहे। भाधिनः। ज्येष्ठे तु मिथुने यत्र तत्र नित्यं गृहं न वेत्। देधं दंडं युद्धमिति यावत्। आषाढे कर्कटो ष्ठ
ष्ठो नत्र स्यात् कन्यकानत था। आश्विने तु तुला दुष्टा वृश्चिकः कार्तिके तथा। चापं मार्गे निवे दुष्टं तेन मार्गोन
श्राननः। माघ कुंभस्तु वै दुष्टस्तन्त्रारंभो न सौन्न नः। मासिमास ष्टकं चे तिदूषितं वैपरस्परां तेमषेषु न
कर्तव्यं मंदिरस्तु नमिहृता। तथा। सिंह गमं षगं वे वगुरुं यत्ने नवर्जयेत्। अस्तगते गुरौ शुक्रे गृहारंभो

नक्षत्रे प्रशस्यते। नातिक्षीणे निशानाथे रहितं नो दिवस्पते। विष्णुधर्मोत्तरे। मलवृद्धकाले न कर्त्तव्यं वास्तुकर्म वि
जानता। — — — स्नपनः कृष्णपक्षान्ते त्रिभागे तच्छेषे कार्यमारम्भदिनपञ्चके। शुक्लपक्षादि त्रिभागे तु शु
क्लप्रतिपदमारभ्य दिनपञ्चके। एवं कृष्णैकादश्यामारभ्य दिनदशकं विविधेन वर्तितं तथा चतुर्थीं नवमीं
वर्जयेच्च चतुर्दशीं॥ विश्वकर्ममते। तिथयोऽत्र प्रशस्यन्ते याः शुभा वास्तुकर्मणि। शस्ते मासि सिते पक्षे
प्रतिपच्च द्वितीया च तृतीया पञ्चमी षष्ठी सप्तमी दशमी तथा। एकादशी त्रयोदशी पौर्णमासी च की
र्त्तिता। एताः पूर्णा इति ख्याता नामतस्तिथयः शुभाः। नन्दं यो नन्दते — — — — — — — — चतुर्थ्यां वा
षष्ठ्यां वा दक्षिणस्यं विवर्जयेत्। तत्र वसतो यस्मान्महाव्याधिभयं भवेत्। अथ वाराः प्रशस्यन्ते
रविभौमविवर्जिताः। दिव्यान्तरिक्षक्षितिजैरुत्पातैर्न विपीडितं। युक्तो पापग्रहैः सन्ध्याव्यतीपातहते च
यत्। तदहो परिहर्त्तव्यं पापग्रहदूषितं। चन्द्रतारानुकूले च कर्त्तव्यं वेश्म विजानता। श्रवणेनानि त्रास्तानि
त्राणि वै नैऋतं तथा। श्रवणो रोहिणी हस्तं रात्रयं चेति वायव्यं वैष्णवं पुष्यं पौष्णं सावित्रमेव च। म का०दे० ३३५

त्स्यपुराणे। वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः। विष्कम्भगण्डपरिघान् वर्जयेत् — — कारयेत्। वि
श्वकर्ममते। अथ योगास्तथा स्वामि वर्जिता ये मनीषिभिः। अतिगण्डो व्यतीपातः परिघो वज्र एव च॥
गण्डः शूलं च विष्कम्भो व्याघातश्च सुदुःखदः। एतान् योगांस्त्वमा वर्ज्य नावेतेषु चैव हि। विष्कम्भे घ
टिकास्तिस्रः पञ्च वा वर्जयेत् सुधीः। वज्रे तु घटिकास्तिस्रो नव वा परिवर्जयेत्। अतिगण्डेषु वै षड् नव
वा द्वौ षड्वा यकाः। गण्डेषु घटिकाः पञ्च व्याघाते नव षड् वा। शूले तु घटिकाः पञ्च सप्त वा दोषदा मताः। वै
धृतौ च व्यतीपाते घटिकाः षष्टिरेव च। परिघे घटिकास्त्रिंशत् त्रिंशद्रात्यवाङ्गना। एतेषां घटिकाः शेषा
सर्वास्त्वन्याः शुभावहाः। योगाः शुभावहाः कार्या वास्तुस्थापनकर्मणि। यथानामतथा तेषां फलसिद्धिरु
क्ता तथा। करणान्यथ वक्ष्यामि वास्त्वारम्भे तु नामपूर्वं। तैतिलं वणिजं नाम बालवं करणान्तरं। धनधान्य
कराणि स्युः श्रियसे च सुखाय च। विष्णुधर्मोत्तरे। अङ्गारके दिने नाम करणं विष्टिसंज्ञे वर्जयेदित्युप
गः। मत्स्यपुराणे। सेतुमेवेयमादृग्गे भवतीति विरोहणे। तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत्। चन्द्रा

दिग्बलं लब्ध्वा लग्नं शुभनिरीक्षितं। स्तनो ह्याया दिकर्तव्यमन्यत्र परिवर्जयेत्। प्रासादे षेवामवस्यात्कूप
वापिषु चैव हि। विश्वकर्ममते। सूक्ष्मत्वात्कथयिष्यामि ये न्यूनेतेः सर्वसंपदः। मार्हेन्द्रो रोहिण्यश्वं दस्ताविश्रोनि
जित्। तथा। स्वलश्रेति समाख्याता सर्वे सर्वार्थसिद्धिदाः॥ अथ वार विशेषेण वर्जनीयान्ब्रवीमि ते। ——
—— वै वर्ज्याश्च देवे ब्रह्मराक्षसौ। मित्रा ह्येयो कुजेन हौ बुधे चैवाभिजित्तथा। पुत्र्यामतथाष्टकेराह्न
साः बृहस्पतिः। तौ जंगे ह्यौ शुक्रह्नौ नौ वर्जनीयौ शनैश्चरे विष्णुधर्मोत्तरे। स्थिरलग्ने स्थिरांशे च कर्त्तुश्चोपच
यान्विते। स्थिरलग्नानि वृषसिंहवृश्चिककुंभाः कर्त्तुः कर्तुरात्रोरुपचयान्विते। त्रिषडेकादशामस्थान
स्थिते। तथा च जातके। त्रिषडेकादशामान्युपचयन्त्यान्यतोन्यथान्यानीति। यस्य सौम्यग्रहाः केन्द्रत्रि
कोणेष्वापि नागवा। पापाश्चोपचयस्थाने तस्मिन्कार्यं निवेशने। बृहस्पतिशुक्रबुधचन्द्राः सौम्याः। क्षी
णेंदुरविमंगलशनैश्चराः पापाः। पापसंयुक्तो बुधश्च। तथा च लघुजातके। क्षीणेंदर्कयमाराः पापास्तैः सं
युतश्चासौम्यः यमः शनैश्चरः। आरो मंगलः। सौम्यो बुधः। इति केन्द्राणि लग्नचतुर्थसप्तदशमस्था

नानि। त्रिकोणं नवपंचमस्थानं। तथा च जातके। केंद्रं चतुष्टयं कंटकं चा लग्नात्सप्तदशमचतुर्थानां संज्ञेयं
इति। नवपंचमे त्रिकोणे नवमर्हं त्रिकोणं चेति। केंद्रस्थं वर्जयेत्पापं सूर्ययमेन केंद्रमेसु। केंद्रसौम्ययु
तं देवं न तु शून्यं कदाचन। विश्वकर्ममते। अपलग्ने च वस्यामि गृहारंभे शुभावहं। वृषो धनुस्तुला कन्या
मिथुनं कलशस्तथा। लग्नान्येतानि शस्तानि गृहप्रासादकर्मणी। क्रितमेतेषु लग्नेषु सर्वसिद्धेन वृद्धिदं। एका
दशे तृतीये च षष्ठे पापग्रहाः शुभाः। मा पत्रे हे ष्टमे चैव मरणं प्राप्यते ध्रुवं। चंद्रार्कादित्यहा स वैरवष्टत्रे
शुभ न हा गृहे। नीच हा न च नीचस्था न वृत्तीर्णास्तु भूषिताः। स्पादियडाणस्वक्षेत्राणि। सूर्यस्य सिंह क्षे
त्रं सोमस्य कर्कः। भौमस्य मेषवृश्चिकौ। बुधस्य मिथुनकन्ये। गुरो धनुर्मीनौ। शुक्रस्य वृषतुले। शने
श्चरस्य मकरकुंभाविति। तदुक्तं लघुजातके। कुजशुक्रज्ञेंदुरविज्ञशुक्रकुजजीवशनिशनिगुरवः। ने
ग्नाइति। एतत्क्रमेण मेषादीनां राशीनां द्वादशानामीश्वरा इत्यर्थः। कुजो मंगलः। ज्ञो बुधः। जीवो गुरुः॥
सौरो शनिश्चरः। नानुरागायइति उच्चारसमारसिनीवस्तत्रस्थानीवस्थाः। तथा च नीचमनीचपरिनाषा

जातके। श्रुत्वा यमृगांगनाककीमीनवाणिनां त्र्यंके स्थिताद्यचा॥ दन्त्रान्त्रिरन्ध्रष्टाविंशतितिथीन्द्रियत्रिघन
विषनुं उच्चांनीवेंसरसममिति। अस्यार्थः॥ मेषस्याद्यादश विंशार विरुच्चं। वृषस्याद्यास्त्रयस्त्रिंशा शा मि
नस्योच्च। कर्कटस्य पंचगुरोरुच्चा मीनस्य सप्तविंशति शुक्रस्योच्चं तुलायां विंशति शनेरुच्चा मीनएतन्म
वेंसमाले। अविबुधो निपुणः सुधी। आरनेतभयत्नेन वास्तुकर्मसु सिद्धिदं॥ ॥इति वास्तुप्रकरणं॥ ॥
अथ प्रतिष्ठाकालनिर्णयः॥ ॥तत्र सामान्यतः॥ विष्णुधर्मोत्तरे। — — — — — — — — प्रजानां
कर्तुस्तथा त्र विज्ञाच महाराज शृणु कालः प्रजाहितः॥ ॥वज्र उवाच॥ श्रुतसु कालेत्र वक्ष्यामि। कस्मि
न्काले तु कर्तव्या प्रतिष्ठा न गुनेदनः॥ कस्मिन्कस्मिन् — — — — — — मार्कंडेय॥ शृणु काल का०दे०
प्रवक्ष्यामि प्रतिष्ठाकरणे तव। यस्मिन्कृते — — — वृष्टे वे युगे ऋते॥ धनधान्यवती स्फीता वरदा चतम ३३७
नवेत्। दृष्टा नवति विज्ञाता विद्वेषाश्रयरोषयुता। एवं धृतेजोवता स्फीता कृतविग्रहकारिणी। तथा विधा
द्वापरे वाभ्यायाता निसाचयर्युता वा श्रुगम्या। लोको सततं थैव च। अहिर्बुध्ने द्वापरान्तले।
द्वा

कान्तुग्रहकारिणी॥ पित्रे विनाशमाप्नोति कर्तुश्च मरणावहा। विश्वे — — — — — — कस्मात्र
नानवेत्। सौम्या तथा कर्त्तव्हार च तथा न वेत्। एवं नाशे नाशमाप्नोति कर्तुः जलाविनाशनं। अ
श्विनेश्रीमति — — — — — — मवाप्नुयात्। लोकानिगम्यता गेसा कर्तुर्दोषिवती नवत्। अश्रुते
पिशुने कार्या प्रतिष्ठा मनुजोत्तम। यस्मिन्युगे च यो नाथो यो यो देव प्रकीर्त्तितः। धनधान्यवती
स्फीता कर्तुः श्रेयो जयावहा। प्रभवादिसंवत्सरे विष्णुत्वादीनि द्वादशयुगानि तन्त्रैव निर्दिष्टानि
संवत्सराख्ये वर्षे पुनित्य मात्राः पुता नवेत्। परिपूर्वा इदुत्तरा ग्रीलोकाख्यात थैव च। यदा पूर्व तदा सौ
म्पकारदा लोकसुंदरी। अनुपूर्वे तु वरदा धनधान्यावति नवेत्। उत्तरे नाशमाप्नोति कर्तुर्नाशावहा
हा नवेत्। तत्रापि शोनो नृत्स्ने वयमस्परा इति नवेत्। प्रभवादयः पंचक्रमेण संवत्सरापरिवत्सरे
दावत्सरानुवत्सरो द्वारसंज्ञकाः। रावमगिराः। आदिपंचकस्य क्रमेण संज्ञा पंचकमेवमुत्तरात्रापि
तितत्रैवाहिता मत्स्यपुराणे। द्वापम्बालंकुनं पट्टनं नीमेचामरायने। विष्णुधर्मोत्तरे उत्तरे वयनेसा

स्याद्धनवृद्धिकरी नवेत्।तत्रापि सुमुहूर्ते वैशाखे सर्वानर्थविवर्जनी।शाश्वरे लोककान्ता सा दृढा च वसुधाधिप।स्फी
ता वसंति सौम्या च वरदा च तथा नवेत्।ग्रीष्मे तेजस्विनि कान्ता नूननियहकारिणी।प्रावृट्कालेन पानाशकर्त्री
सदृसमाक्रयात्।प्रावृट्काले निषेधश्च शिवप्रतिष्ठाव्यतिरिक्तविषयः।शिवप्रतिष्ठायां तद्विधिश्शिवप्रतिष्ठा
कालनिर्णये दर्शितत्वात्।शरत्काले कृतानां शर्वा।प्रमेवप्रपद्यते।इमं ते च सदा सौम्या धर्मवृद्धिकरी नवेत्
माघे कर्त्रीविनाशाय फाल्गुने सुभगा नवेत्।लोकानंदकरी चैत्रे वैशाखे वरसंयुता।आज्ञायुता सदा ज्येष्ठे आ
षाढे धर्मवृद्धिदा।श्रावणे धननाशाय नास्यात्प्रोष्ठपदे विनश्यति।आश्विने नाशमाप्नोति वह्निना कार्तिके तथा।सौ
म्यसो नागममतुले पौषे पुष्टिरनुत्तमा।दोषावहान्विना मासे स्यात्कर्तुरात्मनराधव।चैत्रे वा फाल्गुने वापि का०हे०
ज्येष्ठे वा माधवे तथा।माघे वा सर्वदेवानां प्रतिष्ठा शुभदा नवेत्।अथ माघमासनिषेधो विष्णुप्रतिष्ठावि ३३८
षयः।विधिस्तु तद्व्यतिरिक्तदेवताप्रतिष्ठाविषयः।मार्गशीर्षमासविधिश्च विष्णुप्रतिष्ठाव्यतिरिक्तविषय
माघमार्गशीर्षमासनिषेधश्च विष्णुप्रतिष्ठाकालनिर्णये दर्शितः।श्रावणाश्विनमासनिषेधश्च विष्णुप्रति

ष्ठाव्यतिरिक्तविषयः।विष्णुप्रतिष्ठायां मेतद्द्वयविधे तंत्रे वदर्शितत्वात्।अपरे त्वाहुः।माघमासि सर्वदेवा
नामिति वचनाद्विष्णुप्रतिष्ठापि तत्रापि कार्या।माघादिमासनिषेधस्तु तद्व्यथविषयस्तत्प्रतिष्ठाविशे
षविहितो यमध्यफलदा द्वितीये च शुभावहा।धनधान्यवती स्फीता वरदा तथा नवेत्।यस्य पक्षस्य दृष्टि
स्यात्तस्मिंश्छुक्लफला नवेत्।हृद्यधनायुता स्फीता द्वितीयायां धनोपेता तृतीयायां वरप्रदा।चतुर्थ्यां
नाशमाप्नोति यमस्यास्य क्षुरवावहा।विनायकस्य देवस्य तस्य तत्र हितप्रदा।पंचम्यां श्रीयुता क
र्तुर्वरदा च तथा नवेत्।षष्ठ्यां लक्ष्मीयुषा नित्यं सप्तम्यां रोगनाशिनी।अष्टम्यां धान्यवृद्धधानवा
म्यां तु विनश्यति।नदकाल्या।ष्टता तत्र कर्तुर्नवति पुष्टिदा।धर्मदृक्दिरी ज्ञेया दशम्यां तु तथाष्ट
नातैकादश्यां तथा युक्ता द्वादश्यां सर्वकामदा।त्रयोदश्यां तथा ज्ञेया चतुर्दश्यां विनश्यति।ठस
उ पक्षे पंचदश्यां कर्तुः क्षयकरी नवेत्।पंचदश्यां तथा शुक्ले सर्वकरी नवेत्।इह हस्यत्रा च विज्ञेया त
था दोषवतीन्टपा।द्विव्यांतरीक्षो नो मे च उत्पातेन तु यायुता।कर्तुर्व्याधिप्रदा तत्र प्रतिष्ठा तु क्रिया नवेत्।

तिथ्यां स्नानोत्र यत्नेयं दृष्टो वृद्धिशकीर्तिता। मत्स्यपुराणे। पंचमी च द्वितीया वै तिथिः पंचमी द्वितीया सप्तमी तृतीया
चतुर्थी या चाष्टमी तथा। दशमी पौर्णमासी च ज्ञातातुफलदानवेत्। लक्षणसमुच्चये। ताम्रपत्रे सितैका
र्थ द्वितीया वै तिथिर्ध्रुवा। द्वितीया पुष्यमतीदद्यात् तत्पुत्रसंपदा। पंचमी वन्धिये नित्यं सप्तमी रोगनाशनी। द
शमीन्तूमिवृद्धिवसो नागंपंचत्रयोदशी। नानाविधिं धनं दद्यात् पौर्णमासी तिथिः सदा। एकत्रिंशकरैर्नेदानं नाप
त्रर्षिनानुतिजयाहराम। दिकामेः स्पादिक्का वेदयान्नेन्दुकेः। बाणदिक्षि थिनिः स्वर्णहीनं तुल्यादितानवे
त्या एते शुक्रे तु लोमाः स्फर्वकुले विलोमतः। बृहस्पतिस्पर्द्धि पंचपुत्रं धोजयथनानि च। सर्वस्मिन्कृष्णपक्षे
कृत्स्नेति स्मरोहणीकाकिं हि षत्रलावार्यस्त्रीसिंह्याम कुम्भके। मात्स्ये घाणालिमेषस्थो दिने नागाना प्रधान का०वि०
तः। वृष षट्चतुरायामा श्रवणादित्रयेण तु। विष्णुधर्मोत्तरे। तिलस्वीनां स्त्र्यर्हीने च कुत्रे मावृत्तानवेत् ३३९
रो मधिनाम दद्यात्तनुधेनधनदानं वेत्स्यपुराणस्पाक्षेदे निसंलोकानेदकरीसिते। अर्वेश कर्त्तिता सो
रेशाति ष्टासमुद्रहरुता मत्स्यपुराणे। बुधो दृष्टस्पतिशुक्रस्पयावाराशुनावहाः। रनि निरिहिनेलर्मन

तत्रैव प्रश्नस्पते समुच्चये लक्षणं प्रति। सोनागपमायुष्यं सकमास्नो नानो धृतिः। रविरिस्तुन त्स्या धाबरीया
न्त्रिवस्तुलकौ बुधो चन्द्रिवैचेतिपोगः तत्संगकाशुना। चवेन वालवेचे वर्षोजवनैनत लंतथा
गरवव णिचेवत्राकुनिवचतुष्पदः। नागं किंस्तु ध्रमप्याहे विष्टिहीनं च पञ्चमो। विष्णुधर्मोत्तरे श्र
कुनौ दोषजननौ चतुष्पदे तथा वदा। नागेन वति सौम्या वकिंस्तुघ्ने तुस्तुनप्रदा। कौलवे वरदा स्रया
तैतिले रोगनाशिनी। गरास्ये रोगजननी तथा वणिजी पुष्टिदा। विष्टौ मरणदा कद्रूरालदोषवती
तथा। मात्स्ये। आषाढे द्वे तथा मूलमुत्तरात्रयमेव च। ज्येष्ठाश्रवणरोहिण्यः पूर्वं चानद्रपदा तथा
हस्ताश्विनी रेवती च पुष्पो मृगशिरस्तथा। अनुराधा तथा श्विन्या प्रतिष्ठा सुप्रशस्पते। लक्षणस
मुच्चये पुष्पाराहिणीकालाश्वाप्रगादो त्तराद्विजे पुनर्वस्वि त्रुराधास्तु चित्राज्येष्ठा मृदीनुजी धनी
ष्ठा श्रवणे वैल्पयुगे नाड्रपदे तथा। अश्विनी रेवती मूलं स्वाती फाल्गुनीका द्वयं च तुर्वर्णम
या स्वीहामजा क्षेनरणं मध्या। एतानि शतिलोमानि चलार्थेवां हितोत्तमाः। जरारोगकरास्ति
त्यजेत्तथा।

त्रोरोहिणीनयत्युक्तिसाद स्तःसिद्धिप्रदोलिंगाश्रात्पुर्दशाषाढयुग्मकं।पुनर्वसुःसुखंदद्याद्दनुराधातु संपदः॥वि
ज्ञातव्यंसुखनिसंज्ञेष्टारोगविनाशाकृत्।धनिष्ठारिजपदद्यात्तानदःश्रवणःसदा।युग्मनाडप्रदाद्विब
कुमित्राणिवाश्विनी।रेवतीपुष्टिदानित्यस्वातीऽर्यार्द्रनेवहा।फाल्गुनीद्विजयंदद्दिनरणीरिपुनेदनं॥
आश्लेषानागपसंपत्तिंमूलेऽथनृपसत्क्रिया।मृगःश्रांतिप्रदोनित्यंधन्यात्रातन्विप्रत्नजेवा।अश्लेषास्मृति
कोचैवविज्ञायाचस्तुनदेहा।विद्युधर्मोत्तरेतेजस्विनीज्ञातिकासुहृत्तनिमदकारिणी॥किंचिद्भूतान
तःकालेपुनर्दर्शितवह्निना।नकेऽस्वर्पस्पसोमस्यकुमारस्यवस्तावरा।गंगायाश्वजनीतत्रनदस्तनिच
वह्निनाभ्रजापत्येग्रहनिसंलोकानुग्रहकारिणी।सोम्येतुवरदाप्रोक्तामूषकेस्तुविनस्पति।आर्द्रा का०दे०
याकर्दमरणंत्रिधमेवप्रयच्छति।पुनर्वसौविनाशश्चसंस्कारंवाप्नुयात्पुनः।पुष्टिंपुष्येसमाप्नोति ३५०
धनेनयत्रासातथा।सार्पिकर्त्रीविनाशायनागानांचहितानवेत्।पित्र्येमरणदाकर्त्तुस्तथानाशाच्च
छति।लोकगम्यानवेद्भाग्येकर्त्तुर्नाशावहातथा।तत्रापिकामदेवकर्तुःसौख्यावहातथा।सर्वर्क्षेसुद

दास्फीतालोकानुग्रहकारिणी।आत्पुर्हाचेकृताहस्तेचित्रायांनाशमाप्नुयात्।निसाश्चर्यंयुतालोके
चित्रायांचङ्गीताप्रदा।स्वातौतुवरदासोम्यालोकानुग्रहकारिणी।ऐंद्राग्नेकर्त्तुर्नाशायमैत्रेविमित्रवृ
द्धये।ज्येष्ठायांनेजसाप्रोक्ताधनधानवतीनवेत्।तथाविधातृप्यामूलेकिंतुहृतसमाश्रया।आप्येक्ले
दमवाप्नोतिवैश्वदेवासुखप्रदा।श्रावणेधनधान्याद्यावासवेवसुसंयुता।वरुणेशीघ्रनाशायतथा
प्येमतुजोत्तमा।आहिर्बुध्न्येदयास्फीनाकर्तुःसौख्यप्रदायिनी।धनधान्यायुतापौष्णेआश्विनेयागना
शिनी।याम्येमरणदाकर्तुरात्मनाशकरातथा।सार्केस्याछोकजननीसासोरेमृत्युदायिनी।सानोमेव
ह्निनयदासनमाकस्वारानुतु।केतुनाधूमितेऋक्षेवह्निदाहमवाप्नुयात्।केतूदयेनवेध्येनतेनक्रा
पातोनवेद्यत्रनत्रव्याधिकरीनवेत्।निर्विधोसानवुक्तेनेनभ्रुनाःपुरिकीर्तिताःदिव्यकीर्तिविनाशाय
नोमेचात्मविनाशनी।अंतरीक्षेचविज्ञेयालोकनाशकरीतथा।सवेधतत्त्वतिपातेऋक्षभेकंविवर्जये

तद्दोषैर्दूषितास्तथा युक्ता यावद्रागमनाद्भवेत्। जन्मनक्षत्रविद्धिना कर्तुः श्रेयस्करी न भवेत्। संपत्करी द्वितीयस्था
तृतीये रिनयप्रदा। क्षेमा चतुर्थे त्वविपंचमे व्याधिवर्द्धनी। कार्यवृद्धिकरी षष्ठे सप्तमे धनप्रदा। अष्टमे वा
रसौम्या नवमे श्री विवर्द्धनी। कर्मणां साधिका श्रेष्ठा जन्मादेकादशा मता। एकादशे वृत्तिकरी नेष्टा च
द्वादशे करवेत्। एकोनविंशतितमे कर्तुर्मरणदायिनी। वा ------ द्वितीये धनदा तृतीये रिनय
प्रदा। चतुर्थे क्षेमजननी पंचमे रोगवर्द्धिनी। षष्ठे लक्ष्मीकरी ज्ञेया धनधान्यविवर्द्धनी। द्वितीये च चतुर्थे
च पंचमे च तथाष्टमे। द्वादशे नवमे चैव कर्तुर्दोषवती नवेत्। जन्मस्थे च स्मृतौ पक्षे षष्ठे चैकादशे
स्तथा। दशमा सप्तमश्चैव प्रदा विशेने वेदादेः। पंचमे नवमे चैव द्वादशे वा तथाष्टमे। तृतीये वा चतु
र्थे वा कर्मा स्यापग्रहं न वेत्। विपर्यये एवं धस्त्रपापोपि सुन्नतस्मृतः। चंद्रमा द्वादशार्कस्तूर्ये द्वितीये वा
नयप्रदा। द्वादशे च द्वितीये वा जन्मे मे वा इमवाप्नुयात्। द्वादशो वा द्वितीये वा सौरे मेण दान वेत्। पाप
मध्यगते चंद्रे भवं मरणदां न वेत्। एकस्मिंस्तु प्रहे केंद्रे चंद्रमाः स व्यवस्थितः। केंद्रे यत्र मध्यान्या स्यात्तु

के स्तूर्पार स्तूर्यजे नदा कर्तुर्विनाशाय प्रतिष्ठास्या च राधिपः। चंद्रे साकें विनाय नो मे दा इमवाप्नुयात्॥
ससौरे मृते द्वा ज्ञेया सराहौ निधनप्रदा। नक्षत्रे सोपरागे चैव कर्तुर्निधनकारिणी। लक्षणसमुच्चये। शस्तो
जीवो नवई केंद्रे तथान्ये ष्टात्सपादगो। पोइंसपादगे चैव कर्तुर्निधनकारिणी। उसमस्थानेषु सर्वदा तु
धः। षष्ठाष्टचतुर्थेषु हिक स सन व राशिनः। त्रांशत्रिषष्टदशामृः श्रिशास्तु नफलप्रदः। रविर्दशात्रिप
ह्रं स्थो रोक्त स्त्रिदशासंगतः। षड्स्थानगताः त्वास्तामेहारकृकेतवः। शुभाः क्रूराश्च पापाश्च सर्वराका
दशास्मृताः। एषां दृष्टिर्मुनौ पूर्णा वार्द्धिकी अड्डनयोः। पादिकी राम दिक स्थाने व स्वल्पोः पाद वर्जिताः
द्वितीया संपदाख्याता चतुर्थी क्षेमसंतता। षष्ठी च साधिका नाराजष्टमी त्रानुनाशिका। नवमी चातिमित्रा
स्यादेताः पंच फलप्रदाः॥ विष्णुधर्मोत्तरे। जन्मराक्षदये कर्तुः शिव स्नानाशाकरी न वेत्। द्वितीये धननाश
य तृतीये कर्यहृद्विदा। चतुर्थे इनाशाय पंचमे व्याधिदा न वेत्। षष्ठे शत्रुविनाशाय सप्तमे धनना
शिनी। अष्टमे मृत्युदा ज्ञेया नवमे धर्मनाशनी। दशमे कर्मणां हानिलाभकरी नवेत्। द्वादशे त्वप्र

वायःस्यात्प्रतिष्ठाढ्यस्तथा ख्याता।जन्मलग्नोदये श्रेष्ठधनधान्यकरी भवेत्।जन्मराशिफले सर्वं शेषे ष-
स्थानेषु निर्दिशेत्।मेषोदये कृतादि प्रनाशमायाति पार्थिवः।वृषोदये स्थिराशंका धनधान्यवती नेत्र-
लोकाकांता च मिथुने बहुकल्याणकारिणी।कुलीरे तु प्रनाशः स्यात्सिंहे च सुदृढा भवेत्।मीने गुणा-
वड्डा कर्तुः कन्ये श्रेयस्यात्तथा भवेत्।तुग्या स्यात्सर्वपूर्वा रेच सौम्या सौम्यस्य कीर्तिता।पापग्रहस्य केका-
णो कर्तुर्नाशाय कीर्तिता।सौम्या पठस्य शुभं कर्तुर्निर्वृतिरीरिता।फले पदे च लग्नेषु नवांशेषु तदेव
तत्।द्वादशांशेषु विज्ञेयं तद्देवमनुजोत्तमा।कर्तुर्नाशाय विज्ञेया त्र्यंशांशो सोमसूर्ययोः।शतं जीवे
त्पपौत्राणां कर्तुः कल्याणदा भवेत्।शुभनमेशं महाराज लग्ने पापफला शुभे।लग्ने शुभनतरे प्राप्ते पाप का०दे०
मं शाम शोभे।लग्नस्थे रोकर्तुर्हंता भवति नास्करो।द्वितीये चार्थस्य दानिः स्यात्तृतीये धनसंयुता।त्र्यायुः ३४२
स्यैव चतुर्थे स्यात्पंचमे सुतनाशनो।षष्ठे शत्रुविघातं च शत्रुपसप्तमे न भवेत्।मरणं चाष्टमे चैनो नवमे
धर्मपीडनं दशमे धनहानिः चलाभेलानयुता भवेत्।चतुर्थे बंधुरहिता पंचमे सुतवर्जिता।षष्ठे रिपुवि

नाशाय सप्तमे च धनावहा।अष्टमे मरणं घोरं नवमे धर्मपीडनं।दशमे कर्मदा प्रोक्ता लाभे लाभप्र-
दा भवेत्।व्यये व्ययवती राजं स्त्राया धनविवर्जिता।अर्द्धबिंबाधिके चंद्रे शुक्लपक्षफलं भवे-
त्।अर्द्धबिंबाधिके हीणे कृष्णाह पतिवो धर्मः।चंद्रलग्नगते ज्ञेयास्तिप्रनाशामहीभुजां।द्वितीये च दरिद्रा
स्यात्तृतीये धनसंयुता।बहुभा च चतुर्थे स्यात्पुत्रनाशाय पंचमे।षष्ठे रिपुविनाशाय पुत्रार्थनाशा-
य सप्तमे।अष्टमे मरणं घोरं नवमे धर्मघातिनी।धनान्विता स्याद्दशमे लाभे लाभवती भवेत्।व्य-
ये व्ययवती नित्यं दरिद्रा च तथा भवेत्।लग्ने मृत्युकरा नोमे तथा द्वारितौ द्रव्यधने कीर्तित्रिभुव-
ने — नो तृतीयस्थः करोत्यसौ।चतुर्थे बंधुनाशः स्यात्सुतनाशस्तथा सुते।दशमे कर्मसिद्धिः स्याल्लाभे
लाभवती भवेत्।अरिनाशस्तथा षष्ठे सप्तमे गोविनश्यति।अष्टमे कष्टं मरणं नवमे दशमे स्तुतिः।ध-
नजायात्मजे नित्यं वियोगो व्ययगे भवेत्।शुभलग्ने धनयुता द्वितीये च तथा भवेत्।तृतीया वरदा प्रो-
क्ता चतुर्थे धनसंयुता।कीर्तिश्च पंचमे ज्ञेया षष्ठे रिपुविनाशनी।सुखदा सप्तमे ज्ञेया हर्षदा च तथा

हृमेसोख्यादानवसेराज्ञेदृष्टामेकर्मदृष्टिदा।स्थिरालानगसेत्रेयाव्ययगेधनसंयुता।जीवेधनाढ्या
लग्नस्थेद्वितीयेचतथानवेत्।चन्द्रास्पदाद्तीयेतुचतुर्थेधनसंयुता।पंचमेसुतदाप्रोक्ता।षष्ठेशत्रु
विनाशनी।सप्तमेराज्यदाकर्तुरष्टमेचसमृद्धिदा।कीर्तिदानवमेज्ञेया।दशमेचसमृद्धिदा।लग्नस्थ
लानदाज्ञेयाव्ययेलानसमन्विता।लग्नस्थेनिश्चलेशुक्रेसर्वकामप्रदानवेत्।धनगेचधनंदद्याच्चतृ
येन्नाद्दृद्धिदा।चतुर्थेसुनगाज्ञेया।पंचमेसुतदृद्धिदा।षष्ठेतुहन्त्यनेशुक्रेसप्तमेधनवृद्धिदा।अष्टमे
सुखदाप्रोक्तानवमेचसुखार्थदा।दशमेलोककांता।स्यादस्मिन्नाशालयाप्युगे।तथाव्ययस्थेविज्ञेयाम
व्ययेसधनातथा।मृत्कद्वालग्नगेसौरेदृता।शस्याद्वितीयगे।तृतीयेधनलाजायचतुर्थेकिर्इमृत्कदा
सुतगेसुतनाशःस्याद्रिनाशस्तथारिगे।जायानाशस्तुजायास्थेमृत्कर्मत्कट्वोपगेधर्मगेधर्म
हानिःस्यात्कर्मनाशस्तुकर्मगे।मदालानस्तुलानस्थेव्ययगेचव्ययोनवेत्।शून्यंविवर्जयेत्केन्द्रेतन्न
चैवनियोजयेत्।एवंज्ञात्वातुनंकालंप्रयत्नेननरोद्देववित्।कुर्यात्प्रतिष्ठांयत्नेनगृहाद्यादवथा

का०दे० ३४३

नतः।शुनेह्निसर्वंपत्रस्थांतत्कालंप्रतिमांचयां।सप्तमेत्रिपीठिकांगर्तेस्थापितांविनिवेशयेत्।तत्काल
मेवकुर्वीतनामाचास्यासमाहितः।लग्नणसयुचये।पादालकनचतुर्नाडीनागःस्याद्मीनमेषयोः।वृष
कुंभेचतुर्जानौचनस्त्रःपादवर्हिनाः।मकरेमिथुनेचैवपालिङ्गरिकर्कटे।पादोनापटुनाकन्यावृश्चिका
सार्धपंचतु।केसरीचतृपक्षेनस्थिराःस्फःस्तिद्विदाख्यये।चरंधनुस्तुलामेषाद्वयुग्ममिनकन्यके।कर्कटो
कर्कटोलिश्चप्रकृज्ञाकार्यना।शाकाः।स्थिरःस्थनगेदईदः।शास्त्रोलग्नस्तुतात्रायः।गुरुस्तुक्रवुधेषुतो
लग्नाद्द्याद्वनायुषी।राज्यंसौख्यंबलंपुसांदेशाधर्मादिकवक्रात्।प्रथमःसप्तमस्तुर्यदिशमःकेन्द्रउच्यते।
गुरुशुक्रवुधास्तत्रसर्वसिद्धिप्रदायकाः।त्रिकादशा[illegible]योयःषडाःशुनाः।त्र्यतोनिष्टकर्मार्थ
योज्यास्तिथ्यादयोवुधैः।सुयोगेशाश्वतोधर्मःस्थिरायुःपुष्टिजीवितं।सुलग्नेचमदानागाविष्णुवोचस्थि
तफलं।षट्त्रीतिमुखेपुण्येअयनेचमहानिधौ।उदिनारोग्यमैश्वर्यदिवस्थापनतोनवेत्।संध्याग
तेकुलत्रौचचन्द्रस्थितिमितदुर्गदे।कुतिदायपंडुष्टनहत्रेचैवमज्ञदे।कुर्मिमित्रेनयोसानेचेदृष्टयीपमर्द

ने। एतेषु स्थापिता देवा नृपदुर्निवारा गदाः॥ तस्माद्दिनं निरीक्ष्यादौ सर्वोपस्करमाहरेत्॥ मत्स्यपुराणे। उद
ताराबलं बुधानन्दं ह्यग्रां विधाय च। निमित्तं शकुनं लब्ध्वा वर्जयित्वाद्भुतादिकं। शुभकाले शुभस्थाने क्रूरग्र
हविवर्जिते। तथैव देवता वीत प्रतिष्ठादिकमुत्तमं। अयने विषुवे पुण्ये षडशीतिमुखे तथा। एतेषु
स्थापनं कार्यं विधिदृष्टेन कर्म्मणा। विष्णुधर्म्मोत्तरे। यस्मिन्नृक्षे च देव्या कं फल्गुनाप्रतिसत्तम। तद्दैवद
त्येष्वर्क्षेषु कर्त्तव्यापि याद्वरौद्रः सार्प्पे तथा मैत्रे पित्र्ये वासव एव च। अथर्वे च पुरस्तथा ब्राह्मं केश्वरः।
हे सर्वदैवता। ऐन्द्रे तथैव नैर्ऋते वारुणे च महीपते। आर्यम्णे च तथा नाग्ये मुक्त्वा भाद्रपदा चरः। रौद्रजपा
द दिवु भः पौष्ण्ये श्वाश्विन एव च। याम्यां ग्नेये वते श्रेव त्वाष्ट्रे सौम्ये तथैव च॥ त्वाष्ट्रे सार्जीवदैवते सौवेश्वदेवस्य का०ई०
र्यदैवतः॥ वह्नौ श्रेवाथ याम्ये च मूक्तं ताराश्विवारिणः॥ तथा। दिनमध्यगते सूर्ये मुक्त्वैनिजिदृष्टिमासः ३४।४
र्वकामसमृद्धिः स्यात् सर्वोपद्रववर्जितः॥ मत्स्यपुराणे। प्राजापत्ये तु रात्रौ पुनः ब्राह्मे चोत्थापनं न वेत्। मूल
ऽर्क्षे स्थापने कार्यालेन व्रास्येवि च क्षणः॥ विष्णुधर्म्मोत्तरे। गुरौ वस्तमयं प्राशनी च स्थैकदर्श्यानिति। तस्माद्

तस्थे जीवेच धनधान्यकारी न वेत्। ब्राह्मे रौद्रे तथा द्वैपा प्राजापत्ये सुखावहा। स्वर्ग्ये लोकप्रदा स्वर्गे च
के च क्षयवर्त्तिनी। वनस्पत्ये तु वरदा आम्नेयां तविवर्द्धनी। वासे न वति वरुणा ब्राह्मकाले मृत्युप्रदायि
नी। आग्नेये दाहमाप्नोति क्रोशमष्टे च तेन तथा। सौरे न वति सुस्फीतां वां द्रेच वरदा तथा। नरपान तथाश्वि
दैवत्ये गोदैवे वृद्धिमाप्नुयात्। वैत्रे च पुष्टिदा प्रोक्ता तथा न वति पूजिता। कौमारं वृद्धिमाप्नोति पित्र्येन।
शान्तथैव च। वारुणे रोगदा प्रोक्ता शुनावानैर्ऋते वते। वपलावनर्द्दे वसेयाम्ये मृत्युप्रदा न वेत्। वायव्ये
पे सदा वा चाश्री रस्ये श्रीसुतान वेत्। धनदे धनसंयुक्ता सुदृढा शैलदैवते। पृथ्वीदैवे दृढा सौम्ये सु
नास्या वेदे दैवते। पौरुषे च तथारोगे बहुधर्मविवर्द्धना। कर्त्तुः सुखावहा चैव तथा ताहृ सुता न वेत्।
इति सामान्यप्रतिष्ठा॥ ॥अथ शैवप्रतिष्ठा॥ लक्षणसमुच्चये। उत्तरायणगते ज्ञाने लिङ्गस्थापनमु
त्तमं। दक्षिणे च यये नेवस्यन्ति वर्द्धिनयावहं। संग्रहे स्थापनं नेष्टं तथा वेदक्षिणायने। संग्रहे स्थापि
ते लिङ्गे व्याधिना पीड्यते प्रजाः। कुमाराः संपीड्यते कन्याना श्यन्त जायते। सुमहान् राज्यकोपश्च तदारा

त्रं प्रजायते। कर्त्तुः क्षयः सदा येषां नाशो राज्ञः प्रजायते। कर्त्तुश्च यः सदा शोको गृहे न वर्त्तिदारुणः॥ तस्मात्
स्थापयेद्देवं सम्यग्देवज्ञनिर्णयतः। स्थापनं तु प्रकर्त्तव्यं शास्त्रे राशोदयत्त्रये। ग्रहेष्वपि स्थापितं सिद्धे नवहृ
द्ययोगतः। इमं ते ज्ञानदं लिंगं शास्त्रे सर्वतृतिदं। लग्नी श्रद्धं वसंते च स्त्रीग्रीष्मे वर्षे न शांतिदं। यतीनां सर्व
काले च लिंगस्यारोपणं मतं। रत्नोपलं। माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु। मासेषु शुक्लपक्षेषु
रिक्ता विवर्जिते। द्वितीया पंचमी षष्ठी सप्तमी नवमी तथा। दशम्येकादशी प्रोक्ता शर्म्मा च त्रयोदशी गु
रुः शुक्रो बुधः सोमो वरयेत सुखावहं। आर्द्रा शतभिषा स्वाती रोहिणी श्रवणं वृषः। पूर्वा पूर्वात्तराषाढ
ज्येष्ठा श्लेषाचारवत। चित्रा हस्तो धनिष्ठास्यादनुराधा च सिद्धिदा। लक्षणसमुच्चये। नमस्त्रेयत्रत त्रापि का०ई० ३४५
सर्वकाले द्विपक्षयोः॥ लिंगस्य स्थापनं शस्तं यतेः कामार्थिनो भवा रत्नावल्यां। सोनायः सौनतो युक्ता
नु सिद्धिः साध्यः शिवस्तु जा॥ वृद्धिमातिघतिसिद्धिः भवस्तु क्रोशपथस्रोतनः। बवं च बालवं चैव कौलवं तै
तिलं शुभं। मेषं परमं मेचवसंपक्केमंयपाशुभो लग्नश्च वृश्चिकः सिंहो मेषो मिथुनकर्कटौ। तथा कन्या॥

तुलाकुंभो वृषश्चैव प्रशस्यते। रविहस्तो न वै सिद्धिः सोमे मृगशिरस्तथा। कृत्तिका भौमवारे स्यादनुराधा बुध
वज्रा। रेवती च गुरौ शुक्रा शुक्रवारे पुनर्वसुः। श्रवणं शनिवारे चेत् सिद्धियोगाः शुभान्वता। जन्मनं च तृतीयो
थ च पंचसप्तमकाष्टमास्तु नाः॥ भौममंदौ च पश्चाद्वा द्विसप्तार्के शनिर्गुरुः। जन्मत्र्यर्णेमाष्टाष्टादशमस्थः
शुन बुधः। रससप्तदशाद्यस्थः। शुक्रश्चाथ प्रयत्नतः। त्रैत्र मध्ये महाः सर्वेयमघंटेति निश्चिताः। यस्मा
त्तेषु सर्वकार्यघ्नास्तस्मात्तान्परिवर्जयेत्। कृष्णे चंद्रमसो हानिस्तर्या कौ तैष्यतो बुधः। पापाः पापाश्रया
द्दृष्टास्तस्मात्तान्परिवर्जयेत्। केंद्रस्थे च गुरौ शुक्रे केन लग्ने होर्यथा भद्राः। नष्टे वक्रे तथा शुक्रे गुरौ च
संगते सति। प्रतिष्ठा दोषु नारं नानं हरयात्रां च वर्जयेत्। अनस्तगुरुलग्नेरयवजो वितिःरूणरुविश्वारे शस
मालोकनिपुंश्रीत सर्वसाध्यान्यथाचरेत्। लक्षणसमुच्चये। सुदिने सितपक्षे रविवारर्क्षं भूषिते॥
शुचं द्वतारकायो येगेशुलग्ने करणान्विते। द्विवादरप्रतिष्ठास्यात् मिश्रिते च सितपक्षके। अदैन्ते नैव कृ
ष्णेपि मंत्रमूर्तिप्रनेहनेः। द्वितसिद्धांतकौरोडीशातव र्याणितिष्टति। पंचरात्रेहरे स्मिन्नापंचाशद्वर्षे

स्थितिः। अब्दे तेनैरवीयात्तु वामदक्षिणामंत्रजा। ज्ञानाद्धर्द्धं उसा तिष्टे बाणलिंगस्वयंभुवा॥ ॥इति शिवप्र
तिष्ठा॥ ॥अथ विष्णुप्रतिष्ठा॥ वैखानससंहितायां। अयने चोत्तरे कुर्याद्दक्षिणे वा त्वरान्विते। देवीपु
राणे। व्यष्टेनेरवृवारादनरसिंहत्रिविक्रमः। महिसुरं पापसुरईत्रन्नस्थाप्यावैदक्षिणायने। वैखानस
संहितायां। मार्गशीर्षे कमाघौ च निंदितौ ब्रह्मणा पुरा। मासेषु फाल्गुनः श्रेष्ठः चैत्रो वैशाख एव च।
वा प्याश्वयुग्मासे श्रावणे मासि वा नवे त्। तत्त्वसागरसंहितायां। प्रतिष्ठात्रर्पिति। प्रोक्ता याः क्रमाद्बसा न
थसा। प्रतिष्ठापद्वितीया च नवमी च त्रयोदशी। दशमी च द्वादशी च शुक्लपक्षेषु ना ---- मद्रा
पंचरात्रे। पौर्णमास्यां त्रयोदश्यां चादशम्यां शुक्लपक्षतः। प्रतिपद्विती ययोर्वापि चम्पा दशम्या म - स
स्थिता स्ति थयश्चैता नक्षत्रयोग कृष्ण पक्षमे। वैखानससंहितायां। श्रवणे चैव रोहिण्यां स्वात्यां हस्त पु
नर्वसौ। त्रिषु तरेषु रेवत्यां श्रवणे वा करणे तथा। सौम्यत्वा अनुराधायां। विशाखासु विशेषतः। अश्वि
न्युभश्शस्तेवा यथोक्तगुणसंयुते। अश्विनी रोहिणी यागे पुनर्वसौ च पुष्पतः। नरः णपाश्रवणे हस्ते रेवत्यां

का०६० ३४६

मुत्तरासु च। त्रिषु नक्षत्रयोगेषु क्रमेणैश्चरायणे। तत्त्वसागरसंहितायां। सोमो बृहस्पतिश्चैव भार्गवो
पबुधस्तथा। एते सौम्याग्रहाः प्रोक्ताः प्रतिष्ठा यागकर्मणि। ग्रहवारो ऽस्ति सौम्यानुकूलाः। मत्स्य पंचरात्रे॥
सौम्यग्रहे शस्तदिने सोमानागे च वासरे। ग्रहयोग एवं नवेल्प्रतिष्ठा यज्ञकर्मणि। वैखानससंहितायां।
नरसिंहपुराणे। इर्वे पक्षेषु मेकाले स्थिते चोर्ध्वमुखे पिने। अनुकूले च लग्ने च हरिस्थाप्यो नरैस्तथा॥ न
क्षत्रे च तिथौ युग्मे प्रशस्ते विष्टिवर्जिते। गुरुः शुक्रबुधैर्युक्तिमेक वा स्युतेषु ने। ग्रामस्य यजमानस्या
नुकूले पितन्त्रे व चराशिं विवर्ज्याथ स्थिरराशिं प्रगृह्य च। सुप्रशस्ते मुहूर्ते वै प्रतिष्ठायां कारयेत्॥
लक्षणासमुच्चये। शुभदिने सितपक्षेन सुवारर्क्षे विभूषिते। शुभं चंद्रतारकायोगे सुलग्ने करणान्विते। देव
देवप्रतिष्ठास्यान्मासे च सितपक्षके। अब्दे ते नैवबद्धेपिमंत्रमूर्तिभनेदत्तः। देनास्ति हानकीरो दीशतं
वर्षाणि तिष्ठति। पंचरात्री हारन्मिश्रा पंचाराव र्षसं स्थितिः। अब्दे तानैरवी सातु वामदक्षिणामंत्रजा॥
मधूककाष्टप्रतिष्ठा स्यात्। वाराहपुराणे शुक्लपक्षे उपादश्यां नक्षत्रे रेवते न पात तत्र संस्थापने कुर्या

भूमिसिद्ध्यर्थसाधनं॥ ॥इति विष्णुप्रतिष्ठाकालनिर्णयः॥ ॥अथ देवीप्रतिष्ठाकालः॥ देवीपुराणे। गुरौ मेष
गते शुक्रे देव्याश्चापि प्रतिष्ठयेत्। इड्डे वा नवे वा नोऽन्यतो गच्छेत्परं पदं। तस्मान्मेषगते शुक्रे उत्तमा नवमी मता
तथा मदे श्विनो मासस्तु उत्तमः सर्वकामदः। देवी तत्र सदा शान्तरूपा स्तुत्यापि प्रतिष्ठिता। नवर्ते फलसम्पूर्णं साक्
र्कस्थे च वृषस्थिते। तथा च सिद्धगंधर्वनृपा वा राज्यकांक्षिणः। ते यजन्तु सदा देवीं स्थापयित्वा विधानतः।
न तिथिर्न च नक्षत्रं नोपवासोऽत्र कारणं। माहेश्वरे वा दाने नरसिंहत्रिविक्रमः॥ महिषासुरहं त्र्यम्बस्थाया
चैव दक्षिणायने। तथा च तु षष्टि प्रतिष्ठायाः। ब्रह्माऽरवा च॥ स्थापने च भवत्स्वामि सर्वकामप्रसाधकं। स
र्वकालं प्रकर्तव्यं कृष्णपक्षे विशेषतः॥ रात्रिरूपा यतो देवी दिवारूपो महेश्वरः॥ अतस्तु कालमज्ञात् का०हे०
ज्ञानिः सिद्धिदा परमेश्वरी॥ ॥इति देवीप्रतिष्ठाकालः॥ ॥अथ वापीकूपादिप्रतिष्ठाकालः॥ वह्निपु ३४७
राणे। वापीकूपतडागानां तस्मिन्काले विधिः स्मृतः। शुद्धे दिने शुभनक्षत्रे प्रतिष्ठा शुभदा स्मृता। कर्कटे
अथ चला न स्युस्ते स्युस्तु मकरे न वेदा मीने वृषे तथा पर्णा न स्युः कुंभे च सुवक्त्रे कों वृषे च मिथुने च वृश्चिके

उर्लग्ने लक्ष्मीश्च द्विजग

चग निर्जले न वेदापि च दृष्टि सिंहेतु कन्यायां तुलायां शाश्वतीगतिः॥ सिंहे मेषे धने नाश्रो लग्नश्चे द्विजये छतील
विष्णोर्न रो तस्मिन्सलिले संस्पर्शे कार्त्तिके ये विशेषतः। तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः। शु
न यत्के विदिष्ठे तिथ्यतीते चोत्तरायणे। न कालनियमस्तत्र सलिलं तत्र कारणं॥ ॥इति वापीकूपादि
प्रतिष्ठाकालनिर्णयः॥ ॥इति श्रीमहाराजाधिराजश्रीमहादेवीयसमकरणाधीश्वरसकलविद्या
विशारदश्रीहेमाद्रिविरचिते चतुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये प्रतिष्ठाकालनिर्णयः॥
अथ दीक्षाकालाः। तत्र नानादेवतादीक्षाकालाः॥ कालोत्तरे॥ शरद्वसंतयोर्योगो दीक्षाकर्मविधौ मतः॥
तयोरसंभवे वर्षास्थितान्यत्रापि शस्यते। दीक्षायामनिपूके च तथा मंत्रपरिग्रहे। व्रतग्रहणमोक्षे
चंद्रव्याखंननकर्मणि॥ कार्त्तिक्यां चैव वैशाख्यां स्वजनोनोर विदर्शने। तत्रैव चंद्रसूर्योपरागेषु
पंचदशीतिसुखे पुत्राग्रहे नक्षत्रयोगे च - - - वेष्वन्यस्व पुवा। अयने पुच सर्वेषु योगः सर्वार्थसिद्धि
दः॥ कारणे॥ श्रावणे भाद्रे च मासे च आषाढे मार्गशीर्षके। दीक्षां न कारयेद्धीमान् अन्यमासे तु कारयेत्।

शुक्लपक्षेऽशुभे कृष्णे रिक्ते नवा रतिथिषु च ॥ क्रियाकाण्डे त्वखिलेन विना पर्वदीक्षास्या दर्शास्तु मधुपौषयोः ॥ अन्येऽ
ष्वसदृशकार्यापि विशुद्धेषु ॥ रुद्रिशयपोः ॥ वर्षादौ तु निमित्तानि यस्मात्फलं सदैव ॥ वर्षादिषु निषिद्धेषु ---
कालेषु कदाचन ॥ अशुनक्षत्रकुनानां सुपलं नैसर्गिदीक्षाकर्त्तव्यं स्यात्प्रयत्नः ॥ प्रसिद्धास्तिथयोऽत्र दर्शेन गुरुपर्व च
पवित्रकतिथिश्चैव दीक्षाकर्मविधौ वराः ॥ रत्नावल्यां ॥ तत्र पञ्चमी नवमी षष्ठी अष्टमी च चतुर्दशी ॥ पौर्णमासी वि
शेषाद्धि हिता मुक्तौ मुक्तौ मुमुक्षुषु ॥ आदिसंमंगलासौ त्रिंश्लकावारास्तु नूतये ॥ सप्तम्यां च नवम्यां च एकाद
श्याम थापि वा ॥ द्वादश्यां च त्रयोदश्यां दीक्षाकर्म प्रशस्यते ॥ कविन्तु त्रयोदश्यां न मनावास्यायामिति पाठः ॥ सितेत्
उत्तरायणात्परीक्षेत गुणागुणौ ॥ गुणे गुणसंख्याया मागुणादीनां तु वर्जयेत् ॥ कालोत्तरे ॥ चतुर्थ्यामिष्टवा अष्टम्यां का०हे०
चतुर्दश्यां तथैव च ॥ पौर्णमास्यां प्रकर्त्तव्यं भूतिकामैः सितेतरे ॥ मुक्तिकामैः तु पक्षे यत्किंचित्कर्म चारभेत् ३४८
दिन छिद्राणि मुक्ता च याश्चान्यास्तिथयः स्मृताः ॥ नवसागरसिंहीतायां ॥ नानातिथिपुराजो च्यतउक्तान
त्रेदीक्षयेत् ॥ ॥ इन्द्र उवाच ॥ कस्य कातिथिरुद्दिष्टा विशेषाद्देव नारद ॥ संक्षापान वदीक्षायां विशेषवस्तरंत

था ॥ नारद उवाच ॥ ॥ ब्राह्मणस्य पौर्णमास्य क्षत्रस्य दशमी च कथ्रितेः ॥ चतुर्दशी त्रिवस्यो क्ता वाच शो ताव
तुर्दशी ॥ द्वितीया तु प्रियं प्रोक्ता पार्वत्यास्तृतीयका ॥ नित्यमार्गेषु पार्वत्या अष्टमी च चतुर्दशी ॥ अष्टमीग
णनाथस्य नागोः प्रोक्ता च सप्तमी ॥ एवं मुख्यास्तु सञ्ज्ञपात्तिथयः परिनापिताः ॥ प्रपंचेन तिथिंस वन्नि वि
त्तारोपणं स्मृता ॥ कारणे ॥ पोष्टमेरोदिन्यथादित्ये श्रवणं चाश्विनी तथा ॥ सा विज्ञता इस्वाय पव्येन स्रते मेत्रमे
च च ॥ तिष्यपुष्ये विरुत्तरा गपुत्रविशेष त्रिजन्मजे न क्षत्राणि प्रशस्तानि दीक्षाकर्मणि सुव्रतः ॥ रत्नाव
ल्यां ॥ त्रीण्युत्तराणि रोहिण्यः पुष्यकं मृगशीर्षकं ॥ हस्तस्वातिस्वनुराधा मघा मूले च रेवती ॥ अभिजित्क्षवणं
चेति शिवयोगचतुर्दशी ॥ योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनः स्मृतः ॥ सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सि
द्धिश्च हर्षणः ॥ वरीयांश्च शिवः सिद्धो ब्रह्मैन्द्रश्च षोडश ॥ निंद्यानि तानि यस्तानि विमुक्तये ॥ किंतु देशि
से फादौ तु नान्यत्रापि सर्ववत् ॥ प्रतिपत् सर्वपापा च पञ्चमी हतिकान्तथा ॥ सर्वेन्द्र पदाज्ये ष्टा दशमी रोहि
णी तथा ॥ दादश्या मार्यनक्षत्रे अर्यम्णा च त्रयोदशी ॥ नक्षत्रं तु बार स्येते देवानामपि नाशदा ॥ कारणे ॥ राशो

ञ्चराः॥ अष्टमध्यमाः प्रोक्ता ये स्मृताः॥ स्थिरश्चैव चरश्चान्ये यज्ञ सर्वे विवर्जिताः॥ आचार्यशिष्ययोरानुकू
ल्यं यत्र लग्नं भवेत्॥ तिथ्यादिदोषे सत्यपि तस्य वर्गसंयुक्तं लग्नं तत्र कल्पयेत्॥ चरांगे चरस्थाद्दिश्यं दोषोतिःशो
स्यन्ती यता॥ लग्नदोषापदे दोषाः सर्वे नश्यन्ति नान्यथा॥ लग्नस्थानगर्वे षोडशे केन्द्रस्थे चरस्थे हस्ते॥ दृष्टा
दितिपुष्यं वा सदीक्षा मोमुख्यं नाम तिथिमोमुख्यं वा प्रति नय कालनियमः स्मृतः॥ वर्णमात्रेषु सिद्धा
न्वेषु सिद्धान्मेलयेद्बुधः॥ वर्णवानुक्रमासीनानां गणयेद्यानि॥ पृथक् सिद्धार्णोऽइरेणगवसुनिर्नानुनि
स्वरैः॥ शुद्धरात्रौ सुयः यो यो याम संस्थादिना दिता॥ रिपुरात्रिगते शोषो मासो सो परिकीर्तितः॥ स्वरेश्व
दृष्टो नागं तिथिसप्तमायमंत्र गं॥ मासितस्मिं स्तथा यामे कवीतग्रहणं मनोः॥ ज्योतिशास्त्रानुनिर्ति का° दी°
लमेवादीक्षितो न वेत्॥ अत्र दीक्षार्थयशस्तानितिथीः प्रतिपद्य॥ तत्त्वसागरसंहितायामुक्तं॥ विष्टिवि ३४(?)
नापि दीक्षायां विशिष्टा च सरस्वती॥ गुर्वनोरस्तु रूणं वृसूत्र संगरवपस्थिते॥ तद्वत्तु ज्ञाय दालक्ष्याम
सदीक्षा च सरोमहान् याममेवायदिवारणं प्रवेत्रवादि वसेनिशि॥ आगच्छति गुरुर्देवाय दादीक्षा तदा

न वेत्॥ ग्रामादीक्षातदा ज्ञेया गुरोर्वा समुपस्थिते॥ यदि वेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः॥ नृति
थिर्नग्रतं होमो न स्नानं न जपक्रिया॥ दीक्षायाः कारणं किंच पुत्रे च्छा जो गुरुर्वसेत्॥ इति नारदवदी
क्षाकालनिर्णयः॥ ॥ अथ विष्णुदीक्षाकालः॥ शैव पंचरात्रे॥ विज्ञाय नीति श्रवणं द्विशिष्यमुद्द
द्दतो नीक्षाकरस्यकाले॥ सोमस्य हृष्ठौ सुनलग्न सुत्रे संदीक्षये द्वेत्नपयागुरुरुत्र॥ महापंचरात्रे॥
द्वादश्यां शुक्लपक्षस्य सूर्यसंक्रमणे तथा॥ द्वादश्यां कृष्णपक्षस्य पौर्णमास्यां सुने घवा॥ अमा
वास्यां च वा काल सुद्दिश्य हे ज्ञकः॥ तदेवादित्यदः सर्वमधिवासनमारभेत्॥ तत्त्वसागरसंहिता
यां॥ ब्राह्मणः पौर्णमास्यां च द्वादश्यां चक्रधारिणः॥ चतुर्दश्यां शिवे प्रोक्ता वा च प्रोक्ता चतुर्दश्यां ज
र्वे पंचरात्रे॥ नवद्वादशी विषये॥ दीक्षाविधौ वैनवके च काले स्याद्वादशी पंचदशी तिथिस्तु॥ एकाद
शी पंचदशी तिथिर्न वृत्ता च चतुर्दश्यथवाष्टमी च॥ पत्रादिके योगविधौ प्रशस्ता स्याद्देवतानां
नवमी चतुर्थी॥ ॥ इति श्रीमहाराजाधिराजश्रीमहादेवीय सकलविद्याविशारद श्री हेमाद्रि

रवितेचतुर्वर्ग्यचिंतामणौ परिशेषखण्डे कालनिर्णये विष्णुदीक्षाकालनिर्णयः॥ ॥अथ नैमित्तिका
दिदैवतानां पूजातद्गानां कालाः॥ विष्णुधर्मोत्तरे। कालश्च द्विविधो ज्ञेयः स्थूलः सूक्ष्मोपलक्षितः। स्थू
लश्च लौकिके ज्ञेयः सूक्ष्मश्चाध्यात्मिकस्तथा। सर्वं स्थूलेन कर्तव्यं स्थूलकालविधिं शृणु। स्वस्थानका
लिकानि मेषे चत्वारि गिरस्तुटिः स्मृता। तद्द्वयं तु लवः प्रोक्तो निमेषस्तद्द्वयं नवेन्नु निमेषाः पंचदश।
काष्ठास्त्रिंशत्काष्ठाः कलाः स्मृता। त्रिंशत्कालो मुहूर्तश्च तद्द्वे घटिकाद्वयं। सार्द्धश्च नाडिकाः स
प्तयामं तत्संधिरुच्यते। संधयोश्चैषा समाख्याता अहोरात्रे विचक्षणैः। यजनं प्रतियानं तु उत्तमं त्व
तिक्रितिं। उदये चैव मध्याह्ने त्रयोदशो वार्द्धयामके। यजनं मध्यमं मध्यमुदये त्वमयं समं। परार्द्धमेषु काण्डे०
कालेषु पूजयेत्तु विशेषतः। द्विकालं वा त्रिकालं वा आत्मार्थं संप्रपूजयेत्। पूजारं नोपयत्स्य तं स ३५०
र्वसंध्याविधिं कुरु। संध्यातिक्रमणाद्दोषाः हृते चेत्तु न दोषकः। पूर्वाह्ने चैव मध्याह्ने प्रदोषे च वलि
माहरेत्। अन्यासु सर्वसंध्यासु चानारेत्तु बलिक्रमं। अर्द्धयामे बलिं कुर्यात्कार्यार्थं तु विशेषतः॥

निस्तोस्तवे च पूजायां तथा संवत्सरोत्सवे। कारयेत्तु विशेषेण अन्यथा चेन्न कारयेत्। भास्करोदय
मारभ्य यावत्तु दशनाडिकाः। प्रातःकाल इति प्रोक्तः स्थापनोपणादिषु। पूर्वाह्नाच्च समारभ्य यावत्तु
दशनाडिकाः। मध्याह्न इति विज्ञेयः सायंकालस्तथोच्यते। मध्याह्नाच्च समारभ्य यावत्तु दशनाडि
काः। सायंकाल इति प्रोक्तः प्रदोषोऽधुना शृणु। अस्तमानं समारभ्य सार्द्धः सप्तचनाडिकाः। प्रदो
ष इति विख्यातस्त्वर्द्धयाममतः शृणु। प्रदोषान्तं समारभ्य त्रिपादेन त्रिनाडिकाः। अर्द्धयाम इति
प्रोक्तं अर्द्धरात्रमथोच्यते। अर्द्धयामान्तमारभ्य यावत्तु दशनाडिकाः। मध्यरात्रमिति प्रोक्तं रात्रिर्नि
क्तमथोच्यते। भास्करस्योदयात्पूर्वं त्रिपादेन त्रिनाडिकाः। रात्रिनक्तमिति प्रोक्तं ज्ञात्वेवं सर्वमाचरेत्।
जलसंग्रहणं पुष्पसंग्रहं यजनं तथा। उदयाद्देववक्त्रंशयाग्नेते वा जलग्रहः। देवतास्थाप
नं तीर्थं प्रातःकाले समाचरेत्। प्रातःकालं तमारभ्य यावद्वै दशनाडिकाः। नावद्वापि च कर्तव्या
तीर्थकार्यं प्रजापते। अंकुरार्पण कार्यं तु उत्सवस्याधिवासनं। सायंचमारनेशीमान्नरत्नात्तु

चपबंधने। स्थापने प्रोक्षणे चैव गर्तन्यासे तथैव च। अधिवासनानि सर्वाणि मध्यरात्रे तु कारयेत्॥
रात्रेंतिके विशेषेण सर्वदेवक्रियार्थकं। कुर्यात्स्वरमहाशांतं दात्स्वननिवृत्तये॥ ॥इति निर्णे नैमि-
त्तिकादिदेवतापूजाकालनिर्णयः॥ ॥इति विष्णुपूजाकालः॥ ॥तत्र विष्णुधर्मोत्तरे। एककालं द्वि-
कालं वा त्रिकालं पूजयेद्धरिं। अपूज्य भोजनं कुर्वन्नरकाणि व्रजेन्नरः॥ नारदीये। प्रातर्मध्यंदिने सायं
विष्णुपूजां समाचरेत्। यथासंध्यं तथा नित्यं देवपूजा स्मृता बुधैः। अशक्तो विस्तरेणैव ततः संपूज्य
केशवं। मध्याह्ने चैव सायं च पुष्पांजलिमपि क्षिपेत्। मध्याह्ने वा विस्तरेण संक्षेपेण तथा वा हरिं। सं-
पूज्य भोजनं कुर्यादन्यथा नरकं व्रजेत्। निमित्तेषु च सर्वेषु तत्कालेषु विशेषतः। पूजयेद्देवदेवेशं प्र- का०दे० ३५१
त्यहं संपादयन्नतः॥ ॥इति विष्णुपूजाकालः॥ ॥अथ देवताविशेषपूजने तिथिविशेषाः॥ भवि-
ष्यत्पुराणे। ब्रह्मकल्पे। प्रतिपत्पावकी प्रोक्ता द्वितीया शानस्य च। तृतीया गिरिपुत्र्यास्तु च चतुर्थी वि-
घ्नहारिणः। पंचमी नागराजानां षष्ठी स्कांदी तिथिः स्मृता। सप्तमी सप्तसप्तेस्तु अष्टमूर्तेस्तथाष्ट-

---

मी। नवमी योगिनीनां तु दशमी तु दिशामपि। एकादशी धनेशस्य द्वादशी चक्रिणस्तथा। त्रयोदशी त्व-
नंगस्य भूतेशस्य चतुर्दशी। पौर्णमासी प्रजेशस्य पितॄणां दर्श उच्यते॥ ॥इति देवताविशेषेण तिथि-
विशेषाः॥ ॥अथ कामनाविशेषेण तिथ्यादिविशेषपूजाविशेषाश्च। भविष्यत्पुराणे। अग्नि-
मिष्ट्वा च हुत्वा च प्रतिपद्यमृतं घृतं। इह विषा सर्वधान्यानां प्राप्नुयादमितं धनं। ब्रह्माणं च द्वितीया-
यां संपूज्य ब्रह्मचारिणः॥ भोजयित्वा च विद्यानां सर्वासां पारगो भवेत्। तृतीयायां च वित्तेशं वित्तेशो
जायते ध्रुवं। क्रयादिव्यवहारेषु लाभो बहुगुणो भवेत्। गणेशः सर्वतः कुर्याच्चतुर्थ्यां सर्वकर्म-
सु॥ अविघ्नं विदुषां विघ्नं कार्यनासन्नकर्हिचित्। नागानिष्ट्वा च पंचम्यां न वा शेषेण निभूयते। स्त्रियं
वा लभते पुत्रान्परां च श्रियमाप्नुयात्। संपूज्य कार्त्तिकेयं तु द्विजः षष्ठ्यां प्रजायते। अमेयो रूपसंपन्नो
दीर्घायुः कीर्त्तिवर्द्धनः। सप्तम्यां पूज्यस्त्रेशं चित्रभानुं दिवाकरं। अष्टम्यां पूजितो देवो गोवृषानर-
णो हरः। ज्ञानं ददाति विपुलं कामजान्पच्छते गुणान्। मृत्युहा धनदश्चैव पापहा च प्रजापतिः। दुर्गा।

ग्रांसंपूज्यदुर्गाणांनवम्यांतरणीबुधा।संग्रामेव्यवहारेचसदाविजयमाप्नुयात्।दशम्यांधर्मराज
स्यसर्वव्याधिहरोध्रुवं।नरकादपमृत्योश्चसमुद्धरतिमानवं।एकादश्यांयथोद्दिष्टाविश्वेदेवाःप्रपू
जिताः।प्रजांधनंचधान्यंचप्रयच्छंतिमहींतथा।द्वादश्यांपूजितोविष्णुःसर्वैश्वर्यसमन्वितं।बहु
पुत्रोबहुधनःतथास्यात्तुनसंशयः।पौर्णमास्यांतुयःसोमंपूजयेद्भक्तिमान्नरः।बकृपत्संनवे
त्नस्यइतिनिश्चितामतिः।अमायांपितरःपिंडैरिष्टाकुर्वंतिसर्वदा।प्रजांवृद्धिंतथारक्षांआयु
ष्यंबलमेवच।उपवासंविनाह्येतेनवेत्वक्ताःफलप्रदाः।पूजिताजपहोमैश्चतोषिताभक्तितः
सदा।मूलमंत्राःस्वसंज्ञानिरागमंत्राःप्रकीर्तिताः।पूर्वंचपद्मपत्रस्थाःकर्तव्याश्चेतिपिप्परा।। का०हे०
एतेषांरूपाणिदेवतानांहिचालोकनीयानि।गंधपुष्पोपहारैश्चयथाशक्तिविधीयते।पूजात्रा ३५२
द्येनतथापिफलप्रदा।आज्यधारासमिद्भिश्चदधिक्षीरान्नमाहिकैः।यथोक्तफलदाहोमेजप
ध्यानेनचेतसा।कृत्वायदादशादेवफलान्येतानिभक्तितः।यथोक्तानियथोक्तानिलभतेव्याधि

कानिह।व्रतज्ञस्ययान्यस्मिन्निवसेच्चसुखीसदा।तेषांलोकेषुमंत्रेज्ञोपापवत्सेदतिथिःस्मृताः।इदंत
स्मात्परित्यक्तसत्तज्ञोनजायतेनरः।सुरूपोधनसंपन्नोविजितारिर्महीपतिः।स्त्रीपुंनपुंसकोवापिजा
यतेपुरुषोत्तमः।कूर्मपुराणे।देवतास्यर्चनंनृणंमनोपापाबोवनाशनं।अमावास्यांतिथिंप्राप्य
यस्त्वाराधयतेध्रुवं।ब्रह्माणंपूजयित्वाचसर्वपापैःप्रमुच्यते।कृष्णाष्टम्यांमहादेवंतथाकृष्ण
चतुर्दश्यां।संपूज्यब्राह्मणमुखेसर्वपापैःप्रमुच्यते।त्रयोदश्यांतथारात्रौसोपहारंत्रिलोचनं।दृ
ष्ट्वाज्ञेयःप्रथमेयामेसर्वपापैःप्रमुच्यते।।अमावास्यामयावास्यउद्दिश्यचपितामहं।ब्राह्मणां
स्त्रीन्समभ्यर्च्यमुच्यतेसर्वपातकैः।षष्ठ्यांमुपोषितोदेवंशुक्लपक्षेसमाहितः।सप्तम्यामर्चयेद्भा
नुंमुच्यतेसर्वपातकैः।भरण्यांचचतुर्थ्यांचशुक्लानेअरदिनेयमं।पूजयेत्सप्तजन्मोत्थैर्मुच्यतेपात
कैर्नरः।एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनं।द्वादश्यांशुक्लपक्षस्यमहापापैर्विमुच्यते।विष्णु
धर्मोत्तरे।।।।मार्कंडेयउवाच।कालेनतथाद्वयामिदेवतापूजनेपृथक्।संवत्सरेणधर्मज्ञस

पवासस्य सर्वदा। ब्रह्माणं पूजयेद्देवं सततं प्रथमेऽहनि। पद्मद्वये महानाग पंचदन्तपा सुपोषितः॥ सं
वत्सरेण धर्मज्ञ विद्याद्दृष्ट्वा वर्णकं। हंससंयुक्तेन यानेन ब्रह्मलोकं प्रपद्यते। चैत्रमासस्य या शुक्ले
प्रथमा प्रतिपद्भवेत्। तस्यां किं ब्रह्मणः कृत्वा सोपवासं सुपूजनं। संवत्सरमवाप्नोति सौख्यानि भृगु
नंदन। कालस्यावयवाः सर्वे तस्मिन्नहनि पूजिताः॥ यद्ग्रहाणि च धर्मज्ञ सौख्यं दद्युरनुत्तमं। संव
त्सराधिपं नागं तस्मिन्नहनि पूजयेत्। प्रद्युम्नं च सौख्यमाप्नोति सौख्यमग्र्यं तथैव च। तत्रापि ब्रह्म
णा सृष्टं त्रैलोक्यं प्रथमं द्विज॥ दक्षं प्रजापतिं नित्यं द्वितीयायामथार्चयेत्। फलमाप्नोति धर्मज्ञ गो
मेधस्य न संशयः। तथा नासत्ययोः कृत्वा तस्मिन्नहनि पूजनं। निःसमारोग्यमाप्नोति तथा रूपं च ना का०ह्रे०
श्वे वा शुक्लपक्षे द्वितीयायां बालचंद्रस्य पूजनं। कृत्वा दत्वा बलिं वर्णं धाग्यात्रिसुनगे न वेत्। साध्या ३५३
नां द्वाये प्रोक्तास्तेषां कृत्वा तु पूजनं। तृतीयायां महानाग वार्द्दग्गाद्द फलं न वेत्। तृतीयायां तदास
र्वविष्णुब्रह्ममहेश्वरान्। इष्ट्वा कृष्णम्महानाग त्रिवर्गफलमाप्नुयात्। त्रीन्लोकांश्च तदा नामस

स्यक्रमं पूजयेन्नरः। ऐश्वर्यमहदाप्नोति गतिमग्र्यां च विंदति। तृतीया श्रावणे कृष्णा या स्याद्दृष्टवणसंयुता। तस्यां
संपूज्य गोविंदं पुष्टिमग्र्यामवाप्नुयात्। वैशाखे शुक्लपक्षे तु तृतीयायामुपोषितः। अक्षय्यं फलमाप्नोति स
र्वस्य सुकृतस्य वा। सा तस्मात् कृत्तिकोपेता विशेषेण सुपूजिता। तत्र दत्तं कृतं जप्तं सर्वमक्षय्यमुच्यते। अ
क्षय्या सा तिथिस्तस्मात्तस्यां सुकृतमक्षयं। अक्षतैः पूज्यते विष्णुस्तेन साप्यक्षया मता। अक्षतैस्तु नरः स्ना
तो विष्णोर्दत्वाक्षतांस्तथा। अक्षतान्संप्रकल्प्य सुसंस्कृतांश्चैव कृत्वा चैव तथाक्षतान्। विप्रेषु दत्वा तानेव तथा स
क्तून्सुसंस्कृतान्। यावन्नवतं सुमहानाग फलमक्षय्यमश्नुते। एकामप्युक्तवद्दत्वा तृतीयां भृगुनंदन। एता
सां तृतीयानां सर्वासां तु फलं भवेत्। या कृत्वा सुनगवे नाम देवा दौरन्ययेत्सुरा। चतुर्थ्यां पूजयेत्तेषां कृत्वा
तया दिवमाप्नुयात्। यमराट् पूजनं कृत्वा चतुर्थ्यामेव धार्मिकः। नाप्नोति नारकं दुःखं ज्येष्ठं विश्रुतेन
रः। विनायकमथाभ्यर्च्य चतुर्थ्यां यदुनंदन। सर्वविघ्नविनिर्मुक्तः कार्यसिद्धिमवाप्नुयात्। निःशारति
तथा श्रावणे सरस्वती प्रज्ञा तुष्टिस्तथा कांतिस्तत्रैवाहनि पूजयेत्। तस्मात्सदा देवाप्नोति यथेष्टमनु

नोनमः।विद्याकामोविशेषेणपूजयेत्सरस्वतीं।देवानांमातरःसर्वास्तथातत्राभिपूजिताः।सर्वका
मप्रदाज्ञेयापुरुषस्यविपश्चितः।पंचम्यांपूजनंकृत्वातथाचंद्रमसोनरः।सौभाग्यमहदाप्नोतिप्रशस्ता
न्मैवविंदति।षष्ठ्यांपृथिवींदेवींपूजयेन्नरः।तामेवाप्नोतियत्नेननात्रकार्याविचारणा।विश्वेदेवास्तु
येप्रोक्ताःपूर्वमेवमयाद्विज।।तेषांसंपूजनंकृत्वापंचम्यांदिवमाप्नुयात्।इष्टंगंधर्वमभ्यर्च्यपंचम्यां
स्तुनगोनवेत्।तथाचित्ररथंतेषांराजानंतुविशेषतः।देवनार्यस्तथानार्यःसंपूज्यसुनगोनवेत्।।
इष्टांचम्सरसंचैवतथारूपमवाप्नुयात्।इष्टनागंतथाभ्यर्च्यश्रियमाप्नोत्यनुत्तमां।वारुणेपुष्कर
स्यात्रपिंचम्यांयःसमाचरेत्।सर्वकामसमृद्धस्यसपद्मस्यफलंलभेत्।तथाचपूजयन्राजन्नुतु काण्डे०
तंचैनलकूवरं।।श्रियःसंपूजनंकृत्वापंचम्यांप्रयतःसदा।श्रियमाप्नोतिविपुलांसर्वस्त्रेरमथो ३५४
दिते।सर्वस्यन्तपपंचम्यांगतिंप्राप्तिसरस्वती।उमांमेधांनडकालींतथाकात्यायनीमपि।धृतिंस्त
दांस्वधांमृद्धिमनुत्तस्यांतथाक्षमां।सुरभिंदेवसेनांचवेलोज्योत्स्नांतथाराचीं।गौरीवरुणपत्नीं

श्चपमपत्नींतथैवच।धूमोर्णांसुमहाभागांप्रथुछायांतथैवच।अग्निदेवजननींदेवपत्नींतथै
वच।पूजयेत्कामसमाप्नोतितत्स्यात्कामसंज्ञया।ऐरावणंचगुरुडमुच्चैःश्रवसमेवच।इंद्रस्यवृषभं
चैवचास्त्राण्यस्त्राणियानिच।तथासंपूजयन्राजन्विजयंसमुपाश्नुते।तथानाडपद्मेमासिशु
क्लपक्षस्यपंचमी।नागसंपूजनंकृत्वाधननागीनवेन्नरः।कुमारश्चतथास्कंदोविशाखश्चगुह
स्तथा।चतुरात्माविनिर्मुक्तादाष्टोनगवान्क्रौंचसूदनः।तस्यमनिरःपष्ठ्यांपुत्रानाप्नोत्यनिसीतान्
बालानांपूजनाच्छ्रेयोनरप्राप्नोत्यसंशयः।ऋतूनांपूजनेतत्रकृत्वासुखमवाप्नुयात्।स्कंदपा
श्वचराराजन्नरुद्रपार्श्वचरानपि।यमपार्श्वचरांश्चैवरोगमुक्तिमवाप्नुयात्।कालपाशेतथा
भ्यर्च्यनरंव्याधिशमेवच।रोगक्षयमवाप्नोतिवायुवह्निंद्रवंतथा।वैत्रपष्ठ्यांविशेषेणस्कंदम
भ्यर्च्ययेन्नरः।इष्टेवींक्तिफलमाप्नोतिस्वर्गलोकंचगच्छति।सप्तम्यांचसमभ्यर्च्यसूर्यपत्नींसुवर्चसं
इष्टान्कामानवाप्नोतिनात्रकार्याविचारणा।देवाएकोनपंचाशन्मरुतोनामकीर्तिताः।तेषांसं

पूजनं कृत्वा सम्यग्दिवमाप्नुयात्। इष्टस्य पूजां शीलस्य तद्वा कृत्वा सुखी न वेत्। पूजयित्वा तथा नी
ष्टा सरितं पुण्यनाकं न वेत्। वह्नेः संपूजनं कृत्वा अग्निष्टोममवाप्नुयात्। वायोः संपूजनं कृत्वा प्राप्नो
ति परमां गतिं। संपूज्य वरुणं पीनं समग्रं सोमसंज्ञास्तु ये स्मृताः। समग्रं प्राप्नोति तानेव गतिमग्र्यां च वि
न्दति। समग्रं पायद्रुवार्डुले इष्टमर्म्यर्चयेन्मुनिं। स्वाध्यायफलमाप्नोति तद्वा सफलमश्नुते। पू
जयित्वा समुद्रांस्तु सुद्वीपम ध्यंतद्वा नराः। पातालस्थो महानागं नु वमाप्नोत्यनीप्सितं। सप्तलोकां
स्तथा तत्र पूजयित्वा सुखी न वेत्। धियं चैव तथा वोग्र्यां मतिं च तिमांल नेत्। गंगां सप्तपकांग्र्याव
तथा देवीं सरस्वतीं। सद्य यज्ञानवाप्नोति नरः संपूज्य वै ध्रुवं। आदित्यं पूजयित्वा वै शीघ्रं रोगे कालदे०
ण मुच्यते। समग्रं याद्रवे श्रेष्ठं मतिमग्र्यां च विन्दति। नारं द्रपूजनं कृत्वा मतिमग्र्यां तथा लभे ३५५
त्। जपं तेन शाकतनयं पूजयित्वा सुखी न वेत्। अष्टम्यां पूजनं कृत्वा वस्त्रं नो धर्मविन्नमः। नाग
लोकमवाप्नोति गतिमग्र्यां च विन्दति। एकानंसां तथा देवीं तथा संपूज्य यत्नतः। सर्वकामसमृ

द्धस्य यज्ञस्य लभते फलं। महालक्ष्मीमनभ्यर्च्य नवम्यां यदुनंदन। काममेकमवाप्नोति यत्किंचि
न्मनसि स्थितं। चतुष्पथेषु रथ्यासु तथैवाम्रकेषु च। गिरिशृंगेषु रथ्यासु नदीतीरेषु वाप्यथ
गुहासु च गिरिद्रोणीपिशाचानां बलिं दरेत्। शक्रादीनां च देवानां ये च पार्श्वचरा मताः। तेषां
बलिं विनिःक्षिप्य क्षेममाप्नोति मानवः। आयुधं पूजयित्वा तु नरो विजयमाप्नुयात्। विद्यामा
प्नोति विपुलां पूजयित्वा सरस्वतीं। विद्याकामश्च कुर्वीत तथा पुस्तकपूजनं। तथैवाश्वयु
जे शुक्ले नंदकालीविशेषतः। नवम्यां पूजयित्वा तु सर्वान्कामानवाप्नुयात्। दशम्यां पू
जयित्वा वै विश्वेदेवांस्तथा दश। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते। तथा संपूज्य येद्या
न्तथैव वदिशो दश। क्रियासफलमाप्नोति यत्र तत्राभिजायते। धर्मं संपूज्य देवेशं सर्वस
त्त्वसुखावहं। धर्म्यां गतिमवाप्नोति धर्मं च फलमेव च। एकादश्यां च संपूज्य रुद्रानेकाद
शापरो। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते। तथा सर्वगतान्रुद्रान्सदा सर्वत्र पूज

येत्।सर्वान्कामानवाप्नोति सर्वगानपराजितान्।तथा च द्वादश्यादित्यान्द्वादशरूपां पूजयेन्नरः।द्वाद
शम्यां सर्वमाप्नोति गतिमग्र्यां च विन्दति।द्वादशरूपं देवदेवेशं पूजयित्वा जलाधिपं।पुण्डरीकमवाप्नो
ति वरुणं यादसां पतिं।सर्वदेवेश्वरं शक्रं पूजयित्वा तथा नरः।सर्वान्कामानवाप्नोति स्वर्गलो
कं च गच्छति।विष्णोः संपूजनं कृत्वा कामानाप्नोत्यभीप्सितान्।इष्टमग्र्यं फलं प्राप्य गतिमग्र्यां च वि
न्दति।त्रयोदशरूपामथाभ्यर्च्य कामादेवं जगत्प्रियं।सौभाग्यं महदाप्नोति गतिमग्र्यां च विन्दति।चैत्रशु
क्लत्रयोदशरूपां कामदेवमथार्चयेत्।अयनात्सर्वमाप्नोति फलं संवत्सरोदितं।यज्ञाणां राजसा
नां च चतुर्दशरूपां च पूजने।कृत्वा होममवाप्नोति छायासा फल्पमेव च।पूजयित्वा धनाध्यक्षं तद्दैवे
श्रवणं प्रभुं।बहुवित्तमवाप्नोति फलं संवत्सरोदितं।शंखपद्मौ तथा सर्वनिधीयज्ञप्रपूजितो मा
णिः सर्वधनमाप्नोत्यसंशयं।पूजयित्वा महादेवं सर्वकामानवाप्नुयात्।माघमासे चतुर्दश्यां कृ
ष्णपक्षे विशेषतः।तथा पितृगणान्राजन्त्रीणं चेदे प्रपूजयेत्।सर्वकामसमृद्धस्य यज्ञस्य फ

लमश्नुते।आर्द्रं कृत्वा तथा राजन्सर्वान्कामानवाप्नुयात्।पूर्णिमिंदुं तथाभ्यर्च्य सौभाग्यं महदा
प्नुयात्।इष्टगृहमथाभ्यर्च्य नक्षत्रेमथ वा नृप।तस्मात्होममवाप्नोति कामं च नृगुनंदन।मा
सनाम नक्षत्रे पौर्णमायोगवर्चया।पूर्वपित्वा तथा राजसौभाग्यं महदाप्नुयात्।सोपवासस्तु
नक्षत्रे नक्षत्रेशमथार्चयेत्।नक्षत्रं वाम नागेन तस्मात्काममवाप्नुयात्।कार्त्तिके यमहाना
गेन्द्रन्तिकात्सर्वयेन्नरः।वह्नि होममवाप्नोति कुलं चैव समुद्धरेत्।नन्तिकात्स्तु तथाभ्यर्च्य स
त्कं विजयमाप्नुयात्।नौजं गं नागमभ्यर्च्य श्रियमाप्नोत्यनुत्तमां।कामदेवमथाभ्यर्च्य नागपेसौ
नागपनाग्नवेत्।सावित्रे च तथा हस्ते नप्राप्तां कल्पमाप्नुयात्।इष्टग्रहादि तं देवं तनागंयच्छे
मेव च।गांधर्व वाग्रहं वापितस्मात्काममवाप्नुयात्।कृष्णपक्षे चतुर्दश्यां महाकालमथार्चये
त्।सर्वान्कामानवाप्नोति तथा शं नात्र संशयः।महेश्वरं मातृगणं तथा तत्रादि पूजयेत्।एकं
वा मातरं राजन्काममाप्नोत्यभीप्सितं।तथा तु वरुणं गंधर्वपंचकं पूजयेन्नरः।सर्वत्र जयमाप्ना

तिनात्रकार्याविचारणा॥ षष्ठ्यांतुनरोभ्यर्च्यस्कंदंपार्षदंतथा॥ आरोग्यंसमवाप्नोतिसारदावा
मनसेप्सितं॥ नृसिंहंप्रतिसंबंधपूर्णचंद्रंसमर्चयेत्॥ नरोमातृगणंराजन्सर्वकामान्मनोरमान्
एकांवामातरंराजन्कामानाप्नोत्यभीप्सितान्॥ वाचस्पत्यंसमवाप्नोतिपूजयित्वावनस्पतीन्॥ दे
वानांमानवानांचतस्यज्ञायेतथापरे॥ तेषांसंपूजनंकृत्वाचतुर्दश्यांसुखीभवेत्॥ करणेवामुक्त
र्त्तिंवायथावद्देवमर्चयेत्॥ तस्मात्काममवाप्नोतिगतिमग्र्यांचविंदति॥ चैत्रमासमथाभ्यर्च्यय
थोक्तेर्विनरःसदा॥ इष्टंदेवांयथाभ्यर्च्ययथोक्तंफलमश्नुते॥ संवत्सरेणधर्मज्ञनक्षत्रेपदिवाति
थौ॥ २ देषुसर्वधर्मज्ञसोपवासःसमाहितः॥ संवत्सरेवायुयनेतुतौमासेचतद्दले॥ नक्षत्रेवाध का०दे०
र्मतःशक्त्वातस्यस्वामिनंसदा॥ तावत्कालंमहाभागतस्मात्काममवाप्नुयात्॥ चैत्रात्समारभ्य ३५७
मद्वाशुनावशीचेतस्तुयस्त्वस्तुसमर्चयानः॥ तस्पेहतोषाम्परमंसकामःप्राप्नोतियस्माच्युतवंद्य
चेंद्र॥ ॥इतिकामनाविशेषेणतिथ्यादिविशेषदेवतापूजानिर्णयः॥ ॥अथकामनाविशे

षेणनक्षत्रविशेषदेवताविशेषपूजाविशेषः॥ देवीपुराणे॥ ब्रह्मोवाच॥ देवतायत्रनक्षत्रेय
दादृष्टिस्थितस्तदा॥ उरुस्तेयज्ञदेवस्तुतदासफलमाप्नवेत्॥ देवतारूपंप्रवक्ष्यामिनक्षत्राणांय
थाक्रमं॥ नक्षत्राणिचसर्वाणिपृथक्त्वांश्चैवदृष्टपृथक्पृथक्॥ अश्विन्यामश्विनौविष्णुर्द्दीर्घायुजापतेन
रः॥ व्याधिनिर्मुच्यतेत्विभमस्पर्धव्याधिपीडितः॥ नरएणायममस्पर्धउत्सुमैरसितैस्तुतैः॥ तथा
गंधादिभिःस्तुत्यैरपमृत्सोर्विमुच्यते॥ अनलःकृत्तिकायांतुरुद्रिंशूजितःपरां॥ रक्तमाल्यादिभिर्द्वृषा
त्वधृतहोमेनचध्रुवं॥ इष्टःप्रजापतिःशक्यःइष्टोदद्यात्स्यंतथा॥ रोहिणीदेवराईलगेनाविद
रिक्तंजरात्॥ मृगशीर्षेतथासोमंजयमारोग्यमेवच॥ आर्द्रायांतुशिवंशूल्यंपशून्विजयमश्नुते॥
सितैःपुष्पादिभिर्द्रव्यैर्द्वितंपयसाचैवं॥ पुनर्वसौवाप्यदितिंसदासंपूजनादिकं॥ वरुणस्तर्पित
श्चैवनावेवपरिरक्षति॥ पुष्येबृहस्पतिर्बृद्धिंददातिविपुलंधनं॥ पानगंधादिभिर्नागाअश्लेषायां
प्रपूजिता॥ तर्पितास्तुयथान्यायंनश्याद्यैर्मधुरैःसितैः॥ पूर्वायांविजयंदद्यादुत्तरस्यांनगस्तथा॥

मत्तारमासितं कुर्यात्कन्यायैतु रूपस्य च । हस्ते जन्मनि वा पुष्यं रूपसौभाग्य संपदः ॥ पूजितः सविता
हस्ते विशुद्धे तेजो निधिः सदा । त्वाष्ट्रे पुष्पादिभिः सर्वैर्ददाति विपुलं धनं । राज्यं वृष्टिं च चित्रायां निःसप
त्नेष्य यच्छति । इष्टसंतर्पितः प्रीतः स्वयं वायुर्बलं परं । इन्द्राग्नी च विशाखायां पीतरक्तैः प्रपूजयेत् । ध
नं राज्यं बलं स्निग्धतेजांसि निवसेत्सदा । रक्तैर्मित्रमनूराधायां लिङ्गसंपूज्य मेव च । प्रियो भवति सर्वेषां
विरजांश्रियमाप्नुयात् । ज्येष्ठायां पूर्ववद्वह्निमिष्ट्वा पुष्टिमवाप्नुयात् । गुणैः सर्वैश्च संपूज्यः कर्म
णा वधनेन च । मूले तु निर्ऋतिं सम्यक्कृत्वा संपूज्य पूर्ववत् ॥ ॥ इति कामनाविशेषनक्षत्रपूजा ॥
अथ निमित्तनक्षत्रादेः संयोगे देवताविशेषपूजा देवीपुराणे ॥ ॥ ब्रह्मोवाच । अथ वत्स प्रव
क्ष्यामि यथा त्वं परिपृच्छसि । अल्पक्लेशं महापुण्यं ग्रहर्क्षतिथियोगिकं । शृणु कृष्णाष्टमीयोगं शि
वयोगेषु चोत्तमं । मृदुवर्गश्च नागेन्द्र उमायामां गुरुवासरे । दैवयोगाख्य षष्ठी पुष्यर्क्षे रविवासरे । ध
तिः स्कंदस्तथा ख्याः सर्वकार्यप्रसाधकः । यदा तु सूर्यवारेण सप्तमी विजया तु सा । तदा संभवते

का०दे० ३५८

त्ता नो योगः सर्वगुणावहः । रविनिरिक्ता समायोगाद्दोर्गीयां च प्रवर्तते । इमा ये कालिकाद्याये पष्ठ्
व्या विधिना मुने । संपूर्णफलमाप्नोति स्वस्थाने श्वेरा न वेत् । पुष्पैरिष्ट्वा जलं श्वेतैः पूर्वा चैत्रे च पूर्वव
त् । सप्तपापान्मुच्यते हि चंद्रारीरान्मानसात्तथा । आषाढासु तथा विद्वान् उत्तराषाढयोगतः ॥ विद्वान्सं
पूज्य पुष्पाद्यैः स्वर्गमाप्नोति चात्मना । श्रवणे लसिते विष्णो पुष्पैर्धूपैश्च नक्षितः । संतर्प्य श्रियमा
प्नोति धनं विजयमेव च । धनिष्ठासु वसुनिष्ठाननपं जायते कवित्वमद्दतोपि तथा तेषां गंधपुष्पा
दिभिस्तु भेः । वरुणां शतभिषक्कृत्य व्याधिनिर्मुच्यते नरः । आतुरः पुष्टिमाप्नोति नात्र कार्या विचा
रणा । उत्तरायामहिर्बुध्न्यं परां गतिमवाप्नुयात् । रेवत्यां पूजितः पूषा ददाति सततं पशून् । सितैस्तु
ष्टिं स्थितिं चैव धृतिं विजयमेव च । यत्रैवैते समाख्याता यज्ञाः संक्षेपतो मया । नक्षत्रदेवतानां च
साधकानां हिताय वै । यस्मैवैते समा नक्षत्रा विज्ञानानुसारेण नवं तिफलदा ध्रुवं । गंधं चैव च्छेद्यं दाया
मं क्रियापाप्यं वमेव च । नक्षत्रदेवताय त्वं ज्ञात्वा तत्सर्वमाचरेत् । एवं ज्ञाते हि तत्सर्वपात्राफल

मवाप्नुयात्। क्रियाफलं च संपूर्णमित्युक्तं भानुना स्वयं यज्ञानां चैव पंक्तर्यत्फलं तदवाप्य यथेप्सितं॥
इति नक्तादियोगे शङ्खः॥ ॥अथ पवित्रारोपणकालः॥ तत्र शैवपवित्रारोपणकालः। शिवनवि-
ष्ण्युत्थापनयोः। पौर्णमास्यां तथाष्टम्यां शिवसंपूज्य यत्नतः। उदीपतं शिवे दद्या ह्निवनक्तो ष्व-
नोज्जयेत्। पुनरेव च कार्त्तिक्यां शुक्लपक्षे तु समापयेत्। यतिस्मोदहिणं दद्यात् स्वत्र च स्त्रादि शवि-
कां। यः कुर्यात् शक्तदप्येवं चातुर्मास्यं पवित्रकं। कल्पकोटिशतं दिव्यं रुद्रलोके महीयते। पुण्य-
त्रयास्मरि नृष्ट स्वउ वेदे श्वजायते। इहागतो नवे राजा गुणरूपसमन्वितः॥ शिवरहस्ये। पवित्रारो-
हणं शैनेः कुर्यात् न नस्ति वाश्रुचौ। चतुर्दश्यामथाष्टम्यामधिवास्य विधानतः। श्रावणे प्रोष्ठपद्यां
वै पविपवित्रारोहणं तु यः। कुरुते नापवित्रस्य शस्यासं च स्सरोतरा। शैनो पवित्रमारोप्य रिक्तः संवत्स- का०हे० ३५९
र्णतापि पात। पवित्रं तु पवित्रास्या स्नान्वयेन्गुनेदनो। अपवित्रं तु देहं स्यात्सर्वकर्माखिलं नृणां। का-
लोत्तरे। शुक्लो ह्नला भकर्तव्यं नित्यमेव पवित्रकं। अथवा नियमेनैव कुर्यान्मासत्रयान्तरे। आषा-

ते चतुर्दश्यां नभस्य नभसोः स्त्रथा। अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि। पवित्रारोहणं कार्यं न तु
कालांतरे स्थिते। एकं कालेस्य तिक्रांते प्रायश्चित्तं समाचरेत्। नीतिकानां विशेषेण शुक्लपक्षे स्वयं
विधिः। आषाढे तेचतुर्दश्यामिति। पौर्णमास्यचाद्मासविषयः। आषाढशुक्लचतुर्दश्यामित्य-
र्थः। तथा चामादचौरेतिरे। आषाढस्य सदोद्दिष्टा श्रावणस्य सितासिता। सप्तम्यां च त्रयोदश्यां
तत्र गंधपवित्रकं। त्रयोदश्यां प्रकर्त्तव्यं पवित्रं गंधसंज्ञितं। पवित्रमथ नूतायामाषाढे नियमः स्मृ-
तः। एवं सत्यपि विष्णुस्वापानावेन कर्त्तव्यं। किं तु। विष्णुस्वापानंतरमेव कर्त्तव्यं। उक्तं च। आषाढे पि
न कर्त्तव्यमसुप्ते मधुसूदने। कालोप्यनियतस्तत्र श्रूयतां विधिनिर्णयः। शुक्लाषाढ चतुर्दश्यां
कुर्याच्छ्रावणभाद्रयोः। अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि। न त्वाषाढे चतुर्दश्यामि-
त्यनेनैव विष्णुस्वापानंतरकालः स्वयमेव लभ्यते। ततः किमिति प्रसुप्ते मधुसूदन इति सत्यं।
किं त्वाषाढस्य च द्विविधत्वाद् इति। तत्र श्वाडे सर्वकाले स्वपिति। पुनरधिकमासे सौरमा

।सिंहककर्कटसंक्रांतावेव विष्णुः स्वपितीति। एतदुक्तं न दोषः। उक्तं च ज्योतिःशास्त्रे। मिथुनस्थो यदा भानु
रमावास्याद्वयं स्पृशेत्। द्वि-आषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे इति। तथा। दर्शद्वयमतिक्र
म्य यदा संक्रमते रविः। अधिमासः स विज्ञेयः सर्वकर्मबहिःकृत इति वचनाच्च द्वितीयाषाढे पवित्रेण
कर्तव्यमित्यभिप्रायः। यदा तु चैत्रादिषु षट्सु मासेष्वन्यतमस्मिन्मासे द्व्याषाढः स्यात्। तदा श्राव
णे विष्णुस्वापः। तथा च ज्योतिःशास्त्रे। माधवादिषु षट्सु एकमासे दर्शद्वयं तदा दर्शद्वये यदा द्व्याषाढ
स्तदापि स्याच्चैत्रे श्रावणे बृढः। अतस्तदा श्रावणे पवित्रारोपणं परं कार्यं। उक्तं च मोहानोरोत्तरे। दी
क्षादिस्थापनान्ते च पवित्रादिरात्रके तौ। पवित्रादिनं कर्तव्यं यदा द्वे तु समास्मनः। दर्शद्वयं नवृष्यत्र
रविसंक्रांतिवर्जितं। अधिमासः स विज्ञेयो विष्णुः स्वपिति कर्कटे। तस्य मासेऽधिमासे च कर्तव्यं तु
पवित्रकं। सुप्ते चैव हृषीकेशे दोषो नागन्यथा भवेदिति। ननु किं चांद्रमासेन सौरेण वा गृह्यते अधि
मासस्य शंकास्तीति नैवं प्रायेण पवित्रारोहणे चांद्रमास एवाभिमतो न तु सौरः। कन्यागते रवौ

का॰दे॰
३६०

प्रायश्चित्तविधानात्। आषाढादिमासेषु तु स एव जनार्दने। शुक्लपक्षेऽथवा कृष्णे प्रशस्तास्तत्र
रोपणा। रोगाभिवृद्धिसंयुक्तः प्रवासी राजपीडितः। उक्तमासत्रये यस्तु न कुर्यात्सूत्ररोह
णं। असौ कन्यागते भानौ यथा द्वादशाणुनायुता। द्वादशाणुनाघोरमंत्रेण कुर्यात्पवित्रकं
शानो तुलायां न कर्यं च न। मलिम्लुचं परित्यज्य गर्हितं सर्वकर्मसु। कारणे। आषाढादिचा
तुर्मासं सामान्यामिवि वर्जयेत्। कर्तव्यं पक्षयोः शुक्लकृष्णयोरुभयोरपि। चतुर्दश्यामथा
ष्टम्यां रोपयेत्तु पवित्रकं। रत्नावल्यां। यदा चैकदिने शंभोः परिवाद्यं चिकीर्षति। तत निस
ल्तदा संध्यां हुत्वा नैमित्तिकीं स हुत्वा सम्यगंधपवित्राणि शिवं संपाद्य प्रजयेत्। तथा प
द्मारवंड इति थिस्तत्र तदा तत्तिथिनोगयोः। गंधसूत्रं पवित्रं च कुर्याद्दैवस्य नक्तितः। चतुर्द
श्यां पूर्णिमायां संमिश्रा न तदा कल्पांतरे इति। यद्यत्रैव कर्तव्यं यदि स्यु घ्नतयातद्वाः। गोदोह
नरितेहत्वा साधिवासपवित्रकं। चतुर्दश्यां द्वारोक्तं कुर्याच्छेषं गोषतिथौ चरेत्। तस्मस्यावात्र

योद्दश्यां तु तत्ता गंधपवित्रकं। अष्टम्यां वा चतुर्दश्यां कुर्यात्पवित्रकं तथा। अपरेद्युर्निकर्त्तव्यं
सुपवित्रमितिस्थितिः। अथवा तस्यां दिने केन कर्त्तव्यं चापरेद्युनि। अधिमासे त्रयोदश्यामपरे
क्तविधिवद्वयं गोदोहांतरितं तत्ता यदि स्याद्भयमानसः। सुपवित्रं पौर्णमास्यां तिथिनेदेश
यं विधिः। अष्टम्यामपि बोधेत्यः कामाऽयपवित्ररोपणे॥ ॥इति शिवपवित्रारोपणकालः।
अथ श्रीविष्णुपवित्रारोपणकालः निर्णयः॥ तत्र पवित्रारोपणं नित्यं कार्यं। विष्णुरहस्ये।
पवित्रारोपणं विष्णोर्भुक्तिमुक्तिप्रदायकं। स्त्रीपुंकीर्तिप्रदं पुण्यं सुखसंपद्वनावहं। पुण्य
नोत्तं तथा पुण्यं सर्वपापहरं तु वै। पवित्रारोपणं तस्मात्पवित्रं परमं स्मृतं। संवत्सरे नरो नत्वा का०दे० ३६१
समभ्यर्च्य जनार्दनं। यत्फलं समवाप्नोति पवित्रारोपणेन तत्। नकारातिविधानेन पवित्रा
रोपणं तु यः। तस्य सांवत्सरी पूजा निष्फला मुनिसत्तमाः। तस्माद्भक्तिसमायुक्तो नरैर्विष्णुपराय
णैः। वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरेः। मत्र तंत्रे प्रकारेऽपवित्रारोपणं वस्से सर्वपूजाफल

प्रदं। हरं निरात्तसास्तस्य वर्षपूजां तथान्यथा। विधिना श्रावणे द्वादश्यां यो न कुर्यात्पवित्रकं। व
र्षे वर्षे ततः कार्यं विधिदृष्टेन वर्त्मना। तत्रा परमया प्रुक्तो हरिशीर्षे च वित्रकं। तस्माद्दावश्य
कं पवित्रारोहणं कर्म। आसाद्य कामनानुसारेण पुरीदान्यपि फलानि नवैति इति दृष्टव्यं
विष्णुरहस्ये। श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवाय पवित्रारोहणं
स्मृतं। सिंहस्थे तु रवौ कार्यं कन्यायां तु लगे प्यवा। तस्यामेव तिथौ सम्यक् तुलास्थे न कथंच
न। तथा। द्वारद पार्श्वकर्वीत पवित्रारोहणं शुभं। द्वादश्यां श्रावणे वापि पंचम्यामथवा द्वि
जा। मेत्रं तंत्रं प्रकारो। कर्कटगे तथा सूर्ये सिंहस्थे पितदासरा। द्वादश्यां शुक्लपक्षस्य द्वरेर्दद्या
त्पवित्रकं। अथवेदि प्रयोगेन मुख्यकालो न लभ्यते। कन्यागे पि प्रकुर्वीत यावत्तो त्तिष्ठते ह
रिः। सा च सिंहितायां। तस्य मासचतुष्कस्य मध्ये कुर्यात्शुभे दिने। आषाढे पंचदश्यां तु याव
द्वै कार्तिकस्य तु। संपूर्णं चैव दिवसमिति। आ कर्कटसंक्रान्ते तुलांतेगत्यावधि कालोत्तम

स्य पक्षस्य पक्षं मध्यमसंज्ञितं। एकादश्यास्तदंतो पश्चात्तु मीस्योपजज्ञितं। कालं तं वै समवेक्ष्य दि
उत्तमं सर्वसिद्धिदं। अप्राशेरस्य कालस्य लंतरायेन केन चित्। निर्वाहणी योऽस्य परः कालश्च
शोक्तमादिना। संपादयेत्तयोर्मध्ये विधिवाच्यागपूर्वकं॥ ॥इति श्रीविष्णुपवित्रारोहणकाल
॥अथ नानादेवतापवित्रारोहणकालः॥ तत्र मासो वैष्णवाणवोक्तः तिथिविशेषाः॥ तत्र सा
गरसंज्ञितायां। प्रतिपद्धनदस्योक्ता द्वितीया च श्रियो मता। तृतीया पार्वतीप्रा चतुर्थी विघ्न-
कारिणः॥ पंचमी नागराजीनः प्रोक्ता षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी
मता। मातृणां नवमी प्रोक्ता दशमी वासवेस्मृता। एकादशी मुनीनां तु द्वादशी चक्रपाणिनः
त्रयोदशी अनंगस्य त्रिवस्योक्ता चतुर्दशी। पौर्णमासी सुरश्रेष्ठः पितृर्मे कथिता तिथिः। दे
व्याः त्रिपुरनेरव्याः कथिता च चतुर्थीका। अन्यासामपि निसानामष्टमी नवमी तु का। तिथि
यत्तेस्मारव्याताः पवित्रारोहणे शुना॥ पक्षयन्यानि वक्तुं नेऽपि निस्तेन समर्चयेत्। पवित्रारोह

णं तस्य ष्टपसुरवतये रितं। नवेद्य स्यस्यसंपन्ने देशस्यापि दिवानं वेत्। यच्चसुरव्यता — — —
तावद्भवेत्। इति कालः समारव्यातः श्रृणुस्वत्वं सुराधिप। विष्णुरदस्यो तिथयस्त्वविज्ञाताः स्व
यमुक्तास्तपोधनाः॥ प्रतिपद्धनदस्योक्ता पवित्रारोहणे तिथिः॥ श्रियादेव्या द्वितीया च तिथीं-
नामुत्तमा तिथिः॥ तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च। पंचमी सोमराजस्य षष्ठी प्रोक्ता
गुहस्य च। पंचमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता दुर्गायाश्चाष्टमी
स्मृता। मातृणां नवमी प्रोक्ता दशमी वासुकेः स्मृता। एकादशी ऋषीणां तु द्वादशी चक्रपा
णिनः॥ त्रयोदशी अनंगस्य त्रिवस्योक्ता चतुर्दशी। मम देवी मुनिश्रेष्ठ पौर्णमासि तिथि
स्मृता। यथोक्तास्तु कृपपक्षेतु तिथयः श्रवणेन तु। सर्वेषामेव देवानां कार्यं तासयथा विधि
तथा च कालोत्तरे। विशेषेणोच्यते। वक्ष्ये प्रतिपत्प्रभृतीक्रमात्। वक्रो स्तुभ्र स्नाणोगोर्याग
णेशाहिषु पंचमी। षण्मुखस्यापरस्य सूर्यस्य त्रिवस्याष्टमीदिना। अंबिकायाः इतांनस्य

ञायचक्रपाणिनः॥ कामस्य च त्रयोदश्यां चतुर्दश्यां शिवस्य च। पितॄणां चैव पूजायां गुरु
याग्नं च कारयेत्। चतुर्दश्याम् अथाष्टम्यां पर्वसाधारणं स्मृतं। देवीपुराणे। देवीमधिकृत्य। ज्ये
ष्ठे वैशाखमासे तु श्रावणे वापि कारयेत्। सप्तम्यां वा त्रयोदश्यां मधौ वा सत्पुराधिप॥ ॥इ
ति नानादेवतापवित्रारोपणविधिः॥ ॥अथ दमनकारोपणविधिः॥ ॥देवीपुराणे। ब्र
ह्मोवाच। चैत्रादौ कारयेत्पूजां मम वक्ष्ये यथाविधि। गन्धधूपार्चनादानैर्माल्यैर्दमनकोद्
वैः॥ सद्योमं पूजयेद्देवं सर्वकामानवाप्नुयात्। सर्वतीर्थाभिषेकस्य फलं प्राप्नोति मानवः॥
उमां शिवं हुताशं च द्वितीयायां तु पूजयेत्। इह विघ्नमन्त्रेन नैवेद्यं देयं गन्धार्चनेन नरः। फलमा का॰इ॰
प्नोति विघ्नं दत्तमायायस्य नाषितं। पंचम्यां पूजयेन्नागाननन्ताद्यान्महोरगान्। क्षीरं सर्पिश्च नै ३६३
वेद्यं देयं सर्वविषापहं। षष्ठ्यां स्कन्दस्य कृत्वा पूजां सर्वोपहारिकी। इह देव सुखसौभाग्यम
ते स्कन्दपुरे व्रजेत्। धर्मराजं दशम्यां तु पूजा कार्याग्रगन्धिकी। विगतारिनिरातंक इह चांते परं

पदं। एकादश्यां मृषेः पूजा कार्या सर्वोपहारिकी। धनवान्पुत्रवान्कान्तो मुनिलोके महीयते।
कामदेवस्य पोदश्यां पूजनीयो यथाविधि। रतिप्रीतिसमायुक्तो ऽशोकमणिभूषितः। कुं
ने वासितवस्त्रे वा पात्रे वालेख्यइलादिभिः। आरंवड़ां सुखसंप्राप्तिं सौभाग्यमतुलं लभेत्।
पौर्णमास्यां तस्या कार्या सर्वकामसमृद्धये। इच्छया सहशाच्या च कामिकं लभते फलं॥ ॥इ
ति दमनकारोहणकालः॥ ॥अथ कालविशेषेण पुष्पविशेषाः॥ आषाढे बिल्वकल्हारैरे
रोपितं लभते फलं। नवमल्लिकया पूजानन्तो मासिमद्राफलं। कदंबैश्चंपकैश्चैवं नन्दसे
सर्वकामदा। आश्विने पंकजैः शंखो मार्लस्या पूजनं स्मृतं। इष्टितं लभते सर्वं सर्वकामसमृ
द्धिदं। माघफाल्गुनयोः पुष्पैः पूजने कुंदमुच्यते। चैत्रे दमनकेश्चापि वैशाखे शतपत्रकैः॥
कदंबकुसुमैर्ज्येष्ठे पूजा नाचनगकुरो। पूर्णे संवत्सरे मर्त्यः स्थितिदृशोः समतां व्रजेत्। नविष्णु
पुराणे। पूजा पंकजमालस्या अस्य फलदायिनी। ईशे आश्विने शतपत्रिकया पूजा कार्त्ति

केसर्वकामिकी। नीलोत्पलैः सदा पूजा पुष्पैस्या कुन्दकैः शुभा। माघे च कुन्दकुसुमैर्मरुकेण च
फाल्गुने। शतपत्रैस्तथा चैत्रे पङ्कजैर्यात्सुरसत्तमाः। लभते सर्वयज्ञानां सर्वदानफलं तथा॥ ॥
इति मासविशेषेण पुष्पविशेषपूजाकालः॥ ॥अथ रात्रौ विनिवेदनपुष्पवीनेदः॥ कानि कानि
कदंबानि रात्रौ देयानि शंकरे। दिवा शेषाणि देयानि रात्रौ देया च मल्लिका। भद्रं तेषु ते जाती
करवीरमह निशि। भद्र मह निशि वा पूजायां वा स्थापनमनन्तराणीयमिसर्पः। कामिकाका
रणयोः। नंद्यावर्त्तप्रियावर्त्तश्वेतार्कश्वेतपुष्पकं। पुन्नागं पटिकं षोढ मालती मुदृतेव देत्।
पंकजं हृदती व्याघ्री व्याया तं करवीरकं। उत्पलं पाटलापुष्पं मध्याह्ने उपदापयेत्। चंपका— का०हे० ३६४
नगाधकुरबकं कर्णिकां मालतीमालिकां चैव दापयेच्च प्रदोषके। जातीनीलोत्पलं चैव बिल्व
पुष्पं कदंबकं। दिकरणिवेदनं चमर्दयामे प्रदापयेत्। नीलोत्पलसमं पुष्पं न भूतं न भविष्यति
। कदंबकनकं जाती विनी एवार्द्धरात्रके। अन्यपुष्पाणि सर्वाणि अन्यसंध्यासु दापयेत्॥ ॥इ

ति रात्रिनिवेदनपुष्पनेदः॥ अथ सर्वकालीकपुष्पाणि। बील्वपुष्पं शमीपुष्पं करवीरं च मालती। उन्म
त्तकं चंपकं च सद्यः प्रीतिकरं मम। चंपकाशोककल्हाराः सपुन्नागास्तथा मम। आदिष्टा द्विज
शार्दूल मे चान्ये बकुगंधिनः॥ एते दिशि जितो नित्यं प्रातीशीघ्रं प्रजाम्यदं। ये केचापीर कुसुमैर्जल
जैस्थलजैरपि। संपूज्या प्रोषितैर्नत्या शिवलोके महीयते॥ ॥इति पुष्पविशेषपूजा॥ ॥अ
थ पुष्पादीनामनावेपत्रादिनिःपूजा। कार्येति निरूप्यते। कालिकापुराणे। अलाभे पुष्प
पत्राणामन्नाद्येनापि पूजयेत्। शालितंडुलगोधूमैर्यवैर्वापि समर्चयेत्। गाणपत्यमवा
प्नोति रुद्रलोके वसेच्चिरं। न विष्णुपुराणे। अभावेन हि पुष्पाणां पत्राण्यपि निवेदयेत्। प
त्राणामप्यलाभे तु फलान्यपि निवेदयेत्। फलानामप्यलाभे तु तृणगुल्मलतौष
धीः। तासामप्यतिलाभे तु भक्त्या भवति पूजितः॥ ॥ इति पुष्पाद्यभावे पत्रदाने॥ ॥इति पूजा
साधनत्वं निरूपितं॥ ॥अथ सामान्यतः तुष्टकोलेकर्म। नारायणीयोक्तलिकः। स्थविरा—

विनाशिकाकृतः। अष्टमिराशिरित्याद्याः कालाः स्फुटद्रकर्मणीति। गुलिकास्तवेद्यानेश्वराया

वयःस्पष्टो दिनाधिपमुखोदयानो दिवसांशे परार्धमुदितं गुलिकोदयाख्यं। ग्रपंचितस्या

यं विषहरणप्रकरणे। स्वविरोनामगुरुरंसेशाकनशत्रैतयोरेव दिने स्वांशाकारिक्के रोगगण

दिप्रतिक्रियातास्यतिलस्वश्वर्वनिरणीमयाचपरोप्रवीर्याणि वदंति तज्ज्ञाः। रोहिंडुमूलोग

ददेवतानि क्रूराणि तेषु परिनियदस्यात्। विनासिकं त्रयोविंशास्तवराहमिदिरोदितं। द्या

विंशाद्रंभ्रमंदाद्यैरष्टाशीत्येशाके दिने। कुजागारकदिनः। अष्टमाराशिरविर्यास्मिन्राशौ

वर्त्तते। तस्येशाराष्टमो राशिकालः॥ आदिशाद्रेन कलातिथिवेलानां ग्रहणं। तत्र कालानामा

शुक्लपक्षे वेद्रकलार्द्रग्राह्यते। कृष्णपक्षे च तत्रापि कृष्णपकाले ष्टमीमारभ्यामावास्यापर्यंतं

कुर्यात्। तिथिप्रस्थउपर्यादपश्चिमोदयमारभ्य पंचदशघटिकापर्यंतं समुद्रस्य होतो नवति

सावंद्रवेलानाम तदास्नानादिकर्म न कुर्यात्। तदनन्तरम्पुनः पंचदशघटिकापर्यंतं वेलानास्ति

का०दे०
३६५

तदास्नानकर्म कुर्यात्। पुनः पंचदशघटिकापर्यंतं वेला। तदारभ्य पुनः पंचदशघटिकापर्यंतं

वेलानास्ति॥ ॥इति सामान्यतः शुभकर्मकालः॥ ॥अथ यवतृप्यादिकर्मविशेषेण कालवि

शेषः। मंत्रतंत्रप्रकाशे। राशिरादिकऋतुशानेकर्मांगतच्च कथ्यते। आचार्यैः कथितं पूर्वैः कर्म

णः सिद्धिकारणं। दिनानि यामिनी मांतमृतवो ये पुरःस्थिताः। राशिराद्याः समाक्रम्यनाडीदश

नक्रमात्। आरक्तधवलो बालः शशिरेव रूपकर्मणि। उच्चाटाय स विज्ञेयो वसंते लोहितो

युतो। ग्रीष्मे धूम्रशरीरश्च मारणे सति युज्यते। प्रावृट् रूक्षशरीरा तु स्तंभने सा नियोजिता। श

रत्कालयुता कृष्णे मंत्रज्ञो गुरुपूजके। हेमंते धवलो हृद्यः शांतिवश्यादिकर्मसु। मंत्रतंत्रे। श्री

कामस्तु जपाकाले वा। कोपूर्वाह्णिके तथा। ब्रह्म। सारस्वते जपकाले पूर्वाह्णिके तथा। तथा पू

र्वाह्णे काले वश्यार्थी पूजापदस्थ आकर्षणे निशि प्रोक्तं सापूर्वतु ननतद्धिः। मंत्रतंत्रप्रकाशे।

पूर्वाह्णे स्तंभनं कर्म विद्वेषे वापि निगद्यते। लक्ष्मीसारस्वते कर्म आचरेत् शांतिकं तथा। आयुषो

वर्द्धनं चेति षड्गुणानि प्रवर्त्तते। मंत्रतंत्रे। अहो घोरतुदिनाग्रा यस्तत्र नं चापक्रिकं। द्विदेषायज्ञाप
मेत्र------नार्थायपरंपेन्मध्याकाल्परेमे मनुमारणं उपकर्त्तव्यं यामेश्वर्व्दतीयके॥ ॥इ
ति वृषादिकर्मविशेषकालः॥ ॥अथ विष्णुशयनादिकालनिर्णयः॥ तत्र च विष्णुपुराणे॥
आषाढासितपक्षेषु मैत्रश्रवणरेवती। आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्सवः॥ मैत्रादि
पादे स्वपितीह विष्णुर्वैष्णव्यमध्ये परिवर्त्तते वा। पौष्णावसाने च सुरारिहंता प्रबुध्यते मास
चतुष्टयेन। आषाढादिषु मासेषु मधुरेमाधवस्य च। द्वादश्यां शुक्लपक्षे च प्रस्वापो वर्त्तनोत्स
वः। योऽस्मिन्योगे यदा चाक्रिमेत्रामपि नो निशि। द्वादश्यामेव तत्कुर्यादुत्थानेऽपरे॥ द्वादश्यां तु त का०नि०
था कुर्यादिति पठितानि त्रि। वा दिवा वोत्थानं संध्यायां परिवर्त्तने। अन्यत्र पादयोगेऽपि द्वाद ३६६
श्यामेव कारयेत्। विष्णुधर्मोत्तरे। विष्णुर्दिवा न स्वपिति न च रात्रौ विबुध्यते। द्वादशीऋक्ष
संयोगे पादयोगो न कारणं। पुराणात्। उत्थाने शयने चैव तथा पार्श्वविवर्त्तने। द्वादशीऋक्ष

संयोगे पादयोगो न कारणं। वाराहपुराणे। रेवत्यां तु कार्त्तिमेघ च द्वादशी लोकिता। उत्तिष्ठंते
हृषीकेशो योगनिद्रां विमुंचति। स्कंदपुराणे। स्यैवं पाठः — — कार्यंतिमेघ च द्वादशी लोकिते
उत्तिष्ठतीह हृषीकेशो योगनिद्रां विमुंचति। रेवत्यंते यदा रात्रौ द्वादश्यां वै प्रवर्त्तितः। तदा बु
ध्यते विष्णुर्दिनांते चापरेवती। रेवत्यादिश्यां तो वा द्वादश्यां च विना न वेत्। उत्तयोरर्थ ना
केतु संध्यायां समहोत्सवः। पुराणात्। रेवत्यंते यदा रात्रौ प्रातेनारायणोऽप्यवे। पादयोग
मनादृत्य स्वरूपावप्रवर्त्तते। रेवत्यंते यदा रात्रौ द्वादश्यां च विना न वेत्। उत्तयोरर्थ नावेसा
संध्यायां समहोत्सवः। वाराहपुराणे। द्वादश्यां संधिसमये नक्षत्राणामसंभवे। आषा
ढासितपक्षेषु शयनावर्त्तनादिकं। अयमर्थः। हरिशयनादौ शुक्लद्वादशी आषाढेन्द्रप
दकार्त्तिकानामनुराधाश्रवणरेवतीनामादिमध्यान्तपादयुक्ता रात्रिसंध्यादिवा ह्न्रयुक्ता
च प्रशस्ता। यदा तु यथोपदर्शितकाले पादयोगो न प्राप्यते। तदा द्वादशी नक्षत्रयोग आद

रणीयंतस्याद्यो ऽनुरूपेणचायंविशेषः॥ द्विवारेवतीद्वादशीयोगेरात्रिगामिनिचनक्षत्र-
शेषेदिवांतेविष्णोरुत्थानंपारणांतेरेवत्याविनाद्वादशीसंध्यायामुत्थानादिकंभवति।तदुक्तं।
द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे।आभाकासितपक्षेषु शयनावर्त्तनादिकमिति॥
अत्रकेचिच्चोदयंति।यदिमैत्रादिनक्षत्राणिद्वादशींविहायत्रयोदश्यांभवंति।तदातुच-
तुर्दश्यांतदनंतराणिज्येष्ठादीनि।ततःपौर्णमास्यांतदनंतराणिमूलादीनितथासतिआका-
नाइतिविरुध्यते।तत्रनक्षत्रयुक्तापौर्णमासीसंधिज्येष्ठामित्राक्योनाद्यपदमात्रस्यपाक-
षंविलाप्यते।आन्नायातोत्रिनोज्ञेयोफाल्गुनस्यनभस्त्रिनागतः।शेषमासादिविज्ञेयाइ-
तिवचनात्।नधनज्येष्ठादौहरिशयनादिनविष्यति।तदुक्तंविष्णुधर्मोत्तरे।निद्रास्वापो
द्दिबोधानसंध्यायांपरिवर्त्तनं।पादयोगादृतेत्तिथौद्वादश्यामृक्षयोगइतिः॥आचारसा
रेतु।द्वादश्यामृक्षसंयोगमनादृतिपठितं।तेनात्मतिथिगतैमैत्रादिपादसंबंधेकंटद्वाद-

श्यांसंधिसमापशयनादिक्रियाः॥अत्रश्रीकरणे।आद्याद्यागतकालश्चमावास्याद्व-
यंभवति।तदापितुनरादिसंरेयाणादीनाभावात्।सूक्तंचेदसूर्येऽरवारत्रानेरेवतीबो-
धोवद्दितावचतुर्दश्यांभवति।तदादविष्णुः।तयोःसद्रस्थोविलोकप्रसिद्देस्तत्रदुर्लंघ-
ने।तत्रचाश्विकेनक्षत्रपादपादावृत्तवेक्रियमाणेपंचममासपादपादावृत्तम्यते।मासचतु-
ष्टयेनेतस्यानुपपत्तेः॥पादयोगादन्यथाव्यत्ययमेवकर्त्तव्यदरणीयः।द्वादश्यांसंधि-
समयइतितुमाथुरकाल्पाश्रयणेनोक्तंदिवाद्विवेदनवानामनुष्ठानकल्पः॥माथुरश्च-
तादृतमतन्नमाथुरोद्वादशीपुरस्कारेणनक्षत्रसंबंधापेक्षणेनच।इतिचनक्षत्रपाद-
योगपुरस्कारेणद्वादश्यपेक्षावसानेचतिथिनक्षत्रामलनेचपक्षद्वायप्रशस्ततेनैवेदि-
कत्रारवाविकल्पन्यायेनउपपत्तिस्तदायंतिवसानेक्षत्रामलनेशेनानुनानुष्ठानविक-
ल्पाःकथंतर्हिहरिशंकरयोःसद्रोधानेपस्यतुनात्यागतिरस्ति।तत्रैस्मार्वमनाकुलमि

मिति। अत्र पिंडितपरितोषकृता दूषणमभिहितं। अनुपपन्नमेतत्। तथाहि पादयोगादन्यतिथौ
द्वादश्यामृक्षयोगत इत्यस्य कोऽर्थः। द्वादश्या अन्या एकादशी त्रयोदशी या एकादशी तु लभ्येत न
तस्या नक्षत्रपादयोगादरः। तदुक्तं विष्णुधर्मोत्तरे। एकादश्यां द्वादश्यां च नित्यं संनिहितो हरिः। त
त्र नक्षत्रयोगे पादयोगो न कारणमिति। अत्र त्रयोदश्यामिति च वक्तव्यं। तथासत्यनाका इति
विरुध्यते। न च कार्त्तिकशुक्लाष्टमासचतुष्टयप्रबोधनानुरोधेन प्रापिका इत्युत्तरवचनमप्रसिद्ध
त्वनियतत्वात्। मासचतुष्टयेनैवैवप्रायकानुवादत्वं युज्यते। तथा च कार्त्तिकी इयमाषाढ्यास्तूत्तर
मासाश्चायम कार्त्तिक एव विष्णुप्रबोधे सत्यपि मिथुनादित्ये शयनेऽधिमासे सति पौर्णमासी कालहे० ३६८
द्वयस्य संभवात्। एवं निरपि मासे रुत्थानेन न विरुध्यते। षष्ठ्यादिवसे समइति चतुःसंख्योपपत्ति
द्विराषाढविवेके दर्शयिष्यामः। न च हरिशंकरयोः सदोत्थानमिति लोकप्रसिद्धियामिका।
तस्याः शास्त्रप्रसिद्धेनोदौर्बल्यात्। किं चैवंवादिनां शयने किं वाच्यं। यदनुरोधात्कालप्रमाणं

द्वयादित्येन भवति। तदा किं नैवं हरिशयनं सुनाषारोपणीयं। तत्रापि चतुर्दश्यां नक्षत्रे
प्राशं हरिशंकरयोः सदोत्थानमिति किं लोको न जल्पति। मिथुनादित्ये वा चतुर्दश्यामनुरा
धाप्राप्तौ। तत्राषाढस्य शुक्ल पौर्णमासी लक्षिता मासापेक्षत स्थानेकया पुत्रापि कृतः। तस्मा
च्छयनाषाढादि प्रतिनियमात्। नैष्ठाहैन क्षत्रलाने। पि न शयनादिनिमित्तवचनेनदाधि
मासे यतो वक्तुं अनापाततां। द्विराषाढकल्पनमाश्रित्य नद्रनुष्ठानं तद्व्यतिरेकेण तथाविधन
क्षत्रप्राप्ति— — —र्यथापि न भवति। तथापि अनाका इत्यस्या वरणादरणीयत्वं। किं चैवंवादि
नाञ्चाश्विनेऽपि लोकप्रसिद्धिपुरस्कृ सदैवोत्थापनमनिद्धे तास्वयं लिखितमपि प्रस्मृतं॥
यद्यपि दिवसे मासो न भवति तस्मादन्यथा वर्णनायं। तत्र यदुक्तं। निशि स्वापो दिवोत्थाप
नं संध्यायां परिवर्त्तनं। पादयोगादितितिथौ द्वादश्यामृक्षयोग इति। तस्याय
मर्थः। संध्यायां परिवर्त्तनं। पादयोगादन्यतिथौ द्वादश्यामृक्षयोग इति। तस्यायमर्थः। संध्या

यां परिवर्त्तने। पादयोगादन्यस्यां त्रयोदश्यामपि पादयोगे। संध्यायां परिवर्त्तने। द्वादश्यां न
क्षत्रयोगे निशि स्वापो दिवोत्थानं न भवति। न पुनरुत्सवादिकमपयन्ति। यो नक्षत्रयोगादेव
सति स्नानादाविति समाचक्षते। नेति वक्तव्यमुपपद्यते। एवं चैकादश्यामपि नक्षत्रयोगे
गे वचनांतरबलेन। त्रिमुनाद्याचरणं पुनर्द्वादश्यामेव न कुर्यात्। तथा न द्वादश्यां न संधि
समयेन नक्षत्राणामसत्त्वे। स्नानादाविति पक्षे तूत्थापनावर्त्तनादिकमिति। तस्मात्पुरस्कं
स्याश्रयणेन परिद्वादशीं विहायैकादश्यां नक्षत्रालाभे। तथापि द्वादशीसंधिसमय ए
व स्वापनादिकमनुष्ठेयं। यद्येकादश्यां नक्षत्रयोगो यदि वा त्रयोदश्यां सर्वत्रानाकाप्राप्तौ
द्वादश्यां संधिक्षणे स्वापनादिकं संध्यायाश्च रात्रिदिवसोः स्वयमनेकत्वात्। निशि स्वापो दिवो
त्थानमित्यपि नास्मिन्विरुध्यत इति। स एवमप्युरामाधवकल्पेन तत्र कल्पस्तु। एकादश्यां वा
नक्षत्रयोगे पक्षे घस्रास्ततमतेनान्यतरानुष्ठाने। त्रयोदश्यां वापि कार्त्तिकाविरोधेनास्मत्क्रमि काल॰ ३६९

ति। तदेतदयुक्तं। निशि स्वापो दिवोत्थानमिति वाक्ये न बहूक्तार्थस्वीकारे व्यवहितसंबंध
प्रसंगात्। अस्यार्थस्य वचनादिति प्रतीयते। तेनानंतराधिमासनिपाते तुलावृश्चिकयोर्विक
ल्पेन देवोत्थापनविधायकवचनस्य वक्ष्यमाणत्वात्। तदपि प्रायेणास्य वचनस्यार्जवे
नोपपत्तेर्न बहूक्तार्थस्वीकरणमस्ति। तेन स्वीकरणमनाम तत्साधु। कार्त्तिकद्वादश्युत्सव ए
व। विकल्पाभिप्रायेणोपपद्यते। एतच्च कार्त्तिकस्याधिमासत्वे तु रुकार्त्तिके विष्णुप्रबो
ध इत्युक्तः। तदपि च विकल्पस्य वक्ष्यमाणत्वादयुक्तं। तस्माद्यथोक्तमेव साधीयः। न विष्णो
त्सरात्। भाद्रे नाडपदे मासि एकादश्यां शुभे दिने। कटिदानेन वेद्धिस्मार्भद्रापानकनास
ने। कटिदानं त्वयि तस्य विष्णोरंगपरिवर्त्तनकरणं। तथा। कार्त्तिके शुक्लपक्षस्य एकादश्यां
समाहितः। मंत्रेण चैव राजेंद्र देवमुत्थापयेद्द्विजः। वाराहपुराणे। द्वयं तु द्वादशी देव प्रबो
धार्थं विनिर्मिता। त्वयैव सर्वलोकानां हितार्थं शेषशायिना। एवमन्येषामपि देवानां स्वय

सापतिथिवशेन नक्षत्रवशेन वा शयनाद्याचरणीयमिति। तदुक्तं पुष्करपुराणे॥ यस्य यस्य तु दे-
वस्य यन्नक्षत्रं तिथिस्तु या। तस्य देवस्य तस्मिंस्तु शयनावर्तनादिकमिति। केचित्तिथिवशेन का-
चिन्नक्षत्रवशेन तेषां शयनादिकमाचरणीयम्। प्रतिपदादिपंचदशतिथयो धनदादीनां देवा-
नां तत्रैकैकतिथिरनेकदेवताकीयत्वादिति पदद्वये ब्रह्मणस्य धनदस्य च। तत्रानुष्ठाने विकल्प
एव नास्ति। सप्तविंशतिनक्षत्राधिपतयस्तु देवव्यापिनो। वायुप्रसादीनां नक्षत्रवशेन शयनशयनादि-
कमाचरणीयम्। नक्षत्रतिथिमिलाननरुद्रादीनां शयनादापादादेनो स्वः। न हि कदाचि-
दुर्वृणमाषाढ्यां रौद्रमार्जन्नक्षत्रवशेनापि पूर्वेद्युरुपवासः स्यात्। पूर्वाह्णे स्वापबोधयोः॥
अपराह्णे यदा तौ तु तदहर्निस्ममेवि तु॥ पूर्वाह्णमारम्य त्रिरोषण एवं पूर्वाह्ण इत्युच्यते। दिवा न
स्वापस्य निषेधात्। एवमेव रात्रौ उदयमाने तु गुरुडे ध्वजे पूर्वेद्युरुपवासः स्यात्। अपरपक्ष-
धर्ममाचरेदिति बोधयेत्। कायपपंचरात्रे। मध्ये स्थाने च शयने मत्स्यार्द्धपरिवर्तने। अथयो-

काल नि° ३१

वैष्णवः कश्चिद् दृष्टिनो न क्रितस्मरः॥ अन्नं वा परिभुंजीत फलमूलमथापि वा। अपराधमहं-
तस्य नक्षत्रमासिकथं वन। ह्रिपामिनरके घोरे स्तमान एव न जायते। यवड्भगवतो वासुदेवस्य
शयनादिकालो वचारितः॥ अधिमाससंनिपाते तु कर्कटे अथ वृश्चिके। वपुरायतादिकमाच-
रणीयमेव। तद्विधेको पिसंहेपादन्निर्धीयते। आह ज्योतिःपराशरः॥ अतीते च द्वये सार्द्धेप-
चपक्षे दिनद्वये। दिवसस्याष्टमभागे पतत्येकोधिमासकः॥ दिवस्य सद्वरस्य कर्कषष्टिनाग
मृतोनतः। करोत्येपमहाच्छेदं तथैवैकं च चंद्रमाः॥ एवं सूर्याचंद्रमसावुत्तरायणानंतरं का-
लं दक्षिणायनाख्यागे वैशेषादेगतिवशेषवशेनाधिमासं जनयतः। दक्षिणायनास्यं रक्षवि-
त्वा आह मरीचिः। अधिमासोधिको यस्मिन् हरिशायो न वेत्तदा। अमावास्याद्वयं दृष्ट्वा हरिशाया-
दं अकल्पयेत्। आह त्रिः। मिथुनस्थो यदा नानुरमावास्याद्वयं स्पृशेत्। हरिशायास विज्ञेयो
विष्णुतिकर्कटे। तस्य पक्षे द्वयस्यावे यदंगता दिवाकरः॥ हरिशायः स विज्ञेयो विष्णुः स्वपि-

तिकर्कटे दशम्यादौ नवम्यामिति। तथा माधवीये। — दुस्वैकमासे दर्शद्वयं यदा। द्विराषाढः स
विज्ञेयो विष्णुः स्वपिति कर्कटे। विष्णुः। अमावास्यामतिक्रम्य यदा संक्रमते रविः। द्विराषाढः स
विज्ञेयो विष्णुः स्वपिति कर्कटे। पंचम्यां शुक्लपक्षे च मेषं गच्छेद्दिवाकरः। द्विराषाढः स विज्ञेयो वि
ष्णुः स्वपिति कर्कटे। अत्रायं संक्षेपार्थः। अधिमासो दायं दक्षिणायनात्प्राग्मेषादित्रिके पतति
तदा द्विराषाढः स एव वर्ष एव संपद्यते। तदा दक्षिणायनानंतरं विष्णुः स्वपिति। यदा च कर्कटादि
त्रिकेधिमासः पतति। तदा आगामी वर्षे मेषे कर्कटादित्रयेष्व वृद्धमाषाढपौर्णमासी नभव
ति। तस्या वा आषाढत्वात्तत्रैव विष्णुः स्वपिति। द्विविधस्यापि अधिमासपातस्य नामावास्यादि कालदे॰
स्मृतं। तथा च सति यदा कर्कटादित्रये अमावास्याद्वयं न भवति। तदा शुक्लप्रतिपद्द्वितीया ३७१
यां वा कन्यातुलासंक्रान्तिर्न भवति। आगामिवर्षे मेषे संक्रान्तिरपि। तथैव प्रतिमासं संक्रमणे द्वि
नद्वयं दृष्टा पंचम्यां षडशीति। मिथुनसंक्रान्तिर्न भवति। तदा द्विराषाढे प्रकल्प्य कर्कटे हरिश

यने। ननु परमार्थतो द्विराषाढः। तथा गणितकृत्यानां मिथुनादिस्थानो गच्छतीति अपि गण
मानेना स्फुरे मिथुनगतो गणितेवादिससगणिते आषाढे इति। ननु तत्र गणितामास्यादि द्विकत्वा
न्यां द्विराषाढो गम्यते। तदाह सत्यं। वृषसंक्रान्त्या चतुर्थ्यां तिथौ षडशीति सिते यदा। तदोर्द्धे च विज्ञा
विंसं द्विराषाढस्य कल्पने। तथा च ज्योतिःशास्त्रे। शुक्लचतुर्थीमतिक्रम्य यदा संक्रमते रविः।
द्विराषाढं प्रकल्प्यैव कर्कटादौ स्वपेद्धरिः। अथ मेसद्वितीये वा शुक्ले मेषमियाद्रविः। द्विरा
षाढे क्रियते वस्याद्विष्णोः प्रबोधनं। विष्णुः परं कर्कटगे जलस्थपेत्। दोषं तु शाक्तोक्तवाद्वि
याकालमेव कार्यं तथाहि। द्विराषाढविकल्पोयं वैकुंठशयने भवेत्। यजस्तु चातयज्ञस्यास्ति
ह एव विधीयते। बोधायनश्च। द्विराषाढे क्रियते वस्याद्विष्णोः प्रबोधनं। वितुधेचद्रेप॰
सर्पगस्यैव सा क्रिया। यदा तु प्रथमे वर्षे द्विराषाढे तु कर्कटे। हरिशयनं तदा ज्ञेयं कन्यायां प
रिवर्तनं। शाक्रोत्थापनं च तुलायां दृश्येक्षिवः। वृश्चिके वासुदेवोत्थापना। तदाह विरंचिः। दक्षि

णात्रामुखे चान्तेऽस्य तु लोपं स्याद्धरिशिल्पदा। कन्यावृश्चिकयोरेव विवर्त्तनविबोधने। तथा। कर्कटे
तु हरौ सुप्ते हराक ध्वजक्रियाक्रिया॥ तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनमिति। यत्तु वृश्चिक-
स्थिते द्विराषाढः॥ यत्तु च स्वरूपं तत्तदा श्राद्धपक्षे श्रवणद्वये सति यथा कर्त्तव्यमादावसत्स्व॥
द्विराषाढे तु संभाव्ये यदि सिंपरिद्वयं। परं तु स्थापयेद्दक्षः कन्यायां परिविवर्जयेत्। अथ कन्या-
यामेव श्रवणद्वयं भवति। तदा नामादिश्रवणे त्वाक्को स्थापनं। अस्मिन् दुर्गा स्थापनं। तदाह
सिंहकन्येथ पक्षे च शुक्लादेः पक्षसंयुते। सिंहपरे त्वाकस्मो स्थापनं कनकन्यायामिंदुदुर्गायोः
शुक्लपक्षे द्वये वज्ञाकस्मो यम परः स्मृतः॥ द्विराषाढस्य विद्भिः स्वसमास्मिश्रुता वता। न एतद्वि- कालनि०
सपेक्षायामादात्राकध्वजो स्थापनं च विस्मो प्वपरिवर्त्तनं। मासद्वयेन निर्दिष्टं शयनादिक- ३७२
को विदैः॥ दुर्गायाश्च निर्मासेरधिमासविनैव तत्। अधिमासनिपाते तु क्रमादिंद्राद्रिकान् द-
रान्। कन्याकुलावृश्चिके पुरूप तु स्थापयेन् ध्रुवं। अधिमासनिपाते द्वे स्थापनमरोऽर्थः। यदाह

र्कटादिषु पौर्णमासीद्वयं भवति। अधिमासपाते तु क्रमादिंद्रादिकान् हरीतिति। तथा
हि। आषाढाद्वयसंयुक्तं पौर्णमासद्वयं यदा। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटा-
दिष्या चोक्तं। विज्ञाखादि तु लग्नेषु यदि शर्ग्राद्वयं भवेत्। द्विराषाढः स विज्ञेयः शायनोद्वर्त्त-
नादिषु विज्ञारवादिलक्ष्पलक्षणं। फाल्गुनद्वयस्यापि मासस्यो न क्षत्रतयासंभवात्। त-
त्र फाल्गुनादावधिमासपाते कर्कटे हरिशायने सति मासचतुष्टयेनोत्थापनं भवति। कर्क-
टादिचतुष्टये वधिमासपातत्रिमिनग्वाषाढद्वये हरिशायने वृत्ते श्रावणादाव स्पत्रत दि-
व विध्ये वृश्चिक एव कार्त्तिकमासो वर्त्तते। तेन पंच निरपि मासैस्तत्रैवोत्थापनं। आनाकास्ति-
तपक्षे श्विति अस्य बहुसंमतत्वेनाबाधिकत्वात्। प्रवुध्यते मासचतुष्टयेनास्य प्रथमानुवा-
दात्। एक एवाधिमासो मासः। यदाह बादरायणः॥ एकमास्थिते सूर्ये यदि स्यादधिमासकः॥ ए-
क एव हि मासोऽसौ षष्टिनिर्वसिरेर्मीतरोंत। एवं द्विराषाढफले प्रामे द्विराषाढ तु अतेन त्र स्व

रूपतो द्विराषाढः ॥ एवं यदि परिवर्त्तनदुर्ग्गोत्सवमपि परस्परं बोधव्यं । तद्यथा । श्रावणीद्वयं ना-
द्भपदीद्वयं भवति तदा देवशयनान्मासत्रयेण कन्यायां शक्रोत्थापनं परिवर्त्तिते । तदृते तस्मा-
न्तु मासद्वयेन तुदुत्थायास्तु, तस्माच्च मासेन दुर्ग्गोत्थापनं मासद्वयेण विष्णोः ॥ यदा त्वाश्विनीद्व-
यं भवति तथापि सिंह एव शक्रोत्थापनं परिवर्त्तितं येन विष्णोरुत्थापनं । यदा तु कार्त्तिकीद्वयं भ-
वति तदा कार्त्तिके दुर्ग्गोत्थापनं वृश्चिके देवोत्थापनं यदा कर्कटाधमावास्याद्वयं भवति तदा
विनापि द्विराषाढेन द्विराषाढकल्पनं । कर्कटे हरिशयनं शक्रोत्सवादि तु यथाकालमित्यु-
क्तं । न विष्णोस्तरेः । अधिमासनिपाते पितुलायामेव स्वापोत्थापनमभिहितं । मिथुनस्थे सहस्रां- कालवि० ३७३
शौ स्वापयेन्मधुसूदनं । तुलाराशौ महाराज पुनरुत्थापयेच्च तं । अधिमासे प्रपद्येत एष एव
विधिक्रमः ॥ नान्यथा स्वापयेद्देवं नान्यथोत्थापयेत्तदा । इत्यलमतिविस्तरेण । ब्रह्माण्डपुराणे
भाद्रपदे तु सितपक्षे मासि प्रोष्ठपदे तथा । शक्रस्तुत्थापयेद्राजा विष्णुश्रवणवासवे । विष्णुमुत्तरा-

षाढा । वासवं धनिष्ठा श्रवणनक्षत्रमाद्यपादं भाद्रपदयोगः प्रशस्ततमः ॥ तदुक्तं विष्णुवादि-
गते चन्द्रे शक्रमुत्थापयेन्नृपः ॥ नरराणां मंदपादे च निशीसुप्ते विवर्ज्जयेत् । निशायामस्य पादे च न-
रराणां समसुप्तके । शक्रं प्रवासयेद्देवं यथा राजा न पश्यति । सौरनौ मृत्युर्ज्जीवरि सूतके मृतके
पि वा । भूमिकंपादिदोषास्तु शक्रं नैव प्रवासयेत् । निमित्तविशोषापनिपाते तु नरणं पतथा तदा
नाडरं द्रस्यनुसंधेयं । आह हृद्ववशिष्ठः ॥ चंद्रगेहगते नानौ यदा स्वपिति केशवः । शशिपुत्रगृ-
हे नानैनवो ●त्थाप्यः पुरंदरः । चन्द्रगृहं कर्कराशिपुत्रगृहं कन्येति । तथा इमाधवः । द्विराषाढेन
न्यका या शक्रेनोत्थापयेद्यदि । राज्ञो राज्यं विनश्येत प्रजा चैव न पीड्यते । कालेन्तु स्थापिते शक्रे चिरं जी-
वति पार्थिवः ॥ प्रजानां तत्सवेदेवं नावसन्नवनाशितिरिति । शोषं द्विराषाढेतिरेकद्वर्शनमनुसंधेय-
मिति । देवीपुराणे । प्रोष्ठपदे न वा दृष्टम्यां शुक्लायां शोभनं न्हिको । आश्विने वाथ शुक्लायां श्रावणे वास-
मुच्छ्रयेत् । गर्ग्गः ॥ सिंहगते दिनकरे सितचारुपक्षे हर्यापि पादमुपगच्छति चेत् शशांके । उत्तिष्ठते विविध-

मन्दिरं वृन्दं बोध्यायाम्पान्ततो निद्रां त्यजेद्विचक्रपाणिरिति। अत्र वद्दिग्राहेण हरिदेवसंश्रवण
मुपलक्ष्यते। न विष्णोस्त्तरे। राज्ञान्येनापि कर्त्तव्यो वर्षे वर्षे महोत्सवः। इन्द्रध्वजसमुत्थानं महाद्वा
दशतं यदि। ततो द्वादश्यामेव वर्षे कर्त्तव्यं नान्तरा। पुनः देवीपुराणे। सूर्यरथयात्रायाः कथं विद्द
करणे द्वादश्यां ह्येक कर्त्तव्यस्तन्निषेधकं। इन्द्रध्वजस्य चाथ वसुद्धायो न कृतो यदि। ततो द्वादश्यामे
वर्षे कर्त्तव्यो नान्तरा। पुराः। त्राकालो स्वेवानन स्येककार्यसिद्धगतेरवै। द्वादश्यां शुक्लपक्षे तु नन्द
त्रे विष्णुदेवते। तस्मात्तस्य नरणप्सान्नवम्यामश्विनस्य च। अर्चयित्वा भगवतीं ततः स्वधावि
वर्जयेत्। भागवतपुराणे। कन्यायां कृष्णपक्षे तु पूजयित्वार्चयेद्दिवा। नवम्यां पूजयेद्देवीं ग कालवि०
तवादित्रनिःस्वनैः। शुक्लपक्षे चतुर्द्दश्यां देवीकेशविमोचनं। प्रातरेव तु पञ्चम्यां स्नापयेत्तु शु ३७५
भैर्जलैः। सप्तम्यां मे विकापूजा। अष्टम्यां समुपोषयेत्। व्रतायजागरे चैव नवम्यां विधिवद्वलिं
संप्रेषणं दशम्यां च क्रीडाकौतुकमंगलैः। नारीजनं दशम्यां च बलहस्तिकरं महत्। वाराहपु

णे। आर्द्रायां बोधयेद्देवीं मूलेन पूजयेत्। उत्तरेणार्च्चनं कृत्वा श्रवणेन विवर्जयेत्। अस्य पादे तु नि
शा भागे श्रावणस्य यदा भवेत्। तदा नवम्यां समुत्थानं नवम्यां दिनभागतः। दशम्यां बलहयार्थं कृ
त्वा नीराजनं नृपः। स्वातौ स्याद्धि सद्वतीयादौ सप्ताहं वाश्विने सति। रक्षां कृत्वा दशम्यां तु शक्त्या नीराजयेत्॥
नीराजनं सितेऽहि तां शान्तिं कुर्य्यादिति सर्वः। आह व्यासः॥ आर्द्रायां बोधयेद्देवीं मूलेन प्रतिपूजयेत्। उ
त्तरेणार्च्चनं कृत्वा श्रवणेन विसर्जयेत्। मूलेन सकलां तेषां स्वामादृत्य पूजयेत्। आदिपादे निशा
भागे श्रवणस्य यदा भवेत्। तदा देव्याः समुत्थानं नवम्यां न पुनर्दिवा। अस्य पादे दिवाभागे श्रवण
स्य यदा भवेत्। तदा संप्रेषणं देव्या दशम्यां साधनोत्सवैः। नक्षत्रत्रये फलादौ। नवम्यामश्विने सिते
चण्डिकामुपवासैस्तु पूजयेद्दशहूरुत्तया। पूर्व्वाषाढे तु कन्यायां उत्थानं नवमी दितः। ऊरुस्ते दीयते
राष्ट्रभङ्गाय विकल्पो न वैद्दिति। ब्रह्माण्डपुराणे। तुलायां तिलतैलेन सायं संध्यासमागमे। आकाश
दीपं यो दद्यान्मासमेकं निरन्तरं। सश्रीकाय श्रीपतये सत्रियाय विमुच्यं। दामोदराय नभसि तुलायां
ने

ज्वलमासद। यदि दत्तेन यच्छामि। नमोनंताय वेधसे॥ ॥इति दीपदानमंत्रः॥ ॥अमावास्यां तु लादि
से लक्ष्मीनिद्रां विमुंचति। कार्यासर्वार्थसुखरात्रिः स्यात्। प्रदीपोज्वलितालये। कोसंनैः कुसुमैः
र्गंधैर्दीपैर्गैरीचनाफलैः। वसुबंधूंश्च बंधूंश्च पुष्टं छेकुग्रालयागिरा। पूजयेच्च सदा लक्ष्मीं मलक्ष्मी
मलनाशिनी। लक्ष्म्याः पंचपताकानां धूमैर्जोकं गृहे न्यसेत्। वाराहे। अमावास्यां तु लादिसे लक्ष्मी
निद्रां च मुंचति। प्रोद्दालतानाया कुसुमैः कुसुमैर्गंधैर्दीपैर्गैरीचनाफलैः। वसुबंधून बंधूंश्च पुष्ट
छेकुग्रालयागिरा॥ तस्मिन्शुक्ले सदा विष्णुस्तुलायां मघपृश्निके। लक्ष्मीप्रबोधो दीपालिकोतिलो
के प्रसिद्धिः। कौमुकीयज्ञरात्रिश्च कौमुदी फाल्गुनी तथा। वासंतिका तिथिर्ज्ञेया दृत्रास्य महिमाश्र कालदे०
यः। आश्विने पौर्णमास्यां च नित्यपक्षे क्रीडनं स्मृतं। कौमुदी सा समाख्याता कार्या लोकविभूतीय। ३७५
कार्त्तिके सितपक्षे द्वा तिथौ तु कुसुदा राके। यज्ञार्चा यज्ञरात्रिः वस्पा कार्या चेष्टसुखाय सा। माघ
शुक्लचतुर्थ्यां तु चरमाराध्यच स्त्रियं पिवेभ्यां कुंदकुसुमैः पूजा सा कौमुदी स्मृता। फाल्गुने पौर्णमास्यां

तु पदृपासविलासिका। सा दोपा फाल्गुनी लोके कार्या लोकसमृद्धये। वैशाखे पुष्पा मत्स्योके सुत्र
योद्वसंतास्मरार्चनं। तच्च कार्यं मरोकार्थं द्वेया वासंतिकेति सा। अथ ज्योतिःशास्त्रे। अमावा
स्यां तु लादिस्थे लक्ष्मीनिद्रां विमुंचति। तस्मिन्शुक्ले यदा विष्णुस्तुलायामधिरोहति। उत्तिष्ठस
न्तो विष्णुः पश्चात्कृष्णचतुर्दशी। अथ नविष्णुपुराणे। स्नानं दानं च सुगुरां कार्त्तिके या तिथि
र्भवेत्। प्रतिपद्ब्राह्मणाश्चापि गुरुमिश्रैः प्रदीपकैः। वासो निरहितेश्चार्थैर्गर्हितब्राह्मणः परं।
पुष्पैर्गंधैर्नवैर्वस्त्रैरात्मानं पूजयेद्बुधः। तस्यां प्रतिपदायां च सगच्छेद्ब्राह्मणः परं॥ ॥इति श्री
महाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमाद्रिवि
रचिते चतुर्वर्गचिंतामणौ परिशेषखंडे कालनिर्णये श्रीविष्णुरायनादिकालः॥ ॥इ
ति श्रीविष्णुनामकीर्त्तने कालनिर्णयः॥ ॥विष्णुधर्मोत्तरे। वज्र उवाच॥ कस्मिन्काले तु देव
स्य किं तु नाम प्रकीर्त्तयेत्। एतन्मे त्तं समाचक्ष्व सर्वविद्यसे॥ ॥मार्कंडेय उवाच। पुरु

षं वामदेवं च तथा संकर्षणं प्रभुं। प्रद्युम्नमनिरुद्धं च क्रमादेतत्प्रकीर्तयेत्। बलभद्रं तथा कृष्णं
कीर्तयेत् दिनोदये। माधवं पुण्डरीकाक्षं तथा वै नागशायिनं। पद्मनाभं हृषीकेशं तथा देवं त्रिविक्र-
मं। क्रमेण राजशार्दूल वसंतादिषु कीर्तयेत्। विष्णुं च मधुहंतारं तथा देवं त्रिविक्रमं। वामनं श्री-
धरं चैव हृषीकेशं तथैव च। दामोदरं पद्मनाभं केशवं च यदूत्तमं। नारायणं माधवं च गोविंदं
च तथा क्रमात्। चैत्रादिषु च मासेषु देवदेवमनुस्मरेत्। प्रद्युम्नमनिरुद्धं च पक्षयोः शुक्लकृ-
ष्णयोः। शर्वः सर्वः शिवः स्थाणुः भूतादिर्निधिरव्ययः। आदित्यादिषु क्रमाद्देवमनुस्मरेत्॥
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः। भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः। प्रथ- काल० ३७६
क्षपुंडरीकाक्षो विश्वकर्मास्तु विश्रवाः। सनवो नावनो नत्नाभ नवः प्रभुरीश्वरः। प्रथमे यो हृ-
षीकेशः पद्मनाभोऽमरप्रभुः। अग्राह्यः शाश्वतो धाता तान्स्मश्चैतान्नुस्मरेत्। सर्वदा सर्वदान-
मदेवदेवस्य यादवः। देवदेवस्य नामानि ज्ञातिकादिषु याद्वे ब्रह्माणं श्रीपतिं विष्णुं कपिलं

श्रीपतिं प्रभुं। दामोदरं हृषीकेशं गोविंदं मधुसूदनं। भूधरं गदिनं देवं शंखिनं पद्मिनं तथा। चक्रि-
णं च महाराज प्रथमादिषु संस्मरेत्। सर्वदा सर्वदा नामदेवदेवस्य यादवा। नामानि सर्वाणि ज-
नार्दनस्य कालस्य सर्वं पुरुषप्रवीर। तस्मात् सर्वदा सर्वगतस्य नाम ग्राह्यं यथेष्टं वरदस्य राज-
नास्य॥ वज्र उवाच। कार्यारंभे कथा कस्मिन् किं नाम परिकीर्तयेत्। एतन्मे संशयं छिंधि त्वं हि सर्व-
विदुच्यते। मार्कंडेय उवाच। चक्रिणं हलिनं चैव शार्ङ्गिणं खड्गिनं तथा। क्षेमार्थी प्रवसन् राज-
न् दिक्षु प्राच्यादिषु स्मरेत्। अजितं चाधिकं चैव सर्वं सर्वेश्वरं श्रुणु। संस्मरेत् पुरुषं भक्त्या व्यवहारे-
षु सर्वदा। कूर्मं वाराहं मत्स्यं वा जलप्रतरणे स्मरेत्। भ्राजिष्णुमग्निजनने जपेन्नाम त्वनंतं द्विज॥
संग्रामाभिमुखो गच्छन् संस्मरेदपराजितं। केशवं पुंडरीकाक्षं पुष्कराक्षं तथा जपेत्। नेत्रबाधासु
सर्वासु हृषीकेशं तथैव च। अच्युतं चामृतं चैव जपेदौषधकर्मणि। गरुडध्वजानुस्मरणादापदो
मुच्यते नरः। ज्वरदुष्टशिरोरोगविषवीर्यं प्रशाम्यति। नरसिंहेति कीर्तयेत्। नारायणं शार्ङ्गधरं श्री-

गजमोक्षणं। वामनं खड्गिनं चैव दुःस्वप्नेषु च कीर्तयेत्॥ अग्निदाघे समुत्पन्ने संस्मरेज्जलशायिनं। बल
नद्रं तु पुत्रार्थी संस्मरेन्नेद लायुधं। उत्तारणं वणिज्यार्थी श्रीराममम स्फदयेन पानगस्थमंगले विष्णुं मं
गल्येषु कीर्तयेत्। अम्यपातेषु सर्वेषु विष्णो केशु तथा जपेत्॥ उत्तिष्ठं कीर्तयेद्विद्वं प्रस्वापे माधवं
नरः। भोजने चैव गोविंदं सर्वत्र मधुसूदनं। नारायणं सर्वकालं क्षुतप्रस्खलितादिषु स्थाने देवार्चने
होमे प्रतिपाते प्रदक्षिणे। कीर्तयेद्वासुदेवं च अनुक्तेष्वपि याद्दव। कार्यारंभे तथा राजन् यथेष्टं नाम
कीर्तयेत्। सर्वाणि नामानि च तस्य राजन् सर्वार्थसिद्ध्यै तु भवंति। पुंसां तस्माद्यथेष्टं खलु देवनामसु
सर्वेषु कार्येषु जपेत नक्या॥ ॥इति श्रीविष्णुनामकीर्तने कालविशेषः॥ ॥अथ मुख्यकालातिक्र कालदे०
मे कालः॥ तत्र गौणवाचनिकानुकल्पिकाश्चेति त्रिप्रकाराः। तत्रेदं विचार्यते। मुख्यकालासंभवे ३७१
गौणकालग्रहणं। कार्यं न वेति। न तु मुख्योपि कालो वा गौणः। योगविहित स गौणः। तदा इत्थं क्र
मेण। स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः। यदा गामिक्रिया मुख्यकालस्याप्यंतरा न वेत्॥

गौणकालत्वमिच्छंति केचित्स्वाकृतकर्मणीति। अस्यार्थः। पूर्वोत्तरयोः पूर्वस्य कर्मणो यः स्व
कालस्तस्मादुपरितनउत्तरकर्मस्वकालाच्च पूर्वं नावा पूर्वापरयोरंतरालकाल इति यावत्। त
पूर्वस्मिन् कर्मणि गौणो ज्ञेयः। यद्वा यथोक्तं तरालवर्त्ता हारिकालक्रिया मुख्यकालस्यापि पूर्व
स्मिन् कर्मणि गौणकालतामन्यंत इति। कथं पुनरुत्तरकर्मकालस्य पूर्वकर्मानुष्ठानाय ग्रहण
मार्गं कृतेयतः। स्वकालात् प्रस्फुटं पूर्वकर्म तावद्विनाशायं। उत्तरं च स्वकालप्रच्युतत्वाद्वि
नष्टरूपं। तत्र यद्युत्तरकर्मकाले पूर्वं क्रियते तदा नष्टसामान्याधान्यार्थेन विनष्टविनाशनं
प्रसज्येत। तन्मृतजीवनाशनयाजीवन्मरणमिव स्यात्। भ्रमः। उत्तरकर्मकाले द्वयोरेवावकाशो
स्तीदमुच्यते। न तु नरस्त्वपि तस्मिन्निति। न तु मुख्यकालसमीपवर्तिनः कालस्यापि धेयावि
नानूतप्रवृत्तनूतलम्यलाङ्गृणिकत्वमेवोचितं। स समेवं नकालोपहृताणी नूतानपमादेर्वादि
गुणोपनीतपौलोकिक्यां प्रानरादिशाद्भ्रष्टस्नातस्य गौणत्वमथस्त्येवेति गौणस्योक्तिर्नविधिरू

न्येनानुतदनुपादकालकथंभावस्वभावात्प्यते। इति निषिध्यमाये नेति भ्रमः। नन्वेवं तर्हि यथाकथंचि
त्साद्गुण्यान्यथा कादाचित्कत्वापिकत्वविस्मातरादिद्रव्यसानिद्गतस्येरन्। किमत्रानिष्टं क्रियत एवातद्विकि
हाविद्गसंतसाद्गुण्यपतः गतुरगोणप्रयोगसिंगिनः संगत्यादेरलानान्नदेवमस्तिन्नूसंतन्नायेकश्चि
त्स्नानादिविकंश्राद्धइत्यादिकालसंयुक्तेषु वाक्येषु कालं प्रतिकर्मणो गुणभावेन विधानेमत्वाप्र
धानत्वं तद्विहितकालातिक्रमेणापि कृतकर्मानुष्ठानानुग्रहाय कालान्तरेनुष्ठानेन कार्यमिति।
पूर्वपक्षमभिप्रेत्य सिद्धान्तोवातनकालेहि कर्मचोद्यते। न कर्मणि कालः। अतः कर्मणामेव प्रा
धान्यं। कालमनुद्दिश्य कर्मणो विधानात्। ततः कर्म प्रतिगुणः। अत एव विहितकालातिक्रमे त्वेषा कालदे०
न कृतकर्मानुग्रहार्थं गौणकालेप्यनुष्ठाने कार्ये कालज्ञाने: कर्मणोपि त्यागस्यान्याय्यत्वात्। नन्वे ३७८
कव्यंजनं विना त्रैषभोजनमपि त्यज्यते। तद्वदुक्तं। ननाव कार्मगुणीभावेनात्र पूर्वपक्षो घटते
कर्मणः फलसंबंधात्। फलवत्संबंधाद् फलं तद्गमिति न्यायेन कालस्यैवांगत्वात्। न च कर्मणः

कालार्थतया परार्थत्वात् कजङ्गतिरर्थवाद इति वाच्यं। कालस्य फलवत्कर्मार्थत्वावगमात्। ना
पि कालगुणीभावेनोक्तः सिद्धान्तो घटते। असिद्धे चाभावोपन्यासात्। न हन्त्र कालानुवाद
नुवादेन कर्म विधीयते। कालाम्यतः प्रसिद्धत्वात् अत्र तु कालस्य वाक्यान्तरेण प्राप्त्यभावे माकर्णा
दि रूपेण लोकव्यवहारादेव ज्ञातस्यानुवादो न विध्यतीमेवां लोकसिद्धकालस्वरूपाकर्मवि
धौ तस्य स्वयमफलत्वेन फलवत्कर्मांगत्वाभावेन च विधेरानर्थक्यप्रसंगात्। किं चास्मिन्कर्म
णुपदेश्यस्य न कर्म निरसं वंशो घटते। तस्ये तत्कर्मानुष्ठानेनेतरकर्मानिष्टत्वात्। नन्वेवं तर्हि य
ज्जेत स्वर्गकाम इत्यत्रापि लोकादेवावगतं। स्वर्गकामिनमनूद्य यागविधेरवधारणात् कथं नवि
ध्यानर्थक्यमुच्यते। यद्यपि स्वर्गकामस्योद्देश्यतया वाक्येन चयः प्रतीयते तथापि विनावनया
प्रयमं नास्यापेक्षणात् पुरुषस्य च सिद्धस्वरूपतया न दृनईत्वा स्वर्गकामपदेन कामनाविषय
यत्नृतः स्वर्ग एव साध्यत्वेन स्वर्ग्यते। स्वर्गकामस्तु सर्वसिद्ध एवानूद्यते। यथा लोहितोष्णीपास्

लिङ्गः प्रवरं नीलाहेः विद्धेः ष्याणमृच्छि ज्ञां पाहेस्ता दप्राप्य~~सा॥ विशेषस्य प्रधानत्वं दर्शीसाति~~ष्टुं इति
शेषणमात्रपरत्वात्। एवमिदापितदुक्तं मदनमिश्रैः। तत्रापेक्षितत्वानुनावस्य। कामशाश्लिन
त्वरा॥ विशेषण प्रधानत्वं दर्शीसा। स्फुटदर्शितमिति। अत्र फलानुवादेन तत्र कर्म्मविधिरित्यु
क्तं। तदेवं पर्योक्तौ पूर्वोत्तरपक्षावयुक्तौ। कावत्र हितो युक्तौ। उच्यते तत्र तावत्पूर्वपक्षः। नित्यने
मित्तिकश्रावश्यकत्वं प्रासेतादृग्विधस्वरूपनिर्वाहार्थं यथाशक्त्यादिरूपबंधे विहितं। संप
त्तौ तत्र हत्राप्रतिनिषेधे ग्रहणं। कर्त्तव्यमिति। स्थिते मुख्यकालासंपत्तौ गौणकालग्रहणं कार्यं।
तत्राह त्रिकांडमंडनः। मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते। गौणकालेपि कर्त्तव्यं गौणो काल हे०
प्यत्र दृशो भवेत्॥ ईदृशो मुख्यकालसदृशः। अनेनास्य प्रतिनिधित्वयोग्यता दर्शिता। स्मृतयो ३७९
पि गौणकालस्य ग्रहणं दर्शयंति। यथा कथंचित्कर्त्तव्यं। नित्यं कर्म विजानता। न यस्मात्स्य विलोपे
ऽस्ति पेतुकस्य विशेषत इति। तथा। दिनोदितानि कर्माणि प्रमदादकृतानि वै। यामिन्याः प्रहरं या

वत्तानि सर्वाणि कारयेत्। संध्यारात्रौ न कर्त्तव्यं श्राद्धं खलु विचारणैः। इत्यादिकमीत्संध्यादि
कालविशेषनिषेधश्च गौणत्वेन कालग्रहणं यामैः समामेव कल्पते। नित्यनैमित्तिकेषु यथा
शक्त्यादिरूपबंधसामर्थ्यान्नित्यवदस्तात यान्यान्यपंगानि अधिनवेति। तथा चापेगीनति
प्रधानसचिवान्यंगानि नवेति। न नवेति चेति। ननु यदि मुख्यकालातिक्रमेण गौणकालग्रहण
मविरुद्धं। तर्हि दर्शपौर्णमासपार्वणश्राद्धादीनाममावास्यादिविहितकालानामेव पंचम्यादि
कर्त्तव्यं प्रसज्येत। कानामेषा प्रसक्तिः रनिमतएवहि। गौणकालस्वीकारवादिनां तद्दातदनुष्ठा
ने। एतच्च गौणकालग्रहणं न काम्येषु। तत्र हि सर्वांगोपसंहारशक्तावेवाधिकारप्रतिपादितात्॥
गौणकालग्रहणे तु कर्मानुष्ठाने कश्चिद्विशेषस्त्रिकांडमंडनेनोक्तः। प्रसंगादुच्यते। गौणेष्वेत
षु कालेषु कर्म चोदितमाचरेत्। प्रायश्चित्तप्रकारेण प्रोक्तानिःकृतिमाचरेत्। कल्पांतरोदितं
वा मैत्रेषु पूर्वोक्तिलक्षणेषु गौणकाले ह्याचरन्प्रायश्चित्तप्र~~कारम्~~माचरेत्। पक्षांतरमपि तेन

वोक्तं। प्राप्यश्चित्तमहत्वा यो गौणकाले समाचरेत्॥ अत्राहत्वेत्यत्र पूर्वकालताप्रतीतेर् विहितानन्
वर्णे गौणकालग्रहणं प्राप्तं विधीयते। सर्वत्र सप्तम्यंतनिर्दिष्टस्य कालस्यानुपादेयत्वेन तद्रूपगौणकस्य
नावेस्य निमित्तत्वेनानिधानादधिकारविशेषणत्वेनाधिकारानावः॥ सेनानीयाधिकार प्राप
णात्व निमित्तस्येत्यत्र सत्वे प्रतिपादितः॥ अत एव लौगाक्षिः॥ गणिताज्ञापातकालः॥ कालेति
ष्टं तिदेवताः॥ वरं त्वेकाकृतेः कालेनाकालेन त्वकोटयः॥ यत्तु त्रिकांडमंडनेन गौणकालग्र
हणमुक्तः॥ तत्सर्वपत्तन्यायस्यैव सिद्धांततामनिगम्यमानेनोक्तमित्युपेक्षणीयं। यत्तु यथोक्त
विहितादिस्मरणं न तत्र गौणकालग्रहणं प्रतिपाद्यते। किं चग्रहणमेव यत्तस्त्साय मर्यो गि कालदे॰ ३८०
गम्यते। स्वकालप्राप्तस्य कर्मणो मुख्यद्रव्यसंपत्तिवत् ज्ञाविलोपेनानुष्ठानं कार्यं। किं तु स्वका
ल एव यथा कथंचिन्मुख्याद्रव्यानंतरेणोपादानेन किंचिद्विकलमपि कर्तव्यमिति। यथा दि
नोदितानि कर्माणि इति आदिकथनं मतेन सर्वेष्वपि कर्मसु सर्वेषां गौणकालानां गौणत्व

युक्त्या ग्रहणमुच्यते। किं तु केषु चिदेव कर्मसु किंचिदेव कालांतरमनुकल्पत्वेन मु
ख्यकालवत्प्राप्य द्वारा द्वा प्रापमेव विधीयते। अतोनेन तद्वचनबलेन संवत्सरर्तुमास
तिथ्यादिकालविशेषविहितानि कर्माणि न तत्कालातिक्रमे कालांतरेपि कर्तुं युज्यंते
यत्तु संधारात्रोः श्राद्धनिषेधः। सोपि रागतः प्राप्तस्य न द्वारणादेरिव न्याया नासोम
दितामाह। प्राप्तस्योपपद्यते॥ अथ वा द्रव्यं वा लक्षणसंपत्तिः श्राद्धं प्रति रुचिश्चैव
अकाले यदि वा काले तीर्थे श्राद्धं समाचरेत्। प्राप्तेरेव हि कर्तव्यं तथा च पितृतर्प
णमिति। इत्यादिनिरपराह्णादिव्यतिरिक्तकालप्राप्तस्य श्राद्धस्य — — — दि
काले प्रयं प्रतिषेधः। यत्तु मुख्यकालातिक्रमे नित्यनैमित्तिकानां गौणकालेनुष्ठा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नेदृक्षपते ॥ तत्काचिच्छिष्टगर्हापरिहारमतः परितोरिपाद्यर्थं ॥ कचित्त्वनुकल्पत्वेन
कालांतरविधिरित्यनुवर्द्धः । उपदिष्टकालातिक्रमे बाधिकारानावादेव मुख्यद्र-
व्यलोपान्मुख्यं चेत्साधनं नैवेलभ्यते । कालातिक्रमो न कार्यः । एतदेव वचसंदेहः सर्व-
कमुन्यपेक्षत्रिकांडमंडनेन निर्णीतं । मुख्यकाले हि मुख्यं चेत्साधनं चैव लभ्यते
तत्कालद्रव्ययोः कस्य मुख्यत्वं गौणतामपि । मुख्यकालमुपाश्रित्य गौणमुख्यस्तु
साधनं । नमुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं । तदेवमेतत्सिद्धं । वचनमंतरे कालदे० ३८१
ण गौणकालस्य ग्रहणं न कार्यं । सविश्ववचनेगौणस्य तस्मात्स — पापिकार्यमि-
ति ॥ ॥छ॥ ॥ इति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वर-

सकलविद्याविशारदश्रीहेमाद्रिविरचिते चतुर्वर्गचिंतामणौ परिशेषखंडे का-
लनिर्णयः समाप्तः ॥ ॥ समाप्तोयं पुस्तकः ॥ ॥ स्वदृष्टिदोषान्मतिविभ्रमाद्वा
यदप्यहीनं लिखितं मयात्र ॥ तत्सर्वमार्यैः परिशोधनीयं कोपं न कुर्यात्खलु
लेखकस्य ॥२॥ ॥ शुभं भवतु ॥ ॥ लेखकपाठयोः शुभं भवतु ॥ ॥ श्री ॥ ॥

कालदे० ३८२